अविपरीतबन्धे वेदनोपशान्तिरसृक्प्रसादो मार्दवं च ॥

यदि बन्धन अनुकूल बांधा जाय तो वेदना का शमन, रक्त की शुद्धि तथा व्रण स्थान में मृदुता उत्पन्न होती है ॥२९॥

अबध्यमानो दंशमशकतृणकाष्ठोपलपांशुशीतवातातपप्रभृतिभिर्विशेषैरभिहन्यते व्रणो विविधवेदनोपद्रुतश्च दुष्टतामुपैत्यालेपनादीनि चास्य विशोषमुपयान्ति ॥३०॥

यदि व्रण पर बन्धन नहीं बांधा जाय तो मक्षिका, मच्छर, घास, लकड़ी, पत्थर के कण, धूली, ठण्ढक, वायु, धूप आदि से व्रण दूषित होता है तथा अनेक प्रकार की वेदनाओं से उपद्रुत होकर अधिक दूषित हो जाता है तथा उस पर लगाये हुए आलेपादिक जल्दी सूख जाते हैं ॥ ३० ॥

चूर्णितं मथितं भग्नं विश्लिष्टमतिपातितम्।
अस्थिस्नायुसिराच्छिन्नमाशु बन्धेन रोहति ॥ ३१ ॥
सुखमेवं व्रणी शेते सुखं गच्छति तिष्ठति।
सुखं शय्यासनस्थस्य क्षिप्रं संरोहति व्रणः ॥ ३२ ॥

√ आघात से शरीर का कोई भाग चूर्णित हो जाय, विलोडित हो जाय, टूट जाय, सन्धिच्युत हो जाय, स्वस्थान से च्युत हो कर लटकने लगे, अथवा अस्थि, स्नायु और सिराएं छिन्न हो जाय तो बन्धन बांधने से ठीक हो जाते हैं। बन्धन से व्रणी पुरुष ठीक तरह से सोता है, सुख से चलता है, सुख-पूर्वक खड़ा रह सकता है, बैठ सकता है तथा जो सुख से सो सकता है और बैठ सकता है उसका व्रण भी शीघ्र भर जाता है ॥ ३१-३२ ॥

अबन्ध्याः पित्तरक्ताभिघातविषनिमित्ता यदा च शोफदाहपाकरागतोदवेदनाऽभिभूताः क्षाराग्निदग्धाः पाकात् प्रकुपितप्रशीर्णमांसाश्च भवन्ति ॥ ३३ ॥

पित्त तथा रक्त की दुष्टि से और अभिघात और विष के कारण उत्पन्न व्रण तथा सूजन, जलन, पाक, लालिमा, सूई चुभोने की सी पीड़ा और वेदना से युक्त हो तथा क्षार एवं अग्नि द्वारा जलने से उत्पन्न व्रण तथा पाक से मांस सड़कर झरता हो ऐसे व्रणों में बन्धन नहीं बांधना चाहिये ॥ ३३ ॥

कुष्ठिनामग्निदग्धानां पिडका मधुमेहिनाम्।
कर्णिकाश्चोन्दुरुविषे विषजुष्टव्रणाश्च ये ॥ ३४ ॥
मांसपाके न बध्यन्ते गुदपाके च दारुणे।
स्वबुद्ध्या चापि विभजेत् कृत्याकृत्यांश्च बुद्धिमान् ॥

कुष्ठियों के व्रण, अग्निदग्ध व्रण, मधुमेही मनुष्यों की पिड़काओं के व्रण, चूहे के काटने से फैले हुए विष के कारण उत्पन्न कर्णिकायुक्त व्रण, विषयुक्त व्रण, मांसपाक जन्य व्रण और गुदपाक जन्य व्रणों में बन्धन बाँधना निषिद्ध है। इसके अतिरिक्त बुद्धिमान वैद्य कहां बन्धन लगाना उचित है और कहां अनुचित है आदि कृत्याकृत्य का निर्णय अपनी बुद्धि से कर लेवे ॥ ३४-३५ ॥

देशं दोषञ्च विज्ञाय व्रणञ्च व्रणकोविदः।
ऋतूंश्च परिसञ्चिन्त्य ततो बन्धान्निवेशयेत् ॥ ३६ ॥

व्रण के विषय को जानने वाला विद्वान् वैद्य देश, दोष, व्रण, ऋतु आदि का सम्यग् विचार करके फिर यथायोग्य बन्धन बांधे ॥ ३६ ॥

ऊर्ध्वं तिर्य्यगधस्ताच्च बन्धना त्रिविधा मता।
यथा च बध्यते बन्धस्तथा वक्ष्याम्यशेषतः ॥ ३७ ॥
घनां कवलिकां दत्त्वा मृदु चैवापि पट्टकम्।
विकेशिकामौषधं च नातिस्निग्धं समाचरेत् ॥ ३८ ॥
प्रक्लेदयत्यतिस्निग्धा तथा रूक्षा क्षिणोति च।
युक्तस्नेहा रोपयति दुर्न्यस्ता वर्त्म धर्षति ॥ ३९ ॥
विषमञ्च व्रणं कुर्य्यात् स्तम्भयेत् स्रावयेत्तथा।
यथा व्रणं विदित्वा तु योगं वैद्यः प्रयोजयेत् ॥ ४० ॥

ऊपर, नीचे तथा टेढ़ी इस तरह बन्धग्रन्थि तीन तरह से लगाई जाती है। अब जिस तरह बन्धन बांधा जाता है उस विधि को सम्पूर्णरूप से कहते हैं-प्रथम व्रणस्थान में विकेशिका या वर्ति लगा के औषध कल्क लगावें फिर उस पर मोटी कवलिका (रूई या गाज का पेड या गद्दी) रख कर मुलायम पट्ट (Bandage) से बांध देना चाहिये। विकेशिका (वर्ति) तथा औषध इन्हें अधिक चिकनी करके न लगावें क्योंकि अतिस्निग्ध वर्ति व्रण स्थान को क्लिन्न कर देती है तथा रूक्ष वर्ति या औषध उस व्रण को हानि पहुंचाती है किन्तु उचित स्नेहयुक्त वर्ति व्रण को भरती है। यदि वर्ति को ठीक न रखी जाय तो वह व्रण के मार्ग का घर्षण करती है व्रण को विषम बनाती है, स्राव का निरोध कर देती है या स्राव को बढ़ा देती है इसलिये व्रण का उचित निरीक्षण करके योग्य उपचार करना चाहिये ॥ ३७-४० ॥

पित्तजे रक्तजे वाऽपि सकृदेव परिक्षिपेत्।
असकृत् कफजे वाऽपि वातजे च विचक्षणः ॥ ४१ ॥
तलेन प्रतिपीड्याथ स्रावयेदनुलोमतः।
सर्वांश्च बन्धान् गृढान्तान् सन्धींश्च विनिवेशयेत्॥४२॥

पित्त तथा रक्त की दुष्टि से उत्पन्न व्रण में एक बार ही दबाकर दोष (पूयादि) का स्राव करना चाहिये। कफजन्य तथा वातजन्य व्रण में बार २ दबा कर पूय निकालना चाहिये हस्ततल से व्रण को धीरे २ दबाकर अनुलोम रूप से पूयादि को निकालें तथा सर्व प्रकार के बन्धनों को इस तरह बांधे कि उसके सिरे तथा जोड़ बाहर से दिखाई न दें ॥ ४१-४२ ॥

ओष्ठस्याप्येष सन्धाने यथोद्दिष्टो विधिः स्मृतः।
बुद्ध्योत्प्रेक्ष्याभियुक्तेन तथा चास्थिषु जानता॥४३॥
उत्तिष्ठतो निषण्णस्य शयनं वाऽधिगच्छतः।
गच्छतो विविधैर्यानैर्नास्य दुष्यति स व्रणः ॥ ४४ ॥
ये च स्युर्मांससंस्था वै त्वग्गताश्च तथा व्रणाः।
सन्ध्यस्थिकोष्ठप्राप्ताश्च सिरास्नायुगतास्तथा ॥ ४५ ॥
तथाऽवगाढगम्भीराः सर्वतो विषमस्थिताः।
नैते साधयितुं शक्या ऋते बन्धाद्धरन्ति हि ॥ ४६ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने व्रणालेपनबन्धविधिर्नामाष्टादशोऽध्यायः ॥ १८ ॥

ओष्ठ के सन्धान कर्म में तथा अस्थि के जोड़ने में भी विद्वान् वैद्य स्वबुद्धि से विचार कर उक्तविधि के अनुसार ही बन्धन बांधे। बन्धन से उठते, बैठते, सोते, अनेक सवारियों पर बैठ कर चलते हुए पुरुष का व्रण दूषित नहीं होता है। जो व्रण मांसल स्थानों में होते हैं, त्वचा के अन्दर जो व्रण होते हैं तथा सन्धि, अस्थि और कोष्ठ स्थानों में जो व्रण होते हैं एवं सिरा और स्नायुओं में होने वाले व्रण तथा जो गाढ़े और गम्भीर व्रण होते हैं एवं जो सर्वथा विषम व्रण होते हैं वे बन्धन के बिना ठीक नहीं हो सकते हैं ॥ ४३-४६ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाया व्रणालेपनबन्धविधिर्नामाष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ।

अथातो व्रणितोपासनीयमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब यहां से व्रणितोपासनीय अध्याय का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने कहा था ॥ १-२ ॥

व्रणितस्य प्रथममेवागारमन्विच्छेत् । तच्चागारं प्रशस्तवास्त्वादिकं कार्य्यम् ॥ ३ ॥

व्रणी पुरुष के लिये सर्व प्रथम रहने के लिये मकान का प्रबन्ध करना चाहिये, तथा वह मकान श्रेष्ठ भूमि में बनाना चाहिये ॥ ३ ॥

प्रशस्तवास्तुनि गृहे शुचावातपवर्जिते ।
निवाते न च रोगाः स्युः शारीरागन्तुमानसाः ॥ ४ ॥

प्रशस्त भूमि में बनाये हुए मकान में जो कि पवित्र और सीधी आनेवाली धूप से वर्जित हो तथा वायु के झोकों से रहित हो तो उसमें रहने से शारीरिक आगन्तुक तथा मानसिक रोग नहीं होते हैं ॥ ४ ॥

विमर्शः—वास्तु शब्द का अर्थ गृह है । चरके वास्तुवर्णनम्—"अपहृतास्थिशर्कराकपाले देशे प्रशस्तरूपरसगन्धाया भूमौ गुणवति प्रशस्ते भूमिभागे कृष्णमृत्तिके सुवर्णमृत्तिके वा ॥ वास्तुशास्त्रेऽपि-विल्वो निम्बश्च निर्गुण्डी पिण्डित सप्तपर्णक । सहकारश्च षड्वृक्षै-रारूढा या समस्थला । निष्कपाला निरुपला कृमिवल्मीकवर्जिता ॥ अस्थिवर्ज्या न सुषिरा तनुवालुकसंयुता । अङ्गारैर्दग्धमूलैश्च स्थूलैश्चापि पृथग्विधैः ॥ पङ्कसङ्करकूपैश्च दारुभिर्लोष्टकैरपि । शर्कराभिरयुक्ता या भस्मादैश्च तुषैरपि ॥ सा शुभा सर्ववर्णानां सर्वसम्पत्करी धरा । मनसश्चक्षुषो यत्र सन्तोषो जायते भुवि ॥ तस्या कार्यं गृहं सर्वैरिति गर्गादिसम्मतम् ॥ जहाँ भूमि कंकरीली, बालुका या खड़िया-युक्त होनी चाहिये । उसके आस पास जल सचय न होता हो तथा वायु और सूर्यप्रकाश आने में बाधा न हो । मकान का द्वार पूर्व या उत्तर (प्राग्द्वारमुदग्द्वारं वा) हो कमरे ग्रीष्म में शीतल तथा शीत में उष्ण रह सकें, छत तथा दरवाजे पर्याप्त ऊंचे हों । प्रत्येक व्यक्ति के कमरे का नाप ७० से १०० वर्ग फुट होना चाहिये । (अष्टहस्तायत चतुर्हस्तविस्तृतं धूमातपरजसामन-भिगमन्नीयमृतुसुखमतमस्क निवात प्रवातैकदेशमिति), मकान में खिड़कियाँ तथा झरोखे हों । सूर्य की किरणों में तथा शुद्ध वायु में प्रबल रोग तथा उसके जीवाणुओं के नाशन की शक्ति है अतएव ये दोनों कमरे में आ सकें ऐसा प्रबन्ध हो । रोगी या स्वस्थ पर अधिक समय तक सूर्य की सीधी किरणें न पड़े इसका भी ध्यान रखना चाहिये ।

तस्मिन् शयनमसम्बाधं स्वास्तीर्णं मनोज्ञं प्राक्शिरस्कं सशस्त्रं कुर्वीत ॥ ५ ॥

ऐसे मकान में सम्बाधा (पीड़ा) से रहित, उचित लम्बी चौडी तथा शुद्ध वस्त्र से आच्छादित, मन को प्रिय लगनेवाली, पूर्व में सिरहानेवाली तथा सिरहाने के नीचे चाकू, छुरी आदि शस्त्र रखे हों ऐसी शय्या बिछानी चाहिये ॥ ५ ॥

विमर्शः—ऊँची, नीची, कठोर, खटमलों से व्याप्त, कमजोर पायेवाली खाट नहीं होनी चाहिये । मच्छरदानी लगाना भी श्रेष्ठ है । स्वास्तीर्णं—साफ गद्दा, चद्दर, तकिया और कम्बल या रजाई होनी चाहिये । रोगी के बिछौने, ओढ़ने और पहनने के वस्त्रों को प्रतिदिन धूप में रखें तथा धोने योग्य को धोएँ एवं गुग्गुल सर्षपादि धूपन द्रव्यों से धूपित तथा सुवासित करने चाहिये । "शयनास्तरणप्रावरणानि मृदुलघुशुचिसुग-न्धीनि स्यु । स्वेदमलजन्तुमन्ति मूत्रपुरीषोपसृष्टानि च वर्ज्यानि स्यु । असति सम्भवेऽनेकेषां तान्येव सुप्रक्षालितोपधानानि सुधूपि-तानि सुशुद्धशुष्काण्युपयोगं गच्छेयुः । धूपनानि नर्वाससां शयना-स्तरणप्रावरणाना च यवसर्षपातसीहिङ्गुगुग्गुलुवचाचोरकवय स्थागो-लोमीजटिलापलङ्कषोशीरोहिणीसर्षपनिर्मोकानि घृतसम्प्रयुक्तानि स्यु । (चरक) ।

सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णे शयने व्रणी ।
प्राच्यां दिशि स्थिता देवास्तत्पूजार्थं च तच्छिरः ॥६॥

अच्छे आस्तीर्णवाली शय्या पर व्रणी शयन कर सुखपूर्वक शरीर की चेष्टाएँ (करवट बदलना) कर सकता है । पूर्व दिशा में देवता निवास करते हैं इसलिये उनकी पूजा (सत्कार) के लिये पूर्व दिशा में रोगी का सिर या सिरहाना रखते हैं ॥ ६ ॥

विमर्शः—उत्तर दिशा में रोगी या स्वस्थ किसी का शिर नहीं करना चाहिये । स्वगृहे प्राक्शिरा शेते श्वाशुर्ये दक्षिणशिरा ।

तस्मिन् सुहृद्भिरनुकूलैः प्रियंवदैरुपास्यमानो यथेष्टमासीत ॥ ७ ॥

उक्त प्रकार से शुभलक्षणों वाले गृह में या शय्या पर रोगी अपने अनुकूल तथा प्रिय बोलनेवाले मित्रों के साथ बातचीत करता हुआ स्वेच्छानुकूल यथेष्ट समय तक बैठे या शयन करे ॥ ७ ॥

सुहृदो विचित्रिपन्त्याशु कथाभिर्व्रणवेदनाः ।
आश्वासयन्तो बहुशस्त्वनुकूलाः प्रियंवदाः ॥ ८ ॥

अनुकूल तथा प्रिय बोलनेवाले मित्र अनेक प्रकार से आश्वासन देते हुये तथा विविध ढङ्ग की कथाओं को सुना के रोगी की व्रण वेदना को शीघ्र ही दूर कर देते हैं ॥ ८ ॥

न च दिवानिद्रावशगः स्यात् ॥ ९ ॥
दिवास्वप्नाद् व्रणे कण्डूर्गात्राणां गौरवं तथा ।
श्वयथुर्वेदना रागः स्रावश्चैव भृशं भवेत् ॥ १० ॥

व्रणी मनुष्य दिन में निद्रा नहीं लेवे क्योंकि दिन में सोने से व्रण स्थान में खुजली, अङ्गों में भारीपन, व्रण में सूजन, लालिमा तथा स्राव की अधिकता ये उपद्रव हो जाते हैं ॥९-१०॥

उत्थानसंवेशनपरिवर्त्तनचङ्क्रमणोच्चैर्भाषणाद्यास्वात्मचेष्टाष्वप्रमत्तो व्रणं संरक्षेत् ॥ ११ ॥

उठने, बैठने, करवट बदलने, घूमने, जोर से बोलने आदि आत्मचेष्टाओं में सावधान रह कर व्रण की रक्षा करनी चाहिये ॥ ११ ॥

स्थानासनं चङ्क्रमणं दिवास्वप्नं तथैव च ।
व्रणितो न निषेवेत शक्तिमानपि मानवः ॥ १२ ॥

खड़े रहना, बैठना, घूमना, दिन में सोना, इन्हें शक्ति होने पर भी व्रणी सेवन न करे ॥ १२ ॥

उत्थानाद्यासनं स्थानं शय्या चातिनिषेविता।
प्राप्नुयान्मारुतादङ्गे रुजस्तस्माद्विवर्जयेत् ॥ १३ ॥

अधिक उठने, बैठने, खड़े रहने तथा शयन करने से वायु कुपित हो जाती है जिससे अङ्गों में अनेक प्रकार की पीड़ाएँ होती हैं इस कारण उत्थानादि को वर्जित कर देनी चाहिये ॥ १३ ॥

गम्यानाञ्च स्त्रीणां सन्दर्शनसम्भाषणसंस्पर्शनानि दूरतः परिहरेत् ॥ १४ ॥

मैथुन करने योग्य स्त्रियों को देखना, उनके साथ बातचीत करना, तथा उनका स्पर्श करना दूर से वर्जित कर देना चाहिये ॥ १४ ॥

स्त्रीदर्शनादिभिः शुक्रं कदाचिच्चलितं स्रवेत्।
ग्राम्यधर्मकृतान् दोषान् सोऽसंसर्गेऽप्यवाप्नुयात् ॥ १५ ॥

उक्त स्त्री-दर्शनादि भावों से कभी २ दुर्बल इन्द्रिय पुरुष का शुक्र चलित (स्वस्थानच्युत) हो जाता है जिससे स्त्री सम्भोग न करने पर भी ग्राम्यधर्म (स्त्रीभोग) से होनेवाले दोष (वीर्यच्युति, बलहानि) प्राप्त हो जाते हैं ॥ १५ ॥

विमर्शः—गम्या—स्वपत्नी, वेश्या, दासी प्रभृति।

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्ललवणकटुकगुडपिष्टविकृतिवल्लूरशुष्कशाकाजाविकानूपौदकमांसवसाशीतोदककृशरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत् ॥ १६ ॥

नूतन धान्य, उड़द, तिल, मटर, कुलथी, चवले, हरित वर्ग के शाक, अम्ल, लवण, कटु रस प्रधान द्रव्य, गुड़ और पिष्ट (आटे) के बने मालपूए आदि गरिष्ट पदार्थ, वल्लूर (शुष्क मांस), शुष्क शाक, बकरी, भेड़, आनूप देश तथा जल में रहनेवाले प्राणियों का मांस तथा वसा, ठंडा पानी, कृशरा (खिचड़ी), पायस (खीर), दही, दुग्ध, छाछ आदि को व्रणी वर्जित कर देवे ॥ १६ ॥

विमर्शः—हरितकवर्गशाकानि—कुठेरशिग्रुसुरसमुखाडुरिभूस्तृणा। मूलक चुक्रिका चेति वर्ग हरितकं विदुः ॥

तक्रान्तो नवधान्यादिर्योऽयं वर्ग उदाहृतः।
दोषसञ्जननो ह्येष विज्ञेयः पूयवर्धनः ॥ १७ ॥

नवधान्य से शुरू कर तक्र पर्यन्त जो वर्ग कहा गया है वह दोषजनक तथा पूयवर्द्धक है ॥ १७ ॥

मद्यपश्च मैरेयारिष्टासवशीधुसुराविकारान् परिहरेत् ॥

मद्यपान करनेवाला या अमद्यपी व्रणी मनुष्य मैरेय, अरिष्ट, आसव, सीधु, सुरा विकारों को वर्जित कर देवे ॥ १८ ॥

विमर्शः—मैरेयपरिचयः—मैरेय धातकीपुष्पगुडधान्याम्लसाधितम्। सचातुर्जातकाजाजीभक्तुष्ठोषणनागरम् ॥ अथवा—आसवस्य सुरायाश्च द्वयोरेकत्र भाजने। सन्धान तद्विजानीयान्मैरेयमुभयात्मकम् ॥ आसवारिष्टलक्षणम्—यदपक्वौषधान्युर्व्या सिद्धं मद्यं स आसवः। अरिष्टं काथसिद्धः स्यात्। सीधुलक्षणम्—ज्ञेयः शीतरसः सीधुः पक्वमधुरद्रवैः। सिद्धः पक्वरसः सीधुः सम्पक्वमधुरद्रवैः ॥ सुरालक्षणम्—पक्वपिष्टान्नसन्धानममुत्पन्ना सुरां जगुः। कुछ आचार्य मधुर सौम्यगुणयुक्त द्राक्षारसादिजन्य मद्यसेवन का उपदेश करते हैं। सस्नेह मधुरप्राय नातितीक्ष्णमकर्कशम्। तनु वस्तुस्पेयञ्च मार्द्वीकेषु तदुत्तमम। यद्यपि मद्य उष्णप्रकृतिक होने से पित्त और रक्त को कुपित कर व्रण की शुद्धि तथा रोपण में बाधा पहुंचा सकते हैं किन्तु मधुर सौम्यगुणी मद्य हृदय का ताकत देने वाला तथा दीपन, पाचन, हर्षण और उत्साहवर्धक होने से भोजनोत्तर स्वल्प मात्रा में रोगी को देने से लाभ ही करता है।

मद्यमम्लं तथा रूक्षं तीक्ष्णमुष्णं च वीर्यतः।
आशुकारि च तत् पीतं क्षिप्रं व्यापादयेद् व्रणम् ॥ १९ ॥

मद्य—अम्लरस वाला, रूक्षप्रकृतिक, तीक्ष्ण, उष्णवीर्य, और शीघ्र ही रस-रक्तादि वाहक स्रोतसों में प्रवेशनशील होने से उसका पान करने से शीघ्र व्रण को व्यापादित कर देता है। ॥ १९ ॥

वातातपरजोधूमाव्यायातिसेवनातिभोजनानिष्टभोजनश्रवणदर्शनेर्ष्यामर्षभयक्रोधशोकध्यानरात्रिजागरणविषमाशनशयनोपवासवाग्व्यायामस्थानचङ्क्रमणशीतवातविरुद्धाध्यशनाजीर्णमक्षिकाद्याबाधाः परिहरेत् ॥

वायु, धूप, धूली, धुआं, ओस, इनका अधिक सेवन, अति भोजन, अनिष्ट भोजन, अनिष्ट शब्द का श्रवण और वस्तु का दर्शन, ईर्ष्या, क्रोध, भय, शोक, चिन्ता, रात्रि जागरण, विषम भोजन, विषम शयन, उपवास, जोर से बोलना, सीधा खड़ा रहना, घूमना, शीत और वात का सेवन, विरुद्ध भोजन, अध्यशन, अजीर्ण तथा मक्षिका, मच्छर आदि बाधाओं का परिहरण कर देना चाहिये ॥ २० ॥

विमर्शः—बहु स्तोकमकाले वा विज्ञेय विषमाशनम्। भुक्तस्योपरि भोजनमध्यशन तथा ॥ मक्षिकावर्जनहेतु—मक्षिका व्रणमागत्य निक्षिपन्ति यदा कृमीन्। श्वयथुर्भवेच्चिते तैस्तु जायते भृशदारुण ॥ तीव्रा रुजा विचित्राश्च रक्तस्रावश्च जायते ॥

व्रणिनः सम्प्रतप्तस्य कारणैरेवमादिभिः।
क्षीणशोणितमांसस्य भुक्तं सम्यङ् न जीर्यति ॥ २१ ॥
अजीर्णात् पवनादीनां विभ्रमो बलवान् भवेत्।
ततः शोफरुजास्रावदाहपाकानवाप्नुयात् ॥ २२ ॥

उक्त प्रकार के तथा अन्य इसी प्रकार के कारणों से सन्तप्त हुये तथा क्षीण शोणित-मांस वाले व्रणी का खाया हुआ भोजन ठीक तरह से पचता नहीं है। इस तरह अजीर्ण होने से वात, पित्त आदि दोषों का विभ्रम (स्थानान्तर गमन या दुष्टि) बलवान हो जाता है जिससे व्रण स्थान में सूजन, पीड़ा, स्राव, दाह और पाक उत्पन्न होते हैं ॥ २१-२२ ॥

सदा नीचनखरोम्णा शुचिना शुक्लवाससा शान्तिमङ्गलदेवताब्राह्मणगुरुपरेण भवितव्यमिति। तत् कस्य हेतोः ? हिंसाविहाराणि हि महावीर्याणि रक्षांसि पशुपतिकुबेरकुमारानुचराणि मांसशोणितप्रियत्वात् क्षतज-

निमित्तं व्रणिनमुपसर्पन्ति सत्कारार्थं जिघांसूनि वा कदाचित्॥ २३॥

सर्वदा नख और बाल छोटे रखने वाला, पवित्र, श्वेत वस्त्र पहने हुये, शान्ति पाठ, मङ्गल कर्म, देवता, ब्राह्मण और गुरु की सेवा में तत्पर व्रणी को होना चाहिये। ऐसा क्यों रहना? हिंसार्थ विहार करनेवाले पराक्रमी राक्षस तथा रुद्र, कुबेर और कार्तिकेय के अनुचर मांस और रक्त के अभिलाषुक होने से रक्त के निमित्त व्रणी के पास अपना सत्कार कराने को आते हैं अथवा कभी २ उस व्रणी को मारने की इच्छा से भी आते हैं॥ २३॥

भवति चात्र—

तेषां सत्कारकामानां प्रयतेतान्तरात्मना।
धूपबल्युपहारांश्च भक्ष्यांश्चैवोपहारयेत्॥ २४॥

सत्कार को चाहनेवाले उन राक्षसों के लिये सच्चे अन्तःकरण से प्रयत्न करना चाहिये एवं उनके लिये धूप, बलि, उपहार तथा मिष्टान्नादिक भक्ष्य पदार्थ चौरास्ते पर रखने चाहिये॥ २४॥

विमर्शः—राक्षसा. क किमर्थञ्च घ्नन्ति-अशुचिं भिन्नमर्यादं घृतं वा यदि वाऽश्नतम्। हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा॥ राक्षस शब्द से यहां आठों प्रकार के ग्रहों का बोध होता है। देवास्तथा शत्रुगणाश्च तेषा गन्धर्वयक्षा. पितरो भुजङ्गा'। रक्षांसि या चापि पिशाचजातिरेषोऽष्टको देवगणो ग्रहाख्य॥

ते तु सन्तर्पिता आत्मवन्तं न हिंस्युः। तस्मात् सततमतन्द्रितो जनपरिवृतो नित्यं दीपोदकशस्त्रस्रग्दामपुष्पलाजाद्यलङ्कृते वेश्मनि सम्पन्मङ्गलमनोऽनुकूलाः कथाः शृण्वन्नासीत॥ २५॥

उन देवग्रहों को बलि, उपहार आदि से संतृप्त कर देने से वे जितेन्द्रिय पुरुष को नहीं मारते हैं। इसलिये निरन्तर सावधान होकर कुटुम्बी अथवा आसपास के अनेक मनुष्यों के साथ सदा दीप, जल, शस्त्र, माला, रज्जु, पुष्प तथा धान की लाजा आदि पदार्थों से अलंकृत मकान में सम्पत् (धन), मङ्गल (गाजे बाजे) आदि से प्रसन्न चित्त होकर धर्म कथाओं को सुनता रहना चाहिये॥ २५॥

सम्पदाद्यनुकूलाभिः कथाभिः प्रीतमानसः।
आशावान् व्याधिमोक्षाय क्षिप्रं सुखमवाप्नुयात्॥२६॥

सम्पत्ति के अनुकूल धर्म कथाओं से प्रसन्न मन होकर व्याधि के छुटकारे के लिये आशा रखते हुये प्रयत्न करने से जल्दी रोग मुक्त होकर व्रणी सुख प्राप्त करता है॥ २६॥

ऋग्यजुःसामाथर्ववेदाभिहितैरपरैश्चाशीर्विधानैरुपाध्याया भिषजश्च सन्ध्ययो रक्षां कुर्युः॥ २७॥

उपाध्याय तथा वैद्य प्रातः तथा सायं दोनों सन्ध्या समयों में ऋग्, यजु, साम और अथर्व इन चारों वेदों में कहेहुये तथा अन्य शास्त्रोक्त आशीर्वचनों से रोगी की रक्षा करे॥ २७॥

सर्षपारिष्टपत्राभ्यां सर्पिषा लवणेन च।
द्विरह्नः कारयेद् धूपं दशरात्रमतन्द्रितः॥ २८॥

सरसों, नीम के पत्ते, घृत और नमक इनके द्वारा दिन में दो वार दस दिन तक लगातार सावधानीपूर्वक धूनी देनी चाहिये॥ २८॥

विमर्शः—धूपने विशेषः—'न केवलं व्रणं धूपयेत्, शयनाद्यपि व्रणदोर्गन्ध्यापगमार्थं, नीलमक्षिकादिपरिहारार्थञ्च' (डल्ह्णः)। व्रणे निम्बवचाद्यञ्च धूपनं सम्प्रशस्यते। (शार्ङ्गधर)। शिखिबर्हिबलाकास्थीनि सर्षपाश्चन्दनं च धूपयुक्तम्। धूमो गृहशयनासनवस्त्रादिषु शस्यते विषघ्नः॥ इस तरह प्राचीनों ने भी व्रण, व्रण बन्धन द्रव्य, शय्या, वस्त्र, मकान इन्हें विष तथा जीवाणुरहित करने के लिये धूपन का प्रयोग लिख कर जीवाणुनाशक (Antiseptic) प्रयोगों का पथप्रदर्शन किया है।

छत्रामतिच्छत्रां लाङ्गू(ङ्ग)लीं जटिलां ब्रह्मचारिणीं लक्ष्मीं गुहामतिगुहां वचामतिविषां शतवीर्यां सिद्धार्थकांश्च शिरसा धारयेत्॥ २९॥

छत्रा, अतिच्छत्रा, लाङ्गली, जटिला, ब्रह्मचारिणी, लक्ष्मी, गुहा, अतिगुहा, वचा, अतिविषा, शतवीर्या, सहस्रवीर्या और सिद्धार्थक इन्हें सिर पर धारण करना चाहिये॥ २९॥

विमर्शः—छत्रा और अतिच्छत्रा को डल्हण दोनों प्रकार की द्रोणपुष्पी मानता है। सुश्रुत कहता है कि—छत्रातिच्छत्रके विद्याद् रक्षोघ्ने कन्दसम्भवे। जरामृत्युनिवारिण्यौ श्वेतकापोतिसंस्थिते॥ अरुणदत्त छत्रा को शतपुष्पा तथा अतिच्छत्रा को विषाणिका मानता है। लाङ्गली कपिकच्छुरिति डल्हणः, विषघ्नाङ्गलीति हाराणचन्द्रः। जटिला=जटामासी। ब्रह्मचारिणी=मुण्डतिकेति डल्हणः, ब्रह्मयष्टीति हाराणचन्द्रः, ब्राह्मीति अन्ये। लक्ष्मी=शमी, लक्ष्मणेत्यन्ये, विष्णुक्रान्तेत्यपरे, ऋद्धिरित्युदयचन्द्रः, तुलसीत्यन्ये, गुहाऽतिगुहा-शालपर्णीपृश्निपर्ण्यो। शतवीर्या-शतावरी, नीलदूर्वेत्यन्ये, श्वेतदूर्वेति हाराणचन्द्रः। सहस्रवीर्या-श्वेतदूर्वेति डल्हणः, दूर्वेति हाराणचन्द्रः।

व्यज्येत बालव्यजनैर्व्रणं न च विघट्टयेत्।
न तुदेन्न च कण्डूयेच्छयानः परिपालयेत्॥ ३०॥

गाय, घोड़े आदि की पूंछ से बनी चँवरी से व्रण पर पंखा (हवा) करना चाहिये। व्रण को दबाना, दुखाना और खुजाना नहीं चाहिये किन्तु शय्या पर सोते हुए उसकी रक्षा करनी चाहिये॥ ३०॥

अनेन विधिना युक्तमादावेव निशाचराः।
वनं केशरिणाऽऽक्रान्तं वर्जयन्ति मृगा इव॥ ३१॥

उक्त प्रकार से रहने वाले व्रणी मनुष्य को निशाचर प्रथम ही त्याग देते हैं या आक्रमित नहीं करते हैं जैसे सिंह से व्याप्त वन को अन्य मृग छोड़ देते हैं॥ ३१॥

जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम्।
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति॥ ३२॥

पुराने सांठी चांवलों का भात जो घृत से स्निग्ध हो, एवं उष्ण तथा द्रव और अल्पमात्रा में लेकर जङ्गली पशुपक्षियों के मांसरस के साथ सेवन करने से शीघ्र ही व्रण नष्ट हो जाता है॥ ३२॥

तण्डुलीयकजीवन्तीमुनिपर्णकवास्तुकैः।

बालमूलकवार्त्ताकपटोलैः कारवेल्लकैः ॥ ३३ ॥
सदाडिमैः सामलकैर्घृतभृष्टैः ससैन्धवैः।
अन्यैरेवंगुणैर्वाऽपि मुद्गादीनां रसेन वा ॥
शक्तून् विलेपीं कुल्माषं जलञ्चापि श्रृतं पिबेत् ॥३४॥

चौलाई, जीवन्ती, चौपतिया, बथुआ, कोमल मूली, बैंगन, परवल, करेला इन शाकों को घृत में भूनकर सैन्धव लवण, अनारदाने का चूर्ण और आंवलों का रस मिला कर सेवन करना चाहिए। अथवा और भी इनके समान गुणवाले अन्य पदार्थ तथा मूंग आदि के स्वरस के साथ चावल सेवन करें तथा सत्तू, विलेपी, कुल्माष इन्हें भी प्रयुक्त करें एवं श्रृतजल पीना चाहिये ॥ ३३-३४ ॥

दिवा न निद्रावशगो निवातगृहगोचरः।
व्रणी वैद्यवशे तिष्ठन् शीघ्रं व्रणमपोहति ॥ ३५ ॥

दिन में निद्रा नहीं लेवे तथा झोंके की वायु से रहित मकान में रहकर व्रणी वैद्य के कथन का पालन करता रहने से शीघ्र ही व्रण से आराम प्राप्त करता है ॥ ३५ ॥

व्रणे श्रमश्रुरायासात् स च रागश्च जागरात्।
तौ च रुक् च दिवास्वापात् ताश्च मृत्युश्च मैथुनात् ॥

किसी भी प्रकार के श्रम के करने से व्रण में सूजन उत्पन्न होती है तथा जागरण करने से सूजन और लालिमा उत्पन्न होती है। दिन में शयन करने से सूजन, लालिमा तथा वेदना ये उत्पन्न होते हैं। स्त्रीसम्भोग करने से सूजन, लालिमा, वेदना और मृत्यु होती है ॥ ३६ ॥

एवंवृत्तसमाचारो व्रणी सम्पद्यते सुखी।
आयुश्च दीर्घमाप्नोति धन्वन्तरिवचो यथा ॥ ३७ ॥
इति सुश्रुतसंहितायां सूत्रस्थाने व्रणितोपासनीयो नामैकोनविंशोऽध्यायः ॥ १९ ॥

उपर्युक्त प्रकार से आहार तथा विहार का सेवन करने से व्रणी सुख को प्राप्त करता है तथा वह दीर्घायु का लाभ करता है ऐसा धन्वन्तरि भगवान् का वचन है ॥ ३७ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषायां व्रणितोपासनीयो नामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशतितमोऽध्यायः।

अथातो हिताहितीयमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब यहां से 'हिताहितीय अध्याय' का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १-२

यद्वायोः पथ्यं तत् पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद् द्रव्यमेकान्तेन हितमहितं वा अस्तीति केचिदाचार्या ब्रुवते। तत्तु न सम्यक्। इह खलु यस्माद् द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति ॥ ३ ॥

जो औषध या पदार्थ किंवा आहार-विहार वायु के लिये पथ्यकारी है वह पित्त के लिये अपथ्यकारी होता है। इस विचार की दृष्टि या कारण से कोई भी द्रव्य सब समय और सब अवस्थाओं में पूर्णरूप से या निश्चयरूप से हितकारी या अहितकारी नहीं हो सकता है ऐसा कुछ आचार्य कहते हैं। यह इनका विचार ठीक नहीं है क्योंकि धन्वन्तरि के मतानुसार सुश्रुततन्त्र में सम्पूर्ण द्रव्य अपनी प्रकृति से किंवा अपने संयोग से निरन्तर हितकारी, निरन्तर अहितकारी और अवस्थानुसार हित और अहित उभयार्थकारी होते हैं ॥ ३ ॥

विमर्शः—स्वभावत -तत्र प्रकृतिरुच्यते। स्वभावोय', स पुनराहारौषधद्रव्याणां स्वाभाविको गुर्वादिगुणयोग। तथया—स्वभावादुरुवो मुद्गास्तथा लावकपिञ्जला'। स्वभावाद् गुरवो माषा वराहो महिषस्तथा ॥ (चरकः)। संयोग शब्द से संयोग, संस्कार, राशि, देश, काल का ग्रहण करना चाहिये। संयोगो द्वयोर्बहूनां वा द्रव्याणां संहतीभाव, स विशेषमारभते। य पुनर्नैकशो द्रव्याण्यारभन्ते, तथथा मधुसर्पिषोर्मधुमत्स्यपयसाञ्च संयोग। (चरकः)।

तत्र, एकान्तहितानि जातिसात्म्यात् सलिलघृतदुग्धौदनप्रभृतीनि। एकान्ताहितानि तु दहनपचनमारणादिषु प्रवृत्तान्यग्निक्षारविषादीनि। संयोगादपराणि विषतुल्यानि भवन्ति। हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति ॥ ४ ॥

उनमें से जल, घृत, दुग्ध और चांवलों का भात ये द्रव्य मनुष्य जाति की हित की दृष्टि से जन्म से ही हितकारी हैं। दहन, पचन और मारण आदि कार्यों में अग्नि, क्षार और विष क्रमशः प्रयुक्त द्रव्य एकान्त (पूर्ण या निश्चय) रूप से अहितकर होते हैं। संयोग के कारण अच्छे द्रव्य भी विषतुल्य हो जाने से एकान्तरूप से अहितकर हैं। एक ही समय में हित तथा अहित करने वाले द्रव्य जैसे जो द्रव्य वायु के लिये पथ्यकारी है वही द्रव्य उसी समय पित्त के लिये अपथ्यकारी होता है ॥ ४ ॥

अतः सर्वप्राणिनामयमाहारार्थं वर्ग उपदिश्यते। तद्यथा—

रक्तशालिषष्टिककङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकासनपुष्पकर्दमकशकुनाहृतसुगन्धककलमनीवारकोद्दालकश्यामाकगोधूमवेणुयवादयः। एणहरिणकुरङ्गमृगमातृकाश्वदंष्ट्राकरालऋक्षरोपतलावतित्तिरिकपिञ्जलवर्तीरवर्त्तिकादीनां मांसानि, मुद्गवनमुद्गमकुष्ठकलायमसूरमङ्गल्यचणकहरेण्वाढकीसतीनाः। चिल्लिवास्तुकसुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः। गव्यं घृतं सैन्धवदाडिमामलकमित्येष वर्गः सर्वप्राणिनां सामान्यतः पथ्यतमः ॥ ५ ॥

इस लिये सर्व प्राणियों के आहार के लिये वक्ष्यमाण वर्ग का उपदेश करते हैं। जैसे—लाल चांवल, षष्टिक (साठ दिन में पकने वाले) चांवल, कंगुक (कांगुनी), मुकुन्दक (काले सांठी), पाण्डुक (पीले धान्य), पीतक, प्रमोदक, कालक,

असनक, पुष्पक, कदंबक, शकुनाहृत, सुगन्धक, कलम, नीवार धान्य, कोद्रव (कोदो), उद्दालक (वनकोदो), श्यामाक, गेहूँ, वेणुयवादि धान्य विशेष तथा पृष्ठ (कृष्ण हरिण), हरिण, एरण, मृगमातृका, रुरुदंष्ट्रा, कराल (कस्तूरीमृग), कक्कर, कपूतर, बटेर, तीतर, कपिञ्जल, वर्तीर, वर्तिका आदि प्राणियों का मांस और मृग, वनमृग, मोठ, कलाय (मटर), मसूर, मकुष्ठ (पाण्डु वर्ण की मसूर), चना, हरेणु, अरहर, मर्कोट, चिबड़ी (खेत का बथुआ), वास्तुक (साधारण बथुआ), सुनिषण्णक (चौपतिया), जीवन्ती, तण्डुलीयक (चौलाई) और मण्डूकपर्णी ये शाकें तथा गौ का घी, सैन्धव लवण, अनारदाने और आंवले आदि पदार्थों वाला वर्ग सर्वप्राणियों के लिए सामान्यतया अधिक पथ्यकारक है ॥ ७ ॥

विमर्श.—वरकेऽपि पथ्यमद्रव्याणा निर्देश.—शोणितशालय. शूकधान्यानां पथ्यतमत्वे श्रेष्ठता.। मुद्गाः यवागूधान्यानां, सैन्धवं लवणानां, जीवन्तीशाकं शाकानाम्, वेणव मृगमांसानां, लाव पक्षिणां, गव्यं सर्पिः सर्पिषाम्।

तथा ब्रह्मचर्य्यनिवातशयनोष्णोदकस्नाननिशाव्यव्यायामाश्चैकान्ततः पथ्यतमाः ॥ ६ ॥

ब्रह्मचर्य, वायुरहित स्थान में शयन, सुहाने गरम पानी में स्नान, रात्रि में शयन तथा व्यायाम ये पूर्णरूप से अधिक पथ्यकारी हैं ॥ ६ ॥

विमर्श.—ब्रह्मचर्यलक्षणम्—स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यं सेवनीयं सदा बुधैः॥ धर्म्यं यशस्यमायुष्यं लोकपरसाधनम्। अनुमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम्। (वाग्भट)। रात्रिनिद्रा—स्वाभाविक होने से श्रेष्ठ है। रात्रिस्वभावप्रभवा हि या तां भूतगणाः प्रवदन्ति निद्राम्। (चरकः)। रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः। (मनु.)। प्रदोषरात्रिमो यामौ वेदाभ्यासेन तौ नयेत्। प्रहरद्वयं शयानो ब्रह्मभूयाय कल्पते॥ (द० स्मृति.)। व्यायाम.—शरीरायासजनकं कर्म व्यायामसंज्ञितम्। (सु०)। आयामो विविधोऽज्ञानां व्यायाम इति संज्ञितः। (धनुर्वेदः)।

एकान्तहितान्येकान्ताहितानि च प्रागुपदिष्टानि। हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति ॥७॥

कुछ द्रव्य एकान्त हितकारी होते हैं जैसे पानी, कुछ द्रव्य एकान्त अहितकर होते हैं जैसे अग्नि, इन्हें पहले कह आये हैं। हित और अहितकारक द्रव्य तो वे हैं जैसे-जो द्रव्य वायु के लिए पथ्यकारक हैं वे ही पित्त के लिये अपथ्यकारक हैं ॥७॥

संयोगतस्त्वपराणि विषतुल्यानि भवन्ति। तद्यथा-वल्लीफलकवुककरीराम्लफललवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्कशाकाजाविकमांसमद्यजाम्बवचिलिचिममत्स्यगोधावराहांश्च नैकध्यमश्नीयात् पयसा॥

कुछ पदार्थ ऐसे होते हैं जो अन्य पदार्थों के साथ संयोग करने से विषतुल्य हो जाते हैं। जैसे वल्ली (लता) पर लगने वाले फल कुष्माण्ड आदि, कवक (छत्रक), बांस के अङ्कुर, निम्बादि अम्ल फल, नमक, कुलथी, तिल की खली, दही, तैल, अङ्कुरित धान्य, पिष्टविकृतियां, सूखे शाक, बकरी और मेढ़ का मांस, मद्य, जामुन के फल, चिलचिम नामक मत्स्य, गोधा और शूकर का मांस इन पदार्थों में किसी को भी दुग्ध के साथ मिलाकर सेवन नहीं करना चाहिये ॥ ८ ॥

विमर्श:—जब दो पदार्थों के संयोग होने से भिन्न गुण-धर्म वाला एक तीसरा ही पदार्थ उत्पन्न हो जाय और वह शरीर पर अहित प्रभाव करे उसे संयोगविरुद्ध (Chemically Incompatible) कहते हैं। तुल्य मधु-घृतादि का परीक्षण कर देखना चाहिये।

रोगं सात्म्यं च देशं च कालं देहं च बुद्धिमान्।
अवेक्ष्याग्न्यादिकान् भावान् रोगवृत्तेः प्रयोजयेत् ॥९॥

रोगवृत्ति अर्थात् रोगी समूह या रोगी के उदरादिक रोग, अष्टविध (जात्यातुरौषधान्नरसदेशर्तुदक) सात्म्य, आनूपादिक देश, शीतोष्णवर्षरूपी काल, स्थूल-कृश-मध्य देह, अग्नि, प्रकृति, वय, बल सत्त्व आदि भावों को देखकर बुद्धिमान वैद्य विचार करके हित या अहित द्रव्य का प्रयोग करे ॥ ९ ॥

विमर्श—विचार कर दिया विष अमृत तथा बिना विचार कर दिया दुग्ध भी विष हो सकता है। योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत्। भेषजं वापि दुर्युक्तं तीक्ष्णं सम्पद्यते विषम्॥ (चरक)

अवस्थाऽन्तरवाहुल्याद्रोगादीनां व्यवस्थितम्।
द्रव्यं नेच्छन्ति भिषज इच्छन्ति स्वस्थरक्षणे ॥ १० ॥

रोगादिकों की अनेक अवस्थाओं का आधिक्य होने से बुद्धिमान् वैद्य किसी भी द्रव्य को एकान्तहित या एकान्त रूप से अहितकर नहीं समझते हैं किन्तु स्वस्थावस्था के रक्षण में हित या अहित का विचार करते हैं ॥ १० ॥

द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः।
दुग्धस्यैकान्तहिततां विषमेकान्ततोऽहितम् ॥ ११ ॥
एवं युक्तरसेष्वेषु द्रव्येषु सलिलादिषु।
एकान्तहिततां विद्धि वत्स! सुश्रुत! नान्यथा ॥ १२ ॥

जिस तरह वैद्य स्वस्थ मनुष्य के लिये विष और दुग्ध इन दोनों में से एक को ग्रहण करना हो तो दुग्ध ही को एकान्त हितकारी तथा विष को एकान्त अहितकारी कहते हैं। हे वत्स सुश्रुत! इसी तरह दुग्ध की भांति प्रभावसंसिद्ध युक्तरस जलादिक द्रव्यों को एकान्त (पूर्ण) रूप से हितकारी जानो तथा विपरीत रसयुक्त विषादि में पूर्णहितकारिता न जानो ॥ ११-१२ ॥

अतोऽन्यान्यपि संयोगाद्हितानि वक्ष्यामः—नवविरूढधान्यैर्वसामधुपयोगुडमाषैर्वा ग्राम्यानूपौदकपिशितादीनि नाभ्यवहरेत्। न पयोमधुभ्यां रोहिणीशाकं जातुकशाकं वाऽश्नीयात्। बलाकां वारुणीकुल्मापाभ्याम्। काकमार्चीं पिप्पलीमरिचाभ्यां नाडीभङ्गशाककुक्कुटदधीनि च नैकध्यम्। मधु चोष्णोदकानुपानं पित्तेन चाममांसानि। सुराकृशरापायसांश्च नैकध्यम्। सौवीरकेण सह तिलशष्कुलीम्। मत्स्यैः सहेक्षुविका-

रान्। गुडेन काकमाचीं, मधुना मूलकं, गुडेन वाराहं मधुना च सह विरुद्धम्। क्षीरेण मूलकमाम्रजाम्बवश्वाविच्छूकरगोधाश्च। सर्वांश्च मत्स्यान् पयसा विशेषेण चिलिचिमम्। कदलीफलं तालफलेन पयसा दध्ना तक्रेण वा। लकुचफलं पयसा दध्ना मापसूपेन वा। प्राक् पयसः पयसोऽन्ते वा ॥ १३ ॥

इसके अनन्तर अन्य पदार्थ जो कि संयोग में अहितकर होते हैं उनका वर्णन करते हैं। नवीन अङ्कुरितधान्य तथा वसा, शहद, दुग्ध, गुड़ और उड़द के साथ ग्राम्य, आनूप और जलीय प्राणियों का मांस नहीं खाना चाहिये। दुग्ध और मधु के साथ रोहिणी शाक या जातुक नहीं खानी चाहिये। बलाका के मांस को मद्य तथा अर्द्धस्विन्न धान्य के साथ नहीं खाना चाहिये। मकोय को पीपल तथा काली मरिच के साथ नहीं खानी चाहिये। नाडी का शाक, सुरगा और दही को एक साथ नहीं खाना चाहिये शहद को गरम पानी के साथ, कच्चे मांस के साथ पित्त को तथा सुरा, खिचडी और पायस (खीर) को एक साथ नहीं सेवन करें। सौवीरक (कांजी) के साथ तिल की पापडी नहीं खानी चाहिये। ऊख के बने गुड, शर्करा आदि को मद्य के साथ नहीं खावें। गुड के साथ मकोय, मधु के साथ मूली, गुड तथा शहद के साथ शूकर का मांस निषिद्ध है। इसी तरह दुग्ध के साथ मूली, आम, जामुन, खरगोश, सूकर और गोधा मांस सेवन वर्जित है। दुग्ध के साथ सर्व प्रकार की मछलियां वर्जित हैं किन्तु चिलचिम विशेष कर निषिद्ध है। ताल फल, दुग्ध, दही और छाछ के साथ कदलीफल नहीं खाना चाहिये। दुग्ध, दही और उड़द की दाल या यूष के साथ लकुच (बडहल) का फल नहीं खाना चाहिये तथा दुग्ध के पूर्व या पीछे भी लकुच फल नहीं खाना चाहिये ॥ १३ ॥

विमर्श.—मधु का सर्व उष्ण पदार्थों के साथ सेवन वर्जित है। अन्यान्यवीर्यसंयोगमयथा सविषान्वयात्। (चरकः)। उष्णमुष्णार्तमुष्णे च युक्तं चोष्णं निहन्ति तत्। (वाग्भट)। नानापुष्पप्रकाराणां रसनागात्मकं मधु। तच्छैत्यात्सौकुमार्याच्च सर्वदोषैर्विरुद्ध्यते ॥ (हारीतः)। सौवीरकलक्षण—सर्वेषु निम्बुपै पक्वैः सौवीरं सम्पितं भवेत्। (शार्ङ्गधर.)। चरके—दुग्धेन सह संस्कारमत्स्यसेवननिषेध—"न मत्स्यान् पयसा सहाभ्यवहरेदुभयं ह्येतन्मधुरं मधुरविपाकं महाभिष्यन्दि शीतोष्णत्वाद्विरुद्धवीर्यं, विरुद्धवीर्यत्वाच्छोणितप्रदूषणाय महाभिष्यन्दित्वान्मार्गपरोधाय च विशेषेण चिलचिमं, स हि प्रायेण सर्वतोगोहितरालिलोहितप्रकारः प्रायो भूमौ चरति। स हि महाभिष्यन्दित्वात् स्थूललक्षणमानेतान् शोणितजान् विविधांश्च व्याधीनुपजनयति, आमविषमुदीरयति च। (चरकः)

अतः कर्म्मविरुद्धान् वक्ष्यामः—कपोतान् सर्षपतैलभृष्टान् नाद्यात्। कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात्। कांस्यभाजने दशरात्रपर्युषितं सर्पिः, मधु चोष्णैरुष्णे वा, मत्स्यपरिपचने शृङ्गवेरपरिपचने वा सिद्धां काकमाचीम्। तिलकल्कसिद्धमुपोदिकाशाकम्। नारिकेलेन वराहवसापरिभृष्टां बलाकाम्। भासमङ्गारशूल्यं नाश्नीयादिति ॥ १४ ॥

अब इसके अनन्तर कर्मविरुद्ध द्रव्यों का वर्णन करते हैं—सरसों के तेल में भूने हुये कबूतरों को नहीं खाना चाहिये। कपिञ्जल, मोर, लाव, तीतर और गोधा इनको एरण्ड की लकडियों की अग्नि में पका कर अथवा एरण्ड के तेल में पका कर नहीं खाने चाहिये। कांसे के बर्तन में दस रात तक रखा हुआ घी नहीं खाना चाहिये। उष्ण द्रव्यों के साथ तथा ग्रीष्म ऋतु में शहद सेवन नहीं करना चाहिये। मछली अथवा सोंठ पकाये पात्र में मकोय पका कर नहीं खानी चाहिये। तिलकल्क में सिद्ध किया हुआ पोई का शाक नहीं खाना चाहिये। वराह की चर्बी में भूनी हुई बलाका को नारिकेल के साथ तथा भास पक्षी को लोहे के कांटे में बींध कर अग्नि में पका के नहीं खाना चाहिये ॥ १४ ॥

अतो मानविरुद्धान् वक्ष्यामः—मध्वम्बुनी मधुसर्पिषी मानतस्तुल्ये नाश्नीयात्। स्नेहौ मधुस्नेहौ जलस्नेहौ वा। विशेषादान्तरीक्षोदकानुपानौ ॥ १५ ॥

अब इसके बाद मानविरुद्ध द्रव्यों का वर्णन करते हैं—शहद और पानी तथा शहद और घी बराबर प्रमाण में सेवन नहीं करें। दो प्रकार के भिन्न २ स्नेहों को मिला के सेवन नहीं करें तथा शहद और स्नेह अथवा जल और स्नेह समप्रमाण में मिला कर नहीं खाने चाहिये। विशेषतया मधु और स्नेह के साथ आकाश जल का सेवन नहीं करना चाहिये ॥ १५ ॥

विमर्श.—स्नेहपरिभाषा-सर्पिस्तैलं वसा मज्जा स्नेहो दृष्टश्चतुर्विधः। (चरक)।

अत ऊर्ध्वं रसद्वन्द्वानि रसतो वीर्यतो विपाकतश्च विरुद्धानि वक्ष्याम—तत्र मधुराम्लौ रसवीर्यविरुद्धौ मधुरलवणौ च। मधुरकटुकौ च सर्वतः। मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ललवणौ रसतः। अम्लकटुकौ रसविपाकाभ्याम्, अम्लतिक्तावम्लकषायौ च सर्वतः। लवणकटुकौ रसविपाकाभ्यां, लवणतिक्तौ लवणकषायौ च सर्वतः। कटुतिक्तौ रसवीर्याभ्यां कटुकषायौ च, तिक्तकषायौ रसतः ॥ १६ ॥

अब इसके अनन्तर रस, वीर्य और विपाक में विरुद्ध दो दो रसों का वर्णन करते हैं। जैसे मधुर और अम्ल तथा मधुर और लवण ये रस और वीर्य में विरुद्ध हैं तथा मधुर और कटु रस सब बातों में परस्पर विरुद्ध हैं। मधुर और तिक्त रस तथा मधुर और कषाय रस रस और विपाक में परस्पर विरुद्ध हैं। अम्ल और लवण रस ये दोनों केवल रस में विरुद्ध हैं। अम्ल और कटुक रस रस और विपाक में विरुद्ध हैं। अम्ल और तिक्त तथा अम्ल और कषाय रस सर्व प्रकार से परस्पर विरुद्ध हैं। लवण और कटु रस रस और विपाक में विरुद्ध हैं। लवण और तिक्त रस तथा लवण और कषाय रस सर्व बातों में विरुद्ध हैं। कटु और तिक्त रस तथा कटु और कषाय रस रस और वीर्य में विरुद्ध हैं। तिक्त और कषाय रस रस विरुद्ध हैं ॥ १६ ॥

तरतमयोगयुक्तांश्च भावानतिस्निग्धानत्युष्णानतिशीतानित्यवमादीन् विवर्जयेत् ॥ १७ ॥

तर और तम योग से युक्त भाव अर्थात् पदार्थ जैसे अतिस्निग्ध, अतिरूक्ष, अति उष्ण और अति शीत आदि को वर्जित करना चाहिये ॥ १७ ॥

भवन्ति चात्र—

विरुद्धान्येवमादीनि वीर्यतो यानि कानि च ।
तान्येकान्ताहितान्येव शेषं विद्याद्धितोहितम् ॥ १८ ॥

उक्त प्रकार से जो भी पदार्थ या द्रव्य, वीर्य, गुण तथा रस से विरुद्ध हों वे सब पूर्णरूप से अहितकारी हैं तथा शेष में से कुछ पदार्थ हितकारी तथा कुछ पदार्थ अहितकारी हैं ॥ १८ ॥

विमर्शः—द्रव्य रस, वीर्य, गुण, पाक आदि में से किसी एक द्वारा मुख्यतया अपना २ कार्य करते हैं। किञ्चिद्रसेन करते कर्म वीर्येण चापरम् । द्रव्यं गुणेन पाकेन प्रभावेण च किञ्चन ॥ चरकोक्तो द्रव्याणां विरोधप्रकारो यथा—यत्किञ्चिद्दोषमुत्क्लेश्य न निर्हरति कायतः । आहारजातं तत्सर्वमहितायोपपद्यते ॥ यद्यपि देशकालाग्निमात्रासात्म्यानिलादिभिः । संस्कारतो वीर्यतश्च कोष्ठावस्थान्तरैरपि ॥ परिहारोपचाराभ्यां पाकात् संयोगतोऽपि च । विरुद्धं तच्च न हितं हन्तस्यद्विधिमिश्च यत् ॥ (च सू अ.२६)

व्याधिमिन्द्रियदौर्बल्यं मरणं चाधिगच्छति ।
विरुद्धरसवीर्याणि भुञ्जानोऽनात्मवान्नरः ॥ १९ ॥

जो मनुष्य अपनी आत्मा तथा शरीर के स्वास्थ्य का रक्षण नहीं करता हुआ रसनेन्द्रिय के स्वाद में लालायित होकर रस और वीर्य आदि से विरुद्ध पदार्थों का सेवन करता है वह रोग, इन्द्रियों की दुर्बलता और अन्त में मृत्यु को प्राप्त होता है ॥ १९ ॥

विमर्शः—विरुद्धान्नसेवनजा रोगाः—पाण्ड्वान्यवीसर्पकोदराणां विस्फोटकोन्मादभगन्दरार्शसाम्। मूर्च्छामदाध्मानगलामयानां पाण्ड्वामयस्यानिलस्य चैव ॥ किलासकुष्ठग्रहणीगदानां शोषान्नपित्तज्वरपीनसानाम् । सन्तानदोषस्य तथैव मृत्योर्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥ (च. सू. अ. २६)

यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत् ।
रसादिव्यथयार्थं वा तद्विकाराय कल्पते ॥ २० ॥

जो कुछ भी खाया हुआ विरुद्ध अन्नादि पदार्थ वातादि दोषों को प्रकुपित कर देता है। किन्तु उन दोषों को वमन या विरेचन द्वारा बाहर नहीं निकालता है वह शरीर में विकार करता है, अथवा रस-रक्तादि धातुओं में दुष्टि उत्पन्न कर रोग करता है ॥ २० ॥

विमर्शः—अन्यत्र यत्किञ्चित् से आहार तथा विहार दोनों का ग्रहण किया है। यत्किञ्चिद्दोषमाकुल्य न निर्हरति कायतः । आहारजातमन्यद्वा तत्सर्वमहितं स्मृतम् ॥

विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् ।
वमनं शमनं वाऽपि पूर्वं वा हितसेवनम् ॥ २१ ॥

इस तरह विरुद्धाहार से उत्पन्न हुये रोगों को विरेचन, वमन और शमन नष्ट करते हैं। अथवा पूर्व ही से हितपदार्थों का सेवन करना भी रोगनाशक है ॥ २१ ॥

विमर्शः—आयुर्वेद ने चिकित्सा के दो प्रकार उक्त श्लोक से बताये हैं। आगत व्याधिचिकित्सा और अनागत व्याधिचिकित्सा प्रथम में रोगोत्पत्ति होने पर वमन, विरेचन तथा रोगविरोधी द्रव्यों (रस, भस्म, काष्ठौषधि) द्वारा रोग का प्रशमन करना। चरक ने भी यही माना है। एषाञ्च खलु परेषाञ्च वैरोधिकनिमित्तानां व्याधीनामिमे भाषा. प्रतीकारकरा भवन्ति, यथा वमनं, विरेचनं, तद्विरोधिना द्रव्याणा संशमनार्थमुपयोगस्तथाविधैश्च द्रव्यैः पूर्वमभिसंस्कार शरीरस्येति। वाग्भट ने भी ये ही दो भेद लिखे हैं 'शमं वा तद्विरोधिभि , द्रव्यैर्नैरेव वा पूर्वं शरीरस्याभिसंस्कृति'। 'तथाविधैः' के लिये रसावयवप्रयोगैरिति चक्रपाणिः, वैरोधिकक्रुपितदोषप्रतिपक्षभूतैर्द्रव्यैरिति-अरुण दत्तः, सुवर्णलौहादिविरोधिरोगहरं पूर्वमेव सेवेत, तदुक्तं "न सज्जते हेमपात्रे विषं पद्मदलेऽम्बुवत्' इति डल्हणः। शरीर में जीवाणु प्रवेश से उत्पन्न रोग की चिकित्सा को Curative treatment कहते हैं तथा Serum का उपयोग इसमें बहुत लाभ करता है। जैसे Bacillary dysentery, मस्तिष्कसुषुम्ना ज्वर (Carebrospinal fever), धनुःस्तम्भ (Tetanus), रोहिणी (Diphtheria) रोगों में सीरम से बहुत लाभ होता है। सीरम द्वारा जीवाणुविरोधी या विषविरोधी द्रव्य को रोगी के शरीर में प्रविष्ट कर प्रविष्ट हुये जीवाणु या उनके विष का शमन करते हैं। द्वितीय अनागत व्याधिचिकित्सा (Prophylactic treatment) के लिये मनुष्य को होने वाले रोग से बचने के लिये "पूर्वं वा हितसेवनम्" का उपदेश देते हैं तथा चरकानुसार ऐसे द्रव्यों का सेवन करा देते हैं जिससे मनुष्य के शरीर में होनेवाले रोगों के विरुद्ध टक्कर लेने के लिये संस्कार हो जाता है। 'तथाविधैश्च द्रव्यैः पूर्वमपि संस्कार. शरीरस्येति' तुलसीपत्र, कालीमरिच आश्विन में सेवन करते रहने से मलेरिया ज्वर नहीं होता। रुद्राक्ष के दाने को घिस कर सात दिन तक छोटे बच्चों को देने से शीतला (Small Pox) रोग उत्पन्न नहीं होता। वर्तमान में वैक्सीन (Vaccine) के प्रयोग से बहुत लाभ हुआ है। जीवाणु या उनके विष को स्वस्थ शरीर में प्रविष्ट कर उनका शरीर में संस्कार करके शरीर को उन्हीं विरोधी द्रव्यों के लिये क्षम बनाया जाता है जिससे उन जीवाणुओं का भविष्य में शरीर पर आक्रमण होने पर भी रोगोत्पत्ति न हो। इस तरह वैक्सीन का प्रयोग रोगप्रतिषेध के लिये होता है। जैसे प्लेग, आन्त्रिक ज्वर (Typhoid), विसूचिका (Cholera), अतिसार आदि को रोकने में बहुत लाभ हुआ है। यद्यपि आयुर्वेद में सीरम और वैक्सीन का प्रयोग नहीं है किन्तु इन दोनों सिद्धान्तों तद्विरोधी द्रव्योपयोग द्वारा आगत व्याधिचिकित्सा सीरमप्रयोग तथा पूर्वमपि संस्कार. शरीरस्येति द्वारा अनागत व्याधिचिकित्सा या वैक्सीन प्रयोग का उल्लेख स्पष्ट है। शमनलक्षणम्—न शोषयति यद्दोषान् समानोदीरयत्यपि । समीकरोति विषमान् तद् संशमनमुच्यते ॥

सात्म्यतोऽल्पतया वाऽपि दीप्ताग्नेस्तरुणस्य च ।
स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥ २२ ॥

नित्याभ्यास से सात्म्य हुआ, अल्पमात्रा में सेवित, दीप्ताग्नि वाले का, युवा मनुष्य का अन्तः और बाह्य प्रयोग से शरीर स्निग्ध हो, व्यायाम करने वाले तथा बलवान् पुरुषों का किया हुआ विरुद्ध भोजन भी निष्फल (रोगोत्पत्ति नहीं करने वाला) हो जाता है ॥ २२ ॥

विमर्शः—सात्म्य नाम तथत् सातत्येनोपसेव्यमानमुपशेते। (चरकः)। दीप्ताग्नेः—बलमारोग्यमायुश्च प्राणाश्चाग्नौ प्रतिष्ठिता। (चर०)। व्यायामप्रभावः—व्यायाम कुर्वतो नित्यं विरुद्धमपि भोजनम्। विदग्धमविदग्धं वा निर्दोषं परिपच्यते ॥

अथ वातगुणान् वक्ष्यामः—

पूर्वः समधुरः स्निग्धो लवणश्चैव मारुतः।
गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः ॥ २३ ॥
क्षतानां विषजुष्टानां व्रणिनः श्लेष्मलाश्च ये।
तेषामेव विशेषेण सदा रोगविवर्द्धनः ॥ २४ ॥
वातलानां प्रशस्तश्च श्रान्तानां कफशोषिणाम्।
तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः ॥ २५ ॥

अब इसके अनन्तर वायु के गुणों को कहते हैं। पूर्व दिशा की वायु मधुर, स्निग्ध, लवण, गुरु, दाहजनक तथा रक्तपित्तवर्धक है। क्षत (व्रण) से युक्त, विष से व्याप्त, व्रण से पीड़ित तथा श्लेष्म प्रकृति के मनुष्यों के लिये विशेष करके सदा रोगवर्धक है। वायु की प्रकृति वाले, थके हुये और जिनका कफ सूख गया हो उनके लिये पूर्व वायु प्रशस्त है किन्तु इन्हीं पुरुषों के यदि व्रण हो तो उसमें क्लेद को बढ़ाती है ॥ २३-२५ ॥

मधुरश्चाविदाही च कषायानुरसो लघुः।
दक्षिणो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्धनः ॥
रक्तपित्तप्रशमनो न च वातप्रकोपणः ॥ २६ ॥

दक्षिण दिशा की वायु मधुर, विदाह नहीं करनेवाली, कुछ कसैली, लघु, नेत्रों के लिये हितकारी, बलवर्धक, रक्तपित्त रोग की शामक तथा वातरोगों को नहीं प्रकुपित करनेवाली है।

विशदो रूक्षपरुषः खरः स्नेहबलापहः ॥ २७ ॥
पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः।
सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम् ॥ २८ ॥

पश्चिम दिशा की हवा विशद, रूक्ष, परुष, खर, स्नेह और बल का नाशक, तीक्ष्ण, कफ और मेदोधातु का शोषक, तुरन्त ही प्राण का नाशक और शरीर का शोषक है ॥ २७-२८ ॥

उत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च।
कषायानुरसः शीतो दोषाणां चाप्रकोपणः ॥ २९ ॥
तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्धनः।
क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः ॥ ३० ॥

इति सुश्रुतसंहितायां सूत्रस्थाने हिताहितीयो नाम विंशोऽध्यायः ॥ २० ॥

उत्तर दिशा की हवा स्निग्ध, मुलायम, मधुर, कषायानुरस, शीत तथा दोषों को प्रकुपित नहीं करने वाला है, इसी लिये प्रकृतिस्थ या स्वस्थ पुरुषों के शरीर में क्लेदकारक तथा बलवर्धक है। रसरक्तादि धातुक्षीण, क्षय और विष से पीड़ित मनुष्यों के लिये विशेषकर लाभकारी है ॥ २९-३० ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषायां हिताहितीयो नाम विंशोऽध्यायः ॥ २० ॥

एकविंशतितमोऽध्यायः।

अथातो व्रणप्रश्नमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'व्रण प्रश्न' नामक अध्याय का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १-२ ॥

विमर्शः—व्रणाः व्रणकारणत्वाद् वातादिदोषास्तद्विषयक प्रश्नो यस्मिन् स व्रणप्रश्नम्।

वातपित्तश्लेष्माण एव देहसम्भवहेतवः। तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यतेऽगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके। त एव च व्यापन्नाः प्रलयहेतवः। तदेभिरेव शोणितचतुर्थैः सम्भवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति ॥ ३ ॥

वात, पित्त और श्लेष्मा ये तीनों ही शरीर की उत्पत्ति के कारण हैं। इन्हीं अकुपित तथा नीचे, मध्य और ऊपर यथाक्रम से रहने वाले वात, पित्त और कफ से यह शरीर धारण किया जाता है जिस तरह तीन स्तम्भों से मकान धारण किया जाता है, इस लिये कई आचार्य इस शरीर को त्रिस्थूण कहते हैं। मिथ्या आहार-विहारों से प्रकुपित हुये ये ही वातादि दोष शरीर के प्रलय (विनाश) में कारण होते हैं। वात, पित्त और कफ ये तीन तथा चौथा रक्त ये चारों शरीर की उत्पत्ति, स्थिति (धारण या पोषण) और प्रलय (नाश) में अविरहित (वर्तमान) रहते हैं या ये ही कारण हैं ॥ ३ ॥

विमर्शः—देहसम्भव में प्रधान रूप से यद्यपि शुद्ध शुक्र और आर्तव होते हैं तथापि उनमें भी वातादि अवस्थित होते हैं एवं गर्भ का धारण, पोषण, अङ्ग-प्रत्यङ्ग विकाश आदि कार्य वातादि का है अतः इन्हें देहसम्भव में हेतु माना है। 'तत्र स्त्रीपुंसयो संयोगे तेज शरीराद्वायुरुदीरयति, ततस्तेजोऽनिलसन्निपाताच्छुक्र च्युत योनिमभिप्रपद्यते संसृज्यते चार्तवेन, ततोऽग्निपोमसयोगात् संसृज्यमानो गर्भाशयमनुप्रपद्यते। शीतोष्मानिलैरभिप्रपद्यमानानां महाभूतानां संघातो घन संजायते। (सुश्रुत)। शुक्रशोणित गर्भाशयस्थमात्मप्रकृतिविकारसम्मूच्छित गर्भ इत्युच्यते त चेतनावस्थित वायुर्विभजति, तेज एन पचति, आप क्लेदयन्ति, (सुश्रुतः)। दोषाणां शुक्रार्तवस्थितिः—शुक्रार्तवस्थैर्जन्मादौ विशेषेण विपक्तिमे। तैश्च तिस्र प्रकृतयो हीनमध्योत्तमा पृथक्॥ दोषस्थानानि—ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंस्थिता। त्रिस्थूणम्—ऊर्ध्वमूलमध. शाख त्रिस्थूण पञ्चदैवतम्। क्षेत्रज्ञाधिष्ठित विद्वान् यो

वै वेद स वेदवित् ॥ शोणितचतुर्थं —यद्यपि चरकादिकों ने वातादि तीन ही दोष माने हैं तथा सुश्रुत ने भी वातादि तीन दोष माने हैं किन्तु सुश्रुत ने जहां शल्यप्रकरण है वहां रक्त को भी दोष माना है क्योंकि वातादि दोष भी रक्त के साथ मिल कर ही सब स्थानों में जाते हैं अथवा रोगोत्पत्ति करते हैं। विना रक्त के इनके द्वारा व्रणस्थान की दुष्टि, शोथ, पूयभवन और रोहण नहीं हो सकते।

भवति चात्र—

नर्त्ते देहः कफादस्ति न पित्तान्न च मारुतात्।
शोणितादपि वा नित्यं देह एतैस्तु धार्यते ॥ ४ ॥

कफ के विना देह नहीं है, पित्त के विना देह नहीं है, वायु के विना देह नहीं है अथवा रक्त के विना भी देह नहीं है अत एव सदा इन चारों ही से देह का धारण होता है ॥४॥

विमर्शः—वायु. पित्त कफदचेति त्रयो दोषा. समासतः। विकृताऽविकृता देह घ्नन्ति ते वर्तयन्ति च ॥

तत्र 'वा' गतिगन्धनयोरिति धातु', 'तप' सन्तापे, 'श्लिष' आ लङ्गने, एतेषां कृद्विहितै. प्रत्ययैर्वात' पित्तं श्लेष्मेति च रूपाणि भवन्ति ॥ ५ ॥

इनमें वात शब्द 'वा गतिगन्धनयो' धातु से एवं पित्त शब्द 'तप सन्तापे' धातु से तथा श्लेष्मा शब्द 'श्लिष आलिङ्गने धातुओं से कृदन्तविहित प्रत्ययों द्वारा सिद्ध होते हैं ॥५॥

विमर्शः—वात —गतिगन्धोपादानार्थस्य वा धातो.-असुन्दरादिभ्य इत्यादिसूत्रोत्पन्ने तप्रत्यये वात इति रूपम्। वा धातु का गति और गन्धन अर्थ है। गति से गमन, ज्ञान, प्राप्ति और मोक्ष ये चार अर्थ तथा गन्धन का सूचन अर्थ है। इस तरह वात शब्द के अर्थ में Nervous, System के समस्त कार्य समाविष्ट हो जाते हैं। 'सर्वा हि चेष्टा वातेन' 'वायुस्तन्त्रयन्त्रधरः (चरकः)। 'नर्त्त' को नाड़ी कहना उचित नहीं है क्योंकि 'नर्व' ठोस होती हैं और 'नाडी' शब्द नाली या पोली वस्तु के लिये है। 'सिरा' या 'धमनी' को नाडी कहना उचित है जैसा कि अमरकोष में लिखा है 'नाडी तु धमनी शिरा' 'नाडी परीक्षा' से धमनी गत रक्त की परीक्षा करते हैं न कि नर्व की 'करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी। तच्चेष्टया सुख दुःख ज्ञेयं कायस्य पण्डितै ॥

अतः नाडी को वातसूत्र या ज्ञानतन्तु तथा नर्वस सिस्टम् को वात संस्थान कहना चाहिये। जिस तरह किसी मकान में लगे हुये तांबे के ठोस तारों में विद्युत्प्रवाह होता रहता है और वह तार दृश्य है पर प्रवाह दृश्य नहीं किन्तु प्रकाश होने से या स्पर्श करने से शरीर में झटका लगने से विद्युत् शक्ति का ज्ञान होता है इसी तरह पावरहाउस से तारों में होनेवाले विद्युत्प्रवाह की भांति मस्तिष्क से वातसूत्रों में आज्ञा या संज्ञा का वहन वात द्वारा होता रहता है। वह वात दृश्य नहीं है 'रूपरहितत्वे स्पर्शवत्त्व वायोर्लक्षणम्' किन्तु स्पर्श या शरीर की गति और कार्य से अनुमेय है। पित्तम्—सन्तापार्थस्य तप्धातोरचि प्रत्यये तकारस्येत्वे वर्णविपर्यये तस्य च त्ते कृते पित्तमिति रूपम्। आयुर्वेद में पित्त के पचन, दर्शन, रक्तरञ्जन और शरीर की उष्णता रखना ये मुख्य कार्य माने हैं। 'पित्तादेवोष्मण पक्तिर्नराणामुपजायते' (चरकः)। श्लेष्मा—आलिङ्गनार्थस्य श्लिष् धातोर्मनिन् प्रत्यये गुणे च कृते श्लेष्मेति रूपम्।

दोषस्थानान्यत ऊर्ध्वं वक्ष्यामः—तत्र समासेन वात श्रोणिगुदसंश्रयः; तदुपर्यधो नाभेः पक्वाशयः; पक्वामाशयमध्य पित्तस्य, आमाशयः श्लेष्मण ॥ ६ ॥

अब इसके अनन्तर वातादि दोषों के स्थानों का वर्णन करते हैं। उनमें सक्षेप से वायु श्रोणि और गुदा में रहता है। श्रोणि और गुदा के ऊपर किन्तु नाभि के नीचे पक्वाशय है। पक्वाशय और आमाशय के मध्य में पित्त का स्थान है। आमाशय श्लेष्मा का स्थान है ॥ ६ ॥

विमर्शः—यद्यपि वात, पित्त और कफ सारे शरीर में व्याप्त होकर रहते हैं। 'सर्वशरीरचरा. खलु वातपित्तश्लेष्माण' (चरकः)। तथापि जहां जहां ये विकृतरूप से, स्थूलरूप से, मलरूप से या क्रिया विशेष रूप से उपस्थित होते हैं वहां इनके स्थान माने गये हैं। वायु का प्रधान काम बाहर फेंकने का होने से (प्रक्षेपसहारकरः स प्रोक्तः) पक्वाशय (स्थूलान्त्र Large Intestine) में रहता है। 'अत्रापि पक्वाशयो विशेषेण वातस्थानम्' यहां वायु अन्न पाचन से बने हुये मल को गुदा की तरफ ढकेल कर बाहर फेंकने का काम करता है। बृहदन्त्र में (Peristalsis) की क्रिया होकर मल बाहर फेंका जाता है। कटि भाग के वात सूत्रों द्वारा यह कार्य होता है।

पित्तस्थान—पक्वाशय और आमाशय के मध्य पित्त का स्थान है। महास्रोत के आमाशय (Stomach), ग्रहणी (Duodenum), क्षुद्रान्त्र (Small Intestine), बृहदन्त्र, और गुदा ऐसे विभाग हैं। इनमें ग्रहणी के अन्दर अग्न्याशय (Pancrese) से अग्नि रस तथा यकृत् से पित्त (Bile) आता है तथा आन्त्ररस (Succus entericus) इन तीनों पाचन का कार्य होता है। ग्रहणी को पित्तधरा नाम की कला मानी है तथा स्थान पक्वाशय और आमाशय के मध्य माना है। षष्ठी-पित्तधरा नाम या कला परिकीर्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥ चरक ने पित्त का स्थान आमाशय लिखा है 'अत्रापि-आमाशयो विशेषेण पित्तस्थानम्' तथा आमाशय को नाभि और स्तनों के मध्य माना है। नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः। अशित खादितं लीढ पीतञ्चात्र विपच्यते॥ किन्तु प्रत्यक्ष में यह बात विरुद्ध है आमाशय में आमाशयिक रस (Gastric juice) होता है। यदि हम पित्त को (Bile) मानें तो उसका बनने का स्थान यकृत् है तथा यकृत् में लगे हुये पित्ताशय (Gallbledder) में वह सञ्चित रहता है जहां से समय समय पर एक नाली द्वारा ग्रहणी में पाचनार्थ आता रहता है। इस प्रत्यक्ष से सिद्ध है कि (Bile) ही यदि पित्त है तो उसका मुख्य निवास स्थान पित्ताशय है आमाशय नहीं। श्लेष्मस्थान—आमाशय माना है किन्तु चरक ने उरः (वक्ष) माना है। 'अत्राप्युरो विशेषेण श्लेष्मस्थानम्' वाग्भट ने भी कफ का स्थान उर माना है। 'कफस्य सुतरामुरः।'

अतः परं पञ्चधा विभज्यते। तत्र वातस्य वातव्याधौ वक्ष्यामः। पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिः स्वक् पूर्वोक्तं च। श्लेष्मणस्तूरःशिरःकण्ठसन्धय इति पूर्वोक्तञ्च। एतानि खलु दोषाणां स्थानान्यव्यापन्नानाम्॥

इसके अतिरिक्त ये दोष तथा इनके स्थान पांच पांच प्रकार से विभक्त हैं। वात के भेद तथा स्थान वातव्याधि में कहेंगे। पित्त के स्थान यकृत्, प्लीहा, हृदय, दृष्टि, त्वचा और पूर्वोक्त हैं। श्लेष्मा के स्थान उर, शिर, कण्ठ, सन्धियां तथा पूर्वोक्त हैं। ये अविकृत दोषों के स्थान हैं॥ ७॥

विमर्शः—सुश्रुत ने दोषों के पांच २ भेद किये हैं अतः तदनुसार स्थान दिये है। चरक में दोषों के निम्न स्थान माने हैं। 'स्वेदो रसो लसीका, रुधिरमामाशयश्च पित्तस्थानानि उर शिरोग्रीवापर्वाण्यामाशयो मेदश्च श्लेष्मण' स्थानानि। वस्तिः पुरीषाधानं कटि सक्थिनी पादावस्थीनि च वातस्थानानि।

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥ ८॥

जिस तरह चन्द्रमा, सूर्य और वायु क्रम से विसर्ग, आदान और विक्षेप इन क्रियाओं से जगत् का धारण करते हैं उसी तरह सोमांश कफ सूर्य समान पित्त तथा वायु देह का धारण करते हैं॥ ८॥

विमर्शः—वातादिदोष बाह्य, सोम, सूर्य और वायु से अभिन्न ही हैं। 'तत्र वायोरात्मैवात्मा, पित्तमाग्नेय, श्लेष्मा सौम्य इति। सोम एव शरीरे श्लेष्मान्तर्गतः अग्निरेव शरीरे पित्तान्तर्गतः, 'तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिगृहीता' कालर्तुरसदोषदेहबलनिर्वृत्तिप्रत्ययभूता. समुपदिश्यन्ते।' (चरकः)।

विसर्गः—विसृजति जनयत्याप्यमंशमिति विसर्गः, चन्द्र पृथिवी पर तथा प्राणियों में किरणों द्वारा स्निग्धता तथा शीतलता उत्पन्न करता है तद्वत् कफ भी शरीर को शीतल तथा स्निग्ध रखता है। आदानः—आददति क्षपयति पृथिव्या सौम्यांशमादानम्। सूर्य उष्ण किरणों से जल खींचता है तद्वत् पित्त अन्नरस को खींचता है। विक्षेपः—शीतोष्णवर्षादीना यथायोग प्रेरणम्। बाह्य वायु जगत् में शीत, उष्ण, वर्षा आदि का प्रेरण करता है तथा अन्तर्वायु शरीर में मलमूत्रादिकों को बाहर निकालकर तथा पित्तादि रसों को स्वाशयों में स्रावण करके शरीर की रक्षा करता है। सोमकार्यम्—सोम शिशिराभिर्भाभिरापूरयन् जगदाप्याययति शश्वत्। कफकार्यम्—सन्धिसंश्लेषणस्नेहनरोपणपूरणमलस्थैर्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्मणा अनुग्रह करोति। सूर्यकार्यम्—रविर्भाभिराददानो जगत स्नेहम्। सहस्रगुणमुत्स्रष्टुमादत्ते हि रस रवि। पित्तकार्यम्—रागपक्त्योर्जस्तेजोमेधोष्मकृत् पित्त पञ्चधा प्रविभक्तमग्निकर्मणाऽनुग्रह करोति। वायुकार्यम्—धरणी धारण, ज्वलनो ज्वालनं सृष्टिर्मेघानाम्, अपां विसर्ग, प्रवर्तन स्रोतसा, पुष्पफलानाञ्चाभिनिर्वर्तनम्, उद्भेदन चोद्भिदानाम्। शरीरगतवायुकार्यं—समीरणोऽग्नें, दोषसशोषणः, क्षेप्ता बहिर्मलानां, विण्मूत्रपित्तादिमलाशयाना विक्षेपसहारकर.। (चरकः)

तत्र जिज्ञास्यं, किं पित्तव्यतिरेकादन्योऽग्निः? आहोस्वित् पित्तमेवाग्निरिति?। अत्रोच्यते—न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते आग्नेयत्वात् पित्ते दहनपचनादिष्वभिप्रवर्त्तमानेष्वग्निवदुपचारः क्रियतेऽन्तरग्निरिति। क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति॥ ९॥

पित्त के विषय में यह बात जानने की इच्छा है कि क्या शरीर में पित्त के अतिरिक्त अन्य अग्नि है अथवा पित्त ही अग्नि है। इस विषय में यह कहते हैं कि-पित्त के अतिरिक्त शरीर में अन्य अग्नि उपलब्ध नहीं होती है क्योंकि पित्त में अग्निगुण होने से दहन, पचनादि क्रियाओं के बढ जाने पर अग्नि के समान ही उपचार किया जाता है इस लिये पित्त ही शरीर के भीतर अग्नि है। इसी तरह अग्निगुण तुल्य पित्त के क्षीण होने पर उसकी वृद्धि के लिये अग्नि समान उष्णगुण वाले द्रव्यों (चित्रक, सोंठ, पिप्पली) का उपयोग करते हैं एवं उस पित्त के अधिक बढ जाने पर शीतल द्रव्यों का उपयोग करने से तथा शास्त्र के प्रमाण से हम यह कह सकते हैं कि पित्त के अतिरिक्त शरीर में अन्य अग्नि नहीं है॥ ९॥

विमर्शः—उपद्रव दुर्बल होने पर प्रधान रोग की चिकित्सा करने से उपद्रव अपने आप ठीक हो जाता है। 'तस्य प्रायः प्रधानप्रशमे प्रशमो भवति' (चरक)। किन्तु उपद्रव के प्रबल होने पर मूलरोग से विरोध न करते हुए प्रथम उसी की चिकित्सा करे। 'त्वरित वा बलवन्तमुपद्रव प्रधानाविरोधेन' (अ० संग्रह) आदिव्याधिः—व्याधेरादि प्रथमावस्था । इति आदिव्याधिः। चिकित्साक्रमः—ज्वरस्य पूर्वरूपेषु वर्तमानेषु बुद्धिमान्। पाययेत घृत स्वच्छ ततः स लभते सुखम् ॥ विधिर्मारुतजेष्वेषु पैत्तिकेषु विरेचनम्। मृदु प्रच्छर्दन तद्वत् कफजेषु विधीयते ॥ (सुश्रुत)। पूर्वरूप विकाराणां दृष्ट्वा प्रादुर्भविष्यताम्। या क्रिया क्रियते सा च वेदना हन्त्यनागताम् ॥ (चरक)।

भवति चात्र—

नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ २३ ॥

दोषों के (प्रकोप) बिना रोग उत्पन्न नहीं होता है इस लिये लक्षणादि से अनुक्त (अज्ञात) रोग की चिकित्सा दोषों के लक्षणानुसार करनी चाहिये ॥ २३ ॥

विमर्शः—आचार्यों ने होने वाले रोगों के नाम, लक्षण आदि लिखकर भविष्य में नये होने वाले रोगों के नामकरण के विना ही उनकी दोषानुसार चिकित्सा करने की व्यवस्था कर दी है। अधिकतर आज कल भी जब तक रोग का यथार्थ निदान (Diagnosis) नहीं होता है तब तक दोषविज्ञान या प्रकृतिविज्ञान (Pathology) की सहायता से आवस्थिकी या लाक्षणिक चिकित्सा (Symptomatic treatment) की जाती है।

प्रागभिहिता ऋतवः ॥ २४ ॥

ऋतुओं का वर्णन पहले ऋतुचर्याध्याय में किया गया है ॥

शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया ।
क्रिया हीनाऽतिरिक्ता वा साध्येष्वपि न सिध्यति २६
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥ २७ ॥

शीत ऋतु में शीत का प्रतिकार और उष्ण (ग्रीष्म) ऋतु में उष्णता का प्रतिकार करके प्राप्त क्रिया (चिकित्सा) करनी चाहिये। योग्य चिकित्सा समय का उल्लंघन नहीं करना चाहिये। अप्राप्त समय में की हुई चिकित्सा तथा प्राप्त समय के पश्चात् की हुई चिकित्सा, आवश्यकता से हीन (कम) तथा अतिरिक्त (अधिक) या मिथ्या चिकित्सा साध्य रोगों में भी सफल नहीं होती है। जो बढ़े हुये दोष को शान्त करे तथा अन्य रोग को उत्पन्न नहीं करे उसी को यथार्थ क्रिया (चिकित्सा) कहते हैं किन्तु जो मूल रोग को नष्ट करने के साथ साथ अन्य रोग को उत्पन्न करे वह योग्य क्रिया नहीं है ॥ २५-२७ ॥

विमर्शः—योग्य काल के अतिरिक्त तथा न्यूनाधिक क्रिया व्यर्थ होती है। 'न ह्यतिपातितकालमप्राप्तकाल वा भेषजमुपयुज्यमानं यौगिक भवति । (चरक)। अप्राप्तकालोदाहरणम्—भेषज ह्यामदोषस्य भूयो ज्वलयति ज्वरम् । न तु सग्रहण देय पूर्वमामातिसारिणे। विवध्यमाना प्राग्दोषा जनयन्त्यामयान् बहून् ॥ आमच्छेदे मासिरास्नायुसन्धिव्यापादनमतिमात्रशोणितातिप्रवृत्तिर्वेदनाप्रादुर्भावो भवति । प्राप्तचिकित्सोपेक्षया हानि.—यदा पक्वमप्यपक्वमिति मन्यमानश्चिरमुपेक्षते व्याधिं वैद्यस्तदा द्वारमलभमान. पूयः स्वाश्रयमवदार्योत्सङ्ग महान्तमवकाशनाडीं जनयित्वा कृच्छ्रसाध्यो भवति। हीनातिरिक्तौषधोदाहरणम्—सहसा ह्यतिबलमौषधमपरीक्षकप्रयुक्तमल्पबलमातुरमभिघातयेत्। तथा बलवति बलवद्व्याधिपरिगते स्वल्पबलमौषधमपरीक्षकप्रयुक्तमसाधकं भवति (चरक)। योग्यक्रिया यथा वाग्भटे—प्रयोगः शमयेद्व्याधिं योऽन्यमन्यमुदीरयेत्। नाऽसौ विशुद्धः शुद्धस्तु शमयेद्यो न कोपयेत् ॥

प्रागभिहितोऽग्निरन्नस्य पाचकः । स चतुर्विधो भवति-दोषानभिपन्न एकः । विक्रियामापन्नस्त्रिविधो भवति-विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्वसाम्यादिति ॥ २८ ॥

पहले व्रण प्रश्न नामक २१ वें अध्याय में अन्न को पचाने वाली अग्नि का वर्णन किया गया है, वह चार प्रकार की होती है। वातादि दोषों से रहित एक तथा विकारयुक्त के तीन भेद होते हैं। वात से विषम, पित्त से तीक्ष्ण, कफ से मन्द तथा सर्व दोषों की समानता से चौथी समाग्नि ॥ २८ ॥

विमर्श.—यद्यपि पञ्चमहाभूतों की पांच, रसरक्तादि सात धातुओं की सात और एक जाठराग्नि ऐसे कुल अग्नि के तेरह भेद होते हैं किन्तु विशेषतया जाठराग्नि के चार भेद होते हैं। मन्दस्तीक्ष्णोऽथ विषम समश्चेति चतुर्विध.। कफपित्ताऽनिलाधिक्यात्तत्साम्याज्जाठरोऽनल.॥

तत्र, यो यथाकालमुपयुक्तमन्नं सम्यक् पचति स समः, समैर्दोषैः। यः कदाचित् सम्यक् पचति, कदाचिदाध्मानशूलोदावर्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः; स एवाभिवर्द्धमानोऽत्यग्निरित्याभाष्यते। स मुहुर्मुहुः प्रभूतमप्युपयुक्तमन्नमाशुतरं पचति, पाकान्ते च गलताल्वोष्ठशोषदाहसन्तापान् जनयति। यस्त्वल्पमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्रसेकच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः॥

उन में से जो उपयुक्त समय पर खाये हुये अन्न को ठीक तरह से पचाती है वह सम अग्नि है तथा यह दोषों के समान मात्रा में होने से होती है। जो कभी कभी ठीक पचाती हो तथा कभी कभी अफरा, शूल, उदावर्त, अतिसार, पेट में भारीपन, आंतों में कूजन और प्रवाहण आदि विकार उत्पन्न करती हो उसे 'विषमाग्नि' कहते हैं। जो अधिक खाये हुये अन्नको भी शीघ्र पचाती हो उसे तीक्ष्णाग्नि कहते हैं तथा वही जब अधिक बढ़ जाती है तब उसे अत्यग्नि कहते हैं एवं यह अग्नि बार बार तथा अधिक खाये हुये अन्न को अत्यन्त शीघ्र पचा देती है तथा पाक के अन्त में गले, तालु और ओष्ठ में शोष, दाह तथा सन्ताप आदि उत्पन्न करती है। जो थोडे खाये हुए अन्न को भी उदर और शिर में भारीपन तथा कास, श्वास, प्रसेक (लार टपकना), वमन और अंगों में थकावट आदि विकार उत्पन्न करके अधिक देर में पचाती है उसे मन्दाग्नि कहते हैं ॥ २९ ॥

विमर्शः—अत्यग्नि को भस्मकाग्नि कहते हैं। वर्धमानो भवेत्तीक्ष्णो भस्मकाख्यो महानल.। (वृन्दमाधव)। भुक्तं क्षणाद्भस्म करोति यस्मात्तस्मादय भस्मकसञ्ज्ञोऽभूत्। (योगरत्नाकर)। डाक्टरी में भस्मकाग्नि आमाशयिकरस की अधिकता (Hyper chlorpydria), मधुमेह, हिस्टीरिया तथा आन्त्रस्थकृमि के कारण होती है तथा भस्मकरोग को बुलिमिआ (Bulimia) अथवा पोलिफेगिआ (Polyphagia) कहते हैं।

विषमो वातजान् रोगांस्तीक्ष्णः पित्तनिमित्तजान्।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥३०॥

विषम अग्नि वातजन्य रोगों को, तीक्ष्ण अग्नि पित्तजन्य रोगों को और मन्दाग्नि कफजन्य विकारों को उत्पन्न करती है॥

तत्र, समे परिरक्षणं कुर्वीत। विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्वीत। तीक्ष्णे मधुरस्निग्धशीतैर्विरेकैश्च। एवमेवात्यग्नौ, विशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिः। मन्दे कटुतिक्तकषायैर्वमनैश्च ॥ ३१ ॥

इनमें से समाग्नि की सर्व प्रकार से रक्षा करनी चाहिये। विषमाग्नि में स्निग्ध, अम्ल तथा लवण रस प्रधान विशेष क्रियाओं से प्रतिकार (चिकित्सा) करना चाहिये। तीक्ष्णाग्नि में मधुर, स्निग्ध और शीत खाद्यपेय तथा विरेचन से चिकित्सा करे। इसी तरह अत्यग्नि में भैंस के दुग्ध, दही और घृत से प्रतिकार करना चाहिये। मन्दाग्नि होने पर कटु, तिक्त और कषाय रस द्रव्य तथा वमन से प्रतिकार करना चाहिये ॥३१॥

जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः।
सौदम्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥ ३२ ॥

अन्न को पचाने वाली तथा भोज्य रसों का ग्रहण करने वाली और शरीर को अपने शासन में रखने वाली व ऐश्वर्ययुक्त जाठराग्नि होती है तथा उसका विशेष विवेचन करना सूक्ष्म होने से असम्भव है ॥ ३२ ॥

विमर्शः—ईश्वरः—आयुर्वर्णो बल स्वास्थ्यमुत्साहोपचयौ प्रभा। ओजस्तेजोऽनय प्राणाश्चोक्ता देहाग्निहेतुका ॥ शान्तेऽग्नौ म्रियते युक्ते चिर जीवत्यनामय.। रोगी स्यादिकृते मूलमग्निस्तस्मान्निरुच्यते ॥

प्राणापानसमानैस्तु सर्वतः पवनैस्त्रिभिः।
ध्मायते पाच्यते चापि स्वे स्वे स्थाने व्यवस्थितैः ३३

अपने अपने स्थानों में रहने वाले प्राण, अपान और समान इन तीन प्रकार की वायुओं से जठराग्नि दीप्त होती है जिससे अन्न का पाचन होता है ॥ ३३ ॥

विमर्शः—जठराग्नि पाचन की दृष्टि से शरीर की ईश्वर है किन्तु वह स्वय प्राण, अपान, समान इन त्रिविध वायु के अधीन होती है। डाक्टरी में भी पचन का Nervous control माना है तथा वात संस्थान की खराबी से पाचन में भी खराबी होते देखा गया है।

वयस्तु त्रिविधं—बाल्यं, मध्यं, वृद्धमिति। तत्रोनषोडशवर्षा बालाः। तेऽपि त्रिविधाः—क्षीरपाः, क्षीरान्नादा, अन्नादा इति। तेषु संवत्सरपराः क्षीरपाः, द्विसंवत्सरपराः क्षीरान्नादाः, परतोऽन्नादा इति ॥ ३४ ॥

वय (अवस्था) तीन प्रकार की होती है। बाल्य, मध्य और वृद्ध अवस्था। सोलह वर्ष तक बालक संज्ञा मानी गई है। बालक भी तीन प्रकार के होते हैं। दुग्ध पीने वाले, दुग्ध और अन्न दोनों का सेवन करने वाले तथा केवल अन्न का सेवन करने वाले। उनमें एक वर्ष तक की आयु वाले दुग्धपायी, दो वर्ष की आयु वाले दुग्ध और अन्न उभय का सेवन करने वाले तथा दो वर्ष के बाद अन्नसेवी बालक होते हैं ॥ ३४ ॥

विमर्शः—वयः—कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते।

षोडशसप्तत्योरन्तरे मध्यं वयः। तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति। तत्र, आविंशतेर्वृद्धि, आत्रिंशतो यौवनम्, आचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यसम्पूर्णता, अत ऊर्ध्वमीषत्परिहाणिर्यावत् सप्ततिरिति ॥ ३५ ॥

सोलह वर्ष की आयु से लेकर सत्तर वर्ष की अवस्था पर्यन्त मध्य अवस्था होती है उसके भी वृद्धि, यौवन, सम्पूर्णता और हानि ऐसे चार भेद होते हैं। उनमें बीस वर्ष की आयु तक शरीर के अङ्ग-प्रत्यङ्गों के वृद्धि की अवस्था होती है तथा तीस वर्ष तक यौवन एवं चालीस वर्ष तक रस-रक्तादि सर्व धातु, इन्द्रिय, बल और वीर्य इनकी सम्पूर्णता की अवस्था तथा उसके पश्चात् सत्तर वर्ष की आयु तक कुछ २ क्षीणता होने की आयु मानी जाती है ॥ ३५ ॥

विमर्शः—चरक ने शरीर की वृद्धि तीस वर्ष की आयु तक मानी है। विवर्धमानधातुगुणमात्रिंशद्वर्षमुपदिष्टम्। डाक्टरी में शरीर की वृद्धि की मर्यादा पच्चीस वर्ष तक की मानी है तथा यह अस्थि वृद्धि के लिये है। मांसादि अन्य धातुओं की वृद्धि इससे अधिक आयु तक भी होती रहती है। चरक ने मध्यमवय सत्तर के बजाय साठ वर्ष की ही मानी है। 'मध्य पुन पित्तधातुप्रायमाषष्टिवर्षमुपदिष्टम्' ॥

सप्ततेरूर्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते ॥ ३६ ॥

वृद्धावस्था—सत्तर वर्ष के अनन्तर रसरक्तादि धातु, इन्द्रिय, बल, वीर्य और उत्साह ये दिन प्रतिदिन जिसके क्षीण हो रहे हों, चर्म में सलवटें (वली), पलित (बालों का श्वेत होना) और खालित्य (बालों का गिरना = गञ्जापन) से युक्त एवं कास, श्वास आदि उपद्रवों से आक्रान्त, सर्व प्रकार की क्रियाओं में असमर्थ तथा अभिवृष्टि (मेघ वर्षण) से पुराने मकान की तरह जो गिर रहा हो ऐसे मनुष्य को वृद्ध कहते हैं ॥ ३६ ॥

विमर्शः—चरक ने साठ से सौ वर्ष तक वृद्धावस्था मानी है। अतः परं वायुधातुप्राय क्रमेण जीर्णमुच्यते वर्षशतान्तम्। भारतीय शास्त्रज्ञ तथा फ्लोरेन्स आदि पाश्चात्य विद्वान् मनुष्य की आयुमर्यादा १२५ तक की मानते हैं किन्तु इससे अधिक आयु वाले प्राचीन तथा इस समय में भी मिलते हैं।

तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्ति, ऋते च परिहाणेः। तत्राद्यापेक्षया प्रतिकुर्वीत ॥ ३७ ॥

औषधि मात्रा—हीन या वृद्ध अवस्था को छोड़ कर उत्तरोत्तर वर्धमान वयोवस्थाओं में उत्तरोत्तर औषध की मात्रा भी बढती जाती है। वृद्धावस्था में आद्य (बाल) अवस्था की अपेक्षा रोगों का प्रतीकार करना चाहिये ॥ ३७ ॥

विमर्शः—औषधमात्रावृद्धेः क्रम—बालस्य प्रथमे मासि देया भेषजरत्तिका। अवलेहीकृतैर्वैव क्षीरक्षौद्रसिताघृतैः। वर्धयेत्तावदेकैका यावद्भवति वत्सर.। मासैर्वृद्धिस्तदूर्ध्वं स्याद्यावत् षोडशवत्सर ॥ तत स्थिरा भवेत्तावद्यावद्दर्शनं सप्तति. ॥ (शार्ङ्गधर)। विडङ्गफलमात्रन्तु जातमात्रस्य भेषजम्। एतेनैव प्रमाणेन मासि मासि प्रवर्धितम् ॥ कोलास्थिमात्र क्षीरादेर्दद्याद्भैषज्यकोविद । क्षीरान्नादे कोलमात्रामन्नादे दुम्बरोपमम् ॥ (विश्वामित्र)। सत्तर वर्ष के बाद औषध मात्रा धीरे धीरे कम करनी चाहिये। ततो बालकवन्मात्रा ह्रासनीया शनैः शनै.। (शार्ङ्गधर)। प्रायः वृद्ध और बालकों में कई दृष्टि से समता रहती है। Old age is Second Childhood। २० से ६० वर्ष तक की औषधमात्रा को पूर्णमात्रा (Adult dose) कहा जाता है एक वर्ष से बारह वर्ष तक Young's rule (रोगी की आयु में १२ मिला कर उससे आयु को भाग देने पर जो फल मिलता है वह पूर्णमात्रा का अंश है) के अनुसार अथवा Cowling's rule (रोगी की आयु में एक मिला कर उस सख्या को २४ से भाग देने पर जो फल मिलता है उतनी पूर्णमात्रा है) के अनुसार रोगी को देनी चाहिये। १२ से १६ वर्ष तक $\frac{1}{2}$ से $\frac{3}{4}$ और सोलह से बीस वर्ष तक $\frac{3}{4}$ से $\frac{4}{5}$ तक की मात्रा दी जाती है।

भवन्ति चात्र—

बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥ ३८ ॥
अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत्।
तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात् क्रियां शनैः ॥३९॥

बाल्यावस्था में कफ बढता है तथा मध्यमावस्था में पित्त बढता है और वृद्धावस्था में वायु अधिक बढती है अत एव इन दोषादिकों का तथा वय का विचार कर भेषज की कल्पना करनी चाहिये। अग्निकर्म, क्षारकर्म और विरेचनकर्म बालक और वृद्धों के लिये वर्जित है किन्तु बालक और वृद्धों के रोग अग्नि, क्षार, विरेककर्म से ही साध्य हो तो मृदु ओषधियों के प्रयोग से वह कर्म करना चाहिये ॥ ३८-३९ ॥

विमर्श.—मृद्वी क्रिया—बकरी की भीगणी आदि मृदुद्रव्यसंश्रित अग्नि, मृदुक्षार तथा गुलाब के पुष्प, मुनक्का अमलतास के गुद्दे आदि मृदु द्रव्यों का विरेचन देना चाहिये।

देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः ॥ ४० ॥

स्थूल, कृश और मध्य ऐसे देह के तीन भेद पंद्रहवें अध्याय में कह आये हैं ॥ ४० ॥

कर्शयेद् बृंहयेच्चापि सदा स्थूलकृशौ नरौ।
रक्षणञ्चैव मध्यस्य कुर्वीत सततं भिषक् ॥ ४१ ॥

सर्वदा स्थूल देह का कर्षण, कृश देह का बृहण और मध्य देह का संरक्षण निरन्तर करते रहना चाहिये ॥ ४१ ॥

बलमभिहितगुणं, दौर्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम्। यस्माद्बलवतः सर्वक्रियाप्रवृत्तिस्तस्माद्बलमेव प्रधानमधिकरणानाम् ॥ ४२ ॥

बल के गुणों का वर्णन पन्द्रहवें अध्याय में हो चुका है। दौर्बल्य का विचार स्वभाव, वातादि दोष तथा वृद्धावस्था आदि से करना चाहिये। चिकित्सा की सर्व क्रियाओं की प्रवृत्ति बलवान् रोगी के लिये ही लाभदायिनी हो सकती है अतः चिकित्सा के अधिकरणों (आधारों) में रोगी का बल ही प्रधान है ॥ ४२ ॥

केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः।
तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत् ॥ ४३ ॥

कुछ दुर्बल मनुष्य भी बलवान् होते हैं तथा स्थूल आदमी अल्प बल वाले होते है इसलिये देह की स्थिरता (दृढत्व) और व्यायाम से वैद्य बल की तर्कणा (अनुभव) करे ॥ ४३ ॥

सत्त्वं तु व्यसनाभ्युदयक्रियाऽऽदिस्थानेष्वविक्लवकरम् ॥

सत्त्वगुण व्यसन और अभ्युदय तथा छेद्य-भेद्यादि शस्त्रकर्म के समय मनुष्य को विक्लवित (दुःखी) नहीं होने देता है ॥

विमर्शः—दुःखेष्वनुद्विग्नमना सुखेषु विगतस्पृह । वीतरागभयक्रोध' स्थितधीर्मुनिरुच्यते ॥

सत्त्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना ।
राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः ॥ ४५ ॥

सत्त्वगुण वाला मनुष्य स्वयं आत्मबल से आत्मा या मन को दृढ कर के शारीरिक तथा मानसिक सर्व प्रकार के दुःखों को सहन करता है। रजोगुणी मनुष्य दूसरों से सहारा मिलने पर दुःखों को सहन करता है किन्तु तामसी मनुष्य किसी तरह से भी दुःख को सहन नहीं कर सकता है ॥ ४५ ॥

सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति ॥ ४६ ॥

सात्म्य भाव वे हैं जो देश, काल, जाति, ऋतु, रोग, व्यायाम, जल, दिवाशयन आदि प्रकृति विरुद्ध होने पर भी बाधा पहुचाने वाले नहीं होते हैं ॥ ४६ ॥

यो रसः कल्पते यस्य सुखायैव निषेवितः ।
व्यायामजातमन्यद्वा तत् सात्म्यमिति निर्दिशेत् ॥४७॥

जो सेवन किया हुआ मधुर-लवणादि रस, व्यायाम अथवा अन्य पदार्थ जिस के लिये सुखकारी होता है उसे 'सात्म्य' कहते हैं ॥ ४७ ॥

विमर्शः—सात्म्यम्-सह आत्मना भवतीति सात्म्यम् । सात्म्य नाम तत् यदात्मन्युपशेते । सात्म्य नाम तत् यत् सातत्येनोपसेव्यमानमुपशेते । (चरक) । सात्म्यभेद—जातिसात्म्य-सलिलघृतदुग्धौदनप्रभृतीनि । ऋतुसात्म्य स्वस्थवृत्तोक्तम् ऋतुसात्म्यम् । देशसात्म्य-देशानामामयाना च विपरीतगुण गुणे । सात्म्यमिच्छन्ति सात्म्यशश्चेष्टित चाधमेव च ॥ (चरक) । रोगसात्म्यम्—उपशयो हेतुव्याधिविपरीतैर्विपरीतार्थकारिभिश्चौषधाहारविहारै सुखानुबन्ध । स हि व्याधिसात्म्यसज्ञ । (अ० सं०) । व्यायामसात्म्य—शरीरमनःसुखकरचेष्टा । उदकसात्म्यम्, निद्रासात्म्य—निद्रा सात्म्यीकृता यैस्तु रात्रौ च यदि वा दिवा । न तेषा स्वपता दोषो जाग्रताञ्चोपजायते ॥

प्रकृतिं भेषजं चोपरिष्टाद्व्याख्यामः ॥ ४८ ॥

शारीर स्थान के चतुर्थ अध्याय में प्रकृति और सूत्रस्थान के अन्तिम अध्याय में भेषज का वर्णन किया गया है ॥ ४८ ॥

देशस्त्वानूपो जाङ्गलः साधारण इति । तत्र, बहूदकनिम्नोन्नतनदीपर्वतवृक्षो मृदुशीतानिलो बहुमहापर्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चानूपः ॥ ४९ ॥

भूमिभेद—आनूप, जाङ्गल और साधारण ऐसे कर के देश तीन तरह का होता है। उनमें से जहां जल अधिक वर्षता हो या भरा रहता हो या भूमि में खोदने पर पास ही निकलता हो, पृथ्वी अधिक नीची और ऊंची हो, नदी नाले अधिक हों, वर्षा अधिक होती हो, पवन कोमल और शीतल चलता हो, पर्वत और वृक्ष ये अधिक संख्या में तथा बड़े बड़े हों, जहां अधिक सख्य पुरुष और स्त्री कोमल अंग वाले, सुकुमार और हृष्ट पुष्ट शरीर वाले हों और जहां कफ तथा वायु के रोग अधिक होते हों उसे 'आनूपदेश' कहते हैं ॥

आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः । उभयदेशलक्षणः साधारण इति ॥ ५० ॥

जो देश आकाश की तरह ऊंचाई तथा नीचाई से रहित हो कर सम हो, जहां अत्यन्त विरल, छोटे और कांटेदार वृक्ष हों, पानी कम बरसता हो तथा झरने, कूप, बावड़ी आदि में भी पानी कम हो एवं गरम और तेज हवा चलती हो, जहां छोटे छोटे पहाड़ किसी किसी जगह स्थित हों, जहां के मनुष्य अधिकतर दृढ और कृश शरीर वाले हों एवं जहां वायु तथा पित्त के रोग अधिक होते हों उसे 'जाङ्गल देश' कहते हैं। जहां दोनों के लक्षण मिलते हों उसे 'साधारण देश' कहते हैं ॥५०॥

भवन्ति चात्र ।

समाः साधारणे यस्माच्छीतवर्षोष्ममारुताः ।
दोषाणां समता जन्तोस्तस्मात्साधारणो मतः ॥ ५१ ॥

क्योंकि जहां शीत, वर्षा, गरमी और हवा ये समान रहते हों तथा मनुष्यों के वातादि दोष भी समानावस्था में रहते हों उसे उस कारण से 'समान देश' माना है ॥ ५१ ॥

न तथा बलवन्तः स्युर्जलजा वा स्थलाहृताः ।
स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः ॥५२॥
उचिते वर्तमानस्य नास्ति देशकृतं भयम् ।
आहारस्वप्नचेष्टाऽऽदौ तद्देशस्य गुणे सति ॥ ५३ ॥

अपने देश में इकट्ठे हुये दोष अन्य देश में कुपित होनेपर उतने बलवान् नहीं होते हैं जैसे कि जल में रहने वाले जीव स्थल (पृथ्वी) पर बलवान् नहीं होते हैं। आहार, निद्रा और व्यायामादि चेष्टा आदि में उचित रूप से आचरण करने वाले मनुष्य के लिये देश के गुण होने पर भी देशजन्य रोगादिभय नहीं रहता है ॥ ५२-५३ ॥

विमर्श.—ये श्लोक जल-वायुचिकित्सा (Climatic treatment) का वर्णन करते हैं। दोष अन्य स्थान में कुपित होने से अधिक बलवान् नहीं होते हैं जैसे नक्र अपने स्थान (जल) में रह कर हाथी को भी खींच लेता है किन्तु स्थल पर आने से कुत्ते से भी डर जाता है। नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति। स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥ आनूपोचित. कफः अन्यस्मिन् विरुद्धगुणदेशे यथा जाङ्गलदेशे कुपित कफो बलवान् न भवति। चिकित्सा की सुकरता या रोगसाध्यता के लिये भी काल, देशादि रोग के समान गुणधर्मी नहीं होना श्रेष्ठ माना है। न च कालगुणस्तुल्यो न देशो दुरुपक्रमः। (चरक)। देशप्रकृतिसात्म्यर्तुविपरीतोऽचिरोत्थितः। (सुश्रुत)। अतुल्यदूष्यदेशर्तुप्रकृति पादसम्पदि। (वाग्भट)।

देशप्रकृतिसात्म्यर्तुविपरीतोऽचिरोत्थितः ।
सम्पत्तौ भिषगादीनां बलसत्त्वायुषां तथा ॥ ५४ ॥

केवलः समदेहाग्नेः सुखसाध्यतमो गदः।
अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्यामिश्रलक्षणः॥

साध्यासाध्यता—देश, प्रकृति, सात्म्य और ऋतु के विपरीत तथा चिरकाल से नहीं उत्पन्न हुआ (नवीन) एवं भिषक्, औषध आदि की सुसम्पत्ति तथा बल, सत्त्व और आयु से भी समृद्ध केवल (उपद्रवरहित), समान देह और पाचकाग्नि वाले रोगी का रोग अतीव 'सुखसाध्य' होता है किन्तु इन लक्षणों से विपरीत लक्षण वाला रोग 'असाध्य' होता है और मिश्रित लक्षणों वाला रोग 'कृच्छ्र साध्य' होता है॥ ५४-५५॥

विमर्शः—देशविपरीत-जाङ्गल देश में कफरोग, प्रकृति विपरीत-पित्त प्रकृति के मनुष्य में कफरोगोत्पत्ति, सात्म्यविपरीत-कटुसात्म्य मनुष्य में कफरोग, ऋतु विपरीत-शरद् ऋतु में वातरोग, एवं दूष्य विपरीत रोग 'सुखसाध्य' होते हैं। कहीं कहीं तुल्य दूष्यादिक सुखसाध्यता के जनक होते हैं-ज्वरे तुल्यर्तुदोषत्व प्रमेहे तुल्यदूष्यता। नवीन रोग भी सुखसाध्य होते हैं किन्तु रक्तगुल्म पुराना होने पर ही सुखसाध्य होता है—रक्तगुल्मे पुराणत्व सुखसाध्यस्य लक्षणम्। आयुःसम्पत्तौ-यस्यायुस्तस्य सिद्ध्यन्ति न सिद्ध्यन्ति गतायुषि। समदेहे-सममासप्रमाणस्तु समसहननो नरः। दृढेन्द्रियत्वाद् व्याधीनां न बलेनाभिभूयते॥ क्षुत्पिपासातपसहः शीतव्यायामसहः। समपक्ता समजरः सममासचयो मतः॥ (चरक)

क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः॥ ५६॥

एकक्रिया (वमन, विरेचनादि में से कोई एक अथवा रसभस्म-घृत-तैलासव-अवलेहादि चिकित्सा में से एक) के द्वारा गुणलाभ (रोग नाश) न होने पर उस क्रिया के वेग के शान्त हो जाने पर दूसरी क्रिया करनी चाहिये किन्तु दोनों क्रियाओं का सहप्रयोग कर साङ्कर्य उत्पन्न करना ठीक नहीं है॥ ५६॥

गुणालाभेऽपि सपदि यदि सैव क्रिया हिता।
कर्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि॥ ५७॥

क्रिया के परिवर्तन करने से भी यदि रोग ठीक होने रूपी गुण का लाभ प्रतीत नहीं हो तथा रोग भी अत्यन्त कृच्छ्र साध्य हो और उसमें पूर्व क्रिया शास्त्र और अनुभव प्रमाणों से हितकारी ज्ञात होती हो तो उसी को ही कुछदिन तक प्रारम्भ करनी चाहिये॥ ५७॥

विमर्श—प्रायः सगे सम्बन्धियों के बहकाने से एवं रोग के पुराना होने से २-४ दिन औषध लेने पर लाभ नहीं दीखने से लोग औषधपरिवर्तन में उतावलापन करते हैं इस लिये कम से कम ऐसे रोगों में एक औषध का प्रभाव सात दिन तक अवश्य देखना चाहिये। 'यस्या अपि फल न दृश्यते साऽपि सप्तरात्र प्रतिकर्तव्या।' (डल्हण)

य एवमेनं विधिमेकरूपं
बिभर्त्ति कालादिवशेन धीमान्।
स मृत्युपाशान् जगतो गदौघान्
छिनत्ति भैषज्यपरश्वधेन॥ ५८॥

इति सुश्रुतसंहितायां सूत्रस्थाने आतुरोपक्रमणीयो नाम पञ्चत्रिंशोऽध्यायः॥ ३५॥

जो बुद्धिमान चिकित्सक ऋत्वग्निसात्म्यादि का ठीक विचार करके उक्त प्रकार की मुख्य विधि को चिकित्सा करते समय शास्त्रानुसार व्यवहार में लाता है वह मृत्यु के पाश (फन्दे) तुल्य ससार के रोगसमूहों को भैषज्यरूपी कुठार से नष्ट कर देता है॥ ५८॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने आतुरोपक्रमणीयो नाम पञ्चत्रिंशत्तमोऽध्यायः॥ ३५॥

षट्त्रिंशत्तमोऽध्यायः।

अथातो मिश्रकमध्यायं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

अब इसके अनन्तर 'मिश्रक' नामक अध्याय का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था॥ १-२॥

मालुलुङ्गाग्निमन्थौ च भद्रदारुमहौषधम्।
अहिंस्रा चैव रास्ना च प्रलेपो वातशोफजित्॥ ३॥
दूर्वा च नलमूलञ्च मधुकं चन्दनं तथा।
शीतलाश्च गणाः सर्वे प्रलेपः पित्तशोफहृत्॥ ४॥
आगन्तुजे रक्तजे च ह्येष एव विधिः स्मृतः।
विधिर्विषघ्नो विषजे पित्तघ्नोऽपि हितस्तथा॥ ५॥
अजगन्धाऽश्वगन्धा च काला सरलया सह।
एकैषिकाऽजशृङ्गी च प्रलेपः श्लेष्मशोफहृत्॥ ६॥
एते वर्गास्त्रयो लोध्रं पथ्या पिण्डीतकानि च।
अनन्ता चेति लेपोऽयं सन्निपातकशोफहृत्॥ ७॥

विजोरा निम्बू, अरणी, देवदारु, सोंठ, अहिंस्रा, रास्ना इनका प्रलेप 'वातिक शोफ' को नष्ट करता है। दूर्वा, नरसल की जड़, मुलेठी, लालचन्दन तथा अन्य शीतलगण की ओषधियों का लेप 'पैत्तिक शोफ' को नष्ट करता है। 'आगन्तुकशोफ' तथा 'रक्तदुष्टिजन्य शोफ' में भी यही विधि कही गई है। 'विषजन्य शोफ' में विष को नष्ट करने वाली ओषधियों का लेप तथा पित्तनाशक विधि हितकारक होती है। जङ्गली अजवायन, असगन्ध, मजीठ, लाल निशोथ, सफेद निशोथ, अजशृङ्गी (काकडासिंगी या मेढासिङ्गी) इनका लेप 'कफजन्य शोफ' को नष्ट करता है। ये उपर्युक्त तीनों दोषों के लिये प्रयुक्त हुये तीनों वर्गों के द्रव्य तथा पठानी लोध, हरड, मदनफल और अनन्तमूल (सालसा) इनका लेप 'सान्निपातिक शोफ' को नष्ट करता है॥ ३-७॥

विमर्शः—कषायलेपयो प्रायो युज्यते रक्तचन्दनम्। शीतल गण से काकोल्यादि, उत्पलादि और न्यग्रोधादिगण समझें।

स्निग्धाम्ललवणो वाते कोष्णः, शीतः पयोयुतः।
पित्ते, चोष्णः कफे क्षारमूत्राढ्यस्तत्प्रशान्तये॥ ८॥

वातिक शोथ में स्निग्ध, अम्ल और लवण युक्त तथा कुछ कुछ गरम लेप लगाना चाहिये। पैत्तिक शोफ में दुग्ध के साथ पीसा हुआ तथा शीत लेप लगाना चाहिये। कफजन्य शोथ में क्षार और गोमूत्र युक्त गरम लेप लगाना चाहिये ॥८॥

शणमूलकशिग्रूणां फलानि तिलसर्षपाः।
शक्तवः किण्वमतसी द्रव्याण्युष्णानि पाचनम् ॥ ९ ॥

पाचन—शण, मूली और सहजने के बीज, तिल, सरसों, सत्तू, सुराबीज, अलसी तथा अन्य उष्ण पदार्थों का व्रण शोफ में पाचन करता है ॥ ९ ॥

विमर्शः—सक्तु-यवतण्डुलाजादिचूर्णे सक्तु प्रकीर्तितः।

चिरबिल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतगृध्रकङ्काणां पुरीषाणि च दारणम्।
क्षारद्रव्याणि वा यानि क्षारो वा दारणं परम् ॥ १० ॥

दारण—बड़ा करञ्ज, भिलावा, दन्ती की जड, चित्रक की छाल, कनेर की जड, कबूतर, गीध और कंक इनकी वीट, इन्हें पीस कर लेप करने से शोथ का दारण होता है अथवा मुष्कक-कुटज-पलाशादि क्षारद्रव्य या केवल क्षार ये अत्यन्त दारण करने वाले हैं ॥ १० ॥

द्रव्याणां पिच्छिलानां तु त्वङ्मलानि प्रपीडनम्
यवगोधूमसमाषाणां चूर्णानि च समासतः ॥ ११ ॥

पीडन—पिच्छिल द्रव्यों की छाल या जड और जौ, गेहूँ तथा उडदी इनका चूर्ण ये समास (संक्षेप) से व्रणों के पीडन द्रव्य हैं ॥ ११ ॥

विमर्शः—सेमल, लिसोडा, वैर, नागबला ये पिच्छिल द्रव्य हैं। पीडन द्रव्यों को पीस कर व्रणशोथ पर लेप करने पर जब वह सूखता है तब खिंचाव उत्पन्न होने से पूय बाहर निकलता है। पूयगर्भानणुद्वारान् व्रणान् मर्मगतानपि। यथोक्तैः पीडनद्रव्यैः समन्तात् परिपीटयेत्॥ शुष्यमाणमुपेक्षेत प्रदेहं पीडनम्प्रति। न चाभिमुखमालिम्पेत्तथा दोष प्रसिच्यते॥

शङ्खिन्यङ्कोठसुमनःकरवीरसुवर्चलाः।
शोधनानि कषायाणि वर्गश्चारग्वधादिकः ॥ १२ ॥

'शोधन कषाय'—द्रव्यों में शंखिनी, अंकोठ, मालती, कनेर, सूर्यमुखी तथा आरग्वधादि गण की ओषधियां प्रमुख है॥

विमर्शः—कषाय, वर्ति, कल्क, घृत, तैल, रसक्रिया, अवचूर्णन और धूपन ऐसे आठ प्रकार से व्रणों का शोधन करते हैं।

अजगन्धाऽजशृङ्गी च गवाक्षी लाङ्गलाह्वया।
पूतीकश्चित्रकः पाठा विडङ्गैलाहरेणवः ॥ १३ ॥
कटुत्रिकं यवक्षारो लवणानि मनःशिला।
कासीसं त्रिवृता दन्ती हरितालं सुराष्ट्रजा ॥ १४ ॥
संशोधनीनां वर्त्तीनां द्रव्याण्येतानि निर्दिशेत् ॥
एतैरेवौषधैः कुर्यात्कल्कानपि च शोधनान् ॥ १५ ॥

अजगन्धा, काकडासिङ्गी, इन्द्रवारुणी, कलिहारी, बडा करञ्ज, चित्रक की छाल, पाठा, वायविडंग, बड़ी इलायची, हरेणुका, सोंठ, मरिच, पिप्पली, यवक्षार, सैन्धव सामुद्रादि पांचो लवण, मैनसिल, कासीस, निशोथ, दन्ती, हरताल, फिठकरी, ये 'संशोधन' करने वाली वर्ति के द्रव्य हैं तथा इन्ही द्रव्यों से ही शोधन के लिये कल्क बनाना चाहिये ॥ १३-१५॥

कासीसकटुरोहिण्योर्जातीकन्दहरिद्रयोः।
पूर्वोद्दिष्टेषु चाङ्गेषु कुर्यात्तैलघृतानि वै ॥ १६ ॥

कासीस, कुटकी, चमेली की जड और हलदी इनके क्वाथ और कल्क से तैल और घृत पकाकर शोधन के लिये प्रयुक्त करें॥

अर्कोत्तमां स्नुहीक्षीरं पिष्ट्वा क्षारोत्तमानपि।
जातीमूलं हरिद्रे द्वे कासीसं कटुरोहिणीम्॥
पूर्वोद्दिष्टानि चान्यानि कुर्य्यात् संशोधनं घृतम् ॥१७॥

आक की जड़, त्रिफला, थूहर का दुग्ध, मुष्कक, पलाश आदि श्रेष्ठ क्षार, चमेली की जड़, हरिद्रा, दारुहरिद्रा, कासीस, कुटकी, एवं पूर्व के श्लोक में कहे हुये अजगन्धादि द्रव्य लेकर कल्क बना के यथाविधि संशोधन घृत सिद्ध कर लेना चाहिये॥

मयूरको राजवृक्षो निम्बः कोशातकी तिलाः ॥ १८ ॥
बृहती कण्टकारी च हरितालं मनःशिला।
शोधनानि च योज्यानि तैले द्रव्याणि शोधने ॥१९॥

अपामार्ग, अमलतास, निम्ब की छाल, कडवी तरोई, तिल, बडी कण्टकारी, छोटी कण्टकारी, हरताल, मैनसिल तथा अन्य शोधनवर्ति के द्रव्यों का कल्क बना कर यथाविधि शोधन तैल सिद्ध कर लेना चाहिये ॥ १८-१९ ॥

कासीसे सैन्धवे किण्वे वचायां रजनीद्वये।
शोधनाङ्गेषु चान्येषु चूर्णं कुर्वीत शोधनम् ॥ २० ॥

कासीस, सैन्धव लवण, सुराबीज, वचा, हरिद्रा और दारुहरिद्रा तथा अन्य शोधन द्रव्यों को लेकर खांड कूट के शोधन चूर्ण बना लेवें ॥ २० ॥

सालसारादिसारेषु पटोलत्रिफलासु च।
रसक्रिया विधातव्या शोधनी शोधनेषु च ॥ २१ ॥

रसक्रिया शालसारादि गण के द्रव्य, पटोल, त्रिफला तथा अन्य शोधक द्रव्य लेकर व्रणशोधनार्थ रसक्रिया करनी चाहिये ॥ २१ ॥

श्रीवेष्टके सर्जरसे सरले देवदारुणी।
सारेष्वपि च कुर्वीत मतिमान् व्रणधूपनम् ॥ २२ ॥

धूपनद्रव्य—श्रीवेष्टक, राल, सरल के पेड की छाल, देवदारु तथा अन्य सालसारादि गण की ओषधियों का चूर्ण बना कर उससे 'व्रणधूपन' करना चाहिये ॥ २२ ॥

कषायाणामनुष्णानां वृक्षाणां त्वक्षु साधितम्।
श्रृतं शीतं कषायं वा रोपणार्थेषु शस्यते ॥ २३ ॥

रोपण द्रव्य—शीतवीर्य तथा कसैले वृक्षों की छाल से सिद्ध किया हुआ क्वाथ अथवा शीत कषाय व्रणरोपण के लिये श्रेष्ठ है॥

शीतकषायः—द्रव्यादापोथितात्तोये तत्पुनर्निशि संस्थितात्। कषायो योऽभिनिर्याति स शीतः समुदाहृतः॥

सोमामृताऽश्वगन्धासु काकोल्यादौ गणे तथा।
क्षीरिप्ररोहेष्वपि च वर्तयो रोपणाः स्मृताः ॥ २४ ॥

सोम, गिलोय, असगन्ध, काकोल्यादि गण की ओषधियां और वट, पीपल आदि क्षीरीवृक्षों की जटा के प्ररोह (अङ्कुर) इनके कल्क से लिप्त कर रुई या गाज की बनाई हुई बत्तियां व्रण में रखने से उसका रोपण करती हैं ॥ २४ ॥

विमर्श—क्षीरिणो वृक्षाः—अश्वत्थोदुम्बरप्लक्षवटपिप्पलसंज्ञिता । पञ्चैते क्षीरिणो वृक्षाः समाख्याता विचक्षणैः ॥

समङ्गा सोमसरला सोमवल्कः सचन्दनः ।
काकोल्यादिश्च कल्कः स्यात् प्रशस्तो व्रणरोपणे ॥२५॥

मजीठ अथवा लज्जालु, सोम, सरलकाष्ठ, श्वेतखदिर, लाल चन्दन और 'काकोल्यादि गण' की ओषधियों का कल्क व्रण-रोपण के लिये श्रेष्ठ है ॥ २५ ॥

पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता ।
काकोल्यादिश्च योज्यः स्यात् भिषजा रोपणे घृते ॥२६॥

पृश्निपर्णी, कौंच के बीज, हलदी, दारुहलदी, चमेली, मिश्री तथा 'काकोल्यादिगण' की ओषधियों के द्रव्य रोपण घृत सिद्ध करने के लिये प्रयुक्त करे ॥ २६ ॥

कालानुसार्व्यागुरुणी हरिद्रे देवदारु च ।
प्रियङ्गवश्च रोध्रश्च तैले योज्यानि रोपणे ॥ २७ ॥

तगर, अगुरु, हरिद्रा, दारुहरिद्रा, देवदारु, फूलप्रियङ्गु, पठानी लोध इन द्रव्यों को रोपण तैल सिद्ध करने में प्रयुक्त करें।

कङ्गुका त्रिफला रोध्रं कासीसं अवणाह्वया ।
धवार्जकर्णयोस्त्वक् च रोपणं चूर्णमिष्यते ॥ २८ ॥
प्रियङ्गुका सर्जरसः पुष्पकासीसमेव च ।
त्वक्चूर्णं धवजं चैव रोपणार्थं प्रशस्यते ॥ २९ ॥

कङ्गुधान्य, त्रिफला, पठानी लोध, कासीस, गोरखमुण्डी, धव तथा राल वृक्ष की छाल इनका चूर्ण व्रणरोपण करता है। प्रियङ्गु, राल, पुष्पकासीस, धववृक्ष की छाल इनका चूर्ण व्रण रोपण के लिये श्रेष्ठ है ॥ २८-२९ ॥

त्वक्षु न्यग्रोधवर्गस्य त्रिफलायास्तथैव च ।
रसक्रियां रोपणार्थे विदधीत यथाक्रमम् ॥ ३० ॥

'न्यग्रोधादिगण' के वृक्षों की छाल तथा त्रिफला इनसे 'द्विव्रणीयोक्त विधि' के अनुसार व्रणरोपणार्थ 'रसक्रिया' करनी चाहिये।

अपामार्गोऽश्वगन्धा च तालपर्णी सुवर्चला ।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः ॥ ३१ ॥

उत्सादन द्रव्य—आंधी झाडा, असगन्ध, मुसली, ब्राह्मी अथवा सूर्यभक्ता तथा काकोल्यादि गण की ओषधियों के द्रव्य व्रण के उत्सादन के लिये उत्तम हैं ॥ ३१ ॥

कासीसं सैन्धवं किण्वं कुरुविन्दो मनःशिला ।
कुक्कुटाण्डकपालानि सुमनोमुकुलानि च ॥ ३२ ॥
फले शैरीषकारञ्जे धातुचूर्णानि यानि च ।
व्रणेपूत्सन्नमांसेषु प्रशस्तान्यवसादने ॥ ३३ ॥

कासीस, सैन्धव लवण, सुरावीज, पद्मराग, मैनसिल, मुर्गी के अण्डे की छाल (कवच), चमेली के पुष्पों की कलियां, शिरीष और करञ्ज के फल तथा हरतालादि अन्य धातुओं के चूर्ण उत्सन्न (अतिवृद्ध) मांसाङ्कुर वाले व्रणों के अवसादन (नष्ट) करने के लिये 'उत्सादन विधि' में श्रेष्ठ हैं ॥ ३२-३३ ॥

समस्त वर्गमर्द्धं वा यथालाभमथापि वा ।
प्रयुञ्जीत भिषक् प्राज्ञो यथोद्दिष्टेषु कर्मसु ॥ ३४ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने मिश्रकाध्यायो नाम षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥

बुद्धिमान् वैद्य व्रण के विस्रापनादि कर्म के लिये यथोद्दिष्ट समस्त वर्ग की ओषधियाँ या अर्ध ओषध जो भी प्राप्त हो सके उनका प्रयोग करे ॥ ३४ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां मिश्रकाध्यायो नाम षट्त्रिंशत्तमोऽध्यायः ॥३६॥

सप्तत्रिंशत्तमोऽध्यायः।

अथातो भूमिप्रविभागीयमध्यायं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'भूमिप्रविभागीय नामक' अध्याय का व्याख्यान करेंगे जैसा कि भगवान् धन्वन्तरि ने श्रुसुत के लिये कहा था ॥ १-२ ॥

विमर्श—वर्षाशीतोष्णादि महाभूतकार्य की दृष्टि से तथा महाभूत गुणदृष्टि से भूमि की परीक्षा करते हैं जिससे ओषधियों के गुणधर्म, इनकी उत्तमता, हीनता तथा रोगिपरिज्ञान में सहायता होती है। 'तत्र भूमिपरीक्षा आतुरपरिज्ञानहेतोर्वा स्यादौषधपरिज्ञानहेतोर्वा' (चरक)

श्वभ्रशर्कराऽश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिकताभिरनुपहतामनुपरामभङ्गुरामदूरोदकां स्निग्धां प्ररोहवतीं मृदुं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत ॥ ३ ॥

श्वभ्र (खड्डे, बिल), कंकड, पत्थर, निम्नोन्नता, वल्मीक, श्मशान, फांसी देने का स्थान, देवता का स्थान तथा बालू से रहित हो, ऊपर (नोनिया या क्षारयुक्त) न हो, भङ्गुर (फटने वाली) न हो, जिसमें खोदने पर जल ज्यादा दूर (नीचे) न हो, चिकनी हो, दूर्वा, घास आदि उगता रहता हो, जो मुलायम, स्थिर और समतल हो, जो काले, सफेद और रक्तवर्ण की हो उसकी ओषधि को उखाडने के लिये परीक्षा करनी चाहिये

तस्यां जातमपि कृमिविषशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढमूलमुदीच्यास्त्रौषधमाददीतेत्येष भूमिपरीक्षाविशेषः सामान्य ॥४॥

उपर्युक्त लक्षणों वाली भूमि में उत्पन्न हुई औषध भी कृमि के द्वारा नहीं खाई गई हो, विष, शस्त्र, धूप, वायु, अग्नि, जल तथा अन्य बाधाओं से और रास्ते में होने से नष्ट नहीं हुई हो, तथा उत्तम एक रस से युक्त हो, पुष्ट हो, जिसकी जड़ भूमि में गहराई तक गई हुई हो ऐसी औषध को उत्तर की ओर बैठ कर ग्रहण करे। यह साधारणतया औषध और भूमि की विशेष परीक्षा है ॥ ४ ॥

विशेषतस्तु तत्र, अश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्याप्राया स्वगुणभूयिष्ठा। स्निग्धा शीतलाऽऽसन्नोदका स्निग्धसस्यतृणकोमलवृक्षप्राया शुक्लाऽम्बुगुणभूयिष्ठा। नानावर्णा लघ्वश्मवती प्रवि-

रलाल्पपाण्डुवृक्षप्ररोहा अग्निगुणभूयिष्ठा। रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्राया अनिलगुणभूयिष्ठा। मृद्वी समा स्वभ्रवत्यव्यक्तरसजला सर्वतोऽसारवृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा॥ ५॥

विशेषरूप से जो पत्थर वाली, स्थिर, भारी, श्याम अथवा काले रंग की एवं बड़े बड़े पेड़ तथा घास वाली भूमि अपने पार्थिव गुणों से युक्त होती है। जो चिकनी, ठंडी, थोड़ी गहराई पर खोदने से जल वाली तथा जिसमें मुलायम धान्य और घास पैदा होता हो प्रायः कोमल वृक्ष हों और श्वेत वर्ण की मिट्टी हो वह जल के शीतस्निग्धादि प्रचुर गुणों से युक्त होती है। एवं जो अनेक वर्ण की छोटे छोटे पत्थरों वाली, कहीं कहीं छोटे छोटे सफेद रङ्ग के वृक्ष और तृणाङ्कुरों से युक्त हो वह भूमि आग्नेय तत्त्व प्रधान वाली होती है। जो रूक्ष हो, भस्म अथवा गदहे के समान धूसर वर्ण की हो, जिसमें छोटे छोटे और रूक्ष तथा कोटरयुक्त और अल्प रस वाले वृक्षों की बहुलता हो वह वायुगुण प्रधान भूमि होती है। जो मुलायम, समतल, बिल (गढे) युक्त हो तथा जहां रस और जल अल्प होने से प्रकट नहीं होता हो जहां चारों ओर सारहीन बड़े २ वृक्ष हों एवं जहां बड़े २ पर्वत हों और जिसकी मिट्टी श्याम हो वह भूमि आकाशगुण प्रधान होती है॥ ५॥

अत्र केचिदाहुराचार्याः—प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्यादद्दीतेति। तत्तु न सम्यक्, सौम्याग्नेयत्वाज्जगतः। सौम्यान्यौषधानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते। एतेन शेषं व्याख्यातम्॥ ६॥

अनेक आचार्यों का कथन है कि प्रावृट् (वर्षा के आदि काल) में वनस्पतियों या ओषधियों की जड़ें, वर्षा ऋतु में पत्र, शरद् ऋतु में छाल, हेमन्त ऋतु में दुग्ध, वसन्त ऋतु में सार और ग्रीष्म ऋतु में फलों का ग्रहण (सञ्चय) करना चाहिये किन्तु यह मत ठीक नहीं है क्योंकि जगत् सौम्य (जलीय या कफ तत्त्व प्रधान) तथा आग्नेय (अग्नि या पित्त तत्त्व प्रधान) होता है इस लिये सौम्य (शीतवीर्य अथवा बल या कफ गुण प्रधान) ओषधियों को सौम्य (दक्षिणायन सूर्य होने पर) ऋतुओं में तथा अग्नि गुण प्रधान (उष्णवीर्य) ओषधियों को आग्नेय (उत्तरायण सूर्य होने पर) ऋतुओं में ग्रहण करनी चाहिये। इस प्रकार सञ्चय करने से ओषधियां अविकृत गुणोंवाली होती हैं। सौम्य ओषधियों को सौम्य ऋतुओं में ग्रहण की जाय तथा सौम्य भूमि में वे उत्पन्न हुई हों तो वे अत्यन्त मधुर रस वाली, स्निग्ध तथा अतीव शीतवीर्य प्रधान होती हैं। इसी प्रकार आग्नेय ओषधियों की भी व्यवस्था समझ लेनी चाहिये॥ ६॥

तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्यादद्दीत; अग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि। उभयगुणभूयिष्ठायामुभयतोभागानि। आकाशगुणभूयिष्ठायां संशमनानि। एवं बलवत्तराणि भवन्ति॥ ७॥

✓पृथिवी और जलगुण भूयिष्ठ भूमि में उत्पन्न हुई विरेचक ओषधियों को ग्रहण करना चाहिये। अग्नि, आकाश तथा वायु गुण भूयिष्ठ भूमि में उत्पन्न हुई वामक ओषधियों का सञ्चय करना चाहिये। उभय गुण भूयिष्ठ भूमि में उत्पन्न हुई उभय गुण अर्थात् वमन और विरेचन कर्म करने वाली ओषधियों का सञ्चय करना चाहिये। आकाश गुण भूयिष्ठ भूमि में उत्पन्न हुई संशमन करने वाली ओषधियों का सञ्चय करना चाहिये। इस प्रकार की भूमि से और उचित उक्त समय में सञ्चित की हुई ओषधियां अपने अपने गुणों में अधिक बलवती होती हैं॥ ७॥

सर्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविडङ्गेभ्यः॥ ८॥

✓सर्व प्रकार के औषध द्रव्य नूतन ही ग्रहण करने चाहिये किन्तु शहद, घृत, गुड, पिप्पली और वायविडङ्ग इन्हें सदा पुराने होने पर ग्रहण करें॥ ८॥

विडङ्गं पिप्पली क्षौद्रं सर्पिश्चाप्यनवं हितम्।
शेषमन्यत्त्वभिनवं गृह्णीयादोषवर्जितम्॥ ९॥

इस विषय में कहा भी है—कि विडङ्ग, पिप्पली, शहद और घृत ये पुराने हितकारी होते हैं किन्तु अन्य द्रव्यों को दोषों से रहित तथा नवीन रूप में ही ग्रहण करे॥ ९॥

विमर्शः—निम्न द्रव्य सदा ताजे या गीले ही ग्रहण करें। गुडूची कुटजो वासा कूष्माण्डश्च शतावरी। अश्वगन्धा सहचरी शङ्खपुष्पी प्रसारिणी॥ प्रयोक्तव्या सदैवार्द्रा (शार्ङ्गधर)। निम्न द्रव्य सदा गीले तथा योगोक्त प्रमाण में ही ग्रहण करें अर्थात् आर्द्रद्रव्य सदा द्विगुण गृहीत होते हैं किन्तु इन्हें द्विगुण न लें—वासानिम्बपटोलकेतकबलाकूष्माण्डकेन्दीवरी, वर्षाभूकुटजाश्च नन्दसहिताः सा पूतिगन्धामृता। ऐन्द्री नागबलाकुरण्टकटुः क्षत्रामृता सर्वदा, सार्द्रा एव तु न क्वचिद् द्विगुणिता कार्येषु योज्या बुधैः॥ (भावप्र०)। घनियां, घी पुराना श्रेष्ठ होता है—नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु। विना विडङ्गकृष्णान्यां गुडधान्यव्यनाक्षिकैः॥ (शार्ङ्गधर)। पुरागत्वादि.—नवधुनः शर्करायाश्च गुडस्यापि विशेषतः। एकवत्सरे वृत्ते पुरागत्वं स्मृतं बुधैः॥ बृंहणार्थं शहद नूतन श्रेष्ठ होता है—बृंहणीयं नवं नव नातिश्लेष्महरं परम्। निम्नरोगेषु नवं घृतम्—योजयेन्नवमेवाज्यं भोक्तुं नर्मणि अग्नि। बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः॥ (भावप्र०)। ओषधियों के गुणहीन होने की अवधिः—गुणहीनं भवेद् वर्षादूर्ध्वं तद्रूपनौषधम्। मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुयात्॥ हीनत्वं गुटिकलेहौ लभेते वत्सरात् परम्। हीनाः स्युर्घृततैलाद्यास्तुर्मासाधिकात्तथा॥ (शार्ङ्गधर)।

सर्वाण्येव सक्षीराणि वीर्य्यवन्ति, तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्यादद्दीतेति॥ १०॥

क्षीरयुक्त अथवा रसयुक्त होने पर ही सर्व ओषधियां वीर्यवती होती हैं। उनके सम्पत् (गुण) युक्त न होने पर या न मिलने पर एक वर्ष के भीतर की ग्रहण करनी चाहिये॥

भवन्ति चात्र—

गोपालास्तापसा व्याधा ये चान्ये वनचारिणः।
मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते॥ ११॥

इस विषय में कहा भी है कि गो, भैंस और बकरी चराने वाले, जङ्गल में रहने वाले तपस्वी, हरिणादि का शिकार करने वाले तथा कन्द, मूल, फल खाकर जङ्गल में रहने वाले एवं अन्य भी जो वनवासी हों उनसे औषध (जडी, बूटी) का ज्ञान होता है ॥ ११ ॥

विमर्शः—ओषधियों के केवल नाम और स्वरूप मात्र जानने से काम नहीं चलता है किन्तु उनका रोगों में प्रयोग कैसे होता है यह जानना भी अत्यावश्यक है जैसा कि चरक ने कहा है—ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने। न नामज्ञानमात्रेण रूपमात्रेण वा पुनः ॥ ओषधीनां परां प्राप्तिं कश्चिद्वेदितुमर्हति। योगविन्नामरूपज्ञस्तासां तत्त्वविदुच्यते ॥

सर्वावयवसाध्येषु पलाशलवणादिषु।
व्यवस्थितो न कालोऽस्ति तत्र सर्वो विधीयते ॥१२॥

वनस्पतियों के मूल, पत्र, फल आदि सर्व अवयवों से बनाये हुये जो पलाशादिक चार हैं उनके ग्रहण का (सञ्चय करने का) कोई खास व्यवस्थित समय नहीं है। उनके ग्रहण में सर्व समय उपयुक्त है ॥ १२ ॥

गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते।
तस्माद् भूमिस्वभावेन बीजिनः षड्रसायुताः ॥१३॥
अव्यक्तः किल तोयस्य रसो निश्चयनिश्चितः।
रस एव स चाव्यक्तो व्यक्तो भूमिरसाद्भवेत् ॥ १४ ॥

गन्ध, वर्ण और मधुरादि षड्रसों से युक्त भूमि भी छ प्रकार की होती है इस लिये भूमि के स्वभाव के कारण वृक्ष भी छ रसों से युक्त होते हैं। जल अव्यक्त रस वाला होता है यह अनेक निश्चयों (प्रमाणों) से निश्चित है तथा वही जल का अव्यक्त रस भूमि के रस से व्यक्त (स्पष्ट) हो जाता है ॥

सर्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता।
द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः ॥ १५ ॥

पूर्व में कहे हुये सर्व लक्षणों से युक्त भूमि को साधारण भूमि कहते हैं। जो द्रव्य जैसी भूमि में उत्पन्न होते हैं उन द्रव्यों के गुण विशेषकर उसी भूमि के गुणों के अनुसार होते हैं॥

विगन्धेनापरामृष्टमविपन्नं रसादिभिः।
नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत् ॥ १६ ॥

साधारणतया जो द्रव्य विकृत गन्ध से युक्त न हों तथा जिसके मधुरादि रसों में भी विकार उत्पन्न न हुआ हो वह द्रव्य चाहे नया हो अथवा पुराना हो उसे ग्राह्य ही समझना चाहिये ॥ १६ ॥

जङ्गमानां वयःस्थानां रक्तरोमनखादिकम्।
क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत् ॥ १७ ॥

युवावस्था वाले जङ्गम पशु-पक्षियों का रक्त, रोम और नख आदि ग्रहण करने चाहिये तथा उनके आहार के जीर्ण हो जाने पर दुग्ध, मूत्र और मल औषधार्थ ग्रहण करना चाहिये ॥

विमर्शः—क्षीरादिग्रहे अष्टादशग्रह.-क्षीरं वाष्कयण ग्राह्य विण्मूत्र तच्च नीरुजान्। वयोबलवता धातुपिच्छश्रृङ्गखुरादिकम् ॥

प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजम्।
प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते ॥ १८ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने भूमिप्रविभागीयो नाम सप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥

प्लोत (वस्त्र के खण्ड), मिट्टी के पात्र, काठ के तख्त और खूटियों पर ओषधियां रखी हों तथा पवित्र और प्रशस्त स्थान में भेषजागार (ओषधि शाला) बनवाना चाहिये ॥१८॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने भूमिप्रविभागीयो नाम सप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशत्तमोऽध्यायः।

अथातो द्रव्यसङ्ग्रहणीयमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर द्रव्यसंग्रहणीय नामक अध्याय का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १-२ ॥

समासेन सप्तत्रिंशद् द्रव्यगणा भवन्ति ॥ ३ ॥

संक्षेप से द्रव्यों के सैंतीस गण होते हैं जैसे कि आगे कहते है ॥ ३ ॥

(१) तद्यथा—विदारिगन्धा विदारी विश्वदेवा सहदेवा श्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहा बृहत्यौ पुनर्नवैरण्डो हंसपादी वृश्चिकाल्यृषभौ चेति ॥ ४ ॥

विदारीगन्धादिगण में निम्न ओषधियां हैं जैसे—विदारीगन्धा (शालपर्णी), विदारी (भूमिकूष्माण्ड), विश्वदेवा (नागबला या गंगेरन), सहदेवा (पीले फूलों की बला), श्वदंष्ट्रा (गोखरू), पृथक्पर्णी (पिठवन), शतावर, अनन्तमूल (सालसा), कृष्णसारिवा, जीवक, ऋषभक, महासहा (माषपर्णी), क्षुद्रसहा (मुद्गपर्णी), बडी कटेरी, छोटी कटेरी, पुनर्नवा, एरण्ड, हंसपादी (हंसराज), विच्छियाघास, ऋषभी (कौंच के बीज) ॥ ४ ॥

विमर्शः—जीवकर्षभकाभावे गुडूचीवशलोचने। भावमिश्र ने इन दोनों के अभाव में विदारीकन्द लेना लिखा है।

विदारिगन्धाऽऽदिरयं गणः पित्तानिलापहः।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ॥ ५ ॥

यह उपर्युक्त विदारिगन्धादि गण पित्त और वात को नष्ट करता है तथा राजयक्ष्मा, गुल्म, अङ्गमर्द, ऊर्ध्वश्वास और कास को नष्ट करता है ॥ ५ ॥

(२) आरग्वधमदनगोपघोण्टाकण्टकीकुटजपाठापाटलामूर्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासी-कुरुण्टकगुडूचीचित्रकशार्ङ्गेष्टाकरञ्जद्वयपटोलकिराततिक्तकानि सुपर्वी चेति ॥ ६ ॥

आरग्वधादिगण में निम्न ओषधियां हैं। अमलतास, मैनफल, गोपघोण्टा (कर्कोटी या सुपारी), कण्टकी (विकङ्कत), कूडा, पाठा, पाटला, मूर्वा, इन्द्रयव, सतवन, निम्ब, कुरुण्टक (सफेद फूलों की झिण्टी,) दासी कुरण्टक (नीले फूलों की झिण्टी, पियावासा), गिलोय, चित्रक, शार्ङ्गेष्टा (काकजङ्घा), नाटा और पूतीकरञ्ज, पटोल, चिरायता, करेला ॥ ६ ॥

आरग्वधादिरित्येष गणः श्लेष्मविषापहः।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ॥ ७ ॥

यह आरग्वधादिगण कफ और विष को नष्ट करता है तथा प्रमेह, कुष्ठ, ज्वर, वमन और कण्डू का नाशक तथा व्रणों का शोधक है ॥ ७ ॥

(३) वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृङ्गीपूतीकनक्तमालमोरटाग्निमन्थमैरेयकद्वयबिम्बीवसुकवसिरचित्रकशतावरीबिल्वाजशृङ्गीदर्भा बृहतीद्वयश्चेति ॥ ८ ॥

वरुणादिगण में निम्न ओषधियां हैं। जैसे-वरुण, आर्त्तगल (नीले फूल का पियावासा), सहजना, लाल सहजना, तर्कारी (जयन्ती), मेढाशिङ्गी, पूतीकरञ्ज, नक्तमाल (करञ्ज), मूर्वा या अक्कोल, अरणी, दोनों प्रकार के कुरण्टक, बिम्बी (कुन्दरू), वसुक (वकपुष्प या आक), वसिर (अपामार्ग या गजपीपल), चित्रक, शतावरी, बिल्व, काकडासिङ्गी, कुश, छोटे और बडे फलों वाली कटेरी ॥ ८ ॥

वरुणादिर्गणो ह्येष कफमेदोनिवारणः।
विनिहन्ति शिरःशूलगुल्माभ्यन्तरविद्रधीन् ॥ ९ ॥

उपर्युक्त वरुणादिगण की ओषधियां कफ और मेद को नष्ट करती हैं तथा शिरःशूल, गुल्म और आभ्यन्तरिक विद्रधि को नाशक है ॥ ९ ॥

(४) वीरतरुसहचरद्वयदर्भवृक्षादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटवसुकवसिरभल्लूककुरण्टकेन्दीवरकपोतवङ्काः श्वदंष्ट्रा चेति ॥ १० ॥

वीरतर्वादिगण में निम्न ओषधियां हैं जैसे-वीरतरु (अर्जुन), दोनों प्रकार के सहचर (पीत-नीलपुष्पवाली पियावासा), कुशा, बंदाक, गुन्द्रा, नरसल, कुश, काश, पाषाणभेद, अरणी, मोरट (मूर्वा), वसुक (वकपुष्प), वसिर (अपामार्ग), भल्लूक (श्योनाक), कुरण्टक (पीले फूल का पियावासा), नील कमल, कपोतवङ्का (ब्राह्मी), गोखरू ॥ १० ॥

वीरतर्वादिरित्येष गणो वातविकारनुत्।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः ॥ ११ ॥

यह वीरतर्वादि गण वायु के विकार को नष्ट करता है तथा अश्मरी, शर्करा, मूत्रकृच्छ्र और मूत्राघात की पीडा को शान्त करता है ॥ ११ ॥

(५) सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति ॥ १२ ॥

'सालसारादिगण' में निम्न ओषधियां हैं जैसे सालवृक्ष, अजकर्ण, खैर, कदर (श्वेत या पूति खैर), कालस्कन्ध (तिन्दुकवृक्ष या तमाल), सुपारी का वृक्ष, भोजपत्र, मेढाशिङ्गी, तिनिश (सादन), सिरस, असन, धव, अर्जुन, ताड वृक्ष, शाक (सागौन), नक्तमाल (करञ्ज), पूतिकरञ्ज, अश्वकर्ण (साल वृक्षभेद), अगर, कालीयक (पीत चन्दन) ॥ १२ ॥

सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः ॥ १३ ॥

यह 'सालसारादिगण' कुष्ठ को नष्ट करता है तथा प्रमेह और पाण्डुरोग को नष्ट करता है एवं कफ और मेदो धातु का शोषक है ॥ १३ ॥

विमर्शः—कालीयकं तु कालीय पीतामं हरिचन्दनम् ॥

(६) रोध्रसावररोध्रपलाशकुटन्नटाशोकफल्गीकट्फलैलवालुकशल्लकीजिङ्गिनीकदम्बसालाः कदली चेति १४

रोध्रादिगण में निम्न ओषधियां हैं जैसे-लोध, पठानी लोध, ढाक, कुटन्नट (श्योनाक), अशोक, फल्गी (भारङ्गी), कायफल, एलवालुक (नालुका या हरिवालुलक), शल्लकी, जिङ्गण, कदम्ब, साल, और कदली ॥ १४ ॥

एष रोध्रादिरित्युक्तो मेदःकफहरो गणः।
योनिदोषहरः स्तम्भी व्रण्यो विषविनाशनः ॥ १५ ॥

यह रोध्रादि गण मेद और कफ को नष्ट करता है तथा योनि दोषों का नाशक, अतिसारादि रोगों में मलादि का स्तम्भक, व्रण में हितकारी और विष का नाशक है ॥ १५ ॥

(७) अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति ॥ १६ ॥

'अर्कादिगण' में निम्न ओषधियां होती हैं जैसे आक, अलर्क (सफेद आक), दोनों प्रकार के करञ्ज, नागदन्ती (जमालगोटा), अपामार्ग, भारंगी, रास्ना, इन्द्रपुष्पी (लांगली), क्षुद्रश्वेता (सेफन्द, अतीस या विदारीकन्द), महाश्वेता (नीलपुष्प सेफन्द, वन्ध्याकर्कोटी, श्वेतापराजिता), वृश्चिकाली (मेढाशिङ्गी भेद), अलवणा (ज्योतिष्मती) और तापस वृक्ष (इङ्गुदी) ॥ १६ ॥

अर्कादिको गणो ह्येष कफमेदोविषापहः।
कृमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः ॥ १७ ॥

यह 'अर्कादिगण' कफ, मेद और विषों को नष्ट करता है तथा कृमि और कुष्ठ का शामक और विशेषकर व्रणों का शोधक है ॥ १७ ॥

(८) सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणसुगन्धकसुमुखकालमालकासमर्दत्वकखरपुष्पाविडङ्गकट्फल-

सुरसीनिर्गुण्डीकुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीबलकाकमाच्यो विषमुष्टिकश्चेति ॥ १८ ॥

सुरसादिगण' में निम्न ओषधियां होती हैं जैसे—सुरसा (कृष्ण तुलसी), श्वेत तुलसी, फणिज्झक (मरुवक), अर्जक (वर्वरिका), भूस्तृण (रोहिस घास), सुगन्धक (द्रोणपुष्पी), सुमुख (राजिका), कालमालिका (कृष्णार्जक), कसौंदी, त्वक (नकछिंकनी), खरपुष्पा (वनवर्वरिका), वायविडङ्ग, कायफल, सुरसी (कपित्थपत्रा तुलसी या श्वेत निर्गुण्डी), निर्गुण्डी (नीलपुष्पा सम्भालू), कुलाहल (मुण्डिका), उन्दुरुकर्णिका (मूसाकानी), फञ्जी (भारङ्गी) प्राचीवल (काकजंघा), मकोय और विषमुष्टि (राजनिम्ब, वड़ी अल स्नुपा, कर्कोटी या कुचला इनमें से कोई एक) ॥ १८ ॥

सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥ १९ ॥

यह 'सुरसादिगण' कफ का नाशक, कृमियों का नाशक तथा प्रतिश्याय, अरुचि, श्वास और कास को नष्ट करता है एवं व्रणों का शोधक है ॥ १९ ॥

(९) मुष्ककपलाशधवचित्रकमदनवृत्तकशिशपावज्रवृक्षास्त्रिफला चेति ॥ २० ॥

'मुष्ककादिगण' में मोखा, ढाक, धव, चित्रक, मदन, वृत्तक (कूडा), सीसम, थूहर, हरड, बहेडा, आंवला होते हैं॥

मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहृत् ।
मेहार्शःपाण्डुरोगघ्नः शर्करानाशनः परः ॥ २१ ॥

यह 'मुष्ककादिगण' बढ़ी हुई चरबी तथा शुक्र दोषों को नष्ट करता है। इसी तरह प्रमेह, ववासीर, पाण्डुरोग और मूत्रशर्करा (पथरी) का नाशक है ॥ २१ ॥

(१०) पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसाऽतिविषावचाविडङ्गानि कटुरोहिणी चेति ॥ २२ ॥

'पिप्पल्यादिगण' में पिप्पली, पिपरामूल, चव्य, चित्रक, सोंठ, कालीमरिच, गजपीपल, हरेणुका, छोटी इलायची, अजमोद, इन्द्रयव, पाठा, जीरा, सरसों, वकायन का फल, हींग, भारंगी, मूर्वा, अतीस, वचा, वायविडङ्ग और कुटकी ये हैं ॥२२॥

पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः ।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः ॥ २३ ॥

यह 'पिप्पल्यादिगण' कफहर्ता तथा प्रतिश्याय, वातविकार, अरुचि इन्हें नष्ट करता है तथा अग्नि का दीपक है, गुल्म और शूल का नाशक है एवं आमदोषों का पाचक है ॥ २३ ॥

(११) एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालुकगुग्गुलुसर्जरसतुरुष्ककुन्दुरुकागरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति ॥ २४ ॥

'एलादिगण' में छोटी इलायची, तगर, कूठ, जटामांसी, ध्यामक (रोहिसतृण), दालचीनी, पत्र (तमालपत्र या तेजपत्र), नागकेशर, प्रियङ्गु, हरेणुका, व्याघ्रनख, शुक्ति (नखीभेद), चण्डा (चोरक), स्थौणेयक (थुनेर), श्रीवेष्टक, चोच (दालचीनी भेद), चोरक (ग्रन्थिपर्ण), वालुक (खश), गूगल, सर्जरस (राल), तुरुष्क (शिलारस), कुन्दुरु (लोभान), अगुरु, स्पृक्का (सुगन्धित द्रव्य), उशीर (खस), देवदारु, केशर, पुन्नागकेशर (पद्मकेशर) ये द्रव्य हैं॥२४॥

एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ॥ २५ ॥

यह 'एलादिगण' वात, कफ और विष को नष्ट करता है तथा शरीर के वर्ण को निर्मल करता है एवं कण्डू, पिडका और कोठ को नष्ट करता है ॥ २५ ॥

(१२) वचामुस्तातिविषाभयाभद्रदारूणि नागकेशरञ्चेति ॥ २६ ॥

'वचादिगण' में वचा, नागरमोथा, अतीस, हरड, देवदारु और नागकेशर ये द्रव्य है ॥ २६ ॥

(१३) हरिद्रा दारुहरिद्राकलशीकुटजबीजानि मधुकं चेति ॥ २७ ॥

इसी तरह 'हरिद्रादि गण' में हल्दी, दारुहल्दी, कलशी (पृश्निपर्णी), इन्द्रयव और मुलेठी ये द्रव्य हैं ॥ २७ ॥

एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ विशेषाद्दोषपाचनौ ॥ २८ ॥

ये उपर्युक्त 'वचादिगण' तथा 'हरिद्रादिगण' दुष्ट स्तन्य (दुग्ध) के शोधक, आमातिसार के शामक और विशेष कर आम दोषों के पाचक हैं ॥ २८ ॥

(१४) श्यामामहाश्यामात्रिवृदन्तीशङ्खिनीतिल्वककम्पिल्लकरम्यकक्रमुकपुत्रश्रेणीगवाक्षीराजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥२९॥

'श्यामादिगण' में काली निशोथ, महाश्यामा (विधारा), लाल निशोथ, दन्ती, शङ्खिनी (कालमेघ या कालादाना), तिल्वक (लोध्र), कबीला, रम्यक (वकायन), सुपारी, पुत्रश्रेणी (दन्तीभेद), गवाक्षी (इन्द्रायण), अमलतास, नाटा और पूति करञ्ज, गियोय, सातला, छगलान्त्री (वृद्धदारुक भेद), सेहुण्ड, स्वर्णक्षीरी (सत्यानाशी, चोक, कंकुष्ठ, उशारे रेवन) ये ओषधियां हैं ॥ २९ ॥

उक्तः श्यामादिरित्येष गणो गुल्मविषापहः ।
आनाहोदरविड्भेदी तथोदावर्तनाशनः ॥ ३० ॥

उपर्युक्त यह 'श्यामादिगण' गुल्म और विष को नष्ट करता है तथा आध्मान और उदर रोग में मल का भेदन करता है एवं उदावर्तनाशक है ॥ ३० ॥

(१५) बृहतीकण्टकारिकाकुटजफलपाठा मधुकञ्चेति ॥ ३१ ॥

'बृहत्यादिगण' में बड़ी कटेरी, छोटी कटेरी, इन्द्रयव, पाठा और मुलेठी ये द्रव्य हैं॥ ३१ ॥

पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः।
कफारोचकहृद्रोगमूत्रकृच्छ्ररुजापहः॥ ३२॥

यह 'बृहत्यादिगण' पाचनीय, पित्त और वात का नाशक एवं कफ, अरुचि, हृदयरोग और मूत्रकृच्छ्र की पीडा को नष्ट करता है॥ ३२॥

(१६) पटोलचन्दनकुचन्दनमूर्वागुडूचीपाठाः कटुरोहिणी चेति॥ ३३॥

'पटोलादिगण' में पटोल, श्वेत चन्दन, लालचन्दन, मूर्वा, गिलोय, पाठा तथा कुटकी ये द्रव्य हैं॥ ३३॥

पटोलादिर्गणः पित्तकफारोचकनाशनः।
ज्वरोपशमनो व्रण्यश्छर्दिकण्डूविषापहः॥ ३४॥

यह 'पटोलादिगण' पित्त, कफ और अरुचि को नष्ट करता है, ज्वर का शामक है, व्रण के लिये शोधनादि दृष्टि से हितकारी है और वमन, कण्डू तथा विष को नष्ट करता है॥ ३४॥

(१७) काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति ३५

'काकोल्यादिगण' में काकोली, क्षीरकाकोली, जीवक, ऋषभक, मुद्गपर्णी, माषपर्णी, मेदा, महामेदा, गिलोय, काकड़ासिङ्गी, वंशलोचन, पद्मकाठ, प्रपौण्डरीक (श्वेत कमल), ऋद्धि, वृद्धि, द्राक्षा, जीवन्ती और मुलेठी ये हैं॥ ३५॥

काकोल्यादिरयं पित्तशोणितानिलनाशनः।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा॥ ३६॥

यह 'काकोल्यादिगण' पित्त, रक्त और वायु का नाशक, जीवनीय, बृंहणीय, वृष्य है तथा दुग्ध और क्षीण हुये कफ को बढ़ाता है॥ ३६॥

विमर्श—इस गण में अष्टवर्ग की ओषधियों का वर्णन है उनके न मिलने पर निम्न औषध लेना लिखा है। ऋद्ध्यभावे बला ग्राह्या वृद्ध्यभावे महाबला। मेदाभावे चाश्वगन्धा महामेदे तु शारिवा॥ जीवकर्षभकाभावे गुडूचीवंशलोचने। काकोलीयुगलाभावे निक्षिपेच्च शतावरीम्॥ अष्टवर्गाप्राप्तौ भावप्रकाशमतम्—मेदाजीवककाकोलीवृद्धिद्वन्द्वेऽपि वासनि। वरीविदार्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत्॥

(१८) ऊषकसैन्धवशिलाजतुकासीसहिङ्गूनि तुल्यकञ्चेति॥ ३७॥

'ऊषकादिगण' में ऊषक (क्षारमृत्तिका), सेन्धानमक, शिलाजीत, कासीस और पुष्पकासीस, हींग तथा नील थोथा ये द्रव्य हैं॥ ३७॥

ऊषकादिः कफं हन्ति गणो मेदोविशोषणः।
अश्मरीशर्करामूत्रकृच्छ्रगुल्मप्रणाशनः॥ ३८॥

यह 'ऊषकादिगण' कफ को नष्ट करता है। मेदो वृद्धि को शोषित करता है तथा अश्मरी, शर्करा, मूत्रकृच्छ्र और गुल्म को नष्ट करता है॥ ३८॥

(१९) सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधूकपुष्पाण्युशीरञ्चेति॥ ३९॥

'सारिवादिगण' में सारिवा (अनन्तमूल), मुलेठी, चन्दन, लालचन्दन, पद्माख, खंभारी का फल, महुवे के फूल, खस ये द्रव्य हैं॥ ३९॥

सारिवाऽऽदिः पिपासाघ्नो रक्तपित्तहरो गणः।
पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः॥ ४०॥

यह 'सारिवादिगण' प्यास को नष्ट करता है, रक्तपित्त का नाशक है, पित्तज्वर को शान्त करता है तथा विशेष कर दाह का नाशक है॥ ४०॥

(२०) अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिनकेशराणि मधुकञ्चेति॥ ४१॥

'अञ्जनादिगण' में अञ्जन (सौवीराञ्जन, Sulphide of load), रसाञ्जन (स्रोतोञ्जन Antimony sulphide, तथा दारुहरिद्राकाथकृत), नागकेशर, प्रियङ्गु, नीलकमल, उशीर, कमलकेशर और मुलेठी ये द्रव्य हैं॥ ४१॥

अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः।
विषोपशमनो दाहं निहन्त्याभ्यन्तरं तथा॥ ४२॥

यह अञ्जनादि गण रक्तपित्त का नाशक, विष का संशामक तथा शरीर के भीतरी दाह को नष्ट करता है॥ ४२॥

विमर्शः—रसाञ्जन द्विविध, स्रोतोञ्जन कृष्णपाषाणाकृति Antimony Sulphide, धातुद्रव्य, द्वितीयञ्च दारुहरिद्राक्वाथेन कृत कृत्रिम पीतकृष्णद्रव्यम्—दार्वीक्वाथसम क्षीर पाठ पक्त्वा यदा घनम्। तदा रसाञ्जन ख्यात नेत्रयो. परम हितम्॥ नलद—वीरणस्य तु मूल स्यादुशीर नलद च तत्।

(२१) परूषकद्राक्षाकट्फलदाडिमराजादनकतकफलशाकफलानि त्रिफला चेति॥ ४३॥

'परूषकादिगण' में फालसा, द्राक्षा, कट्फल, दाड़िम, खिरणी, निर्मलीबीज, सागवान का फल तथा त्रिफला ये हैं॥

परूषकादिरित्येष गणोऽनिलविनाशनः।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः॥ ४४॥

यह 'परूषकादिगण' वात को नष्ट करता है, मूत्र के दोषों का हारक, हृदयहितकारी, प्यास को नष्ट करने वाला तथा रुचिकारक है॥ ४४॥

(२२) प्रियङ्गुसमङ्गाधातकीपुन्नागनागपुष्पचन्दनकुचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूला चेति॥ ४५॥

'प्रियङ्ग्वादिगण' में प्रियङ्गु, लज्जालु, धाय के फूल, पुन्नाग (तुङ्ग), नागपुष्प (नागकेशर), श्वेत चन्दन, रक्तचन्दन, मोचरस, रसाञ्जन, जलकुम्भी, स्रोतोऽञ्जन, कमलकेशर, मजीठ, शालपर्णी अथवा दुरालभा ये द्रव्य हैं॥ ४५॥

(२३) अम्बष्ठाधातकीकुसुमसमङ्गाकट्वङ्गमधुकविल्वपेशिकासावररोध्रपलाशनन्दीवृक्षाः पद्मकेशराणि चेति॥ ४६॥

'अम्बष्ठादिगण' में अम्बष्ठा (पाठा), धाय के फूल, लज्जालु, सोनापाठा, मुलेठी, वेलफल की गिरी, पठानीलोध, ढाक, तून और कमलकेशर ये द्रव्य हैं ॥ ४६ ॥

गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ॥४७॥

उपर्युक्त 'प्रियङ्ग्वादिगण' तथा 'अम्बष्ठादिगण' पक्व अतिसार को नष्ट करते हैं, भग्न अस्थि का सन्धान करते हैं तथा पित्त के विकारों में हितकर और व्रणों का रोपण करते हैं ॥४७॥

(२४) न्यग्रोधोदुम्बराश्वत्थप्लक्षमधुककपीतनककुभाम्रकोशाम्रकचोरकपत्रजम्बूद्वयपियालमधूकरोहिणीवञ्जुलकदम्बबदरीतिन्दुकीसल्लकीरोध्रसाववरोध्रभल्लातकपलाशा नन्दीवृक्षश्चेति ॥ ४८ ॥

'न्यग्रोधादिगण' में वड़, गूलर, पीपल, पाखर, मुलेठी, आम्रातक, अर्जुन, आम, कोशाम्र, चोरक के पत्ते, वडी और छोटी जामुन, चिरोञ्जी वृक्ष, महुआ, कुटकी, वेतस, कदम्ब, बेर, तेन्दु, सल्लकी, लोध्र, सावरलोध, भिलावा, ढाक और नन्दीवृक्ष (पारसपीपल) ये द्रव्य हैं ॥ ४८ ॥

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ॥ ४९ ॥

यह 'न्यग्रोधादिगण' व्रण का हितकारी, सङ्ग्राही, भग्न-अस्थि को जोडने वाला, रक्तपित्त का नाशक, दाह और वृद्ध मेदोधातु का नाशक तथा योनिदोषहारक है ॥ ४९ ॥

(२५) गुडूचीनिम्बकुस्तुम्बुरुचन्दनानि पद्मकञ्चेति ॥ ५० ॥

'गुडूच्यादिगण' में गिलोय, नीम, धनियां, चन्दन और पद्माख ये द्रव्य हैं ॥ ५० ॥

एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ।
हृल्लासारोचकवमीपिपासादाहनाशनः ॥ ५१ ॥

यह 'गुडूच्यादिगण' सर्व प्रकार के ज्वरों का नाशक और दीपन है तथा हृल्लास (जीमिचलाना), अरुचि, वमन, पिपासा और दाह को नष्ट करता है ॥ ५१ ॥

(२६) उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकाणि मधुकञ्चेति ॥ ५२ ॥

'उत्पलादिगण' में कमल, लाल कमल, श्वेत कमल, नील कमल, श्वेत नीलकमल, पुण्डरीक (अतिश्वेत कमल) और मुलेठी ये द्रव्य हैं ॥ ५२ ॥

उत्पलादिरयं दाहपित्तरक्तविनाशनः ।
पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः ॥ ५३ ॥

यह 'उत्पलादि गण' शरीर का दाह, रक्तपित्त, पिपासा, विषविकार, हृदय के रोग, वमन और मूर्च्छा को नष्ट करता है ॥

(२७) मुस्ताहरिद्रादारुहरिद्राहरीतक्यामलकबिभीतककुष्ठहैमवतीवचापाठाकटुरोहिणीशार्ङ्गष्टाऽतिविषाद्राविडीभल्लातकानि चित्रकश्चेति ॥ ५४ ॥

'मुस्तादिगण' में मोथा, हलदी, दारुहलदी, हरड़, आंवला, वहेडा, कूठ, श्वेत वचा, वचा, पाठा, कटुकी, काकजंघा, अतीस, द्राविड़ी (छोटी इलायची), भिलावा और चित्रक ये द्रव्य हैं ॥

एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः ।
योनिदोषहरः स्तन्यशोधनः पाचनस्तथा ॥ ५५ ॥

यह 'मुस्तादिगण' नामक औषधवर्ग कफ के रोगों को नष्ट करता है, योनि के दोषों का विनाशक, स्तन्यशोधक तथा आमादि दोषों का पाचक है ॥ ५५ ॥

(२८) हरीतक्यामलकबिभीतकानि त्रिफला ॥५६॥

त्रिफला—हरीतकी, आंवले और वहेड़ा इन्हें 'त्रिफला' कहते हैं ॥ ५६ ॥

विमर्शः—यहां 'त्रिफला' से समान प्रमाण तीनों का लिया है अन्यत्र प्रमाणभिन्नता है—एका हरीतकी योज्या द्वौ च योज्यौ विभीतकौ । चत्वार्यामलकान्याहुस्त्रिफलैषा प्रकीर्तिता ॥ (शार्ङ्गधर)। भावप्रकाश समप्रमाण ग्रहण करता है—पथ्याविभीतधात्रीणां फलैः स्यात् त्रिफला समैः । महती स्वल्पा च त्रिफला पथ्या विभीतकं धात्री महती त्रिफला मता । स्वल्पा काश्मर्यखर्जूरपरूषकफलैर्भवेत् ॥

त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशनी ।
चक्षुष्या दीपनी चैव विषमज्वरनाशनी ॥ ५७ ॥

'त्रिफला' कफ और पित्तको नष्ट करती है तथा प्रमेह और कुष्ठ को भी नष्ट करती है एवं नेत्रों के लिये हितकर तथा अग्नि की दीपक और विषमज्वर को नष्ट करती है ॥ ५७ ॥

(२९) पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकम् ॥५८॥

'त्रिकटु'—छोटी पीपल, काली मरिच और सोंठ इन्हें 'त्रिकटु' कहते हैं ॥ ५८ ॥

त्र्यूषणं कफमेदोघ्नं मेहकुष्ठत्वगामयान् ।
निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि ॥ ५९ ॥

'त्र्यूषण' (त्रिकटु) कफ और मेदोरोगों को नष्ट करता है तथा प्रमेह, कुष्ठ और त्वचा के रोगों को नष्ट करता है एवं अग्नि को दीप्त करता है तथा गुल्म, पीनस और मन्दाग्नि को नष्ट करता है ॥ ५९ ॥

(३०) आमलकीहरीतकीपिप्पल्यश्चित्रकश्चेति ॥६०॥

'आमलक्यादिगण' में आंवले, हरड, पीपल और चित्रक ये द्रव्य हैं ॥ ६० ॥

आमलक्यादिरित्येष गणः सर्वज्वरापहः ।
चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः ॥ ६१ ॥

यह 'आमलक्यादिगण' सर्वप्रकार के ज्वरों को नष्ट करता है, नेत्रों के लिये हितकारी है, अग्नि को दीप्त करता है, वृष्य है तथा कफ और अरोचक को नष्ट करता है ॥ ६१ ॥

(३१) त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलश्चेति ॥ ६२ ॥

'त्रप्वादिगण' में त्रपु वंग (Tin), सीसा (Lead), ताम्बा (Copper), चांदी (Silver), कान्तलौह (Iron), सुवर्ण (Gold) और लोहे का किट्ट (मण्डूर) ये द्रव्य हैं ॥६२॥

विमर्शः—उत्तमलोहकिट्टलक्षणम्—शताब्दमुत्तमं कीट मध्यञ्चाशीतिवार्षिकम्। अधम षष्टिवर्षीय ततो हीन विषोपमम्॥

गणस्त्रप्वादिरित्येष गरक्रिमिहरः परः।
पिपासाविषहृद्रोगपाण्डुमेहहरस्तथा॥ ६३॥

यह 'त्रप्वादिगण' गरदोष तथा क्रिमियों को नष्ट करता है तथा प्यास, विषविकार, हृदय के रोग, पाण्डु और प्रमेह को नष्ट करता है॥ ६३॥

विमर्शः—'गर' से कृत्रिमविष ग्रहण करते हैं। नानाप्राण्यद्भशमलविरुद्धौषधिभस्मनाम्। विषाणा चाल्पवीर्याणा योगो गर इति स्मृतः॥ (वाग्भट)।

(३२) लाक्षारेवतकुटजाश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति॥ ६४॥

'लाक्षादिगण' में लाख, अमलतास, कूडा, कनेर, कायफल, हलदी, दारुहलदी, निम्ब, सप्तपर्ण, चमेली और त्रायमाणा ये द्रव्य हैं॥ ६४॥

कषायस्तिक्तमधुरः कफपित्तार्त्तिनाशनः।
कुष्ठक्रिमिहरश्चैव दुष्टव्रणविशोधनः॥ ६५॥

यह 'लाक्षादिगण' कषाय, तिक्त और मधुर है तथा कफ और पित्त की वेदना को विनष्ट करता है, कुष्ठ और क्रिमि नाशक एवं दुष्टव्रण का विशोधक है॥ ६५॥

पञ्च पञ्चमूलान्यत ऊर्ध्वं वक्ष्यामः॥ ६६॥

अब इसके अनन्तर पांच प्रकार के पञ्चमूलों का वर्णन करते हैं॥ ६६॥

विमर्शः—'अष्टाङ्गसंग्रह' में मध्यम और जीवन नामक दो पञ्चमूल अधिक वर्णित हैं। वलापुनर्नवैरण्डसप्तपर्णीद्वयेन च। मध्यम कफवातघ्न नातिपित्तकर लघु॥ अभीरुवीराजीवन्तीजीवकर्षभकै स्मृतम्। जीवनाख्यन्तु चक्षुष्य वृष्य पित्तानिलापहम्॥

(३३) तत्र त्रिकण्टकबृहतीद्वयपृथक्पर्ण्यो विदारिगन्धा चेति कनीयः॥ ६७॥

इन पञ्चमूलों में गोखरू, छोटी कटेरी, बडी कटेरी, पृश्निपर्णी और विदारीगन्धा (शालपर्णी) यह लघु पञ्चमूल है॥६७॥

कषायतिक्तमधुरं कनीयः पञ्चमूलकम्।
वातघ्नं पित्तशमनं बृंहणं बलवर्द्धनम्॥ ६८॥

'लघु पञ्चमूल' कषाय, तिक्त और मधुर होता है तथा वात को नष्ट करता है, पित्त का शमन करता है, बृंहण है और शरीर के बल को बढाता है॥ ६८॥

(३४) बिल्वाग्निमन्थटिण्टुकपाटलाः काश्मर्य्यश्चेति महत्॥ ६९॥

बिल्व, अरणी, सोनापाठा, पाढल और गम्भारी ये द्रव्य 'बृहत्पञ्चमूल' कहलाते हैं॥ ६९॥

सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्।
मधुरानुरसञ्चैव पञ्चमूलं महत् स्मृतम्॥ ७०॥

'बृहत्पञ्चमूल' तिक्त होता है, कफ और वात को नष्ट करता है, पाक में लघु होता है, अग्नि का दीपक है तथा अनुरस में मधुर होता है॥ ७०॥

विमर्शः—अनुरस'-व्यक्त शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते। विपर्ययेणानुरस'॥ (चरक)। अन्यच्च—अनुरसस्तु रसेनाभिभूतत्वादव्यक्तो व्यक्तो वा किञ्चिदन्ते॥ (अ० सं०)।

अनयोर्दशमूलमूच्यते॥ ७१॥

उपर्युक्त लघु और महत् पञ्चमूल मिलकर दशमूल कहलाते हैं॥

गणः श्वासहरो ह्येष कफपित्तानिलापहः।
आमस्य पाचनश्चैव सर्वज्वरविनाशनः॥ ७२॥

यह दशमूलगण श्वासनाशक, कफ, पित्त और वात का शामक, आमदोषों का पाचक तथा सर्वप्रकार के ज्वरों का नाशक है॥ ७२॥

(३५) विदारीसारिवारजनीगुडूच्योऽजशृङ्गी चेति वल्लीसंज्ञः॥ ७३॥

'वल्लीपञ्चमूल' में विदारीकन्द, सरिवन, हरिद्रा, गिलोय और मेढासीङ्गी ये द्रव्य हैं तथा इन्हें वल्लीसंज्ञक पञ्चमूल कहते है॥ ७३॥

(३६) करमर्दत्रिकण्टकसैरीयकशतावरीगृध्रनख्य इति कण्टकसंज्ञः॥ ७४॥

'कण्टकपञ्चमूल' में करौंदा, गोखरू, पियावासा, शतावरी और गृध्रनखी (वदरवृक्ष) ये द्रव्य हैं तथा इन्हें कण्टक संज्ञक पञ्चमूल कहते हैं॥ ७४॥

रक्तपित्तहरौ ह्येतौ शोफत्रयविनाशनौ।
सर्वमेहहरौ चैव शुक्रदोषविनाशनौ॥ ७५॥

उक्त 'वल्लीपञ्चमूल' तथा 'कण्टकपञ्चमूल' ये दोनों गण रक्तपित्त को नष्ट करते है तथा तीनों प्रकार के (वातिक, पैत्तिक और श्लैष्मिक) शोथ को नष्ट करते हैं एवं सर्व प्रकार के प्रमेहों के नाशक और शुक्र के दोषों के संहारक होते हैं॥७५॥

(३७) कुशकाशनलदर्भकाण्डेक्षुका इति तृणसंज्ञक॥ ७६॥

'तृणपञ्चमूल' में कुश, काश, नरसल, दर्भ और काण्डेक्षुक (सांठा) ये द्रव्य होते हैं तथा इन्हें तृणसंज्ञक पञ्चमूल कहते हैं॥

मूत्रदोषविकारञ्च रक्तपित्तं तथैव च।
अन्त्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत्॥ ७७॥

यह अन्तिम 'तृणपञ्चमूल' दुग्ध के साथ प्रयुक्त करने से मूत्र दोषों को तथा रक्तपित्त को शीघ्र ही नष्ट करता है॥७७॥

विमर्शः—वरकीयतृणपञ्चमूलम्—शरेक्षुदर्भकाशाना शालीना मूलमेव च।

एषां वातहरावाद्यावन्त्यः पित्तविनाशनः।
पञ्चकौ श्लेष्मशमनावितरौ परिकीर्त्तितौ॥ ७८॥

उक्त पांच प्रकार के पञ्चमूलों में से 'आदि' के लघु तथा महत्पञ्चमूल विशेषकर वातनाशक हैं तथा अन्तिम तृणपञ्चमूलक पित्तनाशक है तथा शेष दो वल्ली और कण्टक पञ्चमूल कफ के शामक हैं॥ ७८॥

विमर्शः—वल्लीजपञ्चमूलगुणा—वल्लीजं पञ्चमूलन्तु प्रशस्तं कफनाशनम्। सृष्टमूत्रानिलहरं वृष्यमिन्द्रियबोधनम्॥ कण्टकपञ्चमूलगुणाः—कण्टकाख्यं पञ्चमूलं कफानिलहरं परम्। मधुरानुरसञ्चैव पक्वाशयविशोधनम्॥

त्रिवृतादिकमन्यत्रोपदेक्ष्यामः॥ ७९॥

'त्रिवृतादिगण' का अन्य स्थान पर वर्णन करेंगे॥ ७९॥

समासेन गणा ह्येते प्रोक्तास्तेषान्तु विस्तरम्।
चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम्। ८०॥

संक्षेप से यहां पर उक्त गणों का वर्णन किया है। आगे चिकित्सा स्थान के अध्यायों में दोषों के बलाबल के अनुसार इनका विस्तार से वर्णन करेंगे॥ ८०॥

एभिर्लेपान् कषायांश्च तैलं सर्पींषि पानकान्।
प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक्॥ ८१॥

मतिमान् वैद्य उक्त गणों में कहे हुये द्रव्यों से यथाविधि लेप, कषाय, तैल, घृत और पानक आदि योग बनाकर जिस रोग में जो उचित हो उसे वहां प्रयुक्त करे॥ ८१॥

धूमवर्षानिलक्लेदैः सर्वर्तुष्वनभिद्रुते।
ग्राहयित्वा गृहे न्यस्येद्विधिनौषधसङ्ग्रहम्॥ ८२॥

ओषधिरक्षण व्यवस्था—शास्त्र की विधि के अनुसार ओषधियों को उखाड़ कर धूआं, वर्षा, वायु और जल इनसे खराब न होने वाले एवं सर्व ऋतुओं में भी अनुकूल ऐसे मकान में ओषधिसंग्रह (स्थापन) करना चाहिये॥ ८२॥

समीक्ष्य दोषभेदांश्च मिश्रान् भिन्नान् प्रयोजयेत्।
पृथङ्मिश्रान् समस्तान् वा गणं वा व्यस्तसंहतम्॥ ८३॥

इति सुश्रुतसंहितायां सूत्रस्थाने द्रव्यसङ्ग्रहणीयो नामाष्टत्रिंशोऽध्यायः॥ ३८॥

दोषों के भेदों का भलीभांति विचार करके उनमें दोष मिश्रित हैं अथवा भिन्न (पृथक्) हैं ऐसा ठीक तरह से ज्ञान कर ओषधियों का या उक्त गणों का पृथक् योग, मिश्रित योग अथवा गण की समस्त ओषधियां का प्रयोग करना चाहिये। अथवा गण की एक, दो, तीन या चार ओषधियों को पृथक् या अन्य गण की ओषधियों के साथ संयुक्त कर प्रयोग करना चाहिये॥ ८३॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने द्रव्यसंग्रहणीयो नामाष्टत्रिंशत्तमोऽध्यायः॥ ३८॥

एकोनचत्वारिंशत्तमोऽध्यायः।

अथातः संशोधनसंशमनीयमध्यायं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

अब इसके अनन्तर संशोधन तथा संशमनीय अध्याय का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था॥ १-२॥

विमर्शः—संशोधनलक्षण यथा वाग्भटे—यदीरयेद्बहिर्दोषान् पञ्चधा शोधनञ्च तत्॥ संशमनलक्षणम्—न शोधयति यद्दोषान् समान्नोदीरयत्यपि। समीकरोति विषमान् शमनम् (वाग्भट)।

मदनकुटजजीमूतकेक्ष्वाकुधामार्गवकृतवेधनसर्षपविडङ्गपिप्पलीकरञ्जप्रपुन्नाडकोविदारकर्वुदारारिष्टाश्वगन्धाविदुलवन्धुजीवकश्वेताशणपुष्पीविम्बीवचामृगेर्वारुश्चित्रा चेत्यूर्ध्वभागहराणि। तत्र, कोविदारपूर्वाणां फलानि। कोविदारादीनां मूलानि॥ ३॥

ऊर्ध्वभाग-दोषहर द्रव्य या वामक द्रव्य—मैनफल, कूडा, देवदाली, कड़वी तुम्बी, धामार्गव (पीतपुष्पा कोशातकी), कृतवेधन (कोपातकी का भेद), श्वेत सरसों, वायविडङ्ग, पीपल, करञ्ज, चक्रमर्द, कचनार, कर्वुदार (लिसोड़ा), निम्ब, असगन्ध, विदुल (वेतस), बन्धुजीवक (गुलदुपहरिया), सफेद वचा, शणपुष्पी (वन्यशण), विम्बी (कुन्दरु), वचा, मृगेर्वारु (इन्द्रवारुणी) और चित्रा (द्रवन्ती) ये द्रव्य वमन द्वारा ऊर्ध्वभाग अर्थात् आमाशय, फेफड़े, श्वासमार्ग, नासामार्ग और शिर इनमें स्थित कफादि दोषों का हरण करने वाले हैं। इन द्रव्यों में से कोविदार से पूर्व ओषधियों के फल तथा कोविदार से चित्रा तक की ओषधियों की जड़ वमनार्थ प्रयुक्त करनी चाहिये॥ ३॥

त्रिवृताश्यामादन्तीद्रवन्तीसप्तलाशङ्खिनीविषाणिकागवाक्षीच्छगलान्त्रीस्नुक्सुवर्णक्षीरिचित्रकर्किणिहीकुशकाशतिल्वककम्पिल्लकरम्यकपाटलापूगहरीतक्यामलकविभीतकनीलिनीचतुरङ्गुलैरण्डपूतीकमहावृक्षसप्तच्छदार्का ज्योतिष्मती चेत्यधोभागहराणि। तत्र तिल्वकपूर्वाणां मूलानि। तिल्वकादीनां पाटलान्तानां त्वचः। कम्पिल्लकफलरजः। पूगादीनामेरण्डान्तानां फलानि। पूतीकारग्वधयो पत्राणि। शेषाणां क्षीराणीति॥ ४॥

अधोभाग दोषहरद्रव्य अथवा विरेचक द्रव्य—लाल निशोथ, काली निशोथ, दन्ती, द्रवन्ती, सप्तला (सातला सेहुण्ड), शङ्खिनी (यवतिक्ता, कालमेघ), विषाणिका (वृश्चिकाली, मेढासींङ्गी), गवाक्षी (इन्द्रवारुणी), छगलान्त्री (विधारा), स्नुक् (थूहर), स्वर्णक्षीरी (सत्यानाशी), चित्रक, किणही (अपामार्ग) कुश, काश, तिल्वक (लोध), कवीला, रम्यक (वकायन या पटोलमूल), पाटला, सुपारी, हरड़, आंवला, बहेडा, नील, चतुरङ्गुल (अमलतास), एरण्ड, पूतिकरञ्ज, महावृक्ष (सेहुण्ड), सप्तपर्ण, आक और ज्योतिष्मती (मालकांगनी), ये ओषधियां विरेचन द्वारा अधोभाग के (वात मल, मूत्रादि) दोषों का हरण करती हैं। इनमें से तिल्वक से पूर्व की ओषधियों की जड़ें लेनी चाहिये तथा तिल्वक से पाटला तक की ओषधियों की छालें लेवें और कम्पिल्लक के फल के ऊपर सञ्चित हुई रज ग्रहण करे तथा सुपारी से लेकर एरण्ड तक के द्रव्यों के फल ग्रहण करे और पूतिक तथा आरग्वध (अमलतास) के पत्र तथा शेष ओषधियों का क्षीर विरेचनादि कार्य में ग्रहण करना चाहिये॥ ४॥

विमर्शः—अमलतास के व्यवहार में फली के गूदे का

विरेचनार्थं अधिक प्रयोग होता है। पत्र का तो क्वचित् प्रयोग है।

कोशातकी सप्तला शङ्खिनी देवदाली कारवेल्लिका चेत्युभयतोभागहराणि। एषां स्वरसा इति ॥ ५ ॥

उभयभागदोपहर द्रव्य—कोशातकी, सप्तला, शङ्खिनी, देवदाली, करेला ये द्रव्य वमन तथा विरेचन द्वारा शरीर के ऊर्ध्व और अधोभाग के दोषों का हरण करते हैं। इनका स्वरस कार्य में लेना चाहिये ॥ ५ ॥

पिप्पलीविडङ्गापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरबिम्बीगिरिकर्णिकाकिणिहीवेराज्योतिष्मतीकरञ्जार्कालर्कलशुनातिविषाशृङ्गवेरतालीशतमालसुरसार्जकेङ्गुदीमेषशृङ्गीमातुलुङ्गीसुरङ्गीपीलुजातीशालतालमधुकलाक्षाहिङ्गुलवणमद्यगोशकृद्रसमूत्राणीति शिरोविरेचनानि। तत्र, करवीरपूर्वाणां फलानि। करवीरादीनामर्कान्तानां मूलानि। तालीशपूर्वाणां कन्दाः। तालीशादीनामर्जकान्तानां पत्राणि। इङ्गुदीमेषशृङ्ग्योस्त्वचः। मातुलुङ्गीसुरङ्गीपीलुजातीनां पुष्पाणि। शालतालमधूकानां साराः। हिङ्गुलाक्षे निर्य्यासौ। लवणानि पार्थिवविशेषाः। मद्यान्यासुतसंयोगाः। शकृद्रसमूत्रे मलाविति ॥ ६ ॥

शिरोविरेचक द्रव्य—पिप्पली वायविडङ्ग, अपामार्ग, सहजन, श्वेत सरसों, शिरीष, काली मरिच, कनेर, कुन्दरू, अपराजिता, कटभी, वचा, मालकाङ्गनी, करञ्ज, आक, श्वेतपुष्प का आक, लहसुन, अतीस, सोंठ, तालीसपत्र, तमालपत्र, सुरसा (तुलसी), अर्जक (तुलसी भेद), इंगुदी, मेढासींङ्गी, विजौरे का भेद, सुरङ्गी (लाल सहजन), पीलु, जाती (चमेली), साल वृक्ष, ताड़वृक्ष, महुआ, लाख, हींग, लवण, मद्य, गोबर का रस और गोमूत्र ये शिरोविरेचक द्रव्य हैं। इनमें से कनेर से पहले कहे हुए द्रव्यों के फल लेवे तथा करवीर से आक तक के द्रव्यों की जड़ें और तालीश के पूर्व के द्रव्यों के कन्द तथा तालीस से अर्जक तक के द्रव्यों के पत्र, इङ्गुदी और मेषशृङ्गी की छाल लेनी चाहिये, मातुलुङ्गी, सुरङ्गी, पीलु और जाति इनके पुष्प लेवे, साल, ताल और महुआ इनके सार भाग को लेवे, हिङ्गु और लाक्षा ये निर्यास (गोंद) के रूप में ग्रहण किये जाते हैं। लवण पार्थिव (खनिज) विशेष होते हैं। सन्धान करने से मद्य तैयार होते हैं। गोबर का रस और गोमूत्र ये मल हैं ॥ ६ ॥

संशमनान्यत ऊर्ध्वं वक्ष्यामः-तत्र, भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलाऽतिबलातगलकच्छुरासल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्कार्कशतावरीपुनर्नवावासुकवसिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीपत्तूरवदरयवकोलकुलत्थप्रभृतीनि। विदारिगन्धादिश्च द्वे चाद्ये पञ्चमूल्यौ समासेन वातसंशमनो वर्गः ॥ ७ ॥

अब यहां से संशमनीय वर्ग की ओषधियों का वर्णन करते हैं। वात संशमन वर्ग—देवदारु, कुष्ठ, हरिद्रा, वरुण, मेढासींङ्गी, बला, अतिबला (कंघी), आर्तगल (नीलपियावासा), कौंच के बीज, सल्लकी, कुबेराक्षी (पाटला), वीरतरु (अर्जुन), सहचरा (पियावासा), अरणी, वत्सादनी (गिलोय), पुरण्ड, पाषाणभेद, श्वेत पुष्प का आक, आक, शतावरी, पुनर्नवा, वसुक (मोलसीरी फूल), वसिर (सूर्यावर्त), कचनार (डल्हण मत से धत्तूर), भारंगी, वनकपास, विच्छूटी, पत्तूर (कुचन्दन), बैर, यव, कोल (झड़बेर), कुलथी इत्यादि ओषधियां तथा पूर्वोक्त विदारीगन्धादिगण, आदि के लघु तथा बृहत्पञ्चमूल ये सब संक्षेप से वातसंशामक हैं ॥

चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठापयस्याविदारीशतावरीगुन्द्राशैवलकह्लारकुमुदोत्पलकदलीकन्दलीदूर्वामूर्वाप्रभृतीनि काकोल्यादिः सारिवादिरञ्जनादिरुत्पलादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः ॥ ८ ॥

पित्तसंशमनवर्ग—श्वेतचन्दन, लालचन्दन, ह्रीवेर (वालक), खस, मजीठ, क्षीरकाकोली, विदारीकन्द, शतावर, गुन्द्रा (तृणभेद), शैवल (काई), कह्लार (श्वेत, नील या लाल कमल), कुमुद (श्वेतकमल), उत्पल (किञ्चिन्नीलकमल), कन्दली (पद्मबीज), दूर्वा, मूर्वा इत्यादि ओषधियां तथा काकोल्यादिगण, सारिवादिगण, अञ्जनादिगण, उत्पलादिगण, न्यग्रोधादिगण और तृणपञ्चमूल ये सब संक्षेप से पित्तसंशामक द्रव्य हैं ॥ ८ ॥

कालेयकागुरुतिलपर्णीकुष्ठहरिद्राशीतशिवशतपुष्पासरलारास्नाप्रकीर्य्योदकीर्य्येङ्गुदीसुमनःकाकादनीलाङ्गलकीहस्तिकर्णमुञ्जातकलामज्जकप्रभृतीनि वल्लीकण्टकपञ्चमूल्यौ पिप्पल्यादिर्बृहत्यादिर्मुष्ककादिर्वचादिः सुरसादिरारग्वधादिरितिसमासेन श्लेष्मसंशमनो वर्गः॥९॥

कफसंशमन वर्ग—कालेयक (हरिचन्दन या पीतचन्दन), अगर, तिलपर्णी (लाल चन्दन), कुष्ठ, हरिद्रा, शीतशिव कपूर या सेन्धा नमक या सौंफ), सौंफ, सरला (त्रिवृत् या राल का वृक्ष), रास्ना, प्रकीर्य (पूतिकरञ्ज), उदकीर्य (करञ्ज), हींगोट, चमेली, काकादनी (गुक्षा), कलिहारी, हस्तिकर्ण (भूपलाश या रक्तैरण्ड), मुञ्जातक, लामज्जक (रसभेद) आदि ओषधियां तथा वल्लीपञ्चमूल, कण्टकपञ्चमूल, पिप्पल्यादिगण, बृहत्यादिगण, मुष्ककादिगण, वचादिगण, सुरसादिगण और आरग्वधादिगण यह संक्षेप से कफ का संशमन करने वाला वर्ग है ॥ ९ ॥

तत्र सर्वाण्येवौषधानि व्याध्यग्निपुरुषबलान्यभिसमीक्ष्य विदध्यात्। तत्र, व्याधिबलादधिकमौषधमुपयुक्तं तमुपशम्य व्याधिं व्याधिमन्यमावहति। अग्निबलादधिकमजीर्णं विष्टभ्य वा पच्यते। पुरुषबलादधिकं ग्लानिमूर्च्छामदानावहति संशमनम्। एवं संशोधानमतिपातयति। हीनमेभ्यो दत्तमकिञ्चित्करं भवति तस्मात्सममेव विदध्यात् ॥ १० ॥

उक्त सर्व प्रकार की ओषधियों को रोग, जठराग्नि और रोगी इनके बल का विचार करके न्यूनाधिक मात्रा में प्रयुक्त

करनी चाहिये। यदि रोग के वल की अपेक्षा अधिक वल वाली ओषधि प्रयुक्त की जाय तो वह ओषधि पूर्व व्याधि को तो नष्ट कर देती है किन्तु अन्य व्याधि को उत्पन्न करती है। जठराग्नि की शक्ति से अधिक मात्रा या वल वाली औषध देने से अजीर्ण उत्पन्न करती है अथवा पेट में शूलादिक उत्पन्न करके देर से हजम होती है। रोगी के वल से अधिक मात्रा या वल वाली प्रयुक्त संशामक औषध ग्लानि, मूर्च्छा और मद उत्पन्न करती है। इस प्रकार से प्रयुक्त संशमन ओषधियां दोषवती होती हैं। संशोधन औषध भी रोग, अग्नि और रोगी के वल से अधिक प्रयुक्त करने पर रोगी को अधिक हानि पहुंचाती है। रोग, अग्नि तथा रोगी की शक्ति की अपेक्षा अल्पमात्रा में दी हुई औषध निष्फल हो जाती है। इस लिये रोग, अग्नि तथा रोगी के वल के अनुसार ही औषध मात्रा की कल्पना करनी चाहिये ॥ १० ॥

विमर्शः—विष्टब्धलक्षणम्-विष्टब्धे शूलमाध्मान विविधा वातवेदनाः। मलवातप्रवृत्तिश्च स्तम्भो मोहोऽन्नपीडनम् ॥ (अ० सं०)।

भवन्ति चात्र—

रोगे शोधनसाध्ये तु यो भवेद्दोषदुर्बलः।
तस्मै दद्याद्भिषक् प्राज्ञो दोषप्रच्यावनं मृदु ॥ ११ ॥

संशोधन कर्म से साध्यरोग में यदि रोगी दोषों की उत्कटता से दुर्बल हो गया हो तो उसे मतिमान् वैद्य दोषों को गिराने वाली मृदुवीर्य युक्त रेचक और वामक ओषधियां देवे॥

चले दोषे मृदौ कोष्ठे नेत्येतत्र बलं नृणाम्।
अव्याधिदुर्बलस्यापि शोधनं हि तदा भवेत् ॥ १२ ॥
स्वयं प्रवृत्तदोषस्य मृदुकोष्ठस्य शोधनम्।
भवेदल्पबलस्यापि प्रयुक्तं व्याधिनाशनम् ॥ १३ ॥

दोष के अपने स्थान से चलायमान न होने पर तथा कोष्ठ के मृदु होने पर रोगी के शारीरिक वल का विचार नहीं करना चाहिये क्योंकि विना व्याधि के (अर्थात् उपवासादि से) दुर्बल हुये रोगी को भी उस समय संशोधन करना हितकारी होता है। जिसके दोष स्वयं अपने स्थान से चलायमान हो गये हों तथा जिसका कोष्ठ मुलायम हो ऐसे अल्प वल वाले रोगी में भी प्रयुक्त संशोधक द्रव्य व्याधिनाशक होता है॥

व्याध्यादिषु तु मध्येषु काथस्याञ्जलिरिष्यते।
बिडालपदकं चूर्णं देयः कल्कोऽक्षसम्मितः ॥ १४ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने संशोधनसंशमनीयो नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

औषध मात्रा—व्याधि, अग्नि तथा रोगी के वल के मध्यम होने पर काथ का प्रमाण एक अञ्जलि (४ पल= १६ तोला) होना चाहिये तथा चूर्ण का प्रमाण एक विडालपदक (१ कर्ष, १ तोलाभर) होना चाहिये एवं कल्क का प्रमाण भी एक अक्ष (एक कर्ष = १ तोला) होना चाहिये ॥ १४ ॥

विमर्शः—मध्य तु मान निर्दिष्ट स्वरसस्य चतुष्पलम् ॥ किन्तु शार्ङ्गधर ने स्वरस का प्रमाण आधा पल ही लिखा है—स्वरसस्य गुरुत्वाच्च पलमर्धं प्रयोजयेत्। व्याध्यादिषु तु मध्येषु ॥ वस्तुतस्तु मात्रा की कोई निश्चित स्थिति नहीं है। मात्रायानास्त्यवस्थानं व्याधि कोष्ठ वल वयः। आलोच्य देशकालौ च योज्या तद्वच्च कल्पना ॥ (अ० सं०)।

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने संशोधनसंशमनीयो नामैकोनचत्वारिंशत्तमोऽध्यायः ॥ ३९ ॥

चत्वारिंशत्तमोऽध्यायः।

अथातो द्रव्यरसगुणवीर्य्यविपाकविज्ञानीयमध्याय व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'द्रव्य-रस-गुण-वीर्य-विपाकविज्ञानीय' नामक अध्याय का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १-२ ॥

विमर्शः—द्रव्यादिविज्ञानीय—द्रव्यादीना विशिष्ट ज्ञान तदधिकृत्य कृतोऽध्याय.। डाक्टरी में इसे फार्मेकोलोजी (Pharmacology) कहते है। इस विभाग से ओषधियों की उपयोगिता सिद्ध होती है। जिन ओषधियों की उपयोगिता रस, गुण, वीर्य, विपाकादि से नहीं हो सकती है वैसी स्थिति मे चरक तथा वाग्भट ने उनके लिये प्रभाव शब्द का प्रयोग किया है तथा सुश्रुत ने ऐसी ओषधियों को अचिन्तनीय तथा अमीमांस्य कहा है। अर्थात् ये ओषधियां किस तरह अपना कार्य करती हैं यह इनका प्रभाव है ऐसा माना है। द्रव्य-खादीन्यात्मा मनःकालो दिशश्च द्रव्यसग्रह.। (चरक)। यत्राश्रिता कर्मगुणाः कारण समवायि यत् तद् द्रव्यम् (चरक)। 'सर्वं द्रव्यं पाञ्चभौतिकमस्मिन्नर्थे' (चरक)। ओषधियों की पञ्चमहाभूतात्मक रचना द्रव्य है। डाक्टरी में द्रव्य को ओषधियों का सङ्गठन (Composition of drugs) कह सकते हैं। रस-'रसनाग्राह्यो गुणो रस.' (नैयायिक)। 'रस्यते आस्वाधते इति रस.' रसनार्थो रसः, (चरक)। जिह्वा के अतिरिक्त अन्य स्थानों से भी रस का ज्ञान होता है जैसे कटु या कषाय रस का ज्ञान गला, आमाशय और त्वचा द्वारा। डाक्टरी में यद्यपि इन रसों की कल्पना नहीं है फिर भी व्यवहारतः तिक्त को (Bitter) कषाय को (Astringent) तथा अम्ल को (Acid) कह सकते हैं। वैद्यक में रस और अनुरस दो माने हैं। तत्र व्यक्तो रस स्मृतः। अव्यक्तोऽनुरसः किञ्चिदन्ते व्यक्तोऽपि चेष्यते। (अ० सं०)। व्यक्तः शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते। विपर्ययेणानुरस ॥ (चरक)। गुणलक्षणम्—समवायी तु निश्चेष्ट कारण गुण। (चरक)। अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः॥ (कारिकावली)। द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्। (वैशेषिकदर्शन)। 'विशेषलक्षणा गुणा.' इति रसवैशेषिकसूत्रम्। गुण—को फार्मेकोलोजिकल एक्शन (Pharmecological action) कहते हैं। अर्थात् ओषधियों का शरीर पर रोगनाशन, स्वास्थ्यरक्षण एवं वलवृद्धिरूपी जो कार्य होता है वह गुण है। यद्यपि गुणों की संख्या अनेक हैं तथापि आयुर्वेद में बीस गुण प्रसिद्ध हैं। गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिरा.। गुणा सप्तदशविंशतिः सविपर्ययाः॥ इन्द्रियार्था व्यवायी च विकासी चाशुरे गुणा। (अ० सं०)। चरक मे ४१ गुण माने हैं—सार्था गुर्वादयो बुद्धि.

प्रकाशन शब्द। गुणाः प्रोक्ता—शब्द, स्पर्श, रूप, रस, गन्ध ये पञ्च इन्द्रियार्थ तथा गुरु, मन्दादि बीस सामान्य गुण, बुद्धि पूर्व इच्छा, द्वेष, सुख, दुःख और प्रयत्न ये आत्मगुण और परादि बुद्धि तक संयोग च। विभागश्च पृथक्त्वञ्च परिमाणानि च। संस्कारोऽभ्यास इत्येते गुणाः प्रोक्ता. परादयः। अर्थ शब्द से मन के अर्थ भी गृहीत होते हैं—वित्त विचार्य-मूढ़ चेत सङ्कल्पमेव च। मतिर्विज्ञानमेतो हेयं तत्सर्वं मनसंज्ञकम्। मनोमतोऽर्थो बुद्धिगम्य चेतश्चान्त द्रव्यगुणसंग्रहः। (च सू.अ ८)। कर्मादीनि—कर्म तत्सङ्ख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छादेषौ प्रयत्नाश्च गुणाः। (वै० द्र०)। वीर्यम्—वीर्यन्तु क्रियते येन या क्रिया सावीर्य कुरुते किञ्चिद्य सर्वा वीर्यकृता क्रिया। येन कुर्वन्ति तद्वीर्यम् (सुश्रुत)। येनेति हेतु वा, विवक्षेत वा, प्रभावो वा, गुर्वादिपरा-दादिभिर्गुणैर्या क्रिया स्पर्शादनसमन्वादिरूप कृत्वा क्रियते हस्तादिभिस्तत्र क्रियाग तद्यादि वीर्यम् (चक्रपाणिदत्त) तत्क्रियाकरणशक्तिरूपे द्रव्यक गुणविशेषे गुणे वीर्यम्। वीर्य शक्ति-स्वभावविशेष सामर्थ्य प्रभाव इत्यनर्थान्तरम्। अर्थात् जो कार्य द्रव्य, रस, गुण और विपाक द्वारा न हो सकता हो वह वीर्य या प्रभाव द्वारा हो जाता है। वीर्यभेदा—मृदुतीक्ष्णगुरुलघुस्निग्धरूक्ष-शीतोष्णं स्वत् वीर्यमप्यविध केचित् केचेद द्विविधमास्थिताः॥ शीतोष्ण मिति। (च. सू. अ. २६)। गुण और वीर्य में भेद—यद्यपि हरड़ और आंवले दोनों में समान गुण होते हैं किन्तु दोनों के वीर्य में भेद है। हरीतकी उष्णवीर्य तथा आंवले शीतवीर्य होते हैं। विपाक—अन्ते नानिना योगादद्वेति रसान्तरम्। रसाना परि-णामे स विपाकति स्मृत। (वाग्भट)। विपाकभेदा—त्रिध विपाको द्रव्यस्य स्वादम्लकटुकश्च। स्वादुः स्वादु मधुरमोऽम्ल पच्यते रस.। स्निग्धोऽपि वातनाशाय विपाक प्राह कटु ॥ (अ हृ.सू.अ.९)। द्वौ विपाकविधि मधुर—मधु. कटुकश्चेति। अन्ये प्रतिरस षड्वि-पाक मन्यते तद-प्रसाद बहुभावात् षड् केचित्तदाश्रित्। यत् स्वादुर्वातादिकल्प न शाम्यति वातादिभि। यानि पैत्तिक कटुना कटुर्पुरि न सिध्यो। यत्तस्वे गणानां न स्यादेव विपर्यय ॥

केचिदाचार्या ब्रुवते-द्रव्यं प्रधानम्। कस्मात्? व्यवस्थितत्वात्. इह खलु द्रव्यं व्यवस्थितं न रसादयः, यथा-आमे फले ये रसादयस्ते पक्वे न सन्ति। नित्यत्वाच्च, नित्यं हि द्रव्यमनित्या गुणाः; यथा-कलादि-प्रविभागः, स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च, यथा हि पार्थिवं द्रव्यमन्यमावं न गच्छत्यन्यं शेषाणि। पञ्चेन्द्रियग्रह-णाच्च, पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः। आश्र-यत्वाच्च, द्रव्यमाश्रिता रसादयो भवन्ति। आर-म्भसामर्थ्याच्च, द्रव्याश्रित आरम्भः, यथा-विदारिग-न्धादिमाहृत्य सङ्कलुप्य विपचेदित्येवमादिषु न रसा-दिष्वारम्भः। शास्त्रप्रामाण्याच्च, शास्त्रे हि द्रव्य प्रधा-नमुपदेशे हि योगानां, यथा-मातुलुङ्गाग्निमन्थौ चेत्यादौ न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसा-दीनां, रसादयो हि द्रव्यक्रममपेक्षन्ते, यथा-तरुणे तरुण सम्पूर्णे सम्पूर्ण इति। एकदेशसाध्यत्वाच्च, द्रव्याणामेकदेशेनापि व्याधयः साध्यन्ते, यथा-महा-वृक्षक्षीरेणेति। तस्माद् द्रव्यं प्रधानम्। द्रव्यलक्षणन्तु 'क्रियागुणवत् समवायिकारणम्' इति ॥ ३ ॥

कुछ आचार्य कहते हैं कि द्रव्य, रस, गुण, वीर्य और विपाकों में द्रव्य ही प्रधान है। किस हेतु से द्रव्य प्रधान है? उत्तर नं १-द्रव्य रसगुणादि की अपेक्षा व्यवस्थित (स्थिर या अपरिवर्तन शील) होने से प्रधान है। क्योंकि द्रव्य व्यवस्थित होते हैं, रस, गुण, वीर्यादि स्थिर नहीं होते हैं जैसे कच्चे फल में जो जो अम्लादि रस होते हैं वे पक्व में नहीं रहते हैं क्योंकि उनकी जगह मधुरादि रस बन जाते हैं। नं. २-द्रव्य की प्रधानता-सिद्धि में दूसरा हेतु द्रव्यों के नित्य होने का देते हैं। द्रव्य निश्चय ही नित्य होते हैं किन्तु गुण आदि उसमें अनित्य होते हैं। जैसे द्रव्य के कलल आदि विभाग होते हैं किन्तु उसके रसगन्धादि गुण कभी सम्पन्न (अच्छे) और कभी व्यापन्न (विकृत) होते हैं। नं ३-द्रव्य अपनी पार्थिवादि जाति में स्थिर रहने से प्रधान है जैसे कि पार्थिवादि द्रव्य अन्य जलादि जाति में परिवर्तित नहीं होते हैं एवं शेष जल, तेज आदि द्रव्य भी अन्य जाति में परिवर्तित नहीं होते हैं। नं ४-पांचों ज्ञानेन्द्रियों के द्वारा ग्रहण किये जाने से द्रव्य प्रधान है जैसे द्रव्यों को पांचों इन्द्रियों से जान सकते हैं किन्तु रस-गन्धादि गुण एक२ इन्द्रिय से ही जाने जाते हैं। नं ५-आश्रय (आधार) होने से द्रव्य प्रधान है क्योंकि रस, गन्ध आदि द्रव्य को ही आश्रित करके रहते हैं। नं ६-कुटन, आहरण तथा योग का आरम्भ आदि द्रव्य से ही होता है अतः वही प्रधान है जैसे विदारिगन्धादि गण के द्रव्य को लेकर कूट के पकावे। इस तरह का रस, गन्धादि में कार्य नहीं किया जाता है। नं ७-शास्त्र के प्रमाण से भी द्रव्य ही प्रधान है जैसे शास्त्र में किसी भी योग के वर्णन में द्रव्य ही प्रधान माने गये हैं। जैसे 'मातुलुङ्गादि योग' में मातुलुङ्ग, अग्निमन्थ आदि द्रव्यों के ही नाम लिखे हैं। रस-गन्धादिगुणों के नाम से किसी भी योग का उपदेश नहीं किया गया है। नं. ८-द्रव्यों के क्रम (स्थित्यन्तर) के अनुरूप ही रसगन्धादि गुणों की उत्पत्ति का क्रम अपेक्षित होने से द्रव्य ही प्रधान है क्योंकि रस-गन्धादि द्रव्य के क्रम के अनुसार बदलते रहते हैं। जैसे तरुण (अपक्व) द्रव्य में रस-गन्धादि भी तरुण (अपक्व) रहते हैं और सम्पूर्ण (परिपक्व) द्रव्य में रसगन्धादि भी पूर्ण हो जाते हैं। नं. ९-द्रव्यों के एक देश द्वारा साध्य होने से भी द्रव्य प्रधान हैं। द्रव्यों के एक देश से भी व्याधियां ठीक हो जाती हैं, जैसे महावृक्ष (बूहर) के दुग्ध से अनेक गुल्म, शूल, आध्मान, यकृद्वृद्धि आदि रोग ठीक हो जाते हैं, इसलिये उपर्युक्त सर्वकारणों से द्रव्य ही प्रधान है। द्रव्य का लक्षण इस प्रकार का है—जिसमें क्रिया तथा गुण दोनों रहते हों तथा जो समवायी कारण हो उसे 'द्रव्य' कहते हैं ॥ ३ ॥

विमर्श—क्रियागुणवत्—क्रियाश्च गुणाश्च सन्त्यस्मिन्निति। समवायिकारणं यत्समवेत कार्यमुत्पद्यते, यथा तन्तवः पटस्य।

नेत्याहुरन्ये। रसात्तु प्रधानम्, कस्मात्? आग-मात्, आगमो हि शास्त्रमुच्यते; शास्त्रे हि रसा अधि-कृताः, यथा-रसायत्त आहार इति, तस्मिंश्च प्राणाः।

उपदेशाच्च, उपदिश्यन्ते हि रसाः, यथा-मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च, रसेन ह्यनुमीयते द्रव्यं, यथा-मधुरमिति। ऋषिवचनाच्च, ऋषिवचनं वेदो यथा-किञ्चिदिह्यार्थं मधुरमाहरेदिति। तस्माद्रसाः प्रधानम्। रसेषु गुणसंज्ञा। रसलक्षणमन्यत्रोपदेक्ष्यामः॥ ४॥

द्रव्य प्रधान नहीं है ऐसा अन्य आचार्य कहते हैं। उनका मत है कि रस ही प्रधान है। किस कारण से? नं १-आगम प्रमाण से। 'आगम' शास्त्र को कहते हैं। शास्त्र में रसों ही को प्रधान माना है। जैसे रसों के आधीन आहार है तथा आहार के आधीन प्राण हैं। नं २-उपदेश से भी रस प्रधान हैं। रसों का ही उपदेश किया जाता है जैसे मधुर, अम्ल और लवण रस वात का शमन करते हैं। नं. ३-अनुमान से भी रस प्रधान है क्योंकि रसों ही के द्वारा द्रव्य का अनुमान होता है जैसे यह द्रव्य मधुर है। नं ४-ऋषियों के वचन से भी रस प्रधान हैं। ऋषियों के वचन वेद हैं। जैसें यज्ञ करने के लिये कुछ मधुर लाओ, यहां पर द्रव्य का निर्देश न कर मधुर रस का ही वेद ने निर्देश किया है इसलिये उपर्युक्त सर्वकारणों से रस ही प्रधान होते है। रसों ही की 'गुण' संज्ञा है। रस का लक्षण अन्य स्थान में कहेंगे॥ ४॥

नेत्याहुरन्ये। वीर्य्यं प्रधानमिति। कस्मात्? तद्धशेनौषधकर्मनिष्पत्तेः। इहौषधकर्माण्यूर्ध्वाधोभागोभयभागसंशोधनसंशमनसङ्ग्राहकाग्निदीपनपीडनलेखनबृंहणरसायनवाजीकरणश्वयथुकरविलयनदहनदारणमादनप्राणघ्नविषप्रशमनानि वीर्य्यप्राधान्याद्भवन्ति। तच्च वीर्य्यं द्विविधमुष्णं शीतं च, अग्नीषोमीयत्वाज्जगतः। केचिदष्टविधमाहुः—शीतमुष्णं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेति एतानि वीर्याणि स्वबलगुणोत्कर्षाद्रसमभिभूयात्मकर्म कुर्वन्ति। यथा तावन्महत्पञ्चमूलं कषायं तिक्तानुरसं वातं शमयति, उष्णवीर्यत्वात्, तथा कुलत्थः कषायः, कटुकः पलाण्डुः, स्नेहभावाच्च। मधुरश्चेक्षुरसो वातं वर्द्धयति, शीतवीर्यत्वात्। कटुका पिप्पली पित्तं शमयति, मृदुशीतवीर्यत्वात्, अम्लमामलकं लवणं सैन्धवञ्च। तिक्ता काकमाची पित्तं वर्द्धयति, उष्णवीर्यत्वात्, मधुरा मत्स्याश्च। कटुकं मूलकं श्लेष्माणं वर्द्धयति, स्निग्धवीर्यत्वात्। अम्लं कपित्थं श्लेष्माणं शमयति, रूक्षवीर्यत्वात्, मधुरं क्षौद्रञ्च। तदेतन्निदर्शनमात्रमुक्तम्॥ ५॥

अन्य आचार्य कहते है कि रस भी प्रधान नहीं है, वीर्य ही प्रधान है। किस कारण से? उत्तर—वीर्य की अधीनता ही से ओषधियों का रोगनाशनादि कार्य होने से जैसे इस शास्त्र में ओषधियों के भिन्न भिन्न कार्य, यथा ऊर्ध्वभाग का वमन द्वारा संशोधन, अधोभाग का विरेचन द्वारा संशोधन, उभय भाग संशोधन, संशमन, संग्राहक, अग्निदीपन, प्रपीडन, लेखन, बृंहण, रसायन, वाजीकरण, श्वयथु (शोथ) हर, श्वयथुविलयन, दहन, दारण, मादन, प्राणनाशन तथा विषप्रशमन आदि ओषधियों का कर्म वीर्य की प्रधानता से ही होते हैं। यह वीर्य उष्ण और शीत ऐसे दो प्रकार का है क्योंकि समस्त संसार भी आग्नेय और सौम्य (जल) द्विविध तत्त्वों से ही बना है। कुछ लोग वीर्य को आठ प्रकार का मानते हैं जैसे शीत, उष्ण, स्निग्ध, रूक्ष, विशद, पिच्छिल, मृदु और तीक्ष्ण। उक्त द्विविध या अष्टविध वीर्य अपने बल के गुणोत्कर्ष से रस को पराजित करके स्वकार्य करते हैं। जैसे 'बृहत्पञ्चमूल' रस में कषाय तथा अनुरस में तिक्त होता हुआ भी उष्णवीर्य होने से वात का शमन करता है। इसी तरह कषायानुरस कुलत्थ उष्णवीर्य होने से एवं कटुकरस वाला प्याज स्निग्धवीर्य होने से वायु का शमन करता है। इक्षु (गन्ने) का रस मधुर होता हुआ भी शीतवीर्य होने से वायु को बढाता है। कटुक रस वाली पीपल मृदु शीतवीर्य होने से पित्त को शान्त करती है। अम्ल रस युक्त आंवला और लवण रस युक्त सैन्धव नमक शीतवीर्य होने से पित्त का शमन करते है। तिक्तरस युक्त मकोय उष्णवीर्य होने से पित्त को बढ़ाती है। इसी प्रकार मत्स्य मधुर रसवती होने पर भी उष्णवीर्य होने से पित्त को बढ़ाती है। मूली कटु रस वाली होती हुई भी स्निग्धवीर्या होने से कफ को बढ़ाती है। अम्ल रस युक्त कपित्थ रूक्षवीर्य होने से श्लेष्मा को शान्त करता है तद्वत् मधुर रस युक्त मधु (शहद) भी रूक्षवीर्य होने से कफ को शान्त करता है। इस तरह वीर्य के विषय में यह निदर्शनमात्र कहा है॥ ५॥

भवन्ति चात्र—

ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्॥ ६॥
ये रसाः पित्तशमना भवन्ति यदि तेषु वै।
तैक्ष्ण्यौष्ण्यलघुताश्चैव न ते तत्कर्मकारिणः॥ ७॥
ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै।
स्नेहगौरवशैत्यानि न ते तत्कर्मकारिणः॥ ८॥
तस्माद्वीर्यं प्रधानमिति॥ ९॥

इस विषय में अन्य भी कहा है यथा जो रस वात के संशामक है यदि उनमें रूक्षता, लघुता और शीतता हो तो वे वात का शमन नहीं करते हैं। इसी तरह जो रस पित्त के संशामक हैं उनमें यदि तीक्ष्णता, उष्णता और लघुता हो तो वे रस पित्त को शान्त नहीं करते है। जो रस कफशामक है यदि उनमें स्निग्धता, गुरुता और शैत्य हो तो वे कफ का शमन नहीं करते हैं। इस हेतु से वीर्य ही प्रधान है॥ ६-९॥

विमर्शः—रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः। तत्राधा मारुत-घ्नन्ति त्रयस्तिक्तादय कफम्। कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते॥ (अष्टाङ्गहृदय)।

नेत्याहुरन्ये। विपाकः प्रधानमिति। कस्मात्? सम्यङ्मिथ्याविपाकत्वात्। इह सर्वद्रव्याण्यभ्यवहृतानि सम्यङ्मिथ्याविपकानि गुणं दोषं वा जनयन्ति॥१०॥

अन्य आचार्य कहते हैं कि द्रव्य, रस और वीर्य इनमें से

कोई भी प्रधान नहीं है। उनका कथन है कि विपाक ही प्रधान है। किस हेतु से? उत्तर—सब द्रव्यों का योग्य अथवा मिथ्या विपाक होने से, क्योंकि आहारादि रूप में ग्रहण किये (खाये) हुये सर्व द्रव्य सम्यक् अथवा मिथ्या रूप से विपक्व होकर ही गुण या दोषों के उत्पन्न करते हैं॥ १०॥

तत्राहुरन्ये—प्रतिरसं पाक इति। केचित्त्रिविधमिच्छन्ति—मधुरमम्लं कटुकं चेति। तत्तु न सम्यक्; भूतगुणोद्रेकमाश्रान्योऽम्लो विपाको नास्ति। पित्तं हि विदग्धमम्लतामुपैत्यग्निमान्द्यत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति; श्लेष्मा हि विदग्धो लवणतामुपैतीति॥ ११॥

विपाक के भेदों के विषय में कई अन्य आचार्य कहते हैं कि प्रतिरस पाक होता है अर्थात् मधुरादि रस ६ होने से उनके विपाक के भी ६ भेद होते हैं। कुछ आचार्य मधुर, अम्ल और कटुक ऐसे तीन प्रकार के विपाक मानते हैं किन्तु यह मत ठीक नहीं है क्योंकि पञ्चमहाभूतों के गुणों से और आगम (शास्त्र) से अन्य अम्ल विपाक सिद्ध नहीं होता है। केवल अग्नि की मन्दता होने से पित्त विदग्ध होकर अम्लता को प्राप्त होता है वह विपाक नहीं है। यदि ऐसा ही मान लिया जाय तो चौथा लवण-विपाक भी मानना पड़ेगा क्योंकि पित्त की तरह कफ भी विदग्ध होकर लवणता को प्राप्त होता है॥११॥

मधुरो मधुरस्यान्तोऽम्लस्यैवं सर्वेषामिति केचिदाहुः। दृष्टान्तं चोपदिशन्ति—यथा तावत् क्षीरमुष्णागतं पच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति। केचिदूचुः—अवशवन्तो बलवतां वशमायान्तीति। एवमनवस्थिति; तस्मादसिद्धान्त एषः॥ १२॥

अन्य आचार्य कहते हैं कि मधुर रस का विपाक मधुर और अम्ल रस का विपाक अम्ल इस तरह सभी (छहों) रसों का वही पाक होता है। इस विषय में दृष्टान्त देते हैं कि जैसे दूध (पात्र) में पकता हुआ दूध प्रारम्भ से अन्त तक मधुर ही रहता है इसी तरह चावल, जव और मूंग खेत में बोने पर अङ्कुरित होकर बढ़ने और पकने तक अन्त में भी अपने स्वभाव (स्वरूप) का परित्याग नहीं करते हैं उसी प्रकार रस भी पकने पर अपने स्वभाव को नहीं छोड़ते हैं। कुछ आचार्य कहते हैं कि इन रसों में जो बलहीन होते हैं वे बलवान् के वश में हो जाते हैं। इस तरह सर्वमत अव्यवस्थित हैं। इसलिये तीन रस मानना अथवा ६ रस मानना कोई सिद्धान्त या शास्त्रसम्मत नहीं है॥ १२॥

आगमे हि द्विविध एव पाको मधुरः कटुकश्च। तयोर्मधुरस्यो गुरुः; कटुकस्यो लघुरिति। तत्र पृथिव्यग्नेजोवय्वाकाशानां द्वैविध्यं भवति गुरुत्वावय्वाद् गुरुता लघुता च। पृथिव्यापश्च गुर्व्यः; शेषाणि लघूनि। तस्माद् द्विविध एव पाक इति॥ १३॥

आगम (आयुर्वेद शास्त्र) में मधुर और कटु ऐसे दो ही प्रकार के पाक होते हैं। उनमें से मधुर विपाक गुरु होता है और कटु विपाक लघु होता है। पृथिवी, जल, तेज, वायु और आकाश इन पञ्चमहाभूतों के गुणों के सादृश्य से गुरुता और लघुता ऐसे दो भेद होते हैं। इनमें पृथिवी और जल गुरु होते हैं तथा शेष तेज, वायु और आकाश लघु होते हैं इस लिये विपाक भी दो ही प्रकार का होता है॥ १३॥

भवन्ति चात्र—

द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः।
निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥ १४॥
तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु।
निर्वर्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते॥ १५॥

इस विषय में कहा है कि जिन पच्यमान द्रव्यों में पृथिवी और जल के गुणों की बहुलता होती है उनमें मधुर पाक होता है और जिन पच्यमान द्रव्यों में तेज, वायु और आकाश के गुणों की बहुलता होती है उनमें कटुविपाक होता है॥१४-१५॥

पृथक्त्वदर्शिनामेव वादिनां वादसङ्ग्रहः।
चतुर्गामपि सामग्र्यमिच्छन्त्यत्र विपश्चितः॥१६॥

पृथक् पृथक् द्रव्य, रस, गुण वीर्य, विपाक का प्राधान्य मानने वाले विवादी आचार्यों के वादविवाद का संग्रह ऊपर दिखा दिया है। इस विषय में विद्वान् मनुष्य रस, गुण, वीर्य और विपाक इन चारों के समुदाय को प्रधानरूप से स्वीकार करते हैं॥ १६॥

तद् द्रव्यमात्मना किञ्चित्किञ्चिद्वीर्य्येण सेवितम्।
किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा॥ १७॥

वस्तुतः कुछ द्रव्य अपनी आत्मा या द्रव्यात्मक सामर्थ्य से, कुछ वीर्य के सामर्थ्य से, कुछ रस और विपाक के सामर्थ्य से दोषों को नष्ट करते हैं अथवा दोष-प्रकोपन करते हैं॥१७॥

विमर्श—वास्तव में शरीर पर द्रव्यों का जो रोगनाशनरूपी या रोगवृद्धिरूपी कार्य होता है वह द्रव्य के रस, वीर्य, विपाक इनके मिलित सामर्थ्य से होता है। चरक तथा वाग्भट भी इसी मत को मानते हैं—किञ्चिद्रसेन कुरुते कर्म वीर्येण चापरम्। द्रव्यं गुणेन पाकेन प्रभावेण च किञ्चन॥ रसवीर्यविपाकानां मध्ये कः कं जयति? उच्यते—स्वद् द्रव्ये रसादीनां बलवत्त्वेन वर्तते। अभिभूतेतरांस्तत्तद् कुरुते ते प्रकुर्वते॥ विरुद्धगुणसंयोगे मूलत्वं हि वीर्यते। रसे विपाकस्तौ वीर्ये प्रभावत्वात् व्यपोहति॥ बलवान्ये रसादीनामिति- रसादिकं बलम्। रसवीर्यविपाकानां सामान्यं यत्र दृश्यते॥ विशेष- कर्मणाञ्चैव प्रभावस्तत्र च स्मृतः। प्रभावोऽचिन्त्य उच्यते। प्रभावोऽपि द्विविधश्चिन्त्यः प्रभावः पाठाया वंशादौ, अचिन्त्यस्तु मणिकुष्ठादीनां धारणेन रोगनिवृत्तिः। द्रव्यं द्रव्यस्थौ रसवीर्यविपाकौ समवेतौ तत्तौ विरेचयति द्रव्यं तु न रेचयति। (चरक)।

पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद् द्रव्यं श्रेष्ठतमं स्मृतम्॥१८॥

वीर्य के विना पाक नहीं, रस के विना वीर्य नहीं एवं आधारभूत द्रव्य के विना रस की उत्पत्ति नहीं होती इसलिये द्रव्य को ही अधिक श्रेष्ठ या प्रधान समझना चाहिये॥ १८॥

जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षिकं स्मृतम्।
अन्योऽन्यापेक्षिकं जन्म यथा स्याद् देहदेहिनोः ॥१९॥
वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः।
रसेषु न भवन्त्येते निर्गुणास्तु गुणाः स्मृताः ॥ २० ॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः।
श्रेष्ठं द्रव्यमतो ज्ञेयं, शेषा भावास्तदाश्रयाः ॥ २१ ॥

द्रव्य और रस का जन्म एक दूसरे के आश्रित है जिस तरह देह (शरीर) और देही (आत्मा) का जन्म (आविर्भाव) एक दूसरे के आधीन होता है। इसी तरह वीर्यसंज्ञक आठों गुण भी द्रव्य के ही आश्रित होते है। रसों के अन्दर ये वीर्यसंज्ञक गुण नहीं रह सकते हैं क्योंकि गुण के लक्षण में यह बताया है कि गुण गुण में नहीं रहते हैं। पाञ्चभौतिक इस द्रव्य (शरीर) में औषधीय अथवा आहारोपयोगी द्रव्य ही पकते हैं न कि षड्रस अथवा वीर्यादि अत एव द्रव्य को ही श्रेष्ठ या प्रधान मानना चाहिये तथा शेष अन्य भाव अर्थात् रस, गुण, वीर्य, विपाकादि उस द्रव्य के ही आश्रित हो कर रहते हैं ॥ १९-२१ ॥

विमर्श—वस्तुतो द्रव्येष्वेव गुणा भवन्ति, लाक्षणिकत्वाच्च रसगुणा उच्यन्ते-गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रये। रसेषु व्यपदिश्यन्ते लाक्षणिकोपचारात ॥ (वाग्भट सू०अ०९) रसों की गुणसंज्ञा है (रसेषु गुणसंज्ञा इति स्मृतम्।) तथा गुण स्वयं निर्गुण होते हैं—अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणा ॥ अत एव जो रसों के शीतादिगुण कहे हैं वे द्रव्य के ही गुण हैं—गुणा गुणाश्रया नोक्तास्तस्माद्रसगुणान् भिषक्। विद्याद् द्रव्यगुणान् कर्तुरभिप्रायः पृथग्विधः ॥ (च० सू० अ० २६)।

अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः।
आगमेनोपयोज्यानि भेषजानि विचक्षणैः ॥ २२ ॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः।
नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन ॥ २३ ॥
सहस्रेणापि हेतूनां नाम्बष्ठादिर्विरेचयेत्।
तस्मात्तिष्ठेत्तु मतिमानागमे न तु हेतुषु ॥ २४ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने द्रव्यरसगुणवीर्यविपाकविज्ञानीयो नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

अपने स्वभाव से प्रसिद्ध ओषधियों (खदिर, तुवरक, रसाञ्जन, हरिद्रादि कुष्ठनाशक) के विषय में कोई मीमांसा (तर्क वितर्क, यह ऐसी है या नहीं आदि) या चिन्तन नहीं करना चाहिये किन्तु विद्वान् वैद्य उन्हें जैसा आगम (शास्त्र) ने आज्ञा दे रखी है तदनुसार प्रयुक्त करे। जिन ओषधियों के लक्षण और फल प्रत्यक्ष हों तथा जो स्वभाव से ही प्रसिद्ध हों उन ओषधियों को विद्वान् वैद्य किसी भी प्रकार तर्कवितर्क से नहीं परखे। हजारों तर्क वितर्क रूपी हेतुओं से भी अम्बष्ठा (पाठा) आदि ओषधियों का विरेचनकर्तृत्व सिद्ध नहीं किया जा सकता है अत एव मतिमान् वैद्य आगम (शास्त्र) में विश्वास करे। हेतु या तर्क से उनका गुणधर्म या प्रयोग न करे॥

विमर्शः—ओषधियों के वैद्यकीय उपयोगों की मीमांसा अथवा उपपत्ति उनके पञ्चमहाभूतात्मक सङ्गठन, रस, गुण, वीर्य और विपाक के द्वारा की जाती है किन्तु खदिर, तुवरक, विषमणि आदि द्रव्यों के उपयोग की उपपत्ति उनके रसादि द्वारा ज्ञात न होने पर उन्हें अचिन्त्य या अमीमांस्य मान लिया है किन्तु 'चरक' और 'वाग्भट' ने द्रव्यों के इस अचिन्त्य शक्ति को ही प्रभाव मान लिया है। रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम्। (अ० सं० सू० अ० १७) डाक्टरी में ओषधियों के उपयोगों की मीमांसा उपलब्ध वैज्ञानिक तरीकों से की जा सकती है उन्हें 'मीमांस्य' (Rational) तथा जिनकी मीमांसा न की जा सके उन्हे 'अमीमांस्य' (Emphrical) कहते है। जैसे मलेरिया में Quinine, T. B के लिये स्वर्ण अमीमांस्य हैं।

इत्यायुर्वेदतत्त्वसंदीपिकाभाषायां द्रव्यरसगुणवीर्यविपाकविज्ञानीयो नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

एकचत्वारिंशत्तमोऽध्यायः।

अथातो द्रव्यविशेषविज्ञानीयमध्यायं व्याख्यास्यामः ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'द्रव्यविशेषविज्ञानीय' नामक अध्याय का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १-२ ॥

तत्र, पृथिव्यग्निजोवाय्वाकाशानां समुदायाद् द्रव्याभिनिर्वृत्तिः, उत्कर्षस्त्वभिव्यञ्जको भवति इदं-पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति॥

द्रव्योत्पत्ति—पृथिवी, जल, तेज, वायु और आकाश इन पांचों तत्त्वों के मिलने से द्रव्य की उत्पत्ति होती है। इन पांचों के समुदाय में से जिस भूत के गुणों की उत्कृष्टता होती है उसी से वह द्रव्य पहचाना जाता है जैसे यह 'पार्थिव' है, यह 'जलीय' है यह 'तैजस' द्रव्य है यह 'वायव्य' द्रव्य है और यह 'आकाशीय' द्रव्य है ॥ ३ ॥

विमर्शः—कार्यरूपी द्रव्य पञ्चमहाभूतात्मक हैं—इह हि द्रव्य पञ्चमहाभूतात्मक, तस्याधिष्ठान पृथिवी, योनिरुदक, खानिलानलसमवायान्निर्वृत्तिविशेषौ ॥ (अ० सं०)। प्रायः प्रत्येक द्रव्य में थोड़ी बहुत मात्रा में 'पञ्चमहाभूत' रहते हैं और जिसमें जिस भूत के गुणों का आधिक्य हो उसका उसी भूत के नाम से व्यपदेश करते हैं—'व्यपदेशस्तु भूयसा'।

तत्र, स्थूलसारसान्द्रमन्दस्थिरखरगुरुकठिनगन्धबहुलमीषत्कषायं प्रायशो मधुरमिति पार्थिवम्। तत् स्थैर्य्यबलगौरवसङ्घातोपचयकरं विशेषतश्चाधोगतिस्वभावमिति ॥ ४ ॥

पार्थिव द्रव्य—इनमें जो स्थूल, सार (दृढता) युक्त, सान्द्र (ठोस), मन्द, स्थिर, गुरु (भारी) तथा कठिन हो तथा गन्ध की जिसमें अधिकता हो एवं कुछ कषाय और प्रायः मधुर रस का आधिक्य हो उसे 'पार्थिव' द्रव्य समझना चाहिये। वह शरीर की स्थिरता, बल, गुरुता, कठिनता और वृद्धि को करता है तथा विशेषकर उसे ऊचा फेंकने पर भी नीचे गिरने (गति करने) का स्वभाव वाला होता है ॥ ४ ॥

विमर्शः—'गुरूदाकर्षण नियम' से पार्थिव पदार्थ नीचे गिरते हैं।

शीतस्तिमितस्निग्धमन्दगुरुसरसान्द्रमृदुपिच्छिलं रसबहुलमीषत्कषायाम्ललवणं मधुररसप्रायमाप्यम्। तत् स्नेहनह्लादनक्लेदनबन्धनविष्यन्दनकरमिति ॥५॥

जलीय द्रव्य—ठंडा, गीला या जड, चिकना, मन्द, भारी, फैलने वाला, सान्द्र, मृदु, पिच्छिल, अधिक रसदार, कुछ कषाय, अम्ल और लवण रसों से युक्त तथा अधिक मधुर रस वाला 'जलीय' द्रव्य होता है। जलीय द्रव्य शरीर में स्नेहन, तर्पण, गीला करना, चूर्णादि का पिण्डीकरण (बांधना) और विस्रावण करता है ॥ ५ ॥

उष्णतीक्ष्णसूक्ष्मरूक्षखरलघुविशदं रूपगुणबहुलमीषदम्ललवणं कटुकरसप्रायं विशेषतश्चोर्ध्वगतिस्वभावमिति तैजसम्। तद्दहनपचनदारणतापनप्रकाशनप्रभावर्णकरमिति ॥ ६ ॥

तैजस द्रव्य—गरम, तीक्ष्ण, सूक्ष्म, रूक्ष, खरदरा, लघु और विशद (स्वच्छ) होता है तथा रूपगुणाधिक्ययुक्त, कुछ अम्ल और लवणरसयुक्त किन्तु कटुक रस की अधिकता से युक्त तथा विशेषकर ऊपर को गति करने वाला 'तैजस' पदार्थ होता है। वह दहन, पचन, दारण, तापन, प्रकाशन, प्रभा और वर्ण को करता है ॥ ६ ॥

सूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयम्। तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति ॥ ७ ॥

वायवीय द्रव्य—जो पदार्थ सूक्ष्म, खर, शिशिर, हल्का, विशद, स्पर्शगुण की अधिकता वाला, कुछ तिक्त और विशेषतया कषायरसयुक्त हो वह 'वायवीय' द्रव्य है। वह शरीर में वैशद्य, लाघव, ग्लानि या अवृष्यत्व, रौक्ष्य और मन में अनेक कल्पना करता है ॥ ७ ॥

श्लक्ष्णसूक्ष्ममृदुव्यवायिविशदविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयम्। तन्मार्दवशौषिर्य्यलाघवकरमिति।

आकाशीय द्रव्य—जो पदार्थ चिकना, सूक्ष्म, मृदु, व्यवायी, विशद, विविक्त (अवयव रहित), अव्यक्तरस, शब्द गुण की अधिकता से युक्त हो वह 'आकाशीय' द्रव्य है। यह द्रव्य देह में मार्दव, छिद्रता और लघुता करता है ॥ ८ ॥

अनेन निदर्शनेन नानौषधीभूतं जगति किञ्चिद् द्रव्यमस्तीति कृत्वा तं तं युक्तिविशेषमर्थं चाभिसमीक्ष्य स्ववीर्य्यगुणयुक्तानि द्रव्याणि कार्मुकाणि भवन्ति। तानि यदा कुर्वन्ति स कालः, यत्कुर्वन्ति तदधिकरणं, यथा कुर्वन्ति स उपायः, यन्निष्पादयन्ति तत् फलमिति ॥

इस प्रमाण से संसार में कोई भी द्रव्य ओषधि से भिन्न नहीं है ऐसा मानकर भिन्न भिन्न युक्तिविशेष और अर्थों (प्रयोजनों) का ठीक तरह से विचार कर प्रयुक्त किये हुये अपने वीर्य और गुणों से युक्त द्रव्य रोगनाशनरूपी कार्य करने में समर्थ होते हैं। वे द्रव्य जब कार्य करते हैं उसे 'काल' कहते हैं, जो कुछ करते हैं वह 'कर्म' है, जिसकी शक्ति या प्रभाव से करते हैं उसे 'वीर्य' कहते हैं, जहां करते हैं उसे 'अधिकरण' (कार्यकरण स्थान) कहते हैं, जिस प्रकार करते हैं वह 'उपाय' है और परिणामरूप से जो कुछ बन जाता है या हो जाता है उसे 'फल' कहते हैं ॥ ९ ॥

विमर्श—अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्। अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥

तत्र, विरेचनद्रव्याणि पृथिव्यम्बुगुणभूयिष्ठानि, पृथिव्यापो गुर्व्यस्ता गुरुत्वादधो गच्छन्ति, तस्माद्विरेचनमधोगुणभूयिष्ठमनुमानात्। वमनद्रव्याण्यग्निवायुगुणभूयिष्ठानि, अग्निवायू हि लघू, लघुत्वाच्च तान्यूर्ध्वमुत्तिष्ठन्ति, तस्माद्वमनमप्यूर्ध्वगुणभूयिष्ठम्। उभयगुणभूयिष्ठमुभयतोभागम्। आकाशगुणभूयिष्ठं संशमनम्। साङ्ग्राहिकमनिलगुणभूयिष्ठम्, अनिलस्य शोषणात्मकत्वात्। दीपनमग्निगुणभूयिष्ठं (तत्समानत्वात्)। लेखनमनिलानलगुणभूयिष्ठम्। बृंहणं पृथिव्यम्बुगुणभूयिष्ठम्। एवमौषधकर्माण्यनुमानात्साधयेत्॥

उनमें से जो विरेचक द्रव्य हैं उनमें पृथिवी और जल के गुणों की अधिकता रहती है क्योंकि पृथिवी और जल दोनों भारी होते हैं जिससे उनका किसी भी वस्तु को अपने साथ नीचे लेजाने का स्वभाव होता है इसलिये अनुमान से यह कहा जाता है कि विरेचक द्रव्य प्रायः 'अधोगामी गुणभूयिष्ठ' होते हैं। वामक द्रव्य अग्नि और वायु के अधिक गुणों से युक्त होते हैं। अग्नि और वायु दोनों हलके हैं एवं लघु होने से वे दोनों ऊपर को उठते हैं इसलिये वमनद्रव्य भी 'ऊर्ध्वगामीगुणभूयिष्ठ' होते हैं। जिन पदार्थों में उक्त दोनों प्रकार के गुण होते हैं वे ऊर्ध्व और अधः दोनों भागों में गति करते हैं अर्थात् उनसे वमन और विरेचन दोनों कार्य होते हैं। 'आकाशगुणभूयिष्ठद्रव्य' संशमन करता है, 'अनिलगुणभूयिष्ठद्रव्य' संग्राही (दस्त बांधने वाला) होता है क्योंकि वायु शोषणका कार्य करता है। 'अग्निगुणभूयिष्ठ द्रव्य' दीपन कार्य करते हैं क्योंकि ये आग्नेयद्रव्य जठराग्नि के समान होते हैं। अनिल (वायु) और अनल (अग्नि) गुणों की अधिकता वाले द्रव्य लेखन कार्य करते हैं। पृथिवी और जल के अधिक गुणवाले द्रव्य बृंहण कार्य करते हैं। इस प्रकार से ओषधियों के कार्य अनुमान द्वारा सिद्ध होते हैं ॥ १० ॥

विमर्शः—संशमनलक्षणम्—न शोधयति यद्दोषान् समान् नोदीरयत्यपि। समीकरोति विषमान् तत् सशमनमुच्यते ॥ (शार्ङ्गधर)। सङ्ग्राहिलक्षणम्—आग्नेयगुणभूयिष्ठात्तोयाश्च परिशोष्य यत्। सङ्गृह्णाति मलं यत्तु ग्राही शुण्ठ्यादयो यथा ॥ (भावप्र०)। दीपनलक्षणम्—पचेन्नाम वह्निकृच्च दीपन तद्यथा मिशि-। (शार्ङ्गधर)। लेखनलक्षणम्—धातून् मलान्वा देहस्य विशोष्योल्लेखयेच्च यत्। लेखन तद्यथा क्षौद्र नीरमुष्णं वचा यवा- ॥ (शार्ङ्गधर)। बृंहणलक्षणम्—बृहत्वं यच्छरीरस्य जनयेत्तच्च बृहणम्। (चरक)।

भवन्ति चात्र—

भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः।

भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिम् ॥११॥
खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणाम्।
वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः॥ १२॥
आग्नेयमेव यद् द्रव्यं तेन पित्तमुदीर्य्यते।
वसुधाजलजाताभ्यां बलासः परिवर्द्धते॥ १३॥
एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये विनिश्चितम्।
द्विशो वा बहुशो वाऽपि ज्ञात्वा दोषेषु चाचरेत्॥१४॥

पृथिवी, अग्नि और जलीय द्रव्यों से वायु शान्त होती है। पृथिवी, जल और वायु इन तत्त्वप्रधान द्रव्यों से पित्त शीघ्र ही शान्त होता है। आकाश, तेज और वायु इन तत्त्वजन्य द्रव्यों से मनुष्यों का कफ शान्त होता है। आकाश और वायुगुण भूयिष्ठ द्रव्यों से वात वृद्धि को प्राप्त होता है। केवल अग्निगुणप्रधान द्रव्य से पित्त प्रकुपित होता है। पार्थिव और कफ गुण वाले द्रव्यों से कफ बढ़ता है। इस प्रकार प्रत्येक द्रव्य में भिन्न भिन्न तत्त्वों के गुण की अधिकता रहती है उसे भलीभांति समझकर एक दोष, द्विदोष और अनेक दोषों की चिकित्सा में प्रयुक्त करना चाहिये॥ ११-१४॥

तत्र, य इमे गुणा वीर्य्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां तीक्ष्णोष्णावाग्नेयौ,। शीतपिच्छिलावम्बुगुणभूयिष्ठौ, पृथिव्यम्बुगुणभूयिष्टः स्नेहः, तोयाकाशगुणभूयिष्ठं मृदुत्वम्, वायुगुणभूयिष्ठं रौक्ष्यम्, क्षितिसमीरणगुणभूयिष्ठं वैशद्यम्, गुरुलघुविपाकावुक्तगुणौ; तत्र, उष्णस्निग्धौ वातघ्नौ, शीतमृदुपिच्छिलाः पित्तघ्नाः, तीक्ष्णरूक्षविशदाः श्लेष्मघ्नाः; गुरुपाको वातपित्तघ्नः, लघुपाकः श्लेष्मघ्नः, तेषां मृदुशीतोष्णाः स्पर्शग्राह्याः, पिच्छिलविशदौ चक्षुः स्पर्शाभ्यां, स्निग्धरूक्षौ चक्षुषा, तीक्ष्णो मुखे दुःखोत्पादनात्; गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च, लघुर्बद्धविण्मूत्रतया मारुतकोपेन च। तत्र तुल्यगुणेषु भूतेषु रसविशेषमुपलक्षयेत्। तद्यथा-मधुरो गुरुश्च पार्थिवः, मधुरः स्निग्धश्चाप्य इति॥ १५॥

द्रव्य में जो शीत, उष्ण, स्निग्ध, रूक्ष, मृदु, तीक्ष्ण, पिच्छिल और विशद ये अष्ट वीर्यसंज्ञक गुण हैं, उनमें तीक्ष्ण और उष्ण गुण आग्नेय हैं, शीत और पिच्छिल ये जलगुणभूयिष्ठ हैं, स्नेहगुण पृथिवी और जल की अधिकता से, मृदु गुण जल और आकाश की अधिकता से, रूक्षगुण वायु की अधिकता से तथा विशद गुण पृथिवी और पवन तत्त्व की अधिकता से होता है। गुरु और लघु अर्थात् मधुर तथा कटुविपाक के गुण प्रथम कह दिये हैं। इनमें उष्ण और स्निग्ध गुण वातनाशक हैं। शीत, मृदु और पिच्छिल गुण पित्तशामक होते हैं। तीक्ष्ण, रूक्ष और विशद गुण श्लेष्मनाशक होते हैं। गुरुविपाक वात और पित्त को नष्ट करता है तथा लघुविपाक कफ को नष्ट करता है। इनमें से मृदु, शीत और उष्ण गुण स्पर्शनेन्द्रिय (त्वग्) द्वारा ग्राह्य होते हैं। पिच्छिल और विशद गुण नेत्र तथा स्पर्श से, स्निग्ध और रूक्ष गुण नेत्र द्वारा तथा तीक्ष्णगुण मुख में दुःख के उत्पादन से जाना जाता है। गुरुपाक मल और मूत्र के त्याग से तथा कफ के द्वारा उत्क्लेश होने से जाना जाता है इसी प्रकार लघुविपाक विष्ठा और मूत्र के विबन्ध से तथा वायु के कुपित होने से जाना जाता है। जिन भूतों (पृथिव्यादिक) में गुणों की समानता हो वहां विशिष्ट रस द्वारा प्रयोगादि की कल्पना करनी चाहिये जैसे पार्थिव द्रव्य मधुर और गुरुविपाकी होते हैं तथा जलीय-द्रव्य मधुर एवं स्निग्ध होते हैं॥ १५॥

भवति चात्र—

गुणा य उक्ता द्रव्येषु शरीरेष्वपि ते तथा।
स्थानवृद्धिक्षयास्तस्माद् देहिनां द्रव्यहेतुकाः॥ १६॥

इति सुश्रुतसंहितायां सूत्रस्थाने द्रव्यविशेषविज्ञानीयो नामैकचत्वारिंशत्तमोऽध्यायः॥ ४१॥

इस विषय में कहा भी है कि-द्रव्यों में जो ये बीस गुण कहे हैं वे गुण मनुष्यों के शरीरों में भी उसी तरह विद्यमान रहते हैं इसलिये प्राणियों के शरीर में दोष, धातु और मलों की स्थिति, वृद्धि तथा क्षय सेवित द्रव्यों के कारण ही होते हैं॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने द्रव्यविशेषविज्ञानीयो नामैकचत्वारिंशत्तमोऽध्यायः॥ ४१॥

द्विचत्वारिंशत्तमोऽध्यायः।

अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः॥१॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

अब इसके अनन्तर 'रसविशेषविज्ञानीय' नामक अध्याय का व्याख्यान करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था॥ १-२॥

आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः, तस्मादाप्यो रसः। परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्ति। उत्कर्षापकर्षात्तु ग्रहणम्॥ ३॥

आकाश, वायु, अग्नि, जल और भूमि इनमें क्रमशः उत्तरोत्तर एक एक गुण की वृद्धि होने से शब्द, स्पर्श, रूप, रस और गन्ध ये गुण होते हैं। अर्थात् आकाश में शब्द गुण, वायु में शब्द और स्पर्शगुण, अग्नि में शब्द, स्पर्श और रूपगुण, जल में शब्द, स्पर्श, रूप और रसगुण एवं पृथिवी में शब्द, स्पर्श, रूप, रस और गन्ध ये पांचो गुण होते हैं। इस तरह रस जल से उत्पन्न होता है। इन भूतों के परस्पर संसर्ग, परस्पर अनुग्रह तथा परस्पर अनुप्रवेश (एक का दूसरे में प्रवेश) होने से सर्व भूतों में सर्वभूतों का अथवा गुणों का सान्निध्य रहता है परन्तु जिसका उत्कर्ष (बाहुल्य) होता है उसी के नाम से उसका ग्रहण होता है एवं जिसका अपकर्ष (अल्पत्व) रहता है उसका उस नाम से ग्रहण नहीं होता है॥ ३॥

विमर्शः—प्रायः प्रत्येक भूत का उत्कर्षदृष्टि से एक एक मुख्य या नैसर्गिक गुण होता है—महाभूतानि ख वायुरग्निरापः

क्षितिस्तथा। शब्द स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणा ॥ प्रत्येक भूत में अपकर्ष दृष्टि से अन्य भूतों के गुण भी रहते हैं अतएव लिखा है कि 'एकोत्तरपरिवृद्धा' चरक ने भी यही माना है। तेषामेकगुण पूर्वो गुणवृद्धि परे परे। पूर्व पूर्वगुणश्चैव क्रमशो गुणिषु स्मृतः ॥

स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते। तद्यथा—मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। ते च भूयः परस्परसंसर्गात्त्रिषष्टिधा भिद्यन्ते। तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः, भूम्यग्निगुणबाहुल्यादम्लः, तोयाग्निगुणबाहुल्याल्लवणः, वाय्वग्निगुणबाहुल्यात्कटुकः, वाय्वाकाशगुणबाहुल्यात्तिक्तः, पृथिव्यनिलगुणबाहुल्यात्कषाय इति।

तत्र, मधुराम्ललवणा वातघ्नाः, मधुरतिक्तकषायाः पित्तघ्नाः, कटुतिक्तकषायाः श्लेष्मघ्नाः ॥ ४ ॥

यह जलीय रस अन्य भूतों के संसर्ग से परिपक्व होकर ६ प्रकार का हो जाता है। जैसे मधुर, अम्ल, लवण, कटु, तिक्त और कषाय। ये रस पुनः परस्पर मिलकर ६३ तिरसठ प्रकार के हो जाते हैं। षड्रसों में पृथिवी और जल के गुणों क बहुलता से मधुर रस, पृथिवी, और अग्नि गुण की बहुलता से अम्लरस, जल और अग्नि के गुण बाहुल्य से लवण रसी, वायु और अग्निगुण बाहुल्य से कटुरस, वायु और आकाशगुण बाहुल्य से तिक्तरस एव पृथिवी तथा पवन के गुण बाहुल्य से कषाय रस होता है। इनमें मधुर, अम्ल और लवण रस वात को नष्ट करते है। मधुर, तिक्त और कषाय रस पित्त को नष्ट करते है एवं कटु, तिक्त तथा कषाय रस कफ को नष्ट करते हैं ॥ ४ ॥

विमर्शः—षड्रसगुण —स्वाद्म्ललवणा वायु कषायस्वादुतिक्तका। जयन्ति पित्त श्लेष्माण कषायकटुतिक्तका ॥

तत्र, वायु (यो) रात्मैवात्मा, पित्तमाग्नेयं, श्लेष्मा सौम्य इति।

त एते रसाः स्वयोनिवद्धना अन्ययोनिप्रशमनाश्च ॥

इन में वायु वायु से ही उत्पन्न होता है। पित्त अग्नि से और श्लेष्मा (कफ) सोम अर्थात् जल से उत्पन्न होता है। ये मधुरादि षड्रस स्व (अपने) योनि (उत्पत्ति) करने वाले दोष के वर्द्धक होते हैं तथा अन्ययोनि जो दोष होते हैं उनके शामक होते हैं ॥ ५ ॥

विमर्श'—स्वयोनि—कषायरस की योनि वायु, कटुकरस की योनि पित्त, मधुर रस की योनि श्लेष्मा है।

केचिदाहुरग्नीषोमीयत्वाज्जगतो रसा द्विविधाः-सौम्या आग्नेयाश्च। तत्र मधुरतिक्तकषायाः सौम्याः। कटवम्ललवणा आग्नेयाः। तत्र मधुराम्ललवणाः स्निग्धा गुरवश्च, कटुतिक्तकषाया रूक्षा लघवश्च; सौम्याः शीता आग्नेयाश्चोष्णाः ॥ ६ ॥

कुछ आचार्य कहते हैं कि जगत् अग्निरूप और सौम्य (जलीय) रूप होने से रस भी सौम्य और आग्नेय ऐसे दो ही प्रकार के होते हैं। इनमें मधुर, तिक्त और कषाय सौम्य तथा कटु, अम्ल और लवण आग्नेय होते हैं। उनमें मधुर, अम्ल और लवण रस स्निग्ध तथा भारी होते हैं तथा कटु, तिक्त और कषाय रस रूक्ष और लघु होते हैं। सौम्यरस शीत और आग्नेय रस उष्ण होते हैं ॥ ६ ॥

तत्र, शैत्यरौक्ष्यलाघववैशद्यवैष्टम्भ्यगुणलक्षणो वायुः। तस्य समानयोनिः कषायो रसः। सोऽस्य शैत्याच्छैत्यं वर्द्धयति, रौक्ष्याद्रौक्ष्यं, लाघवाल्लाघवं, वैशद्याद्वैशद्यं, वैष्टम्भ्याद्वैष्टम्भ्यमिति ॥ ७ ॥

उनमें शीत, रूक्ष, लघु, विशद और विष्टम्भ गुणों से युक्त लक्षण वाला वायु होता है तथा उसके समान योनि (उत्पत्तिस्थान) वाला कषाय रस है एवं यह कषाय रस शीतल होने से वायु की शीतता को बढ़ाता है तथा अपनी रूक्षता से वायु की रूक्षता को बढ़ाता है, स्वलाघव से वायु के लाघव को बढाता है, स्ववैशद्य से वायु की विशदता को बढ़ाता है और अपने वैष्टम्भ्य गुण से वायु की विष्टम्भता (विबन्धत्व) को बढ़ाता है ॥ ७ ॥

औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तम्। तस्य समानयोनिः कटुको रसः। सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति, तैक्ष्ण्यात्तैक्ष्ण्यं, रौक्ष्याद्रौक्ष्यं, लाघवाल्लाघवं, वैशद्याद्वैशद्यमिति ॥ ८ ॥

उष्णता, तीक्ष्णता, रूक्षता, लघुता और विशदता इन गुणों से युक्त लक्षणों वाला पित्त है तथा इस पित्त के समान योनि वाला कटुरस है। यह रस अपनी उष्णता से पित्त की उष्णता को बढ़ाता है, स्वतीक्ष्णता से पित्त की तीक्ष्णता, स्वरूक्षता से पित्त की रूक्षता, स्वलघुता से पित्त की लघुता और स्ववैशद्य से पित्त की विशदता को बढ़ाता है ॥ ८ ॥

माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः श्लेष्मा। तस्य समानयोनिर्मधुरो रसः। सोऽस्य माधुर्य्यान्माधुर्य्यं वर्द्धयति, स्नेहात् स्नेहं, गौरवाद्गौरवं, शैत्याच्छैत्यं, पैच्छिल्यात्पैच्छिल्यमिति ॥ ९ ॥

माधुर्य, स्नेह, गौरव, शैत्य और पैच्छिल्य इन गुणों के लक्षणों से युक्त कफ होता है तथा उसके समान योनि वाला मधुर रस है। वह मधुर रस अपनी मधुरता से कफ के माधुर्य को बढ़ाता है तथा स्वस्नेह गुण से कफ की स्निग्धता को बढ़ाता है, स्वगौरवगुण से कफ की गुरुता को बढ़ाता है, स्वशैत्य गुण से कफ की शीतता को तथा स्वपैच्छिल्य गुण से कफ की पिच्छिलता को बढ़ाता है ॥ ९ ॥

तस्य पुनरन्ययोनिः कटुको रसः। स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्य्यमभिभवति, रौक्ष्यात् स्नेहं, लाघवाद्गौरवमौष्ण्याच्छैत्यं, वैशद्यात्पैच्छिल्यमिति। तदेतन्निदर्शनमात्रमुक्तम् ॥ १० ॥

उस कफ का दूसरा अन्य योनि कटुक रस है तथा यह कटु रस कफ के विरुद्ध गुण वाला होने से तथा कटुक होने से कफ की मधुरता को नष्ट करता है तथा यह कटुरस रूक्ष होने से कफ की स्निग्धता को नष्ट करता है एवं लघु होने से कफ

की गुरुता को नष्ट करता है, उष्ण होने से कफ की शीतता को तथा विशद होने से कफ की पिच्छिलता को नष्ट करता है। यह केवल दिग्दर्शन (उदाहरण) मात्र है ॥ १० ॥

विमर्शः—समानयोनि द्रव्य से दोष और धातुओं की वृद्धि तथा विपरीतयोनि द्रव्य से नाश होता है। यह सामान्य नियम है। वृद्धि समानै. सर्वेषा विपरीतैर्विपर्यय. । चरकेऽपि—रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणभूयिष्ठा वा भवन्ति ते तानभिवर्धयन्ति, विपरीतगुणा विपरीतगुणभूयिष्ठा वा शमयन्ति अभ्यस्यमाना'। एतद्धि व्यवस्थाहेतो. षट्त्वमुपदिश्यते रसाना त्रित्वञ्च दोषाणाम्। (चरक)।

रसलक्षणमत ऊर्ध्वं वक्ष्यामः—तत्र, यः परितोषमुत्पादयति प्रह्लादयति तर्पयति जीवयति मुखोपलेपं जनयति श्लेष्माणं चाभिवर्द्धयति स मधुरः। यो दन्तहर्षमुत्पादयति मुखास्रावं जनयति श्रद्धाञ्चोत्पादयति सोऽम्लः। यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्दवं चापादयति स लवणः। यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुकः। यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः। यो वक्त्रं परिशोषयति जिह्वां स्तम्भयति कण्ठं वध्नाति हृदयं कर्षति पीडयति च स कषाय ॥ ११ ॥

अब इसके अनन्तर रसों का लक्षण कहते हैं। रसों में जो शरीर या मन की तुष्टि करता है, आह्लाद देता है, तृप्ति करता है, प्राणों का धारण करता है, मुख में चिपचिपापन पैदा करता है तथा कफ को बढ़ाता है वह मधुररस है एवं जो दन्तों को हर्षित करता है, मुख में लाला का स्राव करता है तथा भोज्यादि पदार्थ अधिक सेवन करने की इच्छा को उत्पन्न करता है वह अम्लरस है। इसी प्रकार जो भोजन में रुचि करता है, कफ को स्रवित करता है एवं शरीर में मृदुता उत्पन्न करता है वह लवण रस है। जो जीभ के अग्रप्रदेश में बाधा या झनझनाहट उत्पन्न करता है, उद्वेग उत्पन्न करता है, शिर को भारीपन से जकड देता है और नासा में सिंघाणक (नासा मल) या पानी का स्राव कराता है वह कटुक रस है। जो गले में चोष (चूषणसमान वेदना) पैदा करता है, मुख में विशदता पैदा करता है, खाने की रुचि और हर्ष उत्पन्न करता है वह तिक्त रस है एवं जो मुख (लाला रस) को सुखाता है, जिह्वा को स्तम्भित कर देता है, कण्ठ का संकोच करता है तथा हृदय को खींचता है तथा पीड़ित करता है वह कषाय रस है ॥

रसगुणानत ऊर्ध्वं वक्ष्यामः—तत्र, मधुरो रसो रसरक्तमांसमेदोऽस्थिमज्जौजःशुक्रस्तन्यवर्धनश्चक्षुष्यः केश्यो वर्ण्यो बलकृत्सन्धानः शोणितरसप्रसादनो बालवृद्धक्षतक्षीणहितः षट्पदपिपीलिकानामिष्टतमस्तृष्णामूर्च्छादाहप्रशमनः पञ्चेन्द्रियप्रसादनः कृमिकफकरश्चेति। स एवंगुणोऽप्येक एवात्यर्थमासेव्यमानः कासश्वासालसकवमथुवदनमाधुर्यस्वरोपघातकृमिगलगण्डानापादयति, तथाऽर्बुदश्लीपदवस्तिगुदोपलेपाभिष्यन्दप्रभृतीन् जनयति ॥ १२ ॥

इसके अनन्तर अब रसों के गुणों का वर्णन करते हैं। उनमें मधुर रस रस, रक्त, मांस, मेद, अस्थि, मज्जा, ओज, वीर्य और दुग्ध इनका वर्धक है, नेत्रों के लिये हितकर है, केशों को लाभ पहुँचाता है, शरीर के रङ्ग को बढ़ाता है, बलकारक, भग्न हुए अस्थ्यादि भागों का सन्धान करता है, रक्त और रस को प्रसन्न करता है, बालक, वृद्ध, क्षत और क्षीण हुये मनुष्यों के लिये हित करता है, भ्रमर तथा चींटियों के लिये अत्यन्त प्रिय है एवं तृषा, मूर्च्छा और दाह को शान्त करता है, पञ्च ज्ञानेन्द्रिय तथा मन इन छ इन्द्रियों को सन्तुष्ट करता है, और अधिक सेवन करने से कृमि और कफ को बढ़ाता है। यह मधुर रस उक्त प्रकार से अच्छे गुण वाला होने पर भी अकेला इसे ही अधिक सेवन किया जाय तो वह कास, श्वास, अलसक (अजीर्ण भेद), वमन, मुख की मधुरता, स्वर का नाश, कृमि रोग और गलगण्ड को पैदा करता है एवं अर्बुद, श्लीपद, वस्ति और गुदा में लेप सा या चिकनापन अथवा भारीपन और अभिष्यन्द (आंख का दूखना) प्रभृति रोगों को उत्पन्न करता है ॥ १२ ॥

अम्लो जरण' पाचनो दीपनः पवननिग्रहोऽनुलोमनः कोष्ठविदाही बहिश्शीतः क्लेदनः प्रायशो हृद्यश्चेति। स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्षनयनसम्मीलनरोमसंवेजनकफविलयनशरीरशैथिल्यान्यापादयति, तथा क्षताभिहतदग्धदष्टभग्नशूनरुग्णप्रच्युतावमूत्रितविसर्पितच्छिन्नभिन्नविद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति, कण्ठमुरो हृदयञ्चेति ॥ १३ ॥

अम्लरस भोजन का पाचन करने वाला, पाचन, दीपन, वायु का निग्रहकारक, दोषों का अनुलोमक या कार्मिनेटिव (Carminative), कोष में दाहकारक, बाहर से शीत, शरीर का क्लेदक और प्रायः हृदय के लिये हितकर होता है। वह ऐसा उत्तम गुणों वाला होता हुआ भी यदि अकेला ही अधिक मात्रा में सेवित किया जाय तो दन्तहर्ष, नेत्रसंकोच, शरीर में रोमाञ्चकारी, कफ का विलायक और शरीर की शिथिलता को उत्पन्न करता है तथा क्षत, अभिहत, दग्ध, सर्पादिदष्ट, अस्थ्यादिभग्न, शोथयुक्त, रुग्ण, प्रच्युत (स्वस्थानभ्रष्ट), लूतादि से अवमूत्रित, स्पर्शविषादि जन्तुओं के स्पर्श से दूषित, छिन्न, भिन्न, विद्ध और उत्पिष्ट (चूर्णित) आदि स्थानों को पकाता है तथा आग्नेय स्वभाव का होने से कण्ठ, छाती और हृदय में दाह उत्पन्न करता है ॥ १३ ॥

लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृद्दुष्णः सर्वरसप्रत्यनीको मार्गविशोधनः सर्वशरीरावयवमार्दवकरश्चेति। स एवंगुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापमुखादिपाकरक्तपित्तवातशोणिताम्लिकाप्रभृतीनापादयति ॥ १४ ॥

लवणरस दोषों का संशोधक, आमादि का पाचक, संधियों

का विश्लेपक, शरीर का छेदक, शिथिलताजनक, उष्ण, सर्व रसों का विरोधी, मलमूत्रादि मार्गों का विशोधक है तथा सम्पूर्ण शरीर के अवयवों में मृदुता करने वाला है। वह ऐसा गुणों वाला होने पर भी उसे अकेला ही अधिक मात्रा में सेवित किया जाय तो शरीर में खुजली, कोठ, शोफ, विवर्णता, पुंस्त्व (मर्दानगी) का विनाश, इन्द्रियों के स्वकर्म का नाश, मुख और नेत्र में पाक, रक्तपित्त, वातरक्त, अम्लिका (हृदय-प्रदाह Heart burn) आदि रोगों को उत्पन्न करता है ॥ १४ ॥

कटुको दीपनः पाचनो रोचनः शोधनः स्थौल्यालस्यकफकृमिविषकुष्ठकण्डूपशमनः सन्धिबन्धविच्छेदनोऽवसादनः स्तन्यशुक्रमेदसामुपहन्ता चेति। स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो भ्रममदगलतालवोष्ठशोषदाहसन्तापबलविघातकम्पतोदभेदकृत् करचरणपार्श्वपृष्ठप्रभृतिषु च वातशूलानापादयति ॥ १५ ॥

कटुकरस दीपन, पाचन, रोचन, दोषसशोधन करता है तथा स्थूलता, आलस्य, कफ, कृमि, विष, कुष्ठ, कण्डू इन्हें शान्त करना है एवं सन्धियों के बन्धनों को ढीला करता है, अनुत्साहकारक या हृदयादि का अवसाद करने वाला, दुग्ध, वीर्य और मेदोधातु का नाशक है। इस प्रकार के गुण वाले अकेले उस कटुक रस को अधिक सेवित किया जाय तो वह भ्रम, मद, गल, तालु और ओष्ठ में शोष, दाह तथा सन्ताप करता है एवं देह के बल का नाश, शरीर में कम्पन, सुई चुभोने की सी पीडा एवं तोडने की सी पीडा को करता है तथा हाथ, पैर, पार्श्व और पीठ आदि स्थानों में वातिक शूल उत्पन्न करता है ॥ १५ ॥

तिक्तश्छेदनो रोचनो दीपनः शोधनः कण्डूकोठतृष्णामूर्च्छाज्वरप्रशमनः स्तन्यशोधनो विण्मूत्रक्लेदमेदोवसापूयोपशोषणश्चेति। स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो गात्रमन्यास्तम्भाक्षेपकार्दितशिरःशूलभ्रमतोदभेदच्छेदास्यवैरस्यान्यापादयति ॥ १६ ॥

तिक्तरस कफादि का छेदक, स्वयं स्वादिष्ट न होते हुये भी अन्य भक्ष्य पदार्थों के खाने की रुचि को करने वाला, अग्नि का दीपक, दोषों का शोधक तथा कण्डू, कोठ, तृष्णा और ज्वर का प्रशमन करने वाला, दुग्ध का शोधक, विष्ठा, मूत्र, क्लेद, मेद, वसा और पूय का शोषण करने वाला है। ऐसा गुण वाला होता हुआ भी यदि उसे अकेला ही अधिक मात्रा में सेवित किया जाय तो वह शरीर के अवयवों तथा मन्या (ग्रीवा) में स्तम्भ (जकड़न), आक्षेपक, अर्दित (मुख का लकवा Facial paralysis), शिरःशूल, भ्रम, तोद, भेद, छेद एवं मुख में विरसता पैदा करता है ॥ १६ ॥

कषायः सङ्ग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति। स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो हृत्पीडाऽऽध्मानवाक्यग्रहमन्यास्तम्भगात्रस्फुरणचुमचुमायनाकुञ्चनाक्षेपणप्रभृतीञ्जनयति ॥ १७ ॥

कषायरस संग्राही, व्रणादि का रोपक, रक्त या अन्य स्रावों का स्तम्भक, दोषों का शोधक, लेखक, शोषक, पीडक और क्लेद को सुखाने वाला है। ऐसा गुण वाला होता हुआ भी यदि उसे अकेला ही सेवित किया जाय तो हृदय में पीडा, मुख का शोष, उदर में आध्मान, बोलने में कठिनाई, मन्यास्तम्भ, अङ्गों का फड़कन, चुमचुमायमान (Tingling sensation), शरीर में आकुञ्चन और आक्षेप Convulsions) आदि रोगों को उत्पन्न करता है ॥ १७ ॥

अतः सर्वेषामेव द्रव्याण्युपदेक्ष्यामः। तद्यथा—काकोल्यादिः क्षीरघृतवसामज्जशालिषष्टिकयवगोधूममाषशृङ्गाटककसेरुकत्रपुसैर्वारुककर्कारुकालाबुकालिन्दकतकगिलोड्यपियालपुष्करबीजकाश्मर्य्यमधूकद्राक्षाखर्जूरराजादनतालनालिकेरेक्षुविकारबलाऽतिबलाऽऽत्मगुप्ताविदारीपयस्यागोक्षुरकक्षीरमोरटमधूलिकाकूष्माण्डप्रभृतीनि समासेन मधुरो वर्गः ॥ १८ ॥

अब इसके आगे सर्व वर्गों के द्रव्यों का वर्णन करते हैं। जैसे काकोल्यादिगण की ओषधियां तथा दुग्ध, घृत, वसा, मज्जा, साली चावल, साँठी चावल, जौ, गेहूँ, उडदी, सिवाडे, कसेरू, त्रपुस (खीरा), एर्वारुक (ककडी), कर्कारुक (खरबूजा), तोबी, कालिन्दक (तरबूज), निर्मली के फल, गिलोय (कन्दविशेष), पियाल (चिरौंजी), पुष्करबीज (कमलबीज), गम्भारी, महुआ, दाख, खजूर (पिण्डखजूर छुहारा), राजादन (खिरनी), तालवृक्ष फल, नारियल, सांठे के विकार जैसे, गुड, चीनी, राब आदि, बला (खिरेंटी), अतिबला (कंघी), कौंच के बीज, विदारी, क्षीरविदारी, गोखरू, क्षीरमोरट (किलाट अथवा सद्यः प्रसूता गौ का सात दिन तक निकलने वाला दुग्ध अथवा ऊख की जड), मधूलिका (मूर्वा), कूष्माण्ड (सफेद पेठा) प्रभृति संक्षेप से मधुरवर्ग के द्रव्य हैं ॥ १८ ॥

दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्दबदरकोलप्राचीनामलकतिन्तिडीककोशाम्रकभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरककुतुपोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥ १९ ॥

अम्लवर्ग में दाडिम, आमले, बिजोरा नीबू, आमड़ा, कैथ, करौंदा, बैर, बड़े बैर, प्राचीनामलक (पानी आंवला), इमली, कोशाम्र (आम का भेद), भव्य (कमरख), पारावत (तिन्दुक भेद), वेंत का फल, लकुच (बड़हल), अमलवेंत, दन्तशठ (बड़ा जम्मीरी नीबू), दही, छाछ, सुरा, शुक्त, सौवीरक, (काञ्जी), तुषोदक, धान्याम्ल इत्यादि संक्षेप से ये सब द्रव्य हैं ॥ १९ ॥

विमर्श—सुरा से धान्याम्ल तक मद्य भेद हैं। सुरा—परिपक्वान्नसन्धानसमुत्पन्ना सुरा स्मृता। शुक्तम्—कन्दमूलफलादीनि सस्नेहलवणानि च। यत्र द्रवेऽभिपूयन्ते तच्छुक्तमभिधीयते ॥ तुषाम्बु—तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवैः। सौवीरं—यवैस्तु निस्तुषैः पक्वैः सौवीरं सन्धितं भवेत्। काञ्जिकं—कुल्माषवान्यमण्डादिसन्धितं काञ्जिकं विदुः ॥

सैन्धवसौवर्चलबिडपाक्यरोमकसामुद्रकपक्त्रिमयवक्षारोपरप्रसूतसुवर्चिकाप्रभृतीनि समासेन लवणो वर्गः ॥

विमर्शः—मदनपुष्पाणान्-मदनफलानान्-अत्र पुष्पशब्दः फले वर्तते, कारणे कार्योपचारात्। (डल्हण)।

मदनशलाटुचूर्णान्येवं वा बकुलरम्यकोपयुक्तानि मधुलवणयुक्तान्यभिप्रतप्तानि, मदनशलाटुचूर्णसिद्धां वा तिलतण्डुलयवागूम् ॥ ४ ॥

मदन के कच्चे फल के चूर्ण को एक पल प्रमाण में लेकर उक्त प्रकार से अपामार्गादि अनुपान के साथ पिलावे अथवा मौलसिरी, महानिम्ब इनकी छाल के क्वाथ में शहद और नमक मिलाकर गरम करके पिलावे। अथवा मदन के कच्चे फल के चूर्ण से सिद्ध की हुई तिल और चावलों की यवागू पिला कर वमन करना चाहिये ॥ ४ ॥

विमर्शः—उष्णमधुप्रयोग —प्रच्छर्दने निरूहे च मधूष्ण न निवार्यते। अल्पपाकमाश्वेव तमोघ्नत्वान्निवर्तते ॥ (वाग्भट)।

निर्वृत्तानां वा नातिहरितपाण्डूनां कुशमूढावबद्धमृद्वोमयप्रलिप्तानां यवतुषमुद्गमाषशाल्यादिधान्यराशावष्टरात्रोषितक्लिन्नभिन्नानां फलानां फलपिप्पलीरुद्धृत्यातपे शोषयेत्। तासां दधिमधुपल्लविमृदितपरिशुष्काणां सुभाजनस्थानामन्तर्नखमुष्टिमुष्णे यष्टीमधुककषाये कोविदारादीनामन्यतमे वा कषाये प्रमृद्य रात्रिपर्युषितं मधुसैन्धवयुक्तमाशीभिरभिमन्त्रितमुदङ्मुखः प्राङ्मुखमातुरं पाययेदनेन मन्त्रेणाभिमन्त्र्य—

'ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानलानिलाः।
ऋषयः सौषधिग्रामा भूतसङ्घाश्च पान्तु ते ॥
रसायनमिवर्षीणां देवानाममृतं यथा।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥'

विशेषेण श्लेष्मज्वरप्रतिश्यायान्तर्विद्रधिषु। अप्रवर्त्तमाने वा दोषे पिप्पलीवचागौरसर्षपकल्कोन्मिश्रैः सलवणैस्तुषाम्बुभिः पुनः पुनः प्रवर्तयेदासम्यग्वान्तलक्षणादिति ॥ ५ ॥

जो मदन के फल भलीभांति पक गये हों, बहुत हरे या पीले न हों उन्हें कुशासे बनाये हुए सम्पुट में रख कर ऊपर से मिट्टी या गोबर पोत कर सुखा के यव-तुष, मूंग, उडद्दी, चावल आदि धान्यों के ढेर (राशि) में आठ दिनरात रखे। फिर वे फल नरम होकर फूट जावें तब उनके बीजों को निकाल कर धूप में सुखाना चाहिये। पश्चात् इन बीजों को दही, शहद, पल्लव (तिलचूर्ण) के साथ मृदित कर सुखा के एक पात्र या शीशी में भर कर सुरक्षित रख देवें। इस प्रकार बनाये हुये इन बीजों को अन्तर्नखमुष्टि में जितने आसकें उस प्रमाण में लेकर मुलेठी के गरम क्वाथ में अथवा कोविदारादिक संशोधन-संशमनीय एकादश क्वाथों में से किसी एक क्वाथ में मिलाकर रात भर पडा रख के दूसरे दिन प्रातःकाल इसमें शहद तथा सैन्धव लवण मिलाकर निम्नोक्त आशीर्वाद के मन्त्रों से अभिमन्त्रित करके उत्तर में अथवा पूर्व में मुख कराके बिठाये हुये रोगी को पिलावे। ब्रह्मा, दक्ष, अश्विनीकुमार, रुद्र, इन्द्र, पृथिवी, चन्द्र, सूर्य, अग्नि, वायु, ऋषि, ओषधियों के समूह तथा भूत (प्राणि) समूह तेरी रक्षा करें। जिस तरह ऋषियों के लिये रसायन ओषधियां तथा देवताओं के लिये अमृत एवं उत्तम नागों के लिये सुधा है उसी तरह तेरे लिये यह औषध फलदायी हो। विशेषतया यह योग कफज्वर, प्रतिश्याय और अन्तर्विद्रधि में प्रयुक्त करने योग्य है। यदि इस योग के पिलाने से वमनादिरूपमें दोष पतित न हों तब पीपल, वचा और सफेद सरसों के कल्क में नमक मिलाकर गरम जलके साथ सम्यग्वान्त लक्षण होने तक बार२ पिलावे ॥

विमर्शः—सम्यग्वान्तलक्षणम्—'पित्तान्तमिष्टं वमन तथोर्ध्वम्'

मदनफलमज्जचूर्णं वा तत्क्वाथपरिभावितं मदनफलकषायेण; मदनफलमज्जसिद्धस्य वा पयसः सन्तानिकां क्षौद्रयुक्तां, मदनफलमज्जसिद्धं वा पयः, मदनफलमज्जसिद्धेन वा पयसा यवागूम्, अधोभागासृक्पित्तहृदाहयोः; मदनफलमज्जसिद्धस्य वा पयसो दधिभावमुपगतस्य दध्युत्तरं दधि वा कफप्रसेकच्छर्दिमूर्च्छातमकेषु। मदनफलमज्जरसं भल्लातकस्नेहवदादाय फाणितीभूतं लेहयेत्। आतपपरिशुष्कं वा तमेव जीवन्तीकषायेण पित्ते कफस्थानगते। मदनफलमज्जकाथं वा पिप्पल्यादिप्रतीवापं, तच्चूर्णं वा निम्बरूपिकाकषाययोरन्यतरेण सन्तर्पणकफजव्याधिहरं, मदनफलमज्जचूर्णं वा मधुककाश्मर्यद्राक्काकषायेण। मदनफलविधानमुक्तम् ॥ ६ ॥

मदनफल की मज्जा के चूर्ण को उसी के क्वाथ की भावना दे कर मदनफल के क्वाथ के साथ पिला कर वमन कराना चाहिये। अथवा मदनफल की मज्जा द्वारा सिद्ध किये हुये दुग्ध की मलाई को शहद में मिला कर खिला के वमन करावे। किंवा मदनफल की मज्जा से सिद्ध किये हुये दुग्ध को पिला कर वमन करावे। अथवा मदनफल की मज्जा से सिद्ध किये हुये दुग्ध में यवागू बना कर अधोभागगत रक्तपित्त और हृदय के दाह में पिलावे। यदि कफ गिरता हो, वमन होती हो तथा मूर्च्छा तथा तमक श्वास होता हो तो इनमें मदनफल की मज्जा से सिद्ध किये हुये दुग्ध का दही जमा के उसका दध्युत्तर (सर=दही के उपर का पानी) अथवा दही पिलाना चाहिये। मिलावें का जैसे तैल निकालते हैं उसी प्रकार मदन फल की मज्जा का रस अथवा तैल निकाल कर उसे पकाके फाणित की तरह गाढा करके चटावे। यदि पित्त कफ के स्थान में चला गया हो तो धूप में सूखे हुये मदनफल की मज्जा के चूर्ण को जीवन्ती क्वाथ के साथ पिलावे।

मदनफल की मज्जा के क्वाथ में पिप्पल्यादि गण की ओषधियों का चूर्ण प्रक्षिप्त कर अथवा मदनफल की मज्जा के चूर्ण को निम्ब तथा रूपिका (आक) इनमें से किसी एक के क्वाथ के साथ मिला कर पिलाने से सन्तर्पणजन्य अथवा कफजन्य रोग नष्ट हो जाते हैं। अथवा मदनफल की मज्जा के चूर्ण को मुलेठी, गम्भारी और द्राक्षा इनके क्वाथ के साथ पिलावे। इस तरह मदनफल के ये इकतीस प्रयोग कहे हैं ॥ ६ ॥

जीमूतककुसुमचूर्णं पूर्ववदेव क्षीरेण, निर्वृत्तेषु क्षीरयवागूं, रोमशेषु सन्तानिकाम्, अरोमशेषु दध्युत्तरं, हरितपाण्डुषु दधि तत्कषायसंसृष्टां वा सुरां, कफारोच-

कासश्वासपाण्डुरोगयक्ष्मसु। पर्यागतेषु मदनफलमज्जवदुपयोगः।

तद्वदेव कुटजफलविधानम्।

कृतवेधनानामप्येष एव कल्पः।

इक्ष्वाकुकुसुमचूर्णं वा पूर्ववत्। एवं क्षीरेण, कासश्वासच्छर्दिकफरोगेषूपयोगः ॥ ७ ॥

जीमूतक (देवदाली) के पुष्पों के चूर्ण को पूर्व की तरह अर्थात् अपामार्ग, आक आदि के साथ दुग्ध में मिला कर पिला के वमन कराना चाहिये। अथवा जीमूतक के फलों के निर्वृत अर्थात् छोटे छोटे रूप में उत्पन्न होने पर उनसे दुग्ध पका के अथवा यवागू सिद्ध करके पिलानी चाहिये। जब फल कुछ बडे हो कर रोमश (कठिन) हो जांय तब उन्हें दुग्ध के साथ उबाल कर उस दुग्ध पर आई हुई मलाई (सन्तानिका) को खिलावे। जब फलों के रोम झड़ जावें तब उनके साथ दुग्ध उबाल कर उसका दही बना के उसके ऊपर जो स्वच्छ पानी होता है उसे पिलावे और जब फल हरे और पाण्डु वर्ण के हो जांय तब उनसे दुग्ध पका के उससे जमे हुये दही को खिलावे। अथवा उन फलों से सिद्ध क्वाथ के साथ सुरा मिला कर पिलावें। इस प्रकार ये जीमूतक के ऊपर कहे हुये ६ प्रयोग कफ, अरुचि, कास, श्वास, पाण्डुरोग और राजयक्ष्मा में प्रयुक्त करने से वमन हो कर दोषों का नाश होता है। जीमूतक के फलों के पर्यागत अर्थात् परिपक्व हो जाने पर मदनफल की मज्जा की तरह उनका प्रयोग करना चाहिये। जीमूतक की तरह ही कुटज (कूडे) के फलों का भी विधान (उपयोग) करना चाहिये। कृतवेधन (कड़वी तरोई) का प्रयोग भी कुटजफल के समान होता है। इक्ष्वाकु (कड़वी तुम्बी) के पुष्पों के चूर्ण को भी पहले की तरह दुग्ध के साथ लेना चाहिये। इससे कास, श्वास, वमन और कफ के रोगों में अच्छा उपयोग (लाभ) होता है ॥ ७ ॥

धामार्गवस्यापि मदनफलमज्जवदुपयोगः। विशेषस्तु गरगुल्मोदरकासश्वासश्लेष्मामयेषु वायौ च कफस्थानगते ॥ ८ ॥

धामार्गव (पीले पुष्प की कड़वी तोरी) का भी मदनफल की मज्जा की तरह उपयोग विशेष कर गर (कृत्रिम विष), गुल्म, उदर, कास, श्वास और कफ इन रोगों में तथा कफस्थान में गये हुये वात के संशमन में होता है ॥ ८ ॥

कृतवेधनफलपिप्पलीनां वमनद्रव्यकषायपरिपीतानां बहुशश्चूर्णमुत्पलादिषु दत्तमाघ्रातं वामयति, तत्त्वनवबद्धदोषेषु यवागूमाकण्ठात्पीतवत्सु च विद्ध्यात्। वमनविरेचनशिरोविरेचनद्रव्याण्येवं वा प्रधानतमानि भवन्ति ॥ ९ ॥

कृतवेधन (श्वेतपुष्प वाली कडवी तोरी) के फलों की मज्जा को अन्य वामक द्रव्यों के क्वाथ के साथ अनेक वार भावित कर धोंट के सुखा कर चूर्ण बनावे। फिर उस चूर्ण को उत्पल आदि (कुमुद, पुण्डरीक) पुष्पों पर छिड़क कर या उन पुष्पों में रख के सूंघने से वमन होता है। इस प्रयोग को जिनके दोष बहुत बढ़ गये हों तथा आकण्ठ तक यवागू पी ली हो उनमें प्रयुक्त करना चाहिये। इस तरह वमन, विरेचन और शिरोविरेचन के द्रव्यों को समान गुण वाले अन्य द्रव्यों के क्वाथ से भावित कर प्रयुक्त करने से वे उस कार्य के लिये अत्यन्त प्रधान (गुणकारक) हो जाते हैं ॥ ९ ॥

विमर्शः—परिपीतानां=भावितानाम्। वमनद्रव्याणि कषायभावनयैव विशेषेण गुणवन्ति भवन्ति। तदाह चरकः—'भूयश्चैषां बलाधानं कार्यं स्वरसभावनैः। सुभावितं ह्यल्पमपि द्रव्यं स्याद् बहुकर्मकृत्। स्वरसैस्तुल्यवीर्यैर्वा तस्माद् द्रव्याणि भावयेत् ॥' इति।

भवतश्चात्र—

वमनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता।
तान् विभज्य यथाव्याधिकालशक्तिर्विनिश्चयात् ॥१०॥
कषायैः स्वरसैः कल्कैश्चूर्णैरपि च बुद्धिमान्।
पेयलेह्याद्यभोज्येषु वमनान्युपकल्पयेत् ॥ ११ ॥

इति सुश्रुतसंहितायां सूत्रस्थाने वमनद्रव्यविकल्पविज्ञानीयो नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥४३॥

इस विषय में दो श्लोक हैं—वमन कराने वाले द्रव्यों के योगों का संक्षेप से यहां निर्देश किया गया है। रोग, काल और रोगी की या रोग की शक्ति आदि का निश्चय कर के इन वमन द्रव्यों को विभक्त कर कषाय, स्वरस, कल्क, चूर्ण आदि के रूप में पेय, लेह्य आदि भोज्य द्रव्यों के साथ बुद्धिमान् वैद्य वमनार्थ प्रयुक्त करे ॥ १०–११ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां सूत्रस्थाने वमनद्रव्यविकल्पविज्ञानीयो नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशत्तमोऽध्यायः।

अथातो विरेचनद्रव्यविकल्पविज्ञानीयमध्यायं व्याख्यास्यामः यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'विरेचनद्रव्यविकल्पविज्ञानीय' नामक अध्याय का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥ १–२ ॥

अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने।
प्रधानं तिल्वकस्त्वक्षु फलेष्वपि हरीतकी ॥ ३ ॥
तैलेष्वेरण्डजं तैलं स्वरसे कारवेल्लिका।
सुधापयः पयःसूक्ष्ममिति प्राधान्यसङ्ग्रहः ॥ ४ ॥
तेषां विधानं वक्ष्यामि यथावदनुपूर्वशः ॥ ५ ॥

विरेचनार्थ प्रयुक्त होने वाले मूलों में लाल रङ्ग का निशोथ का मूल श्रेष्ठ है तथा त्वचाओं में तिल्वक (रोध्र) की त्वचा श्रेष्ठ है एवं विरेचनीय फलों में हरीतकी फल श्रेष्ठ है, तैलों में एरण्ड का तैल, स्वरसों में करेले का स्वरस, विरेचक दुग्धों में थूहर का दुग्ध श्रेष्ठ विरेचक है। इस तरह यह विरेचनीय द्रव्यों में प्रधान द्रव्यों का संग्रह कर दिया है। अब उन द्रव्यों के विधान का यथावत् क्रम से वर्णन करते हैं ॥ ३–५ ॥

वैरेचनद्रव्यरसानुपीतं मूलं महत्त्रैवृतमस्तदोषम्।
चूर्णीकृतं सैन्धवनागराढ्यमम्लैः पिबेन्मारुतरोगजुष्टः॥
इक्षोर्विकारैर्मधुरै रसैस्तत् पैत्ते गदे क्षीरयुतं पिबेच्च।
गुडूच्यरिष्टत्रिफलारसेन सव्योपमूत्रं कफजे पिबेत्तत्॥

दूसरी विरेचक ओषधियों के स्वरस से भावित तथा कृमिविषादि दोषों से रहित बडी निशोथ का मूल लेकर खाण्ड कूट के चूर्ण बना कर इसमें चतुर्थांश सैन्धव लवण और सोंठ का चूर्ण मिला के किसी भी अम्लरस जैसे बिजोरे निम्बू या अनारदाने के स्वरस के साथ वात रोगी सेवन करे। पैत्तिक रोग में ऊख के बने विकार (खाण्ड) के साथ अथवा मधुर रसों के साथ किंवा दुग्ध के साथ उक्त त्रिवृत् के योग को सेवन करे। यदि रोगी कफरोग से पीडित हो तो उक्त निशोथ के चूर्ण को गिलोय, निम्ब और त्रिफला के क्वाथ में सोंठ, मरिच और पीपल का चूर्ण का प्रक्षेप तथा गोमूत्र मिला कर पीवे॥ ६-७॥

त्रिवर्णकट्यूषणयुक्तमेतद् गुडेन लिह्यादनवेन चूर्णम्।
प्रस्थे च तन्मूलरसस्य दत्त्वा तन्मूलकल्कं कुडवप्रमाणम्
कर्षोन्मिते सैन्धवनागरे च
विपाच्य कल्कीकृतमेतदद्यात्।
तत्कल्कभागः समहौषधाढ्यः
ससैन्धवो मूत्रयुतश्च पेयः॥ ८॥

इस निशोथ के चूर्ण को कफज रोगों में त्रिवर्णक अर्थात् त्रिजात (दालचीनी, तेजपात और छोटी एला) तथा त्र्यूषण (सोंठ, मरिच और पिप्पली) के चूर्ण के साथ संयुक्त कर पुराने गुड़ के साथ चाटना चाहिये। अथवा निशोथ का स्वरस एक प्रस्थ (दो शराव = १६ पल) ले कर उसमें निशोथ का कल्क एक कुडव (४ पल) भर मिलावे तथा सेन्धा नमक और सोंठ का चूर्ण एक एक कर्ष प्रक्षिप्त कर पकावे। जब कल्क के समान गाढा हो जाय तब सेवन करे। अथवा इस कल्क का एक भाग तथा इसमें आधा भाग सोंठ का चूर्ण मिला के थोडा सेन्धा नमक तथा गोमूत्र मिला कर पान करना चाहिये॥ ८-९॥

समास्त्रिवृन्नागरकाऽभयाः स्यु-
र्भागार्द्धकं पूगफलं सुपक्वम्।
विडङ्गसारो मरिचं सदारु
योगः ससिन्धूद्भवमूत्रयुक्तः॥ १०॥

निशोथ, सोंठ और हरड इन तीनों को समान प्रमाण अर्थात् एक २ तोले भर लेवें तथा ठीक पकी हुई सुपारी, वायविडङ्ग, मरिच और देवदारु इन्हें आधे आधे भाग (१ तोले) ले कर चूर्ण बना कर ६ माशे भर की मात्रा में सेन्धा नमक मिला कर गोमूत्र के अनुपान से उचित मात्रा (३ माशे से ६ माशे भर) में सेवन करना चाहिये॥ १०॥

विरेचनद्रव्यभवन्तु चूर्णं
रसेन तेषां भिषजा विमृद्य।
तन्मूलसिद्धेन च सर्पिषाऽऽक्तं
सेव्य तदाज्ये गुटिकीकृतञ्च॥ ११॥

त्रिवृतादि विरेचन द्रव्यों के चूर्ण को उन्हीं द्रव्यों के स्वरस या क्वाथ से भावित कर त्रिवृत् की जड़ के कल्क क्वाथ द्वारा सिद्ध किये हुये घृत के साथ गीला करके घोट कर गोली बनावें तथा घृत के साथ ही सेवन करें। गोलियां तीन माशे भर की बनावें। प्रमाण-बच्चों के लिये १ गोली, बडों के लिये २ गोली और क्रूर कोष्ठ वालों के लिये ४ गोली॥ ११॥

गुडे च पाकाभिमुखे निधाय
चूर्णीकृतं सम्यगिदं विपाच्य।
शीतं त्रिजातार्कमथो विमृद्य
योगानुरूपा गुटिकाः प्रयोज्याः॥ १२॥

अथवा त्रिवृतादि विरेचक द्रव्यों के इस चूर्ण को चासनी होते हुये गुड़ में मिला कर ठीक तरह से पका के शीतल होने पर उसमें दालचीनी, तेजपात और छोटी इलायची इनका चूर्ण सुगन्धि के लिये मिला कर घोट के एक २ माशे प्रमाण की गुटिकाएं बना लेनी चाहिये। एक से चार गुटिका तक विरेचनार्थ सेवन करावें॥ १२॥

वैरेकीयद्रव्यचूर्णस्य भागं
सिद्धं साद्धं क्वाथभागैश्चतुर्भिः।
आमृद्नीयात् सर्पिषा तच्छृतेन
तत्क्वाथोष्मस्वेदितं सामितञ्च॥ १३॥
पाकप्राप्ते फाणिते चूर्णितं तत्
क्षिप्तं पक्वं चावतार्यं प्रयत्नात्।
शीतीभूता मोदका हृद्यगन्धाः
कार्यास्त्वेते भक्ष्यकल्पाः समासात्॥ १४॥

त्रिवृतादि विरेचनीयद्रव्यों के चूर्ण का एक भाग तथा विरेचनीय द्रव्यों के क्वाथ का चार भाग ले कर परस्पर मिला के पका कर चूर्ण कर ले। फिर सामित अर्थात् विशिष्टरूप से बनाये हुए श्वेत गेहूं को लेकर त्रिवृतादिद्रव्यों के क्वाथ की उष्मा (भाप) से स्वेदित कर त्रिवृतादि से सिद्ध किये हुये घृत के साथ इन गेहू को मिला कर मर्दन करें तथा फिर चूर्ण के रूप में करके उक्त पकाये हुये त्रिवृतादिचूर्ण में मिला कर पाक को प्राप्त हुई गुड़ की चासनी (फाणित) में मिला कर पकाके उतार लेवें। शीतल होने पर उसमें सुगन्धार्थ दालचीनी, तेजपात और इलायची का चूर्ण प्रक्षिप्त कर हृदय के लिये हितकर गन्ध वाले एक २ तोले के मोदक बना लेना चाहिये॥ १३-१४॥

विमर्शः—सामित = समिता एव सामित, गोधूमचूर्णमित्यर्थः। तदाह राजनिघण्टौ-'गोधूमा धवला धौता. कुट्टिता शोधितास्तत.। प्रोक्षिताश्च विनिष्पिष्टाश्चालिता. समिता. स्मृता.॥' इति।

रसेन तेषां परिभाव्य मुद्गान्
यूपः ससिन्धूद्भवसर्पिरिष्टः।
वैरेचनेऽन्यैरपि वैदलैः स्या-
देवं विदध्याद्रमनौषधैश्च॥ १५॥

वैरेचनिक द्रव्यों के स्वरस या क्वाथ से मूंगों को भावित कर उनका यूष बना के उसमें सैन्धव नमक तथा घृत डाल कर विरेचनार्थ सेवन करावे। इसी प्रकार मसूरादि अन्य द्विदलों को भी वैरेचनिक द्रव्यों के स्वरस या क्वाथ से भावित कर यूष बना लेना चाहिये। ऐसे ही वामक द्रव्यों के स्वरस या

काय से विदलों को भावित कर यूष बनाना चाहिये ॥ १५ ॥

भित्त्वा द्विधेक्षुं परिलिप्य कल्कै-
स्त्रिभण्डिजातैः प्रतिबध्य रज्ज्वा ।
पक्वञ्च सम्यक् पुटपाकयुक्त्या
खादेत्तु तं पित्तगदी सुशीतम् ॥ १६ ॥

सांठे को बीच से द्विधा (दो भागों में) चीर कर चीरे हुये प्रदेश में कल्क का लेप कर डोरी से बांध कर पुटपाक विधि से पका के शीतल होने पर पित्तरोगी उसे चूसे ॥ १६ ॥

विमर्शः—पुटपाकविधिः—पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता । लेपश्च दृषद्वुलं स्थूलं कुर्याद्विद्युत्समावकम् ॥ काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ॥ (शार्ङ्गधर) ।

सिताजगन्धात्वक्क्षीरीविदारीत्रिवृतः समाः ।
लिह्यान्मधुघृताभ्यान्तु तृड्दाहज्वरशान्तये ॥ १७ ॥

शर्करा, जङ्गली अजवायन, वंशलोचन, भूमिकूष्माण्ड और निशोथ इन्हें समान प्रमाण में ले कर चूर्णित करके १ माशे से ३ माशे तक की मात्रा में शहद तथा घृत के साथ तृषा, दाह और ज्वर की शान्ति के लिये सेवन करना चाहिये ॥ १७ ॥

शर्कराक्षौद्रसंयुक्तं त्रिवृच्चूर्णावचूर्णितम् ।
रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकम् ॥ १८ ॥

शर्करा और शहद के साथ निशोथ का चूर्ण मिला कर उस में दालचीनी, तेजपात और कालीमरिचों का चूर्ण चतुर्थांशरूप में मिला कर सुकुमार प्रकृति के लोगों के लिये रेचनार्थ देना चाहिये ॥ १८ ॥

पचेल्लेहं सिताक्षौद्रपलार्धकुडवान्वितम् ।
त्रिवृच्चूर्णयुतं शीतं पित्तघ्नं तद्विरेचनम् ॥ १९ ॥

शर्करा १ पल और शहद आधा कुडव (२ पल) ले कर उसमें निशोथ का चूर्ण मिला के अवलेह बनाकर शीत होने पर सेवन करे। यह पित्तनाशक विरेचन है ॥ १९ ॥

त्रिवृच्छ्यामाक्षारशुण्ठीपिप्पलीर्मधुनाऽऽप्नुयात् ।
सर्वश्लेष्मविकाराणां श्रेष्ठमेतद्विरेचनम् ॥ २० ॥

निशोथ, श्यामा (विधारा), यवक्षार, सोंठ और पीपल इनका चूर्ण बना के मधु के साथ सेवन करे। सर्व प्रकार के कफजन्य विकारों के लिये यह श्रेष्ठ विरेचन है ॥ २० ॥

बीजाढ्यपथ्याकाश्मर्यधात्रीदाडिमकोलजान् ।
तैलभृष्टान् रसानम्लफलैराप्य साधयेत् ॥ २१ ॥
घनीभूतं त्रिसौगन्ध्यं त्रिवृत्क्षौद्रसमन्वितम् ।
लेह्यमेतत्कफप्रायैः सुकुमारैर्विरेचनम् ॥ २२ ॥

अच्छी तरह से पकी हुई हरड, काश्मरी (गम्भारी), आंवले, अनारदाने और बेर इनको समप्रमाण में ले कर एरण्ड तैल में भून कर बिजौरे आदि खट्टे फलों के रस में पकाना चाहिये। आसन्नपाकावस्था में अर्थात् गाढा होने पर इसमें दालचीनी, इलायची और तेजपात का चूर्ण एवं निशोथ का चूर्ण तथा शहद मिला कर पाक कर लेवे। कफ जिनका अधिक बढा हो और जो सुकुमार हों उनके द्वारा यह विरेचक लेह्य सेवन करना चाहिये ॥ २१-२२ ॥

नीलीतुल्यं त्वगेलञ्च तैस्त्रिवृत्ससितोपला ।
चूर्णं सन्तर्पणं क्षौद्रफलाम्लं सन्निपातनुत् ॥ २३ ॥

नीली, दालचीनी और छोटी इलायची इन्हें तुल्य प्रमाण में लेवें तथा इन सब के बराबर शर्करा और निशोथ का चूर्ण लेकर शहद और अम्लफलों के रसानुपान के साथ सेवन करने से सन्तर्पण करता है तथा सन्निपात (त्रिदोष) को नष्ट करता है ॥ २३ ॥

त्रिवृच्छ्यामासिताकृष्णात्रिफलामाक्षिकैः समैः ।
मोदकाः सन्निपातोर्ध्वरक्तपित्तज्वरापहाः ॥ २४ ॥

निशोथ, त्रिधारा, पीपल और हरड, बहेड़ा, आंवला इन्हें समान प्रमाण में लेकर चूर्णित करके शहद के साथ एक २ तोले भर के मोदक बना कर सेवन करने से सन्निपात, ऊर्ध्वरक्तपित्त और ज्वर नष्ट होता है ॥ २४ ॥

त्रिवृद्भागास्त्रयः प्रोक्तास्त्रिफला तत्समा तथा ।
क्षारकृष्णाविडङ्गानि सञ्चूर्ण्य मधुसर्पिषा ॥ २५ ॥
लिह्याद् गुडेन गुटिका कृत्वा वाऽप्यथ भक्षयेत् ।
कफवातकृतान् गुल्मान् प्लीहोदरहलीमकान् ॥
हन्त्यन्यानपि चाप्येतन्निरपायं विरेचनम् ॥ २६ ॥

निशोथ तीन भाग, त्रिफला तीन भाग, यवक्षार एक भाग, पिप्पली एक भाग और वायविडङ्ग एक भाग लेकर चूर्णित करके १ माशे से ४ माशे तक मात्रा में लेकर शहद और घृत के अनुपान से सेवन करे। अथवा गुड के साथ उक्त चूर्ण की गोली बनाकर सेवन करे। यह योग कफ तथा वायु से उत्पन्न गुल्म रोग, प्लीहावृद्धि, उदररोग, हलीमक तथा अन्य रोगों को भी नष्ट करता है। यह उपद्रव रहित विरेचन है ॥ २५-२६ ॥

चूर्णं श्यामात्रिवृन्नीली कट्वी मुस्ता दुरालभा ।
चव्येन्द्रवीजं त्रिफला सर्पिर्मांसरसाम्बुभिः ।
पीतं विरेचनं तद्धि रूक्षाणामपि शस्यते ॥ २७ ॥

श्यामा (काली निशोथ या विधारा), सफेद निशोथ, नीली, कुटकी, नागरमोथा, घमासा, चव्य, इन्द्रयव और त्रिफला इन्हें समान प्रमाण में लेकर चूर्णित करके घृत, मांसरस और जल किसी भी अनुपान के साथ सेवन करने से विरेचन होता है। यह योग रूक्षप्रकृति वाले मनुष्यों के लिए भी लाभदायक है ॥ २७ ॥

वैरेचनिकनिःक्वाथभागाः शीतास्त्रयो मताः ।
द्वौ फाणितस्य तच्चापि पुनरग्नावधिश्रयेत् ॥ २८ ॥
तत् साधुसिद्धं विज्ञाय शीतं कृत्वा निधापयेत् ।
कलसे कृतसंस्कारे विभज्यर्तू हिमाहिमौ ॥ २९ ॥
मासादूर्ध्वं जातरसं मधुगन्धं वरासवम् ।
पिबेदसावेव विधिः क्षारमूत्रासवेष्वपि ॥ ३० ॥

विरेचन करनेवाले (निशोथादि) द्रव्यों के शीत क्वाथ तीन भाग तथा गुड की राब (काक्व) दो भाग मिलाकर अग्नि पर पकावे। अच्छी प्रकार सिद्ध हुआ जानकर ठंडा करके संस्कारित कलस अथवा काचपात्र या चीनी मिट्टी के पात्र में

रख देवें फिर शीत ऋतु में एक मास तथा उष्ण ऋतु में एक पक्ष तक रखे। जब उसमें उत्तम रस तथा मधु के समान गन्ध आने लगे तब उसका सेवन करना चाहिये। क्षार, मूत्र तथा अन्य आसवों के बनाने की भी यही विधि है ॥२८-३०॥

वैरेचनिकमूलानां क्वाथे मापान् सुभावितान्।
सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान् ॥३१॥
अवक्षुण्यैकतः पिण्डान् कृत्वा शुष्कान् सुचूर्णितान्।
शालितण्डुलचूर्णञ्च तत्कषायोष्मसाधितम् ॥ ३२ ॥
तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान्।
मण्डोदकार्थे क्वाथञ्च दद्यात्तत्सर्वमेकतः ॥ ३३ ॥
निदध्यात्कलसे तान्तु सुरां जातरसां पिबेत्।
एष एव सुराकल्पो वमनेष्वपि कीर्त्तितः ॥ ३४ ॥

वैरेचनिक द्रव्यों की जड़ के क्वाथ में भावित किये हुये उड़दों को तथा अच्छी प्रकार धोये हुये और उन्हीं द्रव्यों के क्वाथ में भावित किये हुये शाली के चावलों को लेकर अच्छी प्रकार दोनों को खांड कूट कर पिण्ड बना के सुरा लेवे। फिर अन्य शाली चावलों का चूर्ण लेकर उक्त विरेचनीय द्रव्यों के क्वाथ की ऊष्मा (भाप) से पकावे फिर इसे उपर्युक्त तथा मापतण्डुलमिलित चूर्ण के तीन भाग तथा किण्व का एक भाग मिलाकर सुरा बनाने के लिये वैरेचनिक द्रव्यों का क्वाथ भी उसी के साथ मिलाकर सबको एक मिट्टी के सुवासित कलसे में भर कर मास भर रख दें। फिर इसमें अच्छा रस उत्पन्न हो जाय या सुरा बन जाय तब विरेचनार्थ पीनी चाहिये। वमन के लिये भी इसी कल्प (विधि) के अनुसार वामक द्रव्यों से सुरा निर्माण कर लेनी चाहिये॥

मूलानि त्रिवृदादीनां प्रथमस्य गणस्य च।
महतः पञ्चमूलस्य मूर्वाशार्ङ्गष्ट्योरपि ॥ ३५ ॥
सुधां हैमवतीं चैव त्रिफलाऽतिविषे वचाम्।
संहृत्यैतानि भागौ द्वौ कारयेदेकमेतयोः ॥ ३६ ॥
कुर्यान्निःक्वाथमेकस्मिन्नेकस्मिंश्चूर्णमेव तु।
क्षुण्णांस्तस्मिंस्तु निःक्वाथे भावयेद् बहुशो यवान् ३७
शुष्काणां मृदुभृष्टानां तेषां भागास्त्रयो मताः।
चतुर्थं भागमावाप्य चूर्णानामनुकीर्त्तितम् ॥ ३८ ॥
प्रक्षिप्य कलसे सम्यक् समस्तं तदनन्तरम्।
तेषामेव कषायेण शीतलेन सुयोजितम् ॥
पूर्ववत्सन्निदध्यात्तु ज्ञेयं सौवीरक हि तत् ॥ ३९ ॥

त्रिवृतादि सशोधनीय गण के द्रव्यों की जड़ें, प्रथम (विदारीगन्धादि) गण के द्रव्यों की जड़, बड़े पञ्चमूल के द्रव्यों की जड तथा मूर्वा, शार्ङ्गष्टा (पूतिकरञ्ज) की जड़, थूहर, उशारे रेवन्द, त्रिफला, अतीस और वचा इन्हें समान प्रमाण में लेकर संयुक्त करके दो भाग कर लेवें। एक भाग का क्वाथ बना लेवें तथा दूसरे भाग का चूर्ण बना लेना चाहिये। फिर ओखली में कूटे हुये यवों को उक्त क्वाथ में कई बार भावित कर सुखा के हल्के रूप में भून लेवें। अब इन भूने यवों का तीन भाग के साथ पूर्व चूर्ण का एक भाग मिलाकर सबको एक मिट्टी के कलसे में डाल कर उसमें त्रिवृतादि द्रव्यों का शीतल क्वाथ मिलाकर पूर्ववत् सन्धान कर देवें। इसे 'सौवीरक' कहते हैं ॥ ३५-३९ ॥

विमर्शः—भावनाप्रकार-दिवा दिवातपे शुष्कं रात्रौ रात्रौ विवासयेत्। शुष्कं चूर्णीकृतं द्रव्यं सप्ताहं भावनाविधिः॥ द्रवेण यावता द्रव्यमेकीभूयार्द्रता व्रजेत्। द्रवप्रमाणं निर्दिष्टं भिषग्भिर्भावनाविधौ॥ भाव्यद्रव्यसमं क्वाथ्यं क्वाथ्याद्दष्टगुणं जलम्। अष्टांशशोषितं क्वाथो भाव्यानां तेन भावना॥

पूर्वोक्तं वर्गमाहृत्य द्विधा कृत्वैकमेतयोः ॥ ४० ॥
भागं संक्षुद्य संसृज्य यवैः स्थाल्यामधिश्रयेत्।
अजशृङ्ग्याः कषायेण तमभ्यासिच्य साधयेत् ॥४१॥
सुसिद्धांश्चावताय्यैतानोषधिभ्यो विवेचयेत्॥
विमृद्य सतुषान् सम्यक् ततस्तान् पूर्ववन्मितान्॥ ४२॥
पूर्वोक्तौषधभागस्य चूर्णं दत्त्वा तु पूर्ववत्॥
तेनैव सह यूषेण कलसे पूर्ववत्क्षिपेत्॥ ४३ ॥
ज्ञात्वा जातरसञ्चापि तत्तुषोदकमादिशेत्।
तुषाम्बुसौवीरकयोर्विधिरेषः प्रकीर्त्तितः॥ ४४ ॥
षड्रात्रात् सप्तरात्राद्वा ते च पेये प्रकीर्त्तिते।
वैरेचनेषु सर्वेषु त्रिवृन्मूलविधिः स्मृतः॥ ४५ ॥

'सौवीर सन्धान' में कहे हुये त्रिवृतादि से शार्ङ्गष्टा तक के द्रव्य लेकर उनके दो भाग बना के एक भाग को कूट कर सतुष यवों के साथ संयुक्त कर एक स्थाली (पात्र) में रख कर मेढासिङ्गी का क्वाथ डाल कर पकावें। अच्छी प्रकार से पके हुये यवों को ओषधियों के चूर्ण से पृथक् कर अच्छी प्रकार ओखली में कूट के शेष बचे हुये आधे औषध चूर्ण के साथ मिलाकर इन सब को पूर्ववत् एक कलसे में भर कर जौ के उबले हुये उसी क्वाथ को डालकर मुख बन्द करके धान्यराशि में रख दें। जब उसमें अम्लरस उत्पन्न हो जाय तब उसे 'तुषोदक' कहना चाहिये। इस तरह यह 'तुषाम्बु' तथा 'सौवीरक' बनाने की विधि का वर्णन किया है। प्रायः ये दोनों ६ या ७ रात्रि भर सन्धित रखने से पीने योग्य बन जाते हैं। आसवारिष्ट की तरह मास भर रखने की जरूरत नहीं है। विरेचनीय द्रव्य जैसे-श्यामा, द्रवन्ती, दन्ती, सप्तला आदि के योग निर्माण करने के लिये त्रिवृत् के जो जो योग बनाये हैं उसी प्रकार इनसे भी योग तैय्यार कर लेने चाहिये ॥४०-४५॥

दन्तीद्रवन्त्योर्मूलानि विशेषान्मृत्कुशान्तरे।
पिप्पलीक्षौद्रयुक्तानि स्निग्धान्युद्धृत्य शोषयेत् ॥४६॥
ततस्त्रिवृद्विधानेन योजयेच्छ्लेष्मपित्तयोः।
तयोः कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ॥ ४७ ॥
सर्पिश्च पक्वं वीसर्पकच्छादाहालजीर्जयेत्।
मेहगुल्मानिलश्लेष्मविबन्धांस्तैलमेव च ॥ ४८ ॥

दन्ती और द्रवन्ती की जड़ को पिप्पली के चूर्ण तथा शहद से लिप्त कर मिट्टी और कुशा से लपेट कर पुटपाक विधि से स्वेदित कर निकाल के सुखा लेवें। फिर त्रिवृत् की तरह श्लेष्मा और पित्त के रोगियों में सेवनार्थ प्रयुक्त करे। इसी तरह दन्ती और द्रवन्ती के कल्क तथा क्वाथ से चक्र तैल (कोल्हू से निकाला तिल तैल) सिद्ध कर लेवें

तथा घृत भी सिद्ध कर लें। यह घृत वीसर्प, कण्डू और अलजी को नष्ट करता है तथा तैल प्रमेह, गुल्म एवं वातजन्य तथा कफजन्य मलावरोध को नष्ट करता है ॥ ४६–४८ ॥

चतुःस्नेहं शकृच्छुक्रवातसंरोधजा रुजः।
दन्तीद्रवन्तीमरिचकनकाह्वयवासकैः ॥ ४९ ॥
विश्वभेषजमृद्वीकाचित्रकैर्मूत्रभावितम्।
सप्ताहं सर्पिषा चूर्णं योज्यमेतद्विरेचनम् ॥ ५० ॥
जीर्णे सन्तर्पणं क्षौद्रं पित्तश्लेष्मरुजापहम्।
अजीर्णपार्श्वरुक्पाण्डुप्लीहोदरनिबर्हणम् ॥ ५१ ॥

घृत, तैल, वसा और मज्जा यह चार प्रकार का स्नेह मल, वीर्य और वायु इनके अवरोध से उत्पन्न हुई व्याधियों को नष्ट करता है। दन्ती, द्रवन्ती, काली मरिच, कनकाह्वा (नागकेशर), यवासा (दुरालभा), सोंठ, द्राक्षा और चित्रक इन्हें समान प्रमाण में लेकर सात दिन तक गोमूत्र में भावित कर घृत के साथ विरेचनार्थ प्रयुक्त करें। औषध के जीर्ण होने के बाद लाजसक्तु से सन्तर्पण तथा शहद का सेवन करें। यह विरेचक योग पित्त और कफ के रोग, अजीर्ण, पार्श्वपीडा, पाण्डु तथा प्लीहोदर को नष्ट करता है ॥ ४९–५१ ॥

गुडस्याष्टपले पथ्या विंशतिः स्युः पलं पलम्।
दन्तीचित्रकयोः कर्षौ पिप्पलीत्रिवृतोर्दश ॥ ५२ ॥
कृत्वैतान्मोदकानेकं दशमे दशमेऽहनि।
ततः खादेदुष्णतोयसेवी निर्यन्त्रणास्त्विमे ॥
दोषघ्ना ग्रहणीपाण्डुरोगार्शःकुष्ठनाशनाः ॥ ५३ ॥

पुराना गुड़ आठ पल, हरड़ बीस नग, दन्ती और चित्रक एक २ पल, पिप्पली और निशोथ एक २ कर्ष (तोला) भर लेकर खाण्ड कूट के उक्त गुड़ में मिला कर बराबर के प्रमाण में दस मोदक बनाना चाहिये। इनमें से एक २ मोदक प्रतिदिन दसवें दिन खावे तथा ऊपर से गरम जल पीवे। ये मोदक वातातपादि के परहेज के बिना ही सेवन करने से दोषों के नाशक तथा संग्रहणी, पाण्डुरोग और कुष्ठ को नष्ट करते हैं ॥५२–५३ ॥

व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा ॥ ५४ ॥
नवैतानि समांशानि त्रिवृद्दष्टगुणानि वै।
श्लक्ष्णचूर्णीकृतानीह दन्तीभागद्वयं तथा ॥ ५५ ॥
सर्वाणि चूर्णितानीह गालितानि विमिश्रयेत्।
षड्भिश्च शर्कराभागैरीषत्सैन्धवमाक्षिकैः ॥ ५६ ॥
पिण्डितं भक्षयित्वा तु ततः शीताम्बु पाययेत्।
वस्तिरुक्तृड्ज्वरच्छर्दिशोषपाण्डुभ्रमापहम् ॥ ५७ ॥
निर्यन्त्रणमिदं सर्वं विषघ्नन्तु विरेचनम्।
त्रिवृद्दष्टकसंज्ञोऽयं प्रशस्तः पित्तरोगिणाम् ॥ ५८ ॥
भक्ष्यः क्षीरानुपानो वा पित्तश्लेष्मातुरैर्नरैः।
भक्ष्यरूपसधर्मत्वादाढ्येष्वेव विधीयते ॥ ५९ ॥

सोंठ, मरिच, पीपल, दालचीनी, छोटी इलायची, तेजपात, नागरमोथा, वायविडङ्ग और आंवला ये नौ द्रव्य समान भाग अर्थात् इनको एक एक तोले भर लेवे तथा निशोथ आठ तोले भर लेकर सबका महीन चूर्ण कर ले तथा इसमें दन्ती को दो तोले भर मिलाकर सबका महीन कपड़छन चूर्ण करके ६ तोले शक्कर एवं एक तोले भर नमक तथा मधु मिला कर छोटे छोटे (एक २ तोले भर के) लड्डू बना कर सेवन करें। बाद में ठण्डे पानी का अनुपान करे। इस योग से वस्ति के विकार, तृषा, ज्वर, वमन, शरीर की दुर्बलता, पाण्डुरोग तथा भ्रम-रोग नष्ट होते हैं। यह योग भी शीतवातातपादि परहेजों के बिना ही सेवन किया जाता है तथा विष का नाशक एवं विरेचक है। यह 'त्रिवृद्दष्ट' संज्ञा वाला योग पित्त के रोगियों के लिये श्रेष्ठ है। कफ और पित्त के रोगों से पीडित मनुष्य इस योग को दुग्धानुपान से सेवन करें। यह भक्ष्य पदार्थों के समान होने से धनाढ्य रोगियों के लिये भी उत्तम है ॥५४–५९॥

तिल्वकस्य त्वचं शुष्कामन्तर्वल्कविवर्जिताम्।
चूर्णयित्वा तु द्वौ भागौ तत्कषायेण गालयेत् ॥६०॥
तृतीयं भावितं तेन भागं शुष्कन्तु भावितम्।
दशमूलीकषायेण त्रिवृद्वत्सम्प्रयोजयेत् ॥ ६१ ॥

लोध्र की जड़ के अन्दर की कठिन छाल छोड कर सूखी छाल का चूर्ण करके उसके तीन भाग में से दो भाग लेकर उसी की छाल के क्वाथ से भावित कर पका लेवे। फिर तिल्वक के चूर्ण के शेष तीसरे भाग को उसी के क्वाथ से भावित कर सुखा लेवें। पश्चात् सब चूर्ण को मिला कर दशमूल के क्वाथ से भावित कर सुखा के त्रिवृत् की तरह विरेचनकर्म में प्रयुक्त करें ॥ ६०–६१ ॥

विधानं त्वक्षु निर्दिष्टं फलानामथ वक्ष्यते।
हरीतक्याः फलं त्वस्थिविमुक्तं दोषवर्जितम् ॥ ६२ ॥
योज्यं त्रिवृद्विधानेन सर्वव्याधिनिबर्हणम्।
रसायनं परं मेध्यं दुष्टान्तव्रणशोधनम् ॥ ६३ ॥

अब तक विरेचनीय द्रव्यों की त्वचाओं की विधि का वर्णन किया है। अब विरेचनीय फलों की विधि का वर्णन करते हैं। हरीतकी के निर्दोष तथा अस्थिरहित फल लेकर त्रिवृत् की विधि के अनुसार प्रयुक्त करने से सब रोगों का नाश होता है। ये फल परम रसायन, मेधाके लिये हितकारी तथा दुष्ट और अन्तर्व्रण को शुद्ध करते हैं ॥ ६२–६३ ॥

विमर्श.—प्रशस्तफलानि—आपूर्णरसवीर्याणि काले काले यथाविधि। आदित्यपवनच्छायसलिलप्रीणितानि च ॥ यान्यजघन्यपूतीनि निर्व्रणान्यगदानि च ॥ (चरक)। रसायनलक्षणम्—लाभोपायो हि शस्तानां रसादीनां रसायनम्। यज्जराव्याधिविध्वंसि भेषज तद्रसायनम्। स्वस्थस्यौजस्कर यत्तु तद् वृष्य तद्रसायनम् ॥

हरीतकी विडङ्गानि सैन्धवं नागरं त्रिवृत्।
मरिचानि च तत्सर्वं गोमूत्रेण विरेचनम् ॥ ६४ ॥

हरीतकी, वायविडङ्ग, सैन्धव, सोंठ, निशोथ तथा मरिच इनका समप्रमाण चूर्ण बना के गोमूत्र के साथ सेवन करने से विरेचन होता है ॥ ६४ ॥

हरीतकी भद्रदारु कुष्ठं पूगफलं तथा।
सैन्धवं शृङ्गवेरञ्च गोमूत्रेण विरेचनम् ॥ ६५ ॥

हरड़, देवदारु, कूठ, सुपारी, सैन्धव और सोंठ इन्हें सम-

प्रमाण में चूर्णित कर गोमूत्र के साथ सेवन करने से विरेचन होता है ॥ ६५ ॥

नीलिनीफलचूर्णञ्च नागराभययोस्तथा।
लिह्याद् गुडेन सलिलं पश्चादुष्णं पिबेन्नरः ॥ ६६ ॥

नीलिनीफल, सोंठ और हरड़ इनके चूर्ण को गुड़ के साथ खाकर उष्ण जल पीने से विरेचन होता है ॥ ६६ ॥

पिप्पल्यादिकषायेण पिबेत्पिष्टां हरीतकीम्।
सैन्धवोपहितां सद्य एष योगो विरेचयेत् ॥ ६७ ॥

हरीतकी के चूर्ण में सेन्धालोन मिलाकर पिप्पल्यादिगण के क्वाथानुपान से पीने से सद्य विरेचन होता है ॥ ६७ ॥

हरीतकीं भक्ष्यमाणां नागरेण गुडेन वा।
सैन्धवोपहिता वाऽपि सातत्येनाग्निदीपनी ॥ ६८ ॥
वातानुलोमनी वृष्या चेन्द्रियाणां प्रसादनी।
सन्तर्पणकृतान् रोगान् प्रायो हन्ति हरीतकी ॥ ६९ ॥

हरड़ के चूर्ण को सोंठ या गुड़ अथवा सैन्धव लवण के साथ निरन्तर सेवन करने से अग्नि को दीप्त करती है तथा वातकी अनुलोमिनी और वृष्यगुणवती है एवं इन्द्रियों की प्रसादिका है। सन्तर्पण की अधिकता से उत्पन्न हुये रोगों को प्रायः हरड़ नष्ट कर देती है ॥ ६८-६९ ॥

विमर्शः—वृष्यलक्षणात्—यत्किञ्चिन्मधुरं स्निग्धं जीवनं बृंहणं गुरु। हर्षणं मनसश्चैव तत्सर्वं वृष्यमुच्यते ॥ (चरक)। किन्तु वीर्यक्षयवाले रोगियों में हरीतकी श्रेष्ठ नहीं है—क्षीणिनो रूक्षदुर्बलीसक्तविरिक्तवस्तिभिः। हरीतकीभक्षणेन ॥ (चरक)। सन्तर्पणकृतरोगाः—अनेकक्रियाविशेषाः क्रोधनाशुक्षयवृद्धयः। कुष्ठान्यामप्रदोषाश्च मूत्रकृच्छ्रमरोचकः ॥ तस्मात्तस्यातिस्थौल्यमाशुक्षयं गुरुगात्रता। इन्द्रियोपतप्तः क्लेशो दुर्बलोत्थः प्रसेकः ॥ (चरक)।

शीतमामलकं रूक्षं पित्तमेदःकफापहम्।
विभीतकमनुष्णन्तु कफपित्तनिबर्हणम् ॥ ७० ॥
त्रीण्यम्ललवणकषायाणि सतिक्तमधुराणि च।
त्रिफला सर्वरोगघ्नी त्रिभागघृतमूर्च्छिता ॥ ७१ ॥
वयसः स्थापनं चापि दुर्वान् सन्ततसेविता।
हरीतकीविधानेन फलान्येवं प्रयोजयेत् ॥ ७२ ॥
विरेचनानि सर्वाणि विशेषाच्चतुरङ्गुलान्।
फलं काले समुद्धृत्य सिकतायां निधापयेत् ॥ ७३ ॥
सप्ताहस्नानपेषे शुष्कं ततो मज्जानमुद्धरेत्।
तैलं ग्राह्यं जले पक्त्वा तिलवद्वा प्रपीड्य च ॥ ७४ ॥
तत्स्योपयोगो बालानां यावद्वर्षाणि द्वादश।
लिह्यादेरण्डतैलेन कुष्ठत्रिकटुकान्वितम् ॥ ७५ ॥
सुखोदकञ्चानुपिबेदेष योगो विरेचयेत्।
एरण्डतैलं त्रिफलाकाथेन त्रिगुणेन तु ॥ ७६ ॥
युक्तं पीतं तथा क्षीररसाभ्यां तु विरेचयेत्।
बालवृद्धक्षतक्षीणसुकुमारेषु योजितम् ॥ ७७ ॥

आंवला शीत, रूक्ष तथा पित्त, मेद और कफका नाशक है। बहेड़ा न अधिक उष्ण न ठंडा है तथा कफ और पित्त को नष्ट करता है। ये तीनों अर्थात् हरड़, बहेड़ा और आंवला अम्ल, कषाय, तिक्त और मधुर रसवाले होते हैं। त्रिफला त्रिगुण घृतके साथ मिलाकर नित्य सेवन करने से सर्व रोगों को नष्ट करती है तथा आयु की स्थापक है। सर्व प्रकार के विरेचक फलों का उपयोग हरड़ की तरह करे। विशेष कर अमलतास के पके हुये फल (फली) को योग्य समय में लेकर सात दिन तक बालू (रेत) में गाड़ कर रखें। फिर धूप में सुखा कर उनकी गिरी निकाल लेनी चाहिये। फिर इसे जल में उबालके अथवा तिलों की तरह कोल्हू में पीस कर तैल निकालना चाहिये। इस तैल का उपयोग बारह वर्ष तक के बच्चों के लिये होता है। इस तैल को एरण्ड तैल, कुष्ठ तथा त्रिकटु के साथ मिलाकर चाटना चाहिये पश्चात् कुछ उष्ण जल का अनुपान करना चाहिये। यह प्रयोग रेचन करता है। इसी तरह एरण्ड के तैल को त्रिगुण त्रिफला क्वाथ के साथ किंवा दुग्ध के साथ या मांसरस के साथ मिला कर बालक, वृद्ध, क्षत से क्षीण हुये मनुष्य और सुकुमार प्रकृति के मनुष्यों में प्रयुक्त करने से विरेचन करता है ॥ ७०-७७ ॥

फलानां विधिरुद्दिष्टः क्षीराणां शृणु सुश्रुत!।
विरेचनानां तीक्ष्णानां पयः सौवं परं मतम् ॥ ७८ ॥
अज्ञप्रयुक्तं तद्धन्ति विषवत् कर्म्मविभ्रमात्।
विजानता प्रयुक्तन्तु महान्तमपि सञ्चयम् ॥
भिनत्त्याशैव दोषाणां रोगान् हन्ति च दुस्तरान् ॥७९॥

हे सुश्रुत! इस तरह मैंने विरेचक फलों के सेवन की विधि कह दी है अब विरेचक दुग्धों की सेवन विधि सुनो। तीक्ष्ण विरेचनों में थूहर का दुग्ध सबसे उत्तम विरेचक है किन्तु अज्ञ के द्वारा प्रयुक्त करने से एवं कर्म में विभ्रम होने से यह विष की तरह मार देता है किन्तु ज्ञानवान् चिकित्सक द्वारा प्रयुक्त यह स्नुहीदुग्ध दोषों के बड़े भारी सञ्चय को शीघ्र ही भेदन कर देता है तथा दुस्तर रोगों को भी नष्ट कर देता है ॥

विमर्शः—स्नुवावृक्षभेदाः—द्विविधः स तरुर्यश्च बहुनिदग्धैर्वज्रकैः। स्नुहीक्षीरैः कण्टकैरलैः प्रवरो बहुकण्टकः ॥ तं विनाह्याहरेत् क्षीरं शस्त्रेण तरुणं सिरम्। द्विवर्षं वा त्रिवर्षं वा शिशिरान्ते विशेषतः ॥ (चरक)।

महत्याः पञ्चमूल्यास्तु बृहत्यौश्चैकशः पृथक् ॥ ८० ॥
कषायैः समभागं तु तदङ्गारैर्विशोषितम्।
अम्लादिभिः पूर्ववत्तु प्रयोज्यं कोलसम्मितम् ॥ ८१ ॥

बृहत्पञ्चमूल, छोटी कटेरी तथा बड़ी कटेरी इनके अलग अलग बने क्वाथों को समान प्रमाण में लेकर मिला देवें तथा सबको एक पात्र में भर कर के बृहत्यादि सात क्वाथों को पृथक् पृथक् जिस प्रमाण में लिये हों उनमें से एक क्वाथ के बराबर प्रमाण में थूहर का दुग्ध मिला कर तेज अङ्गारों पर पका के शोषित (गाढा) कर लेवें। इस योग को एक कोल (कर्ष) के प्रमाण में लेकर काञ्जी, मस्तु या सुरा के साथ त्रिवृत् की तरह प्रयुक्त करना चाहिये ॥ ८०-८१ ॥

महावृक्षपयःपीतैर्यवागूत्तण्डुलैः कृता।
पीता विरेचयत्याशु गुडेनोत्कारिका कृता ॥ ८२ ॥
लेहो वा साधितः सम्यक् स्नुहीक्षीरपयोघृतैः।

भाविता॒स्तु स्नुहीक्षीरे पिप्पल्यो लवणान्विताः ॥
चूर्णं काम्पिल्लकं वाऽपि तत्पीतं गुटिकीकृतम् ॥ ८३ ॥

थूहर के दुग्ध की भावना दिये हुये चावलों से बनाई हुई यवागू अथवा इस दुग्ध में भावित गोधूम (गेहूं) से गुड़ में बनाई हुई उत्कारिका (लप्सी), किंवा थूहर का दुग्ध, शक्कर और घी इनका यथाविधि बनाया हुआ अवलेह, किंवा थूहर के दुग्ध से भावित तथा लवणमिश्रित पीपल अथवा थूहर के दुग्ध में भावित कर बनाई हुई कम्पिल्लक (कम्बीले) को गुटिका इनमें से किसी एक योग का सेवन करने से सद्यः विरेचन होता है ॥ ८२-८३ ॥

सप्तला शङ्खिनी दन्ती त्रिवृदारग्वधं गवाम् ।
मूत्रेणाप्लाव्य सप्ताहं स्नुहीक्षीरे ततः परम् ॥ ८४ ॥
कीर्णं तेनैव चूर्णेन माल्यं वसनमेव च ।
आघ्रायावृत्य वा सम्यङ् मृदुकोष्ठो विरिच्यते ॥ ८५ ॥
क्षीरत्वक्फलमूलानां विधानैः परिकीर्त्तितैः ।
अवेक्ष्य सम्यग्रोगादीन् यथावदुपयोजयेत् ॥ ८६ ॥

सप्तला (सेकाकाई), शङ्खिनी, दन्ती, निशोथ और अमलतास की गिरी इन्हें समान प्रमाण में लेकर सात दिन तक गोमूत्र के साथ भावित कर घोंट के सुखा लेवें। फिर सात दिन थूहर के दुग्ध में भावित कर घोंट के सुखा कर चूर्ण कर लेवें। फिर इस चूर्ण को किसी माला पर अथवा रुमाल (वस्त्र) पर छिड़क कर सूंघने से या धोती (वस्त्र) पर छिड़क कर सूंघने से मुलायम कोष्ठ वाले को विरेचन हो जाता है। इस तरह विरेचनीय द्रव्यों के क्षीर, छाल, फल और मूलों (जड़ों) की कही हुई विधियों का रोगादिकों का ठीक विचार कर यथावत् प्रयोग करना चाहिये ॥ ८४-८६ ॥

त्रिवृच्छाणमितास्तिस्रस्तिस्रश्च त्रिफलात्वचः ।
विडङ्गपिप्पलीक्षारशाणास्तिस्रश्च चूर्णिताः ॥ ८७ ॥
लिह्यात् सर्पिर्मधुभ्याञ्च मोदकं वा गुडेन वा ।
भक्ष्येष्वनिष्परीहारमेतच्छ्रेष्ठविरेचनम् ॥ ८८ ॥
गुल्मान् प्लीहोदरं कासं हलीमकमरोचकम् ।
कफवातकृतांश्चान्यान् व्याधीनेतद् व्यपोहति ॥ ८९ ॥

निशोथ तीन शाण, त्रिफला की छाल तीन शाण, विडङ्ग, पिप्पली और यवक्षार ये मिला कर तीन शाण लेकर सब का चूर्ण बना के घृत और शहद के साथ तीन माशे से ६ माशे तक के प्रमाण में सेवन करे। अथवा गुड के साथ तीन तीन माशे भर के मोदक बनाकर सेवन करे। यह सर्व प्रकार के पथ्य से रहित श्रेष्ठ विरेचन है। यह योग सर्व प्रकार के गुल्म, प्लीहोदर, कास, हलीमक, अरोचक तथा कफ और वात से उत्पन्न अन्य रोगों को नष्ट करता है ॥ ८७-८९ ॥

घृतेषु तैलेषु पयःसु चापि मद्येषु मूत्रेषु तथा रसेषु ।
भक्ष्यान्नलेह्येषु च तेषु तेषु विरेचनान्यत्रमतिर्विदध्यात्॥

इस अध्याय में कहे हुये घृत, तैल, दुग्ध, मद्य, मूत्र, स्वरस, मोदक आदि भक्ष्य पदार्थ, चावल, यवागू आदि अन्न पदार्थ और अवलेह इनमें से जो योग्य हो उसके साथ प्रधान मति वैद्य विरेचन का प्रयोग करे ॥ ९० ॥

क्षीरं रसः कल्कमथो कषायः
शृतश्च शीतश्च तथैव फाण्टम् ।
कल्पाः षडेते खलु भेषजानां
यथोत्तरं ते लघवः प्रदिष्टाः ॥ ९१ ॥

इति श्रीसुश्रुतसंहितायां सूत्रस्थाने विरेचनद्रव्यविकल्पविज्ञानीयो नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥

थूहर आदि वृक्ष का दुग्ध, अन्य रेचक द्रव्यों के स्वरस, कल्क, शृत कषाय, शीतकषाय और फाण्ट ये भेषज के ६ प्रकार के कल्प (विधान) होते हैं तथा ये उत्तरोत्तर हल्के होते हैं। क्षीर सब से गुरु तथा फाण्ट सबसे लघु है ॥ ९१ ॥

विमर्शः—क्षीरं=दुग्धम्, रस.=स्वरस', अस्य लक्षणम्—'आर्द्रात्तत्क्षणाकृष्टाद् द्रव्यात्क्षुण्णात्समुद्भव.। वस्त्रनिष्पीडितो यः स रसः स्वरस उच्यते' ॥ आर्द्रद्रव्याभावे—कुडव चूर्णित द्रव्य प्रक्षिप्तं द्विगुणे जले। अहोरात्र स्थित तस्माद् भवेत्स्वरस उच्यते ॥' इति। कल्क=पिष्टद्रव्यपिण्ट:, एतल्लक्षणम्—'द्रव्यमात्र शिलापिष्ट शुष्क वा जलमिश्रितम्। तदेव सूरिभि. पूर्वैः कल्क इत्यभिधीयते' ॥ कषायः=काथः, अस्य शृतकषायशीतकषायभेदेन द्विविध। द्वयोर्लक्षणम्—'वह्नौ तु कथित द्रव्य शृतमाहुश्चिकित्सका.। उपोषितं निशायां तु तोयस्थ शीतमुच्यते' ॥ फाण्ट=कषायभेद', यथा—कल्कितद्रव्यपल चतुष्पले उष्णतोये क्षिप्त्वा क्षणकाल शरावावृत सस्थाप्याथ मृदित वस्त्रपूत च फाण्ट इत्युच्यते। अस्यैतल्लक्षणम्—चूर्णमुष्णेन सम्पृक्त तत्फाण्टमभिधीयते।' इति। ४ कल्पा=प्रकारा।

इत्यायुर्वेदतत्त्वसंदीपिकाभाषायां सूत्रस्थाने विरेचनद्रव्यविकल्पविज्ञानीयो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशत्तमोऽध्यायः ।

अथातो द्रवद्रव्यविधिमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर 'द्रवद्रव्यविधि' नामक अध्याय का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत को कहा था ॥ १-२ ॥

पानीयमान्तरिक्षमनिर्देश्यरसममृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमक्लमपिपासामदमूर्च्छातन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमञ्च ॥ ३ ॥

अन्तरिक्ष (आकाश) से गिरनेवाला जल अव्यक्त रस या अत्यल्प किंवा ईषद् व्यक्त रस युक्त, अमृत के समान जीवन के लिये उपयोगी, तृप्तिकारक, शरीरधारक, आश्वासजनक तथा थकावट, ग्लानि, प्यास, मद, मूर्च्छा, तन्द्रा, निद्रा, दाह को शान्त करने वाला तथा निश्चयरूपेण सर्वावस्था में अत्यन्त पथ्य होता है ॥ ३ ॥

विमर्शः—क्लमलक्षणम्—योऽनायासश्रमो देहे प्रवृद्धः श्वासवर्जित। क्लम'-स इति विज्ञेय इन्द्रियार्थप्रबाधक.॥ तन्द्रा लक्षणम्—इन्द्रियार्थेष्वसम्प्राप्तिर्गौरव जृम्भण क्लम। निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्दिशेत्॥ एकान्ततः पथ्यतमञ्च—जलों में

आन्तरिक्ष जल श्रेष्ठ है ऐसा चरक ने भी कहा है—'आन्तरिक्षमुदकानाम्' इस जल में चूना तथा मेग्नेशियम के लवण नहीं होने से अत्यन्त मृदु (Soft) तथा आन्त्रिकज्वर, विसूचिका आदि रोगोत्पादक जीवाणुओं से रहित होने से स्वास्थ्य के लिये श्रेष्ठ है।

तदेवावनिपतितमन्यतमं रसमुपलभते स्थानविशेषान्नदीनदसरस्तडागवापीकूपचुण्टीप्रस्रवणोद्भिदविकिरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति ॥ ४ ॥

वही आन्तरिक्ष (आकाशीय) जल पृथ्वी पर गिर कर मधुरादि षड्रसों में से किसी एक रस को प्राप्त कर लेता है तथा स्थानविशेष से नदी, नद, सरोवर, तालाब, बावड़ी, कूप, चुण्टी (बिना बंधा कूंआ), पर्वतादि से नीचे गिरने वाला झरना, पृथ्वी को फोड़ कर जल निकलने वाला स्थान (उद्भिद), बालू के गढे (विकिर), केदार (खेत में बांध कर रोका हुआ) और पल्वल (पत्तों से आच्छन्न आनूप देशस्थ छोटे तालाब) आदि स्थानविशेषों में अवस्थित रहता है ॥ ४ ॥

विमर्शः—वैज्ञानिक लोग जल को यौगिक मानते हैं तथा वह हैड्रोजन गैस के दो परमाणु तथा ओक्सिजन गैस के एक परमाणु के संयोग से जल का एक अणु बना है (H_2O) अतः इस दृष्टि से आकाश तथा पृथ्वी पर का जल एक ही है किन्तु पृथ्वी पर के जल में अनेक पदार्थ घुल जाने से वह आन्तरिक्ष जल से भिन्न गुणों वाला हो जाता है। जैसा कि चरक ने भी लिखा है—

जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात्। तत्पततत्पतितञ्चैव देशकालानपेक्षते ॥ खात्पतत्सोमवाय्वर्कैः स्पृष्टं कालानुसारिभिः। शीतोष्णस्निग्धरूक्षाद्यैर्यथास्वं मह्यीगुणैः ॥ शीतं शुचि शिवं मृष्टं विमलं लघु षड्गुणम्। प्रकृत्या दिव्यमुदकं भ्रष्टं पात्रमपेक्षते ॥ वर्षा जल का सङ्गठन—एक लिटर (९०) तोले पानी में २५ सी० सी० (२ तोला) वायवीय पदार्थ जैसे ६४% नायट्रोजन, ३४% आक्सीजन, २% कार्बन डायाक्साइड होता है। जहां कल कारखाने अधिक हों उनसे निकले कज्जली, धूलि वर्षा जल में मिल जाते हैं। वर्षारम्भ का जल वायुमण्डल अशुद्ध रहने से अपेय माना गया है। अनार्त्तवञ्च यद्दिव्यमार्त्तवं प्रथमञ्च यत्। लूतादितन्तुविण्मूत्रविषसश्लेषदूषितम् ॥ न पिबेत्। (वाग्भट)।

तत्र, लोहितकपिलपाण्डुपीतनीलशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते ॥ ५ ॥

उनमें लाल, कपिल, पाण्डु, नील, पीत और श्वेत भूमि प्रदेशों में मधुर, अम्ल, लवण, कटु, तिक्त और कषाय रस वाला पानी यथाक्रम से होता है, ऐसा जल में रसोत्पत्ति के विषय में कई आचार्यों का मत है ॥ ५ ॥

विमर्शः—चरक तथा अष्टाङ्गसंग्रह का मत—श्वेते कषाय भवति पाण्डुरे चैव तिक्तकम्। कपिले क्षारसंसृष्टमूषरे लवणान्वितम् ॥ कटु पर्वतविस्तारे मधुरं कृष्णमृत्तिके ॥

तत्तु न सम्यक्। तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलरसो भवत्युत्कर्षापकर्षेण। तत्र, स्वलक्षणभूयिष्ठायां भूमावम्लं लवणञ्च। अम्ब्वगुणभूयिष्ठायां मधुरम्। तेजोगुणभूयिष्ठायां कटुकं तिक्तं च। वायुगुणभूयिष्ठायां कषायम्। आकाशगुणभूयिष्ठायामव्यक्तरसम्, अव्यक्तं ह्याकाशमित्यतः; तत् प्रधानमव्यक्तरसत्वात्। तत्पेयमान्तरिक्षालाभे ॥ ६ ॥

जीव जैसे गुहाशय (शेर आदि) तथा प्रसह, घोडे आदि एक शफ वाले जीव और जाङ्गल ऐसे ६ मांसवर्ग हैं तथा इन में उत्तरोत्तर वर्ग गुणों में अधिक प्रधान है। स्थानभेद से इनके दो विभाग कर दिये हैं। एक जाङ्गल तथा दूसरा आनूप। इन में जाङ्गल वर्ग के आठ भेद हैं जैसे—जङ्घाल, विष्किर, प्रतुद, गुहाशय, प्रसह, पर्णमृग, विलेशय और ग्राम्य। इनमें जङ्घाल तथा विष्किर अधिक श्रेष्ठवर्ग है।

विमर्शः—जलेशया—मत्स्यादय, आनूपा=जलप्रायप्रदेशवासिनो महिषादय, ग्राम्या=ग्रामवासिनश्छागादय, क्रव्यभुजः=आममांसाशिनो गृध्रादय, एकशफा=खरादय, तदुक्तं भागवते—'खरोऽश्वोऽश्वतरो गौर शरभश्चमरी तथा। एते चैकशफा' इति। जाङ्गला=हरिणादय। जङ्घा वेगवत्य सन्त्येषामिति जङ्घाला, विकीर्य भक्षयन्तीति विष्किरा, चञ्च्या प्रतुद्य भक्षयन्तीति प्रतुदा, गुहाया शेरते इति गुहाशया, स्व भक्ष्य प्रसह्य भक्षयन्तीति प्रसहा, पर्णे मृगयन्त इति पर्णमृगा, तदुक्तम्—'वनौकोवृक्षमार्जारवृक्षमर्कटिकादय। एते पर्णमृगा प्रोक्ता' इति। विले शेरत इति विलेशया, ग्रामे वा ग्राम्या।

तावेणहरिणर्क्षकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो जङ्घाला मृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या बस्तिशोधनाश्च ॥ ५४ ॥

काला हरिण, श्वेतहरिण, नीलाण्ड हरिण, कुरङ्ग (चौकड़िया मृग), कराल (कस्तूरी) मृग, कृतमाल मृग, शरभ, श्वदंष्ट्रा, पृषत (पृष्ठ पर चित्र विचित्र बिन्दुवाला) मृग, चारुष्कर, मृगमातृका (हरिणी) आदि ये जंघाल वर्ग के मृग हैं। इनका मांस कषाय, मधुर, लघु, वातपित्तनाशक, तीक्ष्ण, हृद्य और वस्तिशोधक होता है ॥ ५४ ॥

कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा।
सङ्ग्राही रोचनो बल्यस्तेषामेणो ज्वरापहः ॥ ५५ ॥

इन में से एण मृग-कषाय, मधुर और हृद्य होता है तथा पित्त, रक्त तथा कफ के रोगों को नष्ट करता है एवं संग्राही, रोचक बलकारक और ज्वरनाशक होता है ॥ ५५ ॥

मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः।
शीतलो बद्धविण्मूत्रः सुगन्धिर्हरिणो लघुः ॥ ५६ ॥

सुगन्धि (ताम्र) हरिण-रस और विपाक में मधुर, वातादि दोषनाशक, पाचकाग्निदीपक, शीतल, विष्ठा तथा मूत्र को बांधने वाला और पचने में हलका होता है ॥ ५६ ॥

एणः कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते।
यो न कृष्णो न ताम्रश्च कुरङ्गः सोऽभिधीयते ॥५७॥

काले मृग को 'एण' तथा ताम्रवर्ण के मृग को 'हरिण' कहते हैं तथा जो न काला हो तथा न ताम्र हो उसे 'कुरङ्ग' कहते हैं॥

शीताऽसृक्पित्तशमनी विज्ञेया मृगमातृका।
सन्निपातक्षयश्वासकासहिक्कारुचिप्रणुत् ॥ ५८ ॥

हरिणी—शीतवीर्य होती है तथा रक्तपित्त का शमन करती है एवं सन्निपात, क्षय, श्वास, कास, हिक्का और अरुचि को नष्ट करती है ॥ ५८ ॥

लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकावार्तीकचकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रकुतित्तिरिकुरुवाहकयवालकप्रभृतयस्त्र्याहला विष्किराः॥

लघवः शीतमधुराः कषायाः दोषनाशनाः ॥ ६० ॥

विष्किरवर्ग—लाव (बटेर), तीतर, गौर तीतर, कपिञ्जल, वर्त्तीर; वर्तिका, वर्तक, नप्तृका, वार्तीक, चकोर, कलविङ्क, मयूर, क्रकर, उपचक्र (चकोर), कुक्कुट (मुर्गा), सारङ्ग (पपीहा), शतपत्रक, कुतित्तिरि, कुरुवाहक, यवालक प्रभृति दो पंजे तथा तीसरी चोंच से भूमि को कुरेदते हैं। ये लघु, शीतवीर्य, मधुर, कषाय और दोषनाशक हैं ॥ ५९-६० ॥

विमर्शः—लावभेदाः—गौरिक पाशुलश्चैव पौण्ड्रको दर्मरस्तथा। लावश्चतुर्विध प्रोक्तस्तित्तिरिर्द्विविध स्मृतः। त्र्याहलाः—त्रिभिश्चरणयुगलचञ्चुभिराहलन्ति विलिखन्ति भूमिमिति त्र्याहलाः।

सङ्ग्राही दीपनश्चैव कषायमधुरो लघुः।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥ ६१ ॥

बटेर—दस्त बांधने वाला, अग्निदीपक, कषाय, मधुर, लघु, विपाक में कटु तथा सन्निपात में उत्तम है ॥ ६१ ॥

ईषद्गुरूष्णमधुरो वृष्यो मेधाऽग्निवर्द्धनः।
तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः ॥ ६२ ॥

तीतर—कुछ भारी, उष्ण, मधुर, वृष्य, मेधा तथा अग्निवर्द्धक, सर्वदोषनाशक, संग्राही तथा शरीर के वर्ण को प्रसन्न करता है ॥ ६२ ॥

रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः।
कफोत्थेषु च रोगेषु मन्दवाते च शस्यते।
हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः ॥ ६३ ॥

कपिञ्जल—रक्तपित्त का नाशक, शीतल तथा लघु होता है एवं कफ से उत्पन्न रोग तथा मन्दवात में श्रेष्ठ हैं। गौर तित्तिर-हिक्का, श्वास और वात को विशेषरूप से नष्ट करताहै॥

वातपित्तहरा वृष्या मेधाऽग्निबलवर्द्धनाः।
लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः ॥ ६४ ॥

क्रकर—वातपित्तनाशक, वृष्य, मेधा, अग्नि तथा बल का वर्द्धक, पचने में लघु तथा हृद्य होते हैं। उपचक्र भी गुणों में क्रकर के समान है ॥ ६४ ॥

कषायः स्वादुलवणस्त्वच्यः केश्योऽरुचौ हितः।
मयूरः स्वरमेधाऽग्निदृक्श्रोत्रेन्द्रियदार्ढ्यकृत् ॥ ६५ ॥

मयूर—कषाय, मधुर और लवण है तथा त्वचा, केश और अरोचक में हितकारी है एवं स्वर, बुद्धि, जठराग्नि, नेत्र और कर्ण इन्हें दृढ़ करता है ॥ ६५ ॥

स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः।
बृंहणः कुक्कुटो वन्यस्तद्वद् ग्राम्यो गुरुस्तु सः।
वातरोगक्षयवमीविषमज्वरनाशनः ॥ ६६ ॥

जङ्गल का मुर्गा—स्निग्ध, उष्ण, वातनाशक, वृष्य, स्वेद, स्वर तथा बल देने वाला और बृंहण होता है। ग्राम्य मुर्गा भी वन्य के समान ही गुणों में होता है किन्तु वह पचने में

भारी एवं वात रोग, क्षय, वमन और विषम ज्वर को नष्ट करता है ॥ ६६ ॥

विमर्शः—दुग्ध के अतिरिक्त खाद्य द्रव्यों में अण्डे के समान अन्य पौष्टिक द्रव्य नहीं है। अधिकतर मुर्गी के अण्डे, किन्तु कहीं कहीं वत्तक तथा समुद्री पक्षी या अन्य पक्षियों के अण्डे भी खाये जाते हैं। कार्बोहैड्रेट के सिवाय अण्डे में प्रोटीन, फेट, केल्सियम, फोस्फरस, लोहा, पुटेशियम ये तत्त्व होते हैं तथा इनका पाचन और शोषण शीघ्र होता है। मुर्गी का एक अण्डा आधा पाव दुग्ध के समान है। अण्डे से किसी प्रकार के संक्रामक या अन्य रोग नहीं होते हैं। चरकोक्ता अण्डगुणाः—तार्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि। चटकानाञ्च यानि स्युरण्डानि च हितानि च ॥ रेतःक्षीणेषु कासेषु हृद्रोगेषु क्षतेषु च। मधुराण्यविपाकीनि सद्योबलकराणि च ॥ (च. सू. अ. २७)

कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गगृहकुलिङ्गगोधेवडकडिण्डिमाणवकशतपत्रकमातृनिन्दकभेदाशिशुकसारिकावल्गुलीगिरिशालटवान्नदूपकसुगृहीखञ्जरीटहारीतदात्यूहप्रभृतयः प्रतुदाः ॥ ६७ ॥

प्रतुदवर्ग—कपोत (जङ्गली कबूतर), पारावत (शहर का कबूतर), भृङ्गराज (भंवरा), परभृत (कोकिल), कोयष्टिक (टिटहरी), कुलिङ्ग (चटक), गृहकुलिङ्ग (घर की चिडिया या चिडा), गोधेवडक (गोनर्द पक्षी), डिण्डिमाणवक, शतपत्रक, मातृनिन्दक, भेदाशी, शुक (तोता), सारिका (मैना), वल्गुली, गिरिशा, लटवा, अन्नदूपक, सुगृही, खञ्जरीट, हारीत, दात्यूह प्रभृति प्रतुदवर्ग के पक्षी हैं ॥

कषायमधुरा रूक्षाः फलाहारा मरुत्कराः।
पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः ॥ ६८ ॥

प्रतुद वर्ग के पक्षी—कषाय, मधुर, रूक्ष, स्वयं फल खाने वाले, वातजनक, पित्त और श्लेष्म के नाशक, शीतवीर्य तथा मूत्र को बंद करने वाले एवं अल्प मलोत्पादक हैं ॥ ६८ ॥

सर्वदोषकरस्तेषां भेदाशी मलदूषकः।
कषायस्वादुलवणो गुरुः काणकपोतकः ॥ ६९ ॥
रक्तपित्तप्रशमनः कषायविशदोऽपि च।
विपाके मधुरश्चापि गुरुः पारावतः स्मृतः ॥ ७० ॥
कुलिङ्गो मधुरः स्निग्धः कफशुक्रविवर्द्धनः।
रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः ॥ ७१ ॥

इनमें भेदाशी पक्षी—वातपित्तादि सर्वदोषों को उत्पन्न करता है तथा मलों को दूषित करता है। काणकपोत (जङ्गली कबूतर)-रस में कषाय, स्वादु, लवण तथा पाक में भारी होता है तथा पारावत पक्षी-रक्तपित्त का शामक, रस में कषाय, स्पर्श में पिच्छिल, विपाक में मधुर तथा पचने में भारी होता है। कुलिङ्ग-मधुर, स्निग्ध, कफ और शुक्र का वर्द्धक तथा रक्तपित्तनाशक है एवं घर का कुलिङ्गपक्षी-शुक्र को अधिक मात्रा में बढ़ाता है ॥ ६९-७१ ॥

सिंहव्याघ्रवृकतरक्षुद्वीपिमार्जारशृगालमृगेर्वारुकप्रभृतयो गुहाशयाः ॥ ७२ ॥

गुहाशय वर्ग—में सिंह, व्याघ्र, भेडिया, तरक्षु, रीछ, चीता, मार्जार, शृगाल, मृग, एर्वारुक प्रभृति होते हैं जो पर्वत तथा जङ्गलों की गुफाओं में रहते हैं ॥ ७२ ॥

मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः।
उष्णवीर्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥ ७३ ॥

गुहाशय प्राणी—मधुर, भारी, स्निग्ध, बलवर्द्धक, वात के नाशक उष्णवीर्य होते हैं तथा नेत्र रोग और गुह्य प्रदेश के विकार अर्थात् इन्द्रियशैथिल्य में वसाभ्यङ्ग, गर्भाशय या गुदभ्रंश में इनकी वसा का उपयोग करने से हितकारी होते हैं ॥

काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्रप्रभृतयः प्रसहाः ॥ ७४ ॥

प्रहस वर्ग—में कौआ, कङ्क, कुरर, चाष, भास, शशघाती, उल्लू, चिल्लि (चील), श्येन (बाज), गीध प्रभृति बलपूर्वक छीन के खाने वाले हैं ॥ ७४ ॥

विमर्शः—कङ्कपरिचयः—कङ्कः स्यात् कङ्कमालाख्यो बाणपत्रार्हपक्षकः। लोहपृष्ठो दीर्घपादः पश्चाधःपाण्डुवर्णभाक् ॥ शशघाती को Golden-Eagle कहते हैं। ये नर-मादा दोनों मिलकर खरगोश को चतुराई से मारते हैं। एक बिल के पास छिप जाता है दूसरा दूर जाकर शोर मचाता है जिससे शश बिल से निकलता है और बाहर बैठा उसे मार डालता है।

एते सिंहादिभिः सर्वे समाना वायसादयः।
रसवीर्यविपाकेषु विशेषाच्छोषिणे हिताः ॥ ७५ ॥

ये कौए आदि प्रसह वर्ग के प्राणी रस, वीर्य तथा विपाक में सिंहादिक के समान होते हैं किन्तु विशेष कर शोष (T. B राजयक्ष्मा) के रोगी के लिये हितकारी हैं ॥ ७५ ॥

मद्गुमूषिकवृक्षशायिकावकुशपूतिघासवानरप्रभृतयः पर्णमृगाः ॥ ७६ ॥

पर्णमृग वर्ग—में मद्गु (वृक्ष का सर्प), मूषिक, वृक्षशायिका (गिलहरी), अवकुश, पूतिघास (वृक्ष का बिलाव) तथा बन्दर प्रभृति पर्णमृग है ॥ ७६ ॥

मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः।
सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः ॥ ७७ ॥

ये पर्णमृग—मधुर, गुरु, वृष्य, नेत्ररोगों में हितकारी, राजयक्ष्मा में लाभकारी तथा मूत्र और मल को प्रवृत्त करने वाले एवं कास, अर्श और श्वास रोगों को नष्ट करते हैं ॥७७॥

श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो बिलेशयाः ॥ ७८ ॥

बिलेशय वर्ग—में श्वावित् (सहेढ़ी), शल्यक, गोधा, शशक, वृषदंश (गांव की बिल्ली), लोपाक (लोमड़ी), लोमशकर्ण (बडा बिल्ला), कदली, मृगप्रियक (गोनस), अजगर, सर्प, मूषिक (चूहा), नेवला, महावभ्रु (बड़ा नेवला) आदि जानवर बिलों में शयन करने (रहने) वाले हैं ॥७८॥

वर्चोमूत्रं संहतं कुर्युरेते
वीर्ये चोष्णाः पूर्ववत् स्वादुपाकाः।

वातं हन्युः श्लेष्मपित्ते च कुर्युः
स्निग्धाः कासश्वासकार्श्यापहाश्च ॥ ७६ ॥

ये विलेशयवर्ग के प्राणी विष्ठा तथा मूत्र को गाढा करते हैं तथा वीर्य में उष्ण होते हैं तथा पर्णमृग की तरह विपाक में मधुर, वातनाशक तथा कफ और पित्तकारक, स्निग्ध एवं कास, श्वास और कृशता को नष्ट करते हैं ॥ ७९ ॥

कषायमधुरस्तेषां शशः पित्तकफापहः।
नातिशीतलवीर्यत्वाद्वातसाधारणो मतः ॥ ८० ॥

इन विलेशयों में शश (खरगोश) का मांस-कषाय, मधुर, पित्त और कफ का नाशक होता है एवं अतिशीत वीर्य न होने से वात के प्रकोप तथा प्रशमन करने में साधारण होता है ॥ ८० ॥

गोधा विपाके मधुरा कषायकटुका स्मृता।
वातपित्तप्रशमनी बृंहणी बलवर्द्धनी ॥ ८१ ॥

गोधा—विपाक में मधुर, रस में कषाय तथा कटु, वात और पित्त को शान्त करने वाली, शरीरपुष्टिकारक और बलवर्द्धक होती है ॥ ८१ ॥

शल्यकः स्वादुपित्तघ्नो लघुः शीतो विषापहः।
प्रियको मारुते पथ्योऽजगरस्त्वर्शसां हितः ॥ ८२ ॥
दुर्नामानिलदोषघ्नाः कृमिदूषीविषापहाः।
चक्षुष्या मधुराः पाके सर्पा मेधाऽग्निवर्द्धनाः ॥ ८३ ॥
दर्वीकरा दीपकाश्च तेपूक्ताः कटुपाकिनः।
मधुराश्चातिचक्षुष्याः सृष्टविण्मूत्रमारुताः ॥ ८४ ॥

शल्यक—रस में मधुर, पित्तशामक, लघु, शीत और विषनाशक होता है। प्रियक-वातरोगों में पथ्य तथा अजगर (सर्प)-अर्शरोग में हितकर है। सर्प-अर्श, वातविकार, कृमिरोग तथा दूषीविष को नष्ट करते हैं तथा नेत्र के लिये हितकर, विपाक में मधुर तथा मेधा और पाचकाग्नि के वर्द्धक होते हैं। दर्वीकर सर्प तथा दीपक (राजिमन्त) सर्प-विपाक में कटु, रस में मधुर, नेत्रों के लिये अधिक हितकारी एवं विष्ठा, मूत्र और वायु को प्रवृत्त करने वाले होते हैं ॥८२-८४॥

विमर्शः—दूषीविषलक्षणम्—दूषित देशकालान्नदिवास्वप्नैरभीक्ष्णशः। यस्माद् दूषयते धातून् तस्माद्दूषीविषं स्मृतम्॥ अन्यच्च—जीर्णं विषघ्नौषधिभिर्हृतं वा दावाग्निवाताततपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति॥

अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥

ग्राम्यवर्ग में—घोड़ा, अश्वतर (खच्चर), गो, गदहा, उष्ट्र, बकरा, उरभ्र (मेढा), मेदःपुच्छ (दुम्बा) प्रभृति ग्राम निवासी होने से 'ग्राम्य' कहलाते हैं ॥ ८५ ॥

ग्राम्या वातहराः सर्वे बृंहणाः कफपित्तलाः।
मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः ॥ ८६ ॥

ग्राम्य पशु वातनाशक, बलवर्द्धक, कफ और पित्त करने वाले रस और विपाक में मधुर तथा अग्निदीपक और बलवर्द्धक होते हैं ॥ ८६ ॥

नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः।
छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः ॥ ८७ ॥

छगल (बकरा)—अधिक ठंढा नहीं होता है किन्तु पचने में भारी, स्निग्ध, अल्प पित्त तथा अल्प कफ करने वाला एवं अभिष्यन्द नहीं करने वाला तथा पीनसरोगनाशक होता है ॥ ८७ ॥

बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु।
मेदःपुच्छोद्भवं वृष्यमौरभ्रसदृशं गुणैः ॥ ८८ ॥

मेढे का मांस—बृंहण, पित्त तथा कफ का जनक एवं पचने में भारी होता है। मेदःपुच्छ (पड़के) का मांस वृष्य तथा मेढे के समानगुणकारक होता है ॥ ८८ ॥

श्वासकासप्रतिश्यायविषमज्वरनाशनम्।
श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम् ॥ ८९ ॥
औरभ्रवत्सलवणं मांसमेकशफोद्भवम्।
अल्पाभिष्यन्द्ययं वर्गो जाङ्गलः समुदाहृतः ॥ ९० ॥
दूरे जनान्तनिलया दूरे पानीयगोचराः।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो मताः ॥९१॥
अतीवासन्ननिलयाः समीपोदकगोचराः।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते ॥ ९२ ॥

गो का मांस—श्वास, कास, प्रतिश्याय और विषमज्वर को नष्ट करता है। श्रम करने वाले तथा अत्यग्नि (भस्मक रोग) वालों के लिये हितकारी, पवित्र और वातनाशक होता है। एक खुर वाले प्राणियों (घोड़े आदि) का मांस-उरभ्र के समान गुणकारक तथा कुछ लावणिक रसयुक्त होता है। इस तरह यह जाङ्गल प्राणियों का वर्ग-अल्प अभिष्यन्द (क्लेद) कारक होता है। जो मृग (पशु) तथा विहङ्ग (पक्षी) मनुष्यों के निवास तथा जलाशयों से दूर रहते हैं वे अल्प अभिष्यन्दकारक होते हैं तथा जो मृग और पक्षी बस्ती के अतिनिकट रहते हों एवं जलाशयों के भी समीप में रहते हों वे या उनका मांस अत्यन्त अभिष्यन्द (क्लेद) कारक होता है ॥ ८९-९२ ॥

आनूपवर्गस्तु पञ्चविधः। तद्यथा-कूलचराः, प्लवाः, कोषस्थाः, पादिनः, मत्स्याश्चेति ॥ ९३ ॥

आनूप अर्थात् सजल प्रदेश में रहने वाले प्राणियों का वर्ग पांच प्रकार का होता है। जैसे जल के किनारे (तट) पर घूमने वाले कूलचर, पानी पर तैरने वाले प्लव, शंख सीप आदि कोश बनाकर उसमें रहने वाले कोशस्थ, पैरों वाले (मेढकादि), पादिन मछलियां ॥ ९३ ॥

विमर्शः—अनुगता आपो यत्रेत्यनूपो जलप्रायो देशस्तत्र भवा आनूपास्तेषां वर्गः। कूले नद्यादितटे चरन्ति भक्षयन्ति भ्रमन्ति चेति कूलचराः, प्लवन्ते पानीये तरन्तीति प्लवाः, कोषः शङ्खादीनां सम्पुटस्तत्र तिष्ठन्तीति कोषस्थाः, पादिनः=पादवन्तः कच्छपादयः।

तत्र,गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोद्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः ॥ ९४ ॥

इनमें से कूलचर प्राणी जैसे-हाथी, नील गाय, भैंसा, रुरुमृग, चमर (चमर वाली वनगाय), सूमर (महाशूकर), रोहित, वराह (सूकर), खड्गी (गैंडा), गोकर्ण, कालपुच्छक, उद्र (उदविलाव), न्यङ्कु (मृग), जङ्गली गवय आदि कूलचर प्राणी हैं ॥ ९४ ॥

विमर्शः—रुरुः=शरदि शृङ्गत्यागी मृगभेदः। तल्लक्षणम्—'विकटबहुविषाणः शम्बराकारदेहः सलिलतटचरत्वाच्छम्बरेभ्यो विचित्रः। त्यजति शरदि शृङ्गं रौत्यतोऽसौ रुरुः स्यात् पृथुलमृगविशेष प्रायशश्चेदिदेशे।' इति। कालपुच्छकः=कृष्णपुच्छको मृगभेदः, 'रुरैरेणसमः कालपुच्छो मुनिभिरीरितः' इति तल्लक्षणम्।

वातपित्तहरा वृष्या मधुरा रसपाकयोः।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः ॥ ९५ ॥

ये कूलचर प्राणी—वातपित्तनाशक, वृष्य, रस तथा विपाक में मधुर, शीतवीर्य, बलवर्द्धक, स्निग्ध, मूत्रल और कफवर्द्धक होते हैं ॥ ९५ ॥

विरूक्षणो लेखनश्च वीर्योष्णः पित्तदूषणः।
स्वाद्वम्ललवणस्तेषां गजः श्लेष्मानिलापहः ॥ ९६ ॥
गवयस्य तु मांसं हि स्निग्धं मधुरकासजित्।
विपाके मधुरं चापि व्यवायस्य तु वर्द्धनम् ॥ ९७ ॥
स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः।
निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत् ॥ ९८ ॥

इनमें हाथी का मांस—विरूक्षण, लेखन, उष्णवीर्य, पित्तदूषक, मधुर, अम्ल, लवण तथा कफ और वात का नाशक होता है। गवय का मांस-स्निग्ध, मधुर, कासनाशक, विपाक में मधुर तथा सम्भोग शक्ति का वर्द्धक होता है। भैंस का मांस-स्निग्ध, उष्ण, मधुर, वृष्य, तर्पक, पचने में भारी एवं निद्रा, पुस्त्व (संभोग) शक्ति, बल और दुग्ध का वर्द्धक है एवं मांस को दृढ करता है ॥ ९६-९८ ॥

रुरोर्मांसं समधुरं कषायानुरसं स्मृतम्।
वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् ॥ ९९ ॥
तथा चमरमांसन्तु स्निग्धं मधुरकासजित्।
विपाके मधुरं चापि वातपित्तप्रणाशनम् ॥ १०० ॥
सूमरस्य तु मांसञ्च कषायानुरसं स्मृतम्।
वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् ॥ १०१ ॥
स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु।
श्रमानिलहरं स्निग्धं वाराहं बलवर्द्धनम् ॥ १०२ ॥
कफघ्नं खड्गिपिशितं कषायमनिलापहम्।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥ १०३ ॥
गोकर्णमांसं मधुरं स्निग्धं मृदु कफावहम्।
विपाके मधुरञ्चापि रक्तपित्तविनाशनम् ॥ १०४ ॥

रुरु का मांस—सुमधुर, अनुरस में कषाय, वात तथा पित्त का नाशक, पचने में भारी एवं शुक्र का वर्द्धक होता है। इसी तरह चमर का मांस-स्निग्ध, मधुर, कासनाशक, विपाक में मधुर और वात तथा पित्त का नाशक होता है। सूमर का मांस-कषायानुरस, वात और पित्त का शामक, पचने में भारी तथा शुक्रवर्द्धक होता है। वराह का मांस-स्वेदजनक, शरीर को पुष्ट करने वाला, वृष्य, शीतल, तृप्तिकारक, पचने में भारी, श्रम और वात का नाशक, स्निग्ध एवं बलवर्द्धक होता है। गैंडे का मांस-कफनाशक, कषाय, वातनाशक, पितरों के श्राद्ध में हितकारी पवित्र, आमवर्धक, मूत्रसंग्राहक तथा विशेषकर रूक्ष होता है। गोकर्ण का मांस-मधुर, स्निग्ध मृदु, कफवर्द्धक, विपाक में मधुर तथा रक्तपित्त का नाशक होता है ॥ ९९-१०४ ॥

हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकबकबलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गूत्कोशकाचाचमल्लिकाचशुक्लाचपुष्करशायिकाकोनालकाम्बुकुक्कुटिकामेघरावश्वेतवारलप्रभृतयः प्लवाः सङ्घातचारिणः ॥ १०५ ॥

प्लव अर्थात् तैरने वाले प्राणी-जैसे हंस, सारस, क्रौञ्च, चकवा-चकवी, कुरर, कादम्ब (कलहंस), कारण्डव (शुक्लहंस), जीवञ्जीवक, बगुला, बलाका, पुण्डरीक, प्लव, शरारीमुख, नान्दीमुख, मद्गु, उत्क्रोश (कुरर भेद), काचाच, मल्लिकाच, शुक्लाच, पुष्करशायिका, कोनालक, अम्बुकुक्कुटिका (जलकूकडी), मेघराव तथा श्वेतवारल आदि प्लववर्ग के प्राणी हैं तथा ये सघ बना कर जल पर तैरते हैं ॥१०५॥

विमर्श-जीवञ्जीवकः—दृष्ट एव चार्स्मिस्तु ' 'म्रियते जीवञ्जीवको ग्लायति वेति (अ० सं०)।

जीव जीवयतीति बाहुलकात् खच्; जीवञ्जीवक =यो विषदर्शनमात्रेण ग्लायति म्रियते वा स पक्षिविशेषः। राजानोऽन्नादौ विषसत्तापरिज्ञानायैन पालयन्ति स्म। जीवञ्जीवकश्चकोर इति शब्दार्थचिन्तामणिः। नन्दीमुख =भाटीभेदः। अस्य लक्षणम्—'स्थूला कठोरा वृत्ता च यस्याश्चञ्चूपरिस्थिता। गुटिका चञ्चुसदृशी ज्ञेया नन्दीमुखीति सा॥' इति।

रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः।
सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः ॥ १०६ ॥

ये प्लववर्ग के प्राणी-रक्तपित्तनाशक, शीतवीर्य, स्निग्ध, वृष्य, वातनाशक, मूत्र और पुरीष के उत्पादक या प्रवर्तक तथा रस और विपाक में मधुर होते हैं ॥ १०६ ॥

गुरूष्णमधुरः स्निग्धः स्वरवर्णबलप्रदः।
बृंहणः शुक्रलस्तेषां हंसो वातविकारनुत् ॥ १०७ ॥

इनमें से हंस-पचने में भारी, उष्णवीर्य, मधुर, स्निग्ध होता है तथा स्वर, वर्ण और बल को बढाता है एवं बृंहण, शुक्रजनक और वातविकारनाशक होता है ॥ १०७ ॥

शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोपस्थाः ॥
कूर्मकुम्भीरकर्कटकृष्णकर्कटशिशुमारप्रभृतयः पादिनः ॥

कोशस्थवर्ग में शङ्ख, शङ्खनख (क्षुद्रशङ्ख), शुक्ति, शम्बूक (घोंघे), भल्लूक (कौड़ी) आदि कोशस्थ प्राणी हैं तथा पादिनवर्ग में कच्छप, कुम्भीर (घड़ियाल), केंकड़ा, काला केकड़ा और शिशुमार (नाक) प्रभृति पांव वाले या पांव से चलने वाले प्राणी हैं ॥ १०८-१०९ ॥

शङ्खकूर्मादयः स्वादुरसपाका मरुन्नुदः।
शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः॥
कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः।
शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा॥१११॥

साधारणतया ये शङ्खकूर्मादि जन्तु-रस तथा विपाक में मधुर, वातनाशक, शीतल, स्निग्ध, पित्तविकार में हितकारी, वर्च (मल) वर्द्धक तथा कफवर्द्धक होते हैं। इनमें काला केकड़ा-बलवर्द्धक, कुछ गरम तथा वातनाशक है। श्वेतकेकड़ा-भग्नास्थि का संयोजक, विष्ठा और मूत्र को पैदा करने वाला तथा वात और पित्तनाशक होता है॥ ११०-१११॥

मत्स्यास्तु द्विविधाः-नादेयाः सामुद्राश्च॥ ११२॥

मत्स्य—नदी में होने वाले नादेय तथा समुद्र में होने वाले सामुद्र ऐसे दो प्रकार के होते हैं॥ ११२॥

तत्र नादेयाः—रोहितपाठीनपाटलाराजीववर्मिगो-मत्स्यकृष्णमत्स्यवागुज्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः॥

उनमें नादेय मत्स्य-रोहित, पाठीन, पाटला, राजीव, वर्मि, गोमत्स्य, कृष्णमत्स्य, वागुज्जार, मुरल, सहस्रदंष्ट्र आदि नदी-मत्स्य है॥ ११३॥

विमर्शः—कृष्णमत्स्य = 'सिंगी' इति ख्यात। तदुक्तम्—'कृष्ण-मत्स्यस्तु शकली बहुकण्टकसंयुत। कषायवर्णो रक्ताक्ष कथितो मत्स्यवेदिभिः॥'

नादेया मधुरा मत्स्या गुरवो मारुतापहाः।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः॥११४॥

नदी के मत्स्य-मधुर, पचने में भारी, वात को नष्ट करने वाले तथा रक्तपित्तवर्द्धक, उष्णवीर्य, वृष्य, स्निग्ध तथा स्वल्प मलोत्पादक होते हैं॥ ११४॥

कषायानुरसस्तेषां शष्पशैवालभोजनः।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः॥ ११५॥

रोहितमत्स्य-शष्प (घास) तथा शवाल को खाता है एवं अनुरस में कषाय, वातनाशक तथा अधिक पित्त नहीं कुपित करने वाला होता है॥ ११५॥

विमर्शः—चरक तथा वाग्भट सर्व मत्स्यों में रोहित को श्रेष्ठ मानते हैं 'रोहितो मत्स्यानाम्' (चरकः)। लावरोहितगो-धैणा स्वे स्वे वर्ग वरा परम्। (वाग्भटः)।

पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः।
दूषयेद्रक्तपित्तं तु कुष्ठरोगं करोत्यसौ॥
मुरलो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा॥ ११६॥

पाठीन मत्स्य-कफकारक, वृष्य, निद्राजनक है तथा मांसा-हारी होने से रक्तपित्त को दूषित करता है तथा कुष्ठ रोग को उत्पन्न करता है एवं मुरल मत्स्य-बलवर्द्धक, वृष्य तथा दुग्ध और कफ को बढाता है॥ ११६॥

सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः।
महाह्रदेषु बलिनः, स्वल्पेऽम्भस्यबलाः स्मृताः॥११७॥

सरोवर तथा तालाब में उत्पन्न होने वाले मत्स्य-स्निग्ध तथा मधुर रसयुक्त होते हैं। महाह्रद (बडे भारी जलाशय) में होने वाली मछलियां-बलवान् तथा छोटे जलाशय में उत्पन्न-अल्पबलयुक्त होती हैं॥ ११७॥

तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरुलरुनन्दिवार-लकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः॥

समुद्री मत्स्यों में तिमि, तिमिङ्गल, कुलिश, पाकमत्स्य, निरुलरु, नन्दिवारलक, मकर, गर्गरक, चन्द्रक, महामीन तथा राजीव प्रभृति मत्स्य समुद्र में रहते हैं॥ ११८॥

सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः।
उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्धनाः॥११९॥
बलावहा विशेषेण मांसाशित्वात् समुद्रजाः।
समुद्रजेभ्यो नादेया बृंहणत्वाद् गुणोत्तराः॥ १२०॥
तेषामप्यनिलघ्नत्वाच्चौण्ट्यकौप्यौ गुणोत्तरौ।
स्निग्धत्वात् स्वादुपाकत्वात्तयोर्वाप्या गुणाधिकाः १२१

समुद्री मत्स्य-पचने में भारी, स्निग्ध, मधुर, अधिक पित्त नहीं बढाने वाले, उष्ण, वातनाशक, वृष्य, मलवर्द्धक तथा कफ को बढाते हैं। समुद्री मत्स्य अपने से छोटी छोटी मछ-लियों को खाते हैं। अत एव मांसभक्षी होने से विशेषकर बलवर्द्धक होते हैं। समुद्र में रहने वाले मत्स्यों की अपेक्षा नदी के मत्स्य बृंहण होने से गुणों में अधिक प्रधान होते हैं। नादेय मत्स्यों में भी चुंटी और कूप के मत्स्य वातनाशक होने से गुणों में अधिक होते हैं तथा इनसे भी वापी के मत्स्य स्निग्ध तथा स्वादुपाकी होने से गुणों में अधिक श्रेष्ठ होते हैं॥

नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः।
सरस्तडागजानां तु विशेषेण शिरो लघु॥ १२२॥

नदियों में उत्पन्न मत्स्य-पूंछ तथा मुख की सहायता से चलते रहते हैं इसलिये मध्य शरीर में भारी होते हैं तथा सरोवर और तालाब के मत्स्यों का शिर लघु होता है॥१२२॥

अदूरगोचरा यस्मात् तस्मादुत्सोदपानजाः।
किञ्चिन्मुक्त्वा शिरोदेशमत्यर्थं गुरवस्तु ते॥ १२३॥
अधस्ताद् गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः।
उरोविचरणात्तेषां पूर्वमङ्गं लघु स्मृतम्॥ १२४॥

उत्सोदपान (पर्वत के झरने) में होने वाले मत्स्य अधिक दूर तक विचरण नहीं करने से कुछ शिरःप्रदेश को छोडकर शेषाङ्ग में अधिक भारी होते है। सरोवर में होने वाले मत्स्य अधःप्रदेश में भारी होते है तथा छाती के सहारे चलने से उनके पूर्व अङ्ग लघु होते हैं॥ १२३-१२४॥

विमर्शः—मत्स्य खाने का रिवाज भारत में अधिकतर विहार, बङ्गाल, पञ्जाब, सिन्ध, काश्मीर तथा कुछ उत्तरप्रदेश (यू० पी०) में है। यह एक पौष्टिक खाद्य है। इसमें प्रोटीन अधिक तथा चरबी कार्बोहायड्रेट व खनिज पदार्थ अत्यल्प होते हैं। जिन देशों में चावल अधिक खाया जाता है वहां के लोग चावल के साथ मत्स्य खाते हैं जिससे प्रोटीन की कमी की पूर्ति हो जाती है। जो मछली मोटी होती है उसमें चरबी अधिक होने से अधिक शक्ति उत्पन्न करती है Cod

तथा Halibut आदि मत्स्यों के यकृत् में Vitamin A तथा D अधिक मात्रा में होते हैं अत एव उन मत्स्यों के यकृत् के तैलों का आजकल जीव द्रव्य ए तथा डी की कमी की पूर्ति के लिये चिकित्सा में अधिक प्रयोग हो रहा है। सड़ी गली तथा डिब्बे की मछली खाने से वमन, अतिसार आदि रोग हो जाते हैं। आयुर्वेद में मत्स्य सेवन को कुष्ठोत्पत्ति होने में एक कारण मानते हैं। डाक्टर मूर भी खराब मत्स्य का सेवन कुष्ठोत्पत्ति में एक सहायक कारण है ऐसा मानते हैं किन्तु वे कुष्ठजीवाणु का शरीर संसर्ग विना मत्स्य को सहायक कारण भी नहीं मानते।

इत्यानूपो महाभिष्यन्दिमांसवर्गो व्याख्यातः ॥१२५॥

इस प्रकार यह अत्यन्त अभिष्यन्द करने वाला आनूपदेशवर्ति-प्राणियों के मासवर्ग का विवेचन किया गया है॥१२५॥

विमर्शः—महाभिष्यन्दि=दोषधातुमलस्रोतसामतिशयक्लेदकारीत्यर्थः। तदुक्तम्—'हृदयस्थान्ननिर्यासवाहिस्रोतोमुखानि यत्। मुक्त लिम्पति पिच्छिल्यादभिष्यन्दि तदुच्यते॥ वैशद्यात्कफहन्तृत्वात्तान्येव विवृणोति यत्। तदुक्तमनभिष्यन्दि द्रव्य द्रव्यविशारदैः॥ इति।

तत्र शुष्कपूतिव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां च मांसान्यभक्ष्याणि, यस्माद्विगतव्यापन्नापहतपरिणतालपासम्पूर्णवीर्यत्वाद्दोषकराणि भवन्ति; एभ्योऽन्येषामुपादेयं मांसमिति ॥ १२६ ॥

जाङ्गल तथा आनूप देश के प्राणियों के मांसों में जो मांस सूखा, सड़ा-गला, दुर्गन्धयुक्त हो तथा रोगों से ग्रस्त, विषहत, सर्पभक्षित, विषादि से दिग्ध (लिप्त), शस्त्रादि से विद्ध एवं जीर्ण (बुड्ढे), दुर्बल, बालक, खराब आहार खाने वाले ऐसे पशु-पक्षियों का मांस नहीं खाना चाहिये क्योंकि शुष्क होने से विगत रस, पूति तथा व्याधित होने से व्यापन्न (नष्ट) वीर्य तथा विषसर्पहत, दिग्धविद्ध होने से अपहत (नष्ट) वीर्य एवं जीर्ण होने से परिणतवीर्य तथा कृश और बाल होने से उसका मांस अल्प एवं असम्पूर्ण वीर्य वाला होकर दोषोत्पादक होता है इस लिये उक्त प्रकार से दूषित प्राणियों से अतिरिक्त प्राणियों का मांस उपादेय (ग्राह्य) होता है ॥ १२६ ॥

अरोचकं प्रतिश्यायं गुरु शुष्कं प्रकीर्त्तितम्।
विषव्याधिहतं मृत्युं बालं छर्दिञ्च कोपयेत् ॥ १२७ ॥
कासश्वासकरं वृद्धं त्रिदोषं व्याधिदूषितम्।
क्लिन्नमुत्क्लेशजननं कृतं वातप्रकोपणम् ॥ १२८ ॥

शुष्कमांस-अरुचिजनक, प्रतिश्यायकारक तथा भारी होता है। विष तथा रोग से मरे प्राणियों का मांस-मृत्युजनक होता है। बाल प्राणी का मांस-वमन करता है। वृद्ध प्राणी का मांस-कास और श्वास करता है। रोगग्रस्त प्राणियों का मांस-त्रिदोष का प्रकोप करता है। सड़ा गला मांस-उत्क्लेश करता है तथा दुर्बल प्राणी का मांस-वायु का प्रकोप करता है॥

विमर्शः—सेवनीयमांसलक्षणम्—सद्योहत वयःस्थञ्च शुद्ध सुरभि शस्यते। (अ० सं०)। अपि च—मुहूर्त्तात्तदुपादेयं प्रहारदशवर्जितम्। उष्णदेश तथा उष्णकाल में मांस को अधिक देर तक रखने से उसमें वेसीलस पुण्टरीटीडस आदि पूयोत्पादक जीवाणु प्रविष्ट होकर विष पैदा करते हैं। प्राणियों में राजयक्ष्मा, न्यूमोनिया, प्लेग, एक्टिनो मायकोसिस, पुन्त्राक्स, कृमिरोग होते हैं अत एव मांस ग्रहण करते समय ऐसा प्राणियों का मांस हो तो वर्जित करें। मांस को उबालने से उसमें के रोगोत्पादक जीवाणु नष्ट हो जाते हैं।

स्त्रियश्चतुष्पात्सु, पुमांसो विहङ्गेषु, महाशरीरेष्वल्पशरीराः, अल्पशरीरेषु महाशरीराः प्रधानतमाः। एवमेकजातीयानां महाशरीरेभ्यः कृशशरीराः प्रधानतमाः ॥

चतुष्पद प्राणियों में स्त्रियों का मांस, पक्षियों में पुरुष जाति का मांस, हाथी, गवय इत्यादि बड़े प्राणियों में छोटे प्राणियों का मांस तथा अल्प शरीर वाले प्राणियों में बड़े शरीर वाले का मांस अधिक प्रधान होता है। इस प्रकार एक जाति (वर्ग) के बड़े शरीर वाले प्राणियों की अपेक्षा कृश शरीर वाले प्राणियों का मांस अधिक श्रेष्ठ होता है॥१२९॥

स्थानादिकृतं मांसस्य गुरुलाघवमुपदेक्ष्यामः। तथा—रक्तादिषु शुक्रान्तेषु धातुषूत्तरोत्तरा गुरुतरास्तथा सक्थिस्कन्धक्रोडशिर पादकरकटीपृष्ठचर्मकालेयकयकृदन्त्राणि ॥ १३० ॥

अब स्थान आदि के अनुसार मांस के गुरु तथा लघु होने का वर्णन किया जाता है। जैसे रक्त से वीर्य तक की धातुएं उत्तरोत्तर अधिक भारी होती हैं एव सक्थि (टांगे), स्कन्ध, हृदयविभाग, शिर, पाद, हस्त, कटि, पीठ, चर्म, कालेयक (वृक्क), यकृत् और आन्त्र ये भी उत्तरोत्तर एक दूसरे से अधिक भारी होते हैं ॥ १३० ॥

शिरः स्कन्धं कटी पृष्ठं सक्थिनी चात्मपक्षयोः।
गुरुपूर्वं विजानीयाद्धातवस्तु यथोत्तरम् ॥ १३१ ॥

स्त्री और पुरुष दोनों जाति के पक्षियों में शिर, स्कन्ध, कटी, पीठ, और सक्थि इनमें से पूर्व पूर्व के गुरु होते हैं किन्तु रक्तादि धातुएं उत्तरोत्तर भारी होती हैं ॥ १३१ ॥

सर्वस्य प्राणिनो देहे मध्यो गुरुरुदाहृतः।
पूर्वभागो गुरुः पुंसामधोभागस्तु योषिताम् ॥ १३२ ॥
उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतम्।
पक्षोत्क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणाम् ॥१३३॥

प्रायः सर्व प्रकार के प्राणियों के देह में मध्यभाग भारी होता है। पुरुषों का पूर्व भाग (वक्ष) और स्त्रियों का अधोभाग (कटि) भारी होता है। पक्षियों का उर (छाती) तथा ग्रीवा विशेषतया भारी होते हैं तथा पक्षों के ऊचा नीचा क्षेपण करने से मध्यभाग समान होता है ॥ १३२-१३३ ॥

अतीव रूक्षं मांसं तु विहङ्गानां फलाशिनाम्।
बृंहणं मांसमत्यर्थं खगानां पिशिताशिनाम् ॥
मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणाम् ॥१३४॥

फल खाने वाले पक्षियों का मांस-अत्यन्त रूक्ष होता है तथा मांस खाने पक्षियों का मांस-अत्यन्त बृंहण होता है। मछलियां खाने वाले पक्षियों का मांस-पित्तकारक होता है

तथा धान्य खाने वाले पक्षियों का वातनाशक होता है ॥१३४॥

जलजानूपजा ग्राम्याः क्रव्यादैकशफास्तथा।
प्रसहा बिलवासाश्च ये च जङ्गालसंज्ञिताः ॥ १३५ ॥
प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरम्।
अल्पाभिष्यन्दिनश्चैव यथापूर्वमतोऽन्यथा ॥ १३६ ॥

जल में होने वाले, आनूप देश में होने वाले, ग्रामीण, मांसभक्षी, एक खुर वाले, प्रसह, बिल में रहने वाले तथा जङ्गाल एवं प्रतुद, विष्किर ये उत्तरोत्तर पचने में हलके होते हैं तथा अल्प अभिष्यन्दकारक होते हैं एवं यथापूर्व अधिकाधिक भारी तथा अधिक अभिष्यन्द उत्पन्न करते हैं ॥

प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च। सर्वप्राणिनां सर्वशरीरेभ्यो ये प्रधानतमा भवन्ति यकृत्प्रदेशवर्त्तिनस्तानादद्दीत। प्रधानालाभे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेयं मांसमिति ॥ १३७ ॥

जो प्राणी अपनी जाति के निश्चित प्रमाण से अधिक प्रमाण वाले या मोटे होते हैं वे अल्पबलयुक्त तथा भारी होते हैं। सर्व प्रकार के प्राणियों के सारे शरीर में से यकृत् के पास में जो शिरा, स्नायु, मांसादि अधिक प्रधान भाग होते हैं, उन्हें खाने के लिये ग्रहण करना चाहिये। उन प्रधान अङ्गों के अभाव में मध्यम आयु वाले प्राणी का ताजा तथा अक्लिष्ट (बिना सड़ा गला) मांस ग्रहण करना चाहिये ॥ १३७ ॥

भवति चात्र—

चरः शरीरावयवाः स्वभावो धातवः क्रियाः।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ॥१३८॥

इस विषय में कहा है कि जिस प्राणी का मांस ग्रहण करना हो उसके विषय में चर अर्थात् उस प्राणी का आहार और विहार (चर-गतिभक्षणयोः), उस प्राणी के शरीर के अवयव, उसका स्वभाव, रस-रक्तादि धातु, उसकी चेष्टाएं तथा लिङ्ग, प्रमाण, संस्कार (घृत या तैल में पकाना रूपी संस्कार) तथा मात्रा ये सब परीक्षणीय हैं ॥ १३८ ॥

इति मांसवर्गः।

अथ फलवर्गः—

अत ऊर्ध्वं फलान्युपदेक्ष्यामः। तद्यथा—दाडिमामलकबदरकोलकर्कन्धुसौवीरसिञ्चितिकाफलकपित्थमातुलुङ्गाम्राम्रातककरमर्दप्रियालनारङ्गजम्बीरलकुचभव्यपारावतवेत्रफलप्राचीनामलकतिन्तिडीकनीपकोशाम्राम्लीकाप्रभृतीनि ॥ १३९ ॥

अब इसके अनन्तर फलों का उपदेश करते हैं। जैसे दाडिम, आंवले, बैर, कोल (झाडी के बेर), कर्कन्धु (छोटे बेर), सौवीर (बदरभेद), सिञ्चितिका (बेर भेद), कैथ, बिजौरा, निम्बू, आम, आम्रातक, करौंदा, चिरौंजी, नारङ्गी, जम्बीरी नीम्बू, बड़हल, भव्य (कमरख), पारावत, वेत्रफल, प्राचीनामलक (पानी आंवला), इमली, नीप (कदम्ब), कोशाम्र, अम्लीका (इमली भेद) प्रभृति फलवर्ग में आते हैं ॥

अम्लानि रसतः पाके गुरूण्युष्णानि वीर्यतः।
पित्तलान्यनिलघ्नानि कफोत्क्लेशकराणि च ॥१४०॥

ये उक्त फल रस में अम्ल, विपाक में गुरु, वीर्य में उष्ण, पित्तकारक, वायुनाशक तथा कफ का उत्क्लेश करने वाले होते हैं ॥ १४० ॥

कषायानुरसं तेषां दाडिमं नातिपित्तलम्।
दीपनीयं रुचिकरं हृद्यं वर्चोविबन्धनम् ॥ १४१ ॥
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च।
त्रिदोषघ्नं तु मधुरमम्लं वातकफापहम् ॥ १४२ ॥

इनमें दाडिम—कषायानुरस, अधिक पित्त नहीं करने वाला, अग्निदीपक, रुचिकारक, हृदय के लिये हितकारी तथा मल को बांधने वाला होता है। मधुर तथा खट्टा ऐसे दाडिम दो प्रकार का होता है। मधुर दाडिम-त्रिदोषनाशक तथा अम्ल दाडिम-वात और कफ को नष्ट करता है ॥ १४१-१४२ ॥

अम्लं समधुरं तिक्तं कषायं कटुकं सरम्।
चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकीफलम् ॥ १४३ ॥
हन्ति वातं तदम्लत्वात्पित्तं माधुर्यशैत्यतः।
कफं रूक्षकषायत्वात् फलेभ्योऽभ्यधिकं च तत् ॥१४४॥

आंवले का फल-खट्टा, मीठा, तिक्त, कषाय, कटु, दस्तावर, चक्षु के लिये हितकर, सर्व दोषों का नाशक और वृष्य होता है। यह खट्टा होने से वात को नष्ट करता है, मधुर और शीत होने से पित्त को नष्ट करता है तथा रूक्ष और कषाय होने से कफ को नष्ट करता है एवं सर्वफलों में श्रेष्ठ फल है ॥ १४३-१४४ ॥

कर्कन्धुकोलबदरमामं पित्तकफावहम्।
पक्वं पित्तानिलहरं स्निग्धं समधुरं सरम् ॥ १४५ ॥
पुरातनं तृट्शमनं श्रमघ्नं दीपनं लघु।
सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित् ॥ १४६ ॥

कर्कन्धु, कोल और बदर ये कच्चे होने से पित्त और कफ वर्द्धक होते हैं तथा पक जाने पर पित्त और वात रोग को नष्ट करते हैं एवं स्निग्ध, मधुर तथा दस्तावर होते हैं। पुराने (सूखे हुये) बैर-तृषाशामक, श्रम (थकावट) को दूर करने वाले, अग्निदीपक तथा पचने में लघु होते हैं। सौवीर जाति के बैर-स्निग्ध, मधुर और वात तथा पित्त के नाशक होते हैं ॥

कषायं स्वादु सङ्ग्राहि शीतं सिञ्चितिकाफलम्।
आमं कपित्थमस्वर्यं कफघ्नं ग्राहि वातलम् ॥ १४७ ॥
कफानिलहरं पक्वं मधुराम्लरसं गुरु।
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम् ॥ १४८ ॥

सिञ्चितिका फल (सेव)—कषाय, मधुर, दस्त बांधने वाला तथा शीतल होता है। कच्चा कैथ-स्वर को हानि पहुँचाने वाला, कफनाशक, दस्त बांधने वाला और वातवर्द्धक होता है तथा पका हुआ कपित्थ फल-कफ और वात को नष्ट करने वाला, मधुर, अम्ल, भारी, श्वासनाशक, कासनाशक, अरुचिनाशक, तृष्णाशामक तथा कण्ठ साफ करने वाला होता है ॥ १४७-१४८ ॥

लघ्वम्लं दीपनं हृद्यं मातुलुङ्गमुदाहृतम्।
त्वक् तिक्ता दुर्जरा तस्य वातक्रिमिकफापहा ॥१४६॥
स्वादु शीतं गुरु स्निग्धं मांसं मारुतपित्तजित्।
मेध्यं शूलानिलच्छर्दिकफारोचकनाशनम् ॥ १५० ॥
दीपनं लघु सङ्ग्राहि गुल्मार्शोघ्नं तु केसरम्।
शूलाजीर्णविबन्धेषु मन्देऽग्नौ कफमारुते ॥
अरुचौ च विशेषेण रसस्तस्योपदिश्यते ॥ १५१ ॥

विजौरा निम्बू-लघु, अम्ल, अग्निदीपक तथा हृद्य होता है तथा उसकी त्वचा (छिलका)—तिक्त, पचने में भारी एवं वात, कृमि और कफ को नष्ट करती है। उसका गूदा-मधुर, शीतल, पचने में भारी, स्निग्ध, वात तथा पित्त का शामक, वृद्धिवर्द्धक तथा शूल, वात, वमन, कफ और अरुचि का नाशक है। उसका केसर-पाचकाग्निदीपक, लघु, संग्राही तथा गुल्म और अर्श का नाशक है। उसका रस-शूल, अपचन, विबन्ध, अग्निमान्द्य, कफ तथा वात के रोग एवं अरोचक में विशेष रूप से प्रयुक्त होता है ॥ १४९-१५१ ॥

पित्तानिलकरं बालं पित्तलं वृद्धकेसरम्।
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम् ॥ १५२ ॥
कषायानुरसं स्वादु वातघ्नं बृंहणं गुरु।
पित्ताविरोधि सम्पक्वमाम्रं शुक्रविवर्द्धनम् ॥ १५३ ॥

आम्रगुण—बाल अर्थात् कच्चा आम्रफल जिसमें गुठली न पडी हो-पित्त तथा वायु को पदा करता है। वृद्धकेसर अर्थात् जिसमें गुठली हो गई हो-पित्त उत्पन्न करता है। पका हुआ आम्रफल-हृद्य, वर्णकारक, रुचिवर्द्धक तथा रक्त, मांस और बल को बढाने वाला, अनुरस में कषाय, रस में मधुर, वातनाशक, बलवर्द्धक, पचने में भारी, पित्त का विरोध (विशेष वर्द्धन) न करने वाला तथा शुक्रवर्द्धक होता है ॥ १५२-१५३॥

बृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्यते।
आम्रातकफलं वृष्यं सस्नेहं श्लेष्मवर्द्धनम् ॥ १५४ ॥
त्रिदोषविष्टम्भकरं लकुचं शुक्रनाशनम्।
अम्लं तृष्णापहं रुच्यं पित्तकृत् करमर्दकम् ॥ १५५ ॥
वातपित्तहरं वृष्यं प्रियालं गुरु शीतलम्।
हृद्यं स्वादु कषायाम्लं भव्यमास्यविशोधनम् ॥१५६॥
पित्तश्लेष्महरं ग्राहि गुरु विष्टम्भि शीतलम्।
पारावतं समधुरं रुच्यमत्यग्निवातनुत् ॥ १५७ ॥
गरदोषहरं नीपं प्राचीनामलकं तथा।
वातापहं तिन्तिडीकमामं पित्तबलासकृत् ॥ १५८ ॥
ग्राह्युष्णं दीपनं रुच्यं सम्पक्वं कफवातनुत्।
तस्मादल्पान्तरगुणं कोशाम्रफलमुच्यते ॥ १५९ ॥
अम्लीकायाः फलं पक्वं तद्वद्भेदि तु केवलम्।
अम्लं समधुरं हृद्यं विशदं भक्तरोचनम् ॥ १६० ॥
वातघ्नं दुर्जरं प्रोक्तं नारङ्गस्य फलं गुरु।
तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारणम् ॥ १६१ ॥
वातश्लेष्मविबन्धघ्नं जम्बीरं गुरु पित्तकृत्।
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ॥ १६२ ॥

आम्रातक फल (अम्बाडा)—बृंहण, मधुर, बलवर्द्धक, पचने में भारी, आंतों में विष्टम्भ (वायु, तोद शूल) हो कर पचने वाला तथा वृष्य, स्निग्ध और कफवर्द्धक होता है। लकुच फल (बडहल)-त्रिदोषजनक, विष्टम्भकारक और वीर्यनाशक होता है। करौंदा-अम्ल, तृषानाशक, रुचिवर्द्धक और पित्तकारक होता है। पियाल (चिरौंजीफल)-वात तथा पित्त का नाशक, वृष्य, पचने में भारी तथा शीतल होता है। भव्य (कमरख)—हृदय के लिये हितकर, मधुर, कषाय, अम्ल, मुख का शोधक, पित्त तथा कफ का नाशक, दस्त बांधने वाला, पचने में भारी, विष्टम्भकारक और शीतल होता है। पारावत-मधुर, रुचिकारक तथा अत्यग्नि (भस्मक रोग) तथा वात का नाशक होता है। नीप (कदम्ब) फल-कृत्रिमविष का नाशक होता है तथा पानी आंवला भी इसी के समान गुण कारक होता है। तिन्तिडी का कच्चा फल-वातनाशक, पित्त तथा कफ को करने वाला होता है तथा पका हुआ-ग्राही, उष्णवीर्य, दीपन तथा रुचिवर्द्धक होता है कफ और वात को नष्ट करता है। कोशाम्रफल-इससे कुछ कम गुणों वाला होता है। अम्लीका (इमली) का पका हुआ फल-गुणों में तिन्तिडीफल के समान ही होता है परन्तु भेदक (दस्तावर) होता है। नारङ्गफल (सन्तरा)-अम्ल, मधुर, हृद्य, विशद, भोजन में रुचि बढाने वाला, वातनाशक, दुर्जर और भारी होता है। जम्बीर (नीबू)-तृषा, शूल, कफ, जी मिचलाना, वमन, श्वास, वात, कफ और मलविबन्ध को नष्ट करने वाला, पचने में भारी तथा पित्तजनक होता है। ऐरावत तथा दन्तशठ (गोदडा नीबू)-खट्टा तथा रक्तपित्तजनक होता है ॥१५४-१६२॥

विमर्श—इन दाडिमादि वर्ग के फलों में साइट्रिक, टार्टरिक, मेलिक, आक्जेलिक अम्लों के होने से खट्टापन तथा टेनिन, गैलिन आदि अम्लों के होने से कसैलापन होता है। इन फलों में विटामिन सी० खास होता है। जो कि स्कर्वी रोग का प्रतिबन्धक है। ये फल भोजन को पचाते हैं। इनका सेवन अत्यावश्यक है।

क्षीरवृक्षफलजाम्बवराजादनतोदनशीतफलतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफल्गुपरूपकगाङ्गेरुकीपुष्करवर्तिविल्वविम्बीप्रभृतीनि ॥ १६३ ॥

कषायरसाधिक्य वाले फल—जैसे न्यग्रोध, उदुम्बर, पीपल, पाखर और वेतस इन क्षीरवृक्षों के फल तथा जामुन, राजादन (खिरणी), तोदन, शीतफल, तिन्दुक, बकुल (मौलसिरी), धामन, अश्मन्तक, अश्वकर्ण, फल्गु (अक्षीर), फालसा, गंगोठ (नागवला), पुष्करवर्ति, विल्व, बिम्बी प्रभृति हैं ॥ १६३ ॥

फलान्येतानि शीतानि कफपित्तहराणि च।
सङ्ग्राहकाणि रूक्षाणि कषायमधुराणि च ॥ १६४ ॥

उक्त न्यग्रोधादि के फल-शीतल, कफपित्तनाशक, ग्राही, रूक्ष, कषाय और मधुर होते हैं ॥ १६४ ॥

क्षीरवृक्षफलं तेषां गुरु विष्टम्भि शीतलम्।
कषायं मधुरं साम्लं नातिमारुतकोपनम् ॥ १६५ ॥
अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित्।

स्निग्धं स्वादु कषायं च राजादनफलं गुरु ॥ १६६ ॥
कषायं मधुरं रूक्षं तोदनं कफवातजित्।
अम्लोष्णं लघु सङ्ग्राहि स्निग्धं पित्ताग्निवर्द्धनम् १६७
आमं कषायं सङ्ग्राहि तिन्दुकं वातकोपनम्।
विपाके गुरु सम्पक्वं मधुरं कफपित्तजित् ॥ १६८ ॥
मधुरं च कषायं च स्निग्धं सङ्ग्राहि वाकुलम्।
स्थिरीकरं च दन्तानां विशदं फलमुच्यते ॥ १६९ ॥
सकषायं हिमं स्वादु धान्वनं कफवातजित्।
तद्वद् गाङ्गेरुकं विद्यादश्मन्तकफलानि च ॥ १७० ॥

क्षीरी वृक्षों के फल-गुरु, विष्टम्भकारक, शीतल, कषाय, मधुर तथा अम्ल होते हैं तथा वायु का अधिक प्रकोप नहीं करते हैं। जामुनफल-अत्यन्त वातकारक, दस्त को बांधने वाला तथा कफ और पित्त को नष्ट करता है। राजादन (खिरनी) का फल-स्निग्ध, मधुर, कषाय और भारी होता है। तोदनफल-कषाय, मधुर, रूक्ष, कफवातशामक, अम्ल, उष्ण, लघु, ग्राही, स्निग्ध, पित्तजनक तथा अग्निवर्द्धक है। कच्चा तिन्दुकफल-कसैला, ग्राही तथा वातप्रकोपक होता है और पका हुआ-विपाक में गुरु, मधुर, कफ तथा पित्त का नाशक होता है। वकुल का फल—मधुर, कषाय, स्निग्ध, संग्राही, दांतों को दृढ करने वाला तथा विशद होता है। धामन फल-कषाय, शीत, मधुर तथा कफ और पित्त का नाशक होता है। धामन फल के गुणानुरूप ही गाङ्गेरुक तथा अश्मन्तक फलों के गुण जानो ॥ १६५-१७० ॥

विमर्श.—भारत में प्राचीन काल से जामुन की गुठली का प्रयोग मधुमेह तथा बहुमूत्र में करते हैं। वर्तमान विज्ञान ने जामुन के बीज में जम्बूलाइन (Tombuline) नामक एक ग्लूकोसाइड प्राप्त किया है जो कि मधुमेह में शर्करा तथा मूत्र राशि को कम करता है। अब डाक्टर भी जामुन की गुठली का सत्त्व मधुमेह में तथा बिल्व इक्सट्रेक्ट का अतिसार में प्रयोग करने लग गये हैं।

विष्टम्भि मधुरं स्निग्धं फल्गुजं तर्पणं गुरु।
अत्यम्लमीषन्मधुरं कषायानुरसं लघु ॥ १७१ ॥
वातघ्नं पित्तजननमामं विद्यात् परूषकम्।
तदेव पक्वं मधुरं वातपित्तनिबर्हणम् ॥ १७२ ॥
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्।
पौष्करं स्वादु विष्टम्भि बल्यं कफकरं गुरु ॥ १७३ ॥

फल्गु (अंजीर) फल-विष्टम्भकारक, मधुर, स्निग्ध, तृप्तिकर तथा पचने में भारी होता है। कच्चा परूषक (फालसा)-अत्यन्त खट्टा, कुछ मीठा, अनुरस में कषाय, पचने में हलका, वातनाशक तथा पित्तजनक होता है। वही फालसा पक जाने पर-मधुर, वातपित्तनाशक, विपाक में मधुर, शीतल तथा रक्तपित्तप्रसादक होता है। पौष्कर (तालाब में होने वाले सिंघाडे या कमल के फल)-रस में मधुर, विष्टम्भजनक, बलवर्द्धक, कफकारक और गुरु होते हैं ॥ १७१-१७३ ॥

कफानिलहरं तीक्ष्णं स्निग्धं सङ्ग्राहि दीपनम्।
कटुतिक्तकषायोष्णं बालं बिल्वमुदाहृतम् ॥ १७४ ॥
विद्यात् तदेव सम्पक्वं मधुरानुरसं गुरु।
विदाहि विष्टम्भकरं दोषकृत् पूतिमारुतम् ॥ १७५ ॥

कच्चा बिल्व फल-कफ और वात का नाशक, तीक्ष्ण, स्निग्ध, संग्राही, अग्निदीपक, कटु, तिक्त और कषाय तथा उष्ण होता है किन्तु वही पक जाने पर-अनुरस में मधुर, पचने में भारी, विदाहजनक, विष्टम्भकारक, दोषजनक तथा दुर्गन्धित वायु पैदा करता है ॥ १७४-१७५ ॥

बिम्बीफलं साश्वकर्णं स्तन्यकृत् कफपित्तजित्।
तृड्दाहज्वरपित्तासृक्कासश्वासक्षयापहम् ॥ १७६ ॥

बिम्बीफल (कुन्दरु) तथा अश्वकर्ण-दुग्धवर्द्धक, कफ और पित्त को नष्ट करने वाले तथा तृषा, दाह, ज्वर, रक्तपित्त, कास, श्वास और क्षय को नष्ट करते हैं ॥ १७६ ॥

तालनालिकेरपनसमौचप्रभृतीनि ॥ १७७ ॥
स्वादुपाकरसान्याहुर्वातपित्तहराणि च।
बलप्रदानि स्निग्धानि बृंहणानि हिमानि च ॥१७८॥

ताल, नारियल, कटहल, मोचा (केला) आदि फल-रस और विपाक में मधुर, वातपित्तनाशक, बलदायक, स्निग्ध, बृंहण तथा शीतल होते हैं ॥ १७७-१७८ ॥

फलं स्वादुरसं तेषां तालजं गुरु पित्तजित्।
तद्बीजं स्वादुपाकं च मूत्रलं वातपित्तजित् ॥ १७९ ॥
नालिकेरं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलम्।
बलमांसप्रदं हृद्यं बृंहणं वस्तिशोधनम् ॥ १८० ॥
पनसं सकषायं तु स्निग्धं स्वादुरसं गुरु।
मौचं स्वादुरसं प्रोक्तं कषायं नातिशीलम्।
रक्तपित्तहरं वृष्यं रुच्यं श्लेष्मकरं गुरु ॥ १८१ ॥

इनमें ताल का फल-मधुर रस वाला, पचने में भारी और पित्तनाशक होता है। उसका बीज-विपाक में मधुर, मूत्रजनक तथा वात-पित्तनाशक है। नारियल का फल-पचने में भारी, स्निग्ध, पित्तनाशक, मधुर, शीतल, बल और मांस का वर्द्धक, हृद्य, बृंहण तथा वस्ति (मूत्राशय) का शोधक होता है। पनस (कटहल) फल-कसैला, स्निग्ध, स्वादुरसयुक्त तथा, पचने में भारी होता है। केवल रस में मधुर और कषाय होता है तथा अधिक शीतल नहीं होता है एवं रक्तपित्त नाशक, वृष्य, रुचिजनक, कफकारक तथा भारी होता है ॥

विमर्शः—तालवर्ग के फलों में-स्टार्च, शर्करा अधिक मात्रा में तथा अल्पमात्रा में फेट, प्रोटीन एवं जीवद्रव्य भी होते हैं। नारिकेल फल क्षय रोग में अमेरिका तथा भारत में प्रयुक्त होता है। बृंहण गुरु शीतलम्। दाहक्षतक्षयहर रक्तपित्तप्रसादनम् ॥ (वाग्भटः)। केले में-शर्करा, फेट, प्रोटीन, चूना, क्षार, लौह, फास्फोरिक एसिड तथा विटासिन बी० और सी० होते हैं। अतिसार, प्रवाहिका में केला सङ्ग्राही पथ्य है।

द्राक्षाकाश्मर्यखर्जूरमधूकपुष्पप्रभृतीनि ॥ १८२ ॥
रक्तपित्तहराण्याहुर्गुरूणि मधुराणि च।
तेषां द्राक्षा सरा स्वर्या मधुरा स्निग्धशीतला ॥ १८३ ॥
रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा।
हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनम्

केश्यं रसायनं मेध्यं काश्मर्यं फलमुच्यते ॥ १८४ ॥
क्षतक्षयापहं हृद्यं शीतलं तर्पणं गुरु ।
रसे पाके च मधुरं खार्जूरं रक्तपित्तनुत् ॥ १८५ ॥
बृंहणीयमहृद्यं च मधूककुसुमं गुरु ।
वातपित्तोपशमनं फलं तस्योपदिश्यते ॥ १८६ ॥

द्राक्षा, गम्भारी, खर्जूर, महुवे के पुष्प तथा फल प्रभृति-रक्तपित्तनाशक, गुरु और मधुर होते हैं। इनमें से द्राक्षा-दस्तावर, स्वर को बढ़ाने वाली, मधुर, स्निग्ध, शीतल है तथा रक्तपित्त, ज्वर, श्वास, तृष्णा, दाह तथा क्षय को नष्ट करती है। गम्भारी फल-हृद्य, मूत्रावरोधनाशक, रक्तपित्त और वातरोग का नाशक, केशों के लिये हितकारी, रसायन तथा बुद्धिवर्द्धक होता है। खजूर (छुहारा तथा पिण्डखजूर)-क्षत और क्षय का नाशक, हृद्य, शीतल, तृप्तिकारक, गुरु तथा रस और विपाक में मधुर होता है। महुवे के पुष्प-जो कि सूखने पर मुनक्के से (फलोपम) हो जाते हैं-बलवर्द्धक होते हैं एवं हृदय के लिये अहितकारी और पचने में भारी होते हैं तथा महुवे के फल-वात और पित्त के शामक होते हैं ॥ १८२-१८६ ॥

वातामाक्षोडाभिषुकनिचुलपिचुनिकोचकोरुमाणप्रभृतीनि ॥ १८७ ॥

बादाम, अखरोट, अभिषुक (काजू), निचुल (चिलगोजा), पिचु, निकोचक (पिस्ता), उरुमाण (नासपाती) प्रभृति शुष्क मेवे वर्ग के फल हैं ॥ १८७ ॥

पित्तश्लेष्महराण्याहुः स्निग्धोष्णानि गुरूणि च ।
बृंहणान्यनिलघ्नानि बल्यानि मधुराणि च ॥ १८८ ॥

ये मेवे—पित्त और कफ के नाशक, स्निग्ध, उष्ण, गुरु, बृंहण, वातनाशक, बलवर्द्धक तथा मधुर होते हैं ॥ १८८ ॥

विमर्शः—इन मेवों में १५-२० प्रतिशत प्रोटीन, ५०-६० फेट, ९-१२ प्रतिशत कार्बोहाईड्रेट, ३-५ प्रतिशत सेल्यूलोज, १ प्रतिशत खनिजक्षार तथा ४-५ प्रतिशत जलीयांश होता है। इनमें कार्बोहाइड्रेट कम होने से मधुमेही के लिये हितकारी तथा फेट और प्रोटीन अधिक होने से मांसवद् बृंहण हैं।

कषायं कफपित्तघ्नं किञ्चित्तिक्तं रुचिप्रदम् ।
हृद्यं सुगन्धि विशदं लवलीफलमुच्यते ॥ १८९ ॥
वसिरं शीतपाक्यं च सारुष्करनिबन्धनम् ।
विष्टम्भि दुर्जरं रूक्षं शीतलं वातकोपनम् ।
विपाके मधुरं चापि रक्तपित्तप्रसादनम् ॥ १९० ॥

हरफा रेवडी के फल-कषाय, कफपित्तनाशक, कुछ तिक्त, रुचिदायक, हृद्य, सुगन्धयुक्त और विशद होते है। वसिर (सूर्यभक्ता) के फल, शीतपाक्य (वला के फल) और अरुष्कर (भल्लातक फल) या उसका निबन्धन (डंठल)-विष्टम्भजनक, पचने में कठिन, रूक्ष, शीतल, वातप्रकोपक, विपाक में मधुर तथा रक्तपित्तशामक होते हैं ॥ १८९-१९० ॥

विमर्शः—लवलीफलपरिचयः-घनस्निग्धा हरिताशुपुप्रन्नाट-सदृक्फला । सुगन्धिमूला लवली पाण्डुकोमलवल्कला ॥

शीतं कषायं मधुरं टङ्क मारुतकृद् गुरु ।
स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैङ्गुदम् ॥ १९१ ॥
शमीफलं गुरु स्वादु रूक्षोष्णं केशनाशनम् ।
गुरु श्लेष्मातकफलं कफकृन्मधुरं हिमम् ॥ १९२ ॥
करीराक्षिकपीलूनि तृणशून्यफलानि च ।
स्वादुतिक्तकटूष्णानि कफवातहराणि च ॥ १९३ ॥
तिक्तं पित्तकरं तेषां सरं कटुविपाकि च ।
तीक्ष्णोष्णं कटुकं पीलु सस्नेहं कफवातजित् ॥ १९४ ॥

टङ्क (नीलकपित्थ)—शीतल, कषाय, मधुर, वातवर्द्धक और भारी होता है। इङ्गुदीफल-स्निग्ध, उष्ण, कटु, मधुर और वातकफ-नाशक होता है। शमी का फल-भारी, मधुर, रूक्ष, उष्ण तथा केशनाशक होता है। लिसोड़ा फल-भारी, कफकारक, मधुर और शीतल है। करीर, आक्षिक, पीलु और तृणशून्य (मल्लिका) के फल-मधुर, तिक्त, कटु, उष्ण तथा कफ और वात के नाशक होते हैं। उनमें से पीलुफल-रस में कटु, पित्तजनक, दस्तावर, विपाक में कटु, तीक्ष्ण, उष्ण, रस में कटु, स्नेहांशयुक्त तथा कफ और वात के नाशक होते हैं ॥

आरुष्करं तौवरकं कषायं कटुपाकि च ॥ १९५ ॥
उष्णं क्रिमिज्वरानाहमेहोदावर्त्तनाशनम् ।
कुष्ठगुल्मोदरार्शोघ्नं कटुपाकि तथैव च ॥ १९६ ॥
करञ्जकिंशुकारिष्टफलं जन्तुप्रमेहनुत् ।
अङ्कोलस्य फलं विस्रं गुरुश्लेष्महरं हिमम् ॥ १९७ ॥
रूक्षोष्णं कटुकं पाके लघु वातकफापहम् ।
तिक्तमौषद्विषहितं विडङ्गं कृमिनाशनम् ॥ १९८ ॥

तौवरक फल—आरुष्कर (व्रणकारक), कषाय, विपाक में कटु, उष्णवीर्य तथा कृमि, ज्वर, आनाह, प्रमेह तथा उदावर्त का नाशक होता है। करञ्ज, ढाक (पलास) और नीम के फल-कृमि, प्रमेह, कुष्ठ, गुल्म, उदर तथा अर्श के नाशक एवं विपाक में कटु होते हैं। वायविडङ्ग-रूक्ष, उष्ण, विपाक में कटु, पचने में हलकी, वात तथा कफ की शामक, कुछ तिक्त, विषज रोगों में हितकारी तथा कृमिनाशक होती है ॥१९५-१९८॥

विमर्शः—तुवरक का विशेष प्रयोग कुष्ठ में, पलाशबीजों का गोलकृमि (Round worm) तथा विडङ्ग का प्रयोग चपटे कृमि (Tape worm) में आयुर्वेद तथा डाक्टरी दोनों में करते हैं।

व्रण्यमुष्णं सरं मेध्यं दोषघ्नं शोफकुष्ठनुत् ।
कषायं दीपनं चाम्लं चक्षुष्यं चाभयाफलम् ॥ १९९ ॥
भेदनं लघु रूक्षोष्णं वैस्वर्यक्रिमिनाशनम् ।
चक्षुष्यं स्वादुपाक्यात्तं कषायं कफपित्तजित् ॥२००॥

अभया (हरड़) फल—व्रण में हितकारी, उष्ण, दस्तावर, मेधाहितकर, दोषनाशक, शोफ और कुष्ठ का नाशक, कषाय, अग्निदीपक, अम्ल तथा नेत्रों के लिये हितकारी है। आक्ष (बहेड़ा का) फल-दस्तावर, लघु, रूक्ष, उष्ण, स्वर को विकृत करने वाला, कृमिनाशक, नेत्रहितकारी, विपाक में मधुर, कषाय एवं कफ तथा पित्त को नष्ट करता है ॥ १९९-२०० ॥

कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहम्।
कषायमीषन्मधुरं किञ्चित् पूगफलं सरम् ॥ २०१ ॥
जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलम्।
कक्कोलकं लवङ्गं च तिक्तं कटु कफापहम् ॥ २०२ ॥
लघु तृष्णापहं वक्त्रक्लेददौर्गन्ध्यनाशनम्।
सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ॥ २०३ ॥
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः।
लताकस्तूरिका तद्वच्छीता वस्तिविशोधनी ॥ २०४ ॥

पूगफल (सुपारी)—कफ और पित्त का नाशक, रूक्ष, मुख का क्लेद तथा मल का नाशक, रस में कषाय तथा कुछ मधुर और दस्तावर होता है। जातीकोश (जावित्री), कर्पूर, जायफल, लताकस्तूरी फल, कक्कोलक (क्यूबेब आफिसिनेलिस्) तथा लवङ्ग—ये तिक्त (कडवे), कटु (चरपरे), कफनाशक, पचने में लघु, तृषानाशक, मुख की विलग्नता तथा दुर्गन्ध को नष्ट करनेवाले हैं। इनमें कर्पूर—कडवा, सुगन्धि, शीतल, लघु तथा लेखन होता है तथा तृषा, मुख की खुश्की एवं अरुचि में लाभकारी है। इसी प्रकार लताकस्तूरी—कर्पूर के समान गुणकारी तथा शीतल एवं वस्तिशोधक होती है॥ २०१-२०४॥

प्रियालमज्जा मधुरो वृष्यः पित्तानिलापहः।
बैभीतको मदकरः कफमारुतनाशनः ॥ २०५ ॥
कषायमधुरो मज्जा कोलानां पित्तनाशनः।
तृष्णाच्छर्द्यनिलघ्नश्च तद्वदामलकस्य च ॥ २०६ ॥
बीजपूरकशम्याकमज्जा कोशाम्रसम्भवः।
स्वादुपाकोऽग्निबलकृत् स्निग्धः पित्तानिलापहः ॥२०७॥
यस्य यस्य फलस्येह वीर्यं भवति यादृशम्।
तस्य तस्यैव वीर्येण मज्जानमपि निर्दिशेत् ॥ २०८ ॥

प्रियालमज्जा (चिरौंजी)—मधुर, वृष्य तथा वातपित्तनाशक होती है। बहेडे फल की मज्जा—मदकारक तथा वातकफनाशक होती है। कोल (बदरी फल) की मज्जा—कषाय, मधुर, पित्तनाशक, तृषाशामक, वमननाशक तथा वातहर होती है। आंवले के फल की मज्जा भी कोलमज्जा के समान गुण वाली होती है। बीजपूर तथा शम्याक (अमलतासफली) की मज्जा तथा कोशाम्र मज्जा—विपाक में मधुर, पाचकाग्नि तथा बलकी वर्द्धक, स्निग्ध एवं पित्त तथा वात की नाशक होती है। जिस जिस फल का जैसा जैसा वीर्य होता है उसी के अनुरूप उसकी मज्जा को भी जानो॥ २०५-२०८॥

फलेषु परिपक्वं यद् गुणवत्तदुदाहृतम्।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणोत्तरम्।
ग्राह्युष्णं दीपनं तद्धि कषायकटुतिक्तकम् ॥ २०९ ॥
व्याधितं कृमिजुष्टं च पाकातीतमकालजम्।
वर्जनीयं फलं सर्वमपर्याप्तमेव च ॥ २१० ॥

इति फलवर्गः।

बिल्वफल को छोड़ कर अन्य सब फलों में पके हुये फल प्रशस्त गुणयुक्त होते हैं किन्तु बिल्वफल कच्चा ही गुण युक्त होता है। कच्चा बिल्वफल—कब्ज (विबन्ध) करने वाला, उष्ण, दीपन, कषाय, कटु और तिक्त रस युक्त होता है। जो फल रोगयुक्त, कृमिव्याप्त, अधिक पका (सड़ा गला) हुआ, बिना मौसम के लगा हुआ और बिना पका हुआ हो ऐसे सर्व प्रकार के फलों को त्याग देना चाहिये॥ २०९-२१०॥

विमर्शः—वर्जितफलानि—हिमानिलोष्णदुर्वातव्याललालादिदूषितम्। जन्तुजुष्टं जले मग्नमभूमिजमनार्त्तवम्॥ (वाग्भटः)।

अथ शाकवर्गः।

शाकान्यत ऊर्ध्वं वक्ष्यामः। तत्र पुष्पफलालाबुकालिन्दकप्रभृतीनि॥ २११॥

अब इसके अनन्तर विविध प्रकार की शाकों का वर्णन करते हैं। उनमें पुष्पफल (कोहड़ा), अलाबु (लौकी या तुम्बी), कालिन्दक (तरबूज) प्रभृति का शाक॥ २११॥

पित्तघ्नान्यनिलं कुर्युस्तथा मन्दकफानि च।
सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च ॥ २१२ ॥

उक्त शाक-पित्तनाशक, वातकारक, किञ्चित्कफकारक, मूत्र और मल को पैदा करने वाली तथा रस और विपाक में मधुर होती है॥ २१२॥

पित्तघ्नं तेषु कूष्माण्डं बालं मध्यं कफावहम्।
शुक्लं लघूष्णं सक्षारं दीपनं वस्तिशोधनम् ॥ २१३ ॥
सर्वदोषहरं हृद्यं पथ्यं चेतोविकारिणाम्।
दृष्टिशुक्रक्षयकरं कालिन्दं कफवातकृत् ॥ २१४ ॥
अलाबुर्भिन्नविट्का तु रूक्षा गुर्व्यतिशीतला।
तिक्तालाबुरहृद्या तु वामिनी वातपित्तजित् ॥ २१५ ॥

इनमें कच्चा कूष्माण्ड-पित्तनाशक, मध्य (अधपका) कूष्माण्ड-कफकारक तथा शुक्ल या पका हुआ कूष्माण्ड-पचने में हलका, उष्ण, क्षारयुक्त, अग्निदीपक तथा वस्ति का शोधक (मूत्रल) होता है एवं सर्व दोषों का नाशक, हृदय के लिये हितकारी तथा चित्त के विकार (मानस रोग जैसे उन्माद, अपस्मार, संन्यास, मूर्च्छा) वालों के लिये परम पथ्य है। कालिन्द (तरबूज)—दृष्टि तथा शुक्र का नाशक एवं वात और कफ का जनक है। अलाबु-दस्तावर, रूक्ष, पचने में भारी तथा अधिक शीतल होती है। कडवी तुम्बी-हृदय के लिये अहितकर, वमनकारक तथा वात और पित्त को नष्ट करती है॥ २१३-२१५॥

त्रपुसैर्वारुकर्कारुकशीर्णवृन्तप्रभृतीनि॥ २१६॥

त्रपुस (खीरा), एर्वारुक (ककड़ी), कर्कारुक (ककड़ी भेद), शीर्णवृन्त प्रभृति भी फलशाक हैं॥ २१६॥

स्वादुतिक्तरसान्याहुः कफवातकराणि च।
सृष्टमूत्रपुरीषाणि रक्तपित्तहराणि च ॥ २१७ ॥
बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतम्।
तत्पाण्डुकफकृज्जीर्णमम्लं वातकफापहम् ॥ २१८ ॥
एर्वारुकं सकर्कारु सम्पक्वं कफवातकृत्।
सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम् ॥ २१९ ॥

सचारं मधुरं चैव शीर्णवृन्तं कफापहम्।
भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघु ॥ २२० ॥

ये फलशाक-स्वादु, तिक्त(कड़वे), कफ तथा वात के जनक मूत्र और मलको उत्पन्न या प्रवर्तित करने वाले तथा रक्तपित्त-नाशक होते हैं। इनमें कच्ची नीली ककड़ी-पित्तनाशक होती है तथा ठीक तरह से पकी हुई श्वेत ककडी-कफ करने वाली तथा अधिक पकी हुई (जीर्ण)-खट्टी होती है तथा वात और कफ को नष्ट करती है। पूर्वोक्त तथा कर्कारु अधिक पकने पर-कफ और वात को करती हैं तथा क्षारयुक्त, मधुर, रुचिवर्द्धक, अग्निदीपक और अधिक पित्तवर्द्धक नहीं होती हैं। शीर्णवृन्त (ककडी)—क्षारयुक्त, मधुर, कफनाशक, दस्तावर, अग्नि-दीपक, हृद्य एवं अफारा तथा अष्ठीला वृद्धि (Enlargement of Prostate) को नष्ट करती है तथा पचने में लघु होती है॥

पिप्पलीमरिचशृङ्गवेरार्द्रकहिङ्गुजीरककुस्तुम्बुरुजम्बीरसुमुखसुरसार्जकभूस्तृणसुगन्धककासमर्दककालमालकुठेरकक्षवकखरपुष्पशिग्रुमधुशिग्रुफणिज्झकसर्षपराजिकाकुलाहलावगुत्थगण्डीरतिलपर्णिकावर्षाभूचित्रकमूलकलशुनपलाण्डुकलायप्रभृतीनि ॥ २२१ ॥

पिप्पली, मरिच, सोंठ, अदरख, हींग, जीरा, कुस्तुम्बुरु (धनियां), जम्बीरी नीबू, सुमुख (वन तुलसी), सुरसा (तुलसी), अर्जक (तुलसी भेद), भूस्तृण (रोहिष), सुगन्धक (गन्धतृण), कसौंदी, कालमाल (काली तुलसी), कुठेरक (तुलसी भेद), क्षवक (नकछिक्नी), खरपुष्प (मरुवक), सहजना, लालसहजना, फणिज्झक (मरुआ), सरसों, राई, कुलाहल, अवगुत्थ (लाल चिरमू), गण्डीर (सूरण), तिलपर्णिका (लाल चन्दन या चोरक), पुनर्नवा, चीता, मूली, लहसुन, प्याज और कलाय (मटर) ये सब शाक बनाने को तथा इनमें बहुत से (धनियां, जीरा, हींग आदि) द्रव्य शाकों के संस्कार (छौंकने) के काम में आते हैं॥

कटून्युष्णानि रुच्यानि वातश्लेष्महराणि च।
कृतान्नेपूपयुज्यन्ते संस्कारार्थमनेकधा ॥ २२२ ॥

ये पिप्पल्यादि द्रव्य-रस में कटु, उष्णप्रकृतिक, रुचिवर्द्धक, वात तथा कफ को नष्ट करने वाले होते हैं तथा इनमें से कई द्रव्यों का कृतान्न अर्थात् शाक या अन्य अन्न के खाद्य पेय पदार्थ बनाने में संस्कार करने के लिये (मसाले के रूप में) प्रयुक्त होते हैं॥ २२२ ॥

तेषां गुर्वी स्वादुशीता पिप्पल्यार्द्रा कफावहा।
शुष्का कफानिलघ्नी सा वृष्या पित्ताविरोधिनी २२३
स्वादुपाक्यार्द्रमरिचं गुरु श्लेष्मप्रसेकि च।
कटूष्णं लघु तच्छुष्कमवृष्यं कफवातजित् ॥ २२४ ॥
नात्युष्णं नातिशीतं च वीर्यतो मरिचं सितम्।
गुणवन्मरिचेभ्यश्च चक्षुष्यं च विशेषतः ॥ २२५ ॥
नागरं कफवातघ्नं विपाके मधुरं कटु।
वृष्योष्णं रोचनं हृद्यं सस्नेहं लघु दीपनम् ॥ २२६ ॥
कफानिलहरं स्वर्यं विबन्धानाहशूलनुत्।
कटूष्णं रोचनं हृद्यं वृष्यं चैवार्द्रकं स्मृतम् ॥ २२७ ॥
लघूष्णं पाचनं हिङ्गु दीपनं कफवातजित्।
कटु स्निग्धं सरं तीक्ष्णं शूलाजीर्णविबन्धनुत् ॥२२८॥
तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्द्धनम्।
कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम् ॥ २२९ ॥
कारवी करवी तद्वद्विज्ञेया सोपकुञ्चिका।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता ॥ २३० ॥
आर्द्रा कुस्तुम्बरी कुर्यात् स्वादुसौगन्ध्यहृद्यताम्।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशनी।
दोषघ्नी कटुका किञ्चित् तिक्ता स्रोतोविशोधनी॥२३१॥

विमर्शः—'समिता वेष्टिता मध्ये मधु दत्त्वा मृता घृते। मधुमस्तकमुद्दिष्टम्'। अपि च—'मधुनैलघृतैर्मध्ये वेष्टिताः समिताश्च याः। मधुमस्तकमुद्दिष्टं तस्याख्या परिमार्जनम्॥' इति। मधुमस्तका एव मधुशीर्षका उच्यन्ते इति डल्हणः। तत्र मधुशीर्षकलक्षणमाह नलः—विमर्द्य समिताचूर्णं मृदुपाक गुडान्वितम्। घृतावगाहे गुडिका वृत्तां पत्त्वां सकेशरान्॥ सौगन्धिकाधिवासा च कुर्यात्पूपलिका मुधः। स एव खण्डसयाव सिताम्रानमपूरित। मातुलुङ्गत्वचा चैव वेष्टितो मधुशीर्षक॥' इति। संयाव—सयावस्तु घृतक्षीरगुडगोधूमपाकजः'। 'समिता घृतदुग्धेन मोदयित्वा सुशोभनान्। पचेद् घृतोत्तरे खण्डे क्षिपेद् भाण्डे नवे ततः। सयावोऽसौ युतश्चूर्णैः खण्डैलामरिचार्द्रकैः॥' इति।

रोचनो दीपनः स्वर्यः पित्तघ्नः पवनापहः।
गुरुर्मृष्टतमश्चैव सट्टकः प्राणवर्द्धनः॥ ४०२॥

सट्टक (श्रीखण्ड समान पदार्थ)—रोचक, दीपक, स्वरवर्द्धक, पित्तशामक, वातनाशक, पचने में भारी, अत्यन्त मीठा (मृष्टतम) और प्राणशक्तिका वर्द्धक होता है॥ ४०२॥

विमर्शः—सट्टकलक्षणम्—लवणव्योषखण्डैस्तु दधि निर्मथ्य गालितम्। पक्वं दाडिमसंयुक्त चन्द्रचूर्णावचूर्णितम्॥ सट्टक पाचका आहुः।

हृद्यः सुगन्धिर्मधुरः स्निग्धः कफकरो गुरुः।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः॥ ४०३॥

विष्यन्दन—हृद्य, सुगन्धित, मधुर, स्निग्ध, कफजनक, पचने में भारी, वातनाशक, तृप्तिकारक तथा बलवर्द्धक होता है॥ ४०३॥

विमर्शः—विष्यन्दनपरिचयः—आमगोधूमचूर्णञ्च सर्पि क्षीरगुडान्वितम्। नातिसान्द्रो नातिघनो विष्यन्दो नाम नामतः॥

बृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः॥ ४०४॥

सामित (गेहूं के पिष्ट के बने सर्व पदार्थ)—शरीर पुष्टिकर, वातपित्तनाशक, बलवर्द्धक, हृद्य तथा अतीव पथ्यकारक होते हैं। उनमें फेनक (फीणी) आदि पदार्थ अधिक हलके होते हैं॥ ४०४॥

विमर्शः—फेनका—'विमर्द्य विमलां शुक्ला समिता नातिशर्कराम्। सवेष्टनाय गर्भार्थं खरपाकं घृते पचेत्। फेनक फेनसङ्काशं सम्पूर्णशशिसन्निभम्॥' इति।

मुद्गादिवेसवाराणां पूर्णा विष्टम्भिनो मताः।
वेसवारैः सपिशितैः सम्पूर्णा गुरुबृंहणाः॥ ४०५॥

मुद्गादि वेसवार से भरे हुये सामित—विष्टम्भजनक होते हैं। मांसादि वेसवार से भरे हुये सामित—भारी तथा शरीर को पुष्ट करती है॥ ४०५॥

पाललाः श्लेष्मजनना, शष्कुल्यः कफपित्तलाः।
वीर्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः।
विदाहिनो नातिबला गुरवश्च विशेषतः॥ ४०६॥

पलल (तिल चूर्ण) से बने हुये पदार्थ (पलल)—कफजनक होते हैं तथा शष्कुली (पूडियां)—कफ और पित्त उत्पन्न करती हैं। पिष्टक (तण्डुल चूर्ण) से बने पदार्थ (पैष्टिक)—उष्णवीर्य, कफपित्तप्रकोपक, विदाहकारक, अधिक बल नहीं देने वाले तथा विशेषकर पचने में भारी होते हैं॥४०६॥

वैदला लघवो भक्ष्याः कषायाः सृष्टमारुताः॥४०७॥
विष्टम्भिनः पित्तसमाः श्लेष्मघ्ना भिन्नवर्चसः।
बल्या वृष्यास्तु गुरवो विज्ञेया मापसाधिताः॥४०८॥

दालों (द्विदल धान्यों) के भक्ष्य पदार्थ—पचने में हलके, रस में कषाय, वातजनक, विष्टम्भकारक, पित्त को समान रखने वाले, कफनाशक तथा मल का भेदन करने वाले होते हैं। माष (उड़द) से बनाये हुये भक्ष्य पदार्थ—बलवर्द्धक, वृष्य और पचने में भारी होते हैं॥ ४०७-४०८॥

कूर्चिकाविकृता भक्ष्या गुरवो नातिपित्तलाः।
विरूढककृता भक्ष्या गुरवोऽनिलपित्तलाः॥४०९॥
विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणाः।
हृद्याः सुगन्धिनो भक्ष्या लघवो घृतपाचिताः॥४१०॥
वातपित्तहरा बल्या वर्णदृष्टिप्रसादनाः।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः॥ ४११॥

कूर्चिका (दुग्ध के फटे हुए घन भाग) से बने हुये (गुलाब जामुन, रसगुल्ले आदि) पदार्थ—पचने में भारी तथा अधिक पित्तजनक नहीं होते हैं। विरूढ (अङ्कुरित) धान्यों को पीसकर उनसे बनाये हुये भक्ष्य पदार्थ—पचने में भारी, वातपित्तवर्द्धक, विदाह तथा उत्क्लेश पैदा करने वाले, रूक्ष तथा दृष्टिदूषक होते हैं। घी में बनाये हुये भक्ष्य पदार्थ—हृद्य, सुगन्धित, पचने में हलके, वातपित्तनाशक, बलवर्द्धक तथा शरीर के रंग और दृष्टि के प्रसादक होते हैं। तैल से बनाये हुये भक्ष्य पदार्थ—विदाहजनक, पचने में भारी, विपाक में कटु तथा गरम होते हैं एवं वायुनाशक तथा दृष्टिदूषक, पित्तजनक तथा त्वचा के दूषक होते हैं॥ ४०९-४११॥

उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः॥ ४१२॥
फलमांसेक्षुविकृतितिलमापोपसंस्कृताः।
भक्ष्या बल्याश्च गुरवो बृंहणा हृदयप्रियाः॥ ४१३॥
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः।
सुपक्वास्तनवश्चैव भूयिष्ठं लघवो मताः॥ ४१४॥

फलवर्ग, मांसवर्ग, इक्षुविकार तथा तिल, माष (उड़द) आदि डाल कर बनाये हुये भक्ष्य पदार्थ—बलजनक, पचने में भारी, शरीर—पुष्टिकर तथा हृदय को प्रिय लगने वाले होते हैं। कपाल (मिट्टी के ठीकरे) या तवे पर बनाये हुये पदार्थ—पचने में लघु तथा वायुकोपक होते हैं। यदि ये ही पदार्थ खूब पके हुये तथा पापड़ के समान पतले हों तो पचने में अत्यन्त हलके होते हैं॥ ४१३-४१४॥

सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः।
कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चसः॥ ४१५॥

किलाट आदि से बनाये हुये भक्ष्य पदार्थ—पचने में भारी

तथा कफवर्द्धक होते हैं। कुल्माष—वायुकारक, रूक्ष, गुरु तथा मल के प्रवर्तक होते हैं ॥ ४१५ ॥

विमर्शः—किलाटलक्षणम्—नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः। कुल्मापलक्षणम्—अर्द्धस्विन्नाश्च गोधूमा अन्ये च चणकादयः। कुल्माषा इति कथ्यन्ते।

उदावर्त्तहरो वाट्यः कासपीनसमेहनुत्।
धानोलुम्बास्तु लघवः कफमेदोविशोषणाः ॥ ४१६ ॥

भूने हुये यवादि से बनाया हुआ वाट्य—उदावर्त, कास, पीनस तथा प्रमेह को नष्ट करता है। धान (भूने हुये जौ) तथा उलुम्ब (अग्निपक्व चने=होरा)—पचने में हलके तथा कफ और मेदोवृद्धि का शोषण करते हैं ॥ ४१६ ॥

सक्तवो बृंहणा वृष्यास्तृष्णापित्तकफापहाः।
पीताः सद्यो बलकरा भेदिनः पवनापहाः ॥ ४१७ ॥
गुर्वी पिण्डी खराऽत्यर्थं लघ्वी सैव विपर्ययात्।
सक्तूनामाशु जीर्येत मृदुत्वादवलेहिका ॥ ४१८ ॥

पानी में एक दिन भिंगो कर सुखा के ओखली में खाण्ड कूट भाड़ में भुनाये हुये जौ, गेहूं, चने को चक्की में पीस कर बनाये हुये सत्तू—शरीर-पुष्टिकर और वृष्य होते हैं तथा प्यास, पित्त और कफ को नष्ट करते हैं। इन्हें पानी में घोल कर लवण-मरिच मिला के अथवा शर्करा मिला के पीने से तुरन्त बल को बढ़ाते हैं, कुछ दस्तावर होते हैं तथा वायु को नष्ट करते है। सक्तु की अत्यन्त कठिन पिण्डी—पचने में भारी तथा मुलायम पिण्डी—लघु होती है। सक्तू का अवलेह—मुलायम होने से शीघ्र ही हजम हो जाता है ॥ ४१७-४१८ ॥

लाजाश्छर्द्यतिसारघ्ना दीपनाः कफनाशनाः।
बल्याः कषायमधुरा लघवस्तृण्मलापहाः ॥ ४१९ ॥
तृट्छर्दिदाहघर्मार्त्तिनुदस्तत्सक्तवो मताः।
रक्तपित्तहराश्चैव दाहज्वरविनाशनाः ॥ ४२० ॥

धान की खीलें वमन तथा अतिसार को नष्ट करती हैं, पाचकाग्नि को दीप्त करती हैं, कफ को नष्ट करती हैं, बल बढ़ाती हैं, रस में कषाय तथा मधुर होती है पचने में हलकी तथा तृषाशामक और मलनाशक होती हैं। लाजों का सत्तू—तृषा, वमन, दाह तथा घर्म (धूप) की अर्ति (पीड़ा=लू लगना) को नष्ट करता है तथा रक्तपित्त, दाह और ज्वर को नष्ट करता है ॥ ४१९-४२० ॥

पृथुका गुरवः स्निग्धा बृंहणाः कफवर्द्धनाः।
बल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्चसः ॥ ४२१ ॥

चिउड़े—पचने में भारी, स्निग्ध, बृंहण, कफवर्द्धक तथा बलवर्द्धक होते हैं। उन्हें दुग्ध में भिंगो कर शर्करा मिला के खाने से वे वातनाशक तथा दस्तावर होते हैं ॥ ४२१ ॥

सन्धानकृत्पिष्टमामं ताण्डुलं कृमिमेहनुत्।
सुदुर्जरः स्वादुरसो बृंहणस्तण्डुलो नवः।
सन्धानकृन्मेहहरः पुराणस्तण्डुलः स्मृतः ॥ ४२२ ॥

कच्चे चावलों का आटा—भग्नसंधानकर तथा कृमि और प्रमेह को नष्ट करता है। नूतन चावल—पचने में कठोर, रस में मधुर होते हैं तथा पुराने चावल—बृंहण, भग्न-संधानकारक और प्रमेहनाशक होते हैं ॥ ४२२ ॥

द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु।
यथाकारणमासाद्य भोक्तॄणां छन्दतोऽपि वा।
भक्ष्यादयः प्रकल्प्याः स्युस्तदा सुनिपुणो भिषक्।
द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु।
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्दिशेत् ॥४२३॥

इति भक्ष्यवर्गः।

अनेक प्रकार के भक्ष्यादि द्रव्यों के संयोग, घृत तैल तथा मसालों से संस्कार तथा अनेक रूप में बनाये हुये विकार (खाद्यपेयादि पदार्थ) किंवा विकार अर्थात् रोग इन्हें भली-भांति देखकर तथा रोग या नीरोग आदि अवस्था या दोष-प्रकोप का भी विचार कर तथा भोक्ताओं की इच्छा का भी ध्यान रख के उन अनेक द्रव्यों की योनि (उत्पत्ति) भिन्न-भिन्न होने से शास्त्र के अनुसार ही उनके गुण दोषों तथा सेवन करने के तरीकों का वर्णन करना चाहिये ॥ ४२३ ॥

अतः सर्वानुपानान्युपदेक्ष्यामः।
अम्लेन केचिद्विहता मनुष्या-
माधुर्ययोगे प्रणयीभवन्ति।
तथाऽम्लयोगे मधुरेण तृप्ता-
स्तेषां यथेष्टं प्रवदन्ति पथ्यम् ॥ ४२४ ॥

अब इसके अनन्तर सर्व अनुपानों का वर्णन करते हैं। अधिक खट्टे पदार्थों के खाने से उद्वेजित हुये मनुष्यों को माधुर्य (मीठे) पदार्थों का सेवन कराने से प्रसन्न हो जाते हैं उसी तरह अधिक मधुर पदार्थों से अतितृप्त या घबड़ाये हुए मनुष्यों को अम्लपदार्थ खिलाने से प्रसन्न हो जाते हैं। इसी तरह उन मनुष्यों के लिये एक दूसरे से विभिन्न षड् रसों का पथ्यरूप में प्रयोग करना शास्त्रकार कहते हैं ॥४२४ ॥

शीतोष्णतोयासवमद्ययूष-
फलाम्लधान्याम्लपयोरसानाम्।
यस्यानुपानं तु हितं भवेद्य-
त्तस्मै प्रदेयं त्विह मात्रया तत् ॥ ४२५ ॥
व्याधिं च कालं च विभाव्य धीरै-
र्द्रव्याणि भोज्यानि च तानि तानि।
सर्वानुपानेषु वरं वदन्ति-
मेध्यं यदम्भः शुचिभाजनस्थम् ॥ ४२६ ॥
लोकस्य जन्मप्रभृति प्रशस्तं
तोयात्मकाः सर्वरसाश्च दृष्टाः।
संक्षेप एषोऽभिहितोऽनुपाने-
ष्वतः परं विस्तरतो विधास्ये ॥ ४२७ ॥

शीतल जल, उष्ण जल, आसव, मद्य, यूष, फलाम्ल, धान्याम्ल (कांजी), दुग्ध, मांसरस इनमें से जिसके लिये

जो अनुपान उपयुक्त हो उसके लिये उस अनुपान को यथा-प्रमाण से देना चाहिये। धीर (विद्वान्) वैद्य रोग, समय, औषध द्रव्य, भिन्न भिन्न प्रकार के भोज्य द्रव्य इन सबका विचार करके उन भोज्यों का सेवन करावे। सर्व प्रकार के अनुपानों में अच्छे पवित्र पात्र में रखा हुआ आकाशीय (आन्तरिक्ष) जल श्रेष्ठ अनुपान है। वहुधा जन्म से लेकर मृत्युपर्यन्त यह आन्तरिक्ष जल प्रशस्त अनुपान है क्योंकि अन्य प्रकार के दाडिमादि रस भी जल स्वरूप ही होते हैं। इस प्रकार अनुपानों के विषय में यह संक्षेप से कहा है, इसके अनन्तर विस्तृत वर्णन करेंगे॥ ४२५-४२७॥

विमर्श—अनुपानगुण—दोषवद् गुरु वा मुक्तमतिमात्रमथापि वा। यथोक्तेनानुपानेन सुखमन्नं प्रजीर्य्यति॥

उष्णोदकानुपानं तु स्नेहानामथ शस्यते।
ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा॥४२८॥
अनुपानं वदन्त्येके तैले यूषाम्लकाञ्जिकम्।
शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्वशः॥४२९॥
दधिपायसमद्यार्त्तिविषजुष्टे तथैव च।
केचित् पिष्टमयस्याहुरनुपानं सुखोदकम्॥ ४३०॥

भल्लातक तैल तथा तुवरक तैल को छोड़ कर अन्य [सर्व प्रकार के स्नेहों के सेवन के पश्चात् उष्ण जल का अनुपान करना प्रशस्त है। कुछ आचार्य कहते हैं कि तैलों के सेवन में यूष तथा अम्ल कांजी का अनुपान करना चाहिये। शहद तथा पिष्टान्न के भक्ष्य के सेवन के पश्चात् शीतल [जल का अनुपान करना चाहिये। दही तथा दुग्ध, से बने पदार्थों (पायस=खीर) के सेवन के पश्चात् तथा मद्य की पीड़ा (मदात्यय) तथा विष खा लेने पर तथा पिष्ट के बने हुये पदार्थों के सेवन के पश्चात् सुखोदक (मन्दोष्ण जल) पीना चाहिये ऐसा कुछ लोग कहते हैं॥ ४२८-४३०॥

पयो मांसरसो वाऽपि शालिमुद्गादिभोजिनाम्।
युद्धाध्वातपसन्तापविषमद्यरुजासु च॥ ४३१॥
माषादेरनुपानं तु धान्याम्लं दधिमस्तु वा।
मद्ये मद्योचितानां तु सर्वमांसेषु पूजितम्॥ ४३२॥
अमद्यपानामुदकं फलाम्लं वा प्रशस्यते।
क्षीरं घर्माध्वभाष्यस्त्रीक्लान्तानाममृतोपमम्॥४३३॥
सुरा कृशानां स्थूलानामनुपानं मधूदकम्।
निरामयानां चित्रं तु भुक्तमध्ये प्रकीर्त्तितम्॥४३४॥
स्निग्धोष्णं मारुते पथ्यं, कफे रूक्षोष्णमिष्यते।
अनुपानं हितं चापि पित्ते मधुरशीतलम्॥ ४३५॥
हितं शोणितपित्तिभ्यः क्षीरमिक्षुरसस्तथा।
अर्कशेलुशिरीषाणामासवास्तु विपार्त्तिषु॥ ४३६॥

शालि चावल तथा मुद्गादि खाने वालों के लिये तथा युद्ध और रास्ते चलने से थके हुये मनुष्यों के लिये एवं धूप, अग्निसन्ताप, विष और मद्य से पीडित पुरुषों को दुग्ध अथवा मांसरस का अनुपान कराना चाहिये। उडदी आदि गरिष्ठ-पदार्थों के खाने पर काञ्जी अथवा दही के ऊपर का पानी (मस्तु) का अनुपान करना चाहिये। मद्यपान के अभ्यासियों को मांस खाने पर मद्य का ही अनुपान श्रेष्ठ होता है किन्तु जो मद्यपान न करते हों उन्हें मांससेवन पर जल अथवा फलाम्ल (खट्टे फलों का रस) का अनुपान करावे। धूप, मार्ग में चलने, अधिक भाषण देने तथा अधिक स्त्री-सम्भोग से क्लान्त (थके हुये या मुर्झाये हुए) मनुष्यों को दुग्ध का अनुपान अमृत के समान हितकारी होता है। दुर्बल पुरुषों के लिये सुरा तथा स्थूलों के लिये शहद मिश्रित पानी का अनुपान श्रेष्ठ होता है। निरामय (स्वस्थ) मनुष्यों को भोजन के मध्य (बीच) में चित्र अर्थात् स्निग्धरूक्षोष्ण-मधुरादि अनेकविध अनुपान कराना चाहिये। वात रोग में स्निग्ध तथा उष्ण अनुपान, कफप्रकृति या कफ रोगों में रूक्ष तथा उष्ण अनुपान एवं पित्त प्रकृति या पित्त के रोगियों में मधुर और शीतल पदार्थों का अनुपान प्रशस्त होता है। रक्तपित्त के रोगियों में दुग्ध तथा सांठे के रस का अनुपान तथा विष खाये हुये मनुष्यों को आक, शेलु (लिसोड़ा) और शिरस इनके आसवों का अनुपान हितकारी होता है॥ ४३१-४३६॥

अतः परं तु वर्गाणामनुपानं पृथक् पृथक्।
प्रवक्ष्याम्यानुपूर्व्येण सर्वेषामेव मे शृणु॥ ४३७॥

अब इसके अनन्तर पूर्वोक्त शाल्यादि वर्ग के पदार्थों के पृथक् पृथक् अनुपान क्रम से कहता हूँ सो सुनो॥ ४३७॥

तत्र पूर्वसस्यजातीनां वदराम्लं, वैदलानां धान्याम्लं, जङ्गालानां धन्वजानां च पिप्पल्यासवः, विष्किराणां कोलबदरासवः, प्रतुदानां क्षीरवृक्षासवः, गुहाशयानां खर्जूरनालिकेरासवः, प्रसहानामश्वगन्धाऽऽसवः, पर्णमृगाणां कृष्णगन्धासवः, विलेशयानां फलसारासवः, एकशफानां त्रिफलाऽऽसवः, अनेकशफानां खदिरासवः, कूलचराणां शृङ्गाटककशेरुकासवः, कोशवासिनां पादिनां च स एव, प्लवानामिक्षुरसासवः, नादेयानां मत्स्यानां मृणालासवः, सामुद्राणां तु मातुलुङ्गासवः, अम्लानां फलानां पद्मोत्पलकन्दासवः, कषायाणां दाडिमवेत्रासवः, मधुराणां त्रिकटुकयुक्तः खण्डासवः, तालफलादीनां धान्याम्लम्, कटुकानां दूर्वानलवेत्रासवः, पिप्पल्यादीनां श्वदंष्ट्रावसुकासवः, कूष्माण्डादीनां दार्वीकरीरासवः, चुच्चुप्रभृतीनां लोध्रासवः, जीवन्त्यादीनां त्रिफलाऽऽसवः, कुसुम्भशाकस्य स एव, मण्डूकपर्ण्यादीनां महापञ्चमूलासवः, तालमस्तकादीनामम्लफलासवः, सैन्धवादीनां सुरासव आरनालं च, तोयं वा सर्वत्रेति॥ ४३८॥

उनमें पूर्व कहे अन्नसमूह जैसे शूकधान्य, कुधान्य तथा शमीधान्यों का अनुपान, वदराम्ल तथा कलाय-मुद्गादि द्विदल धान्यों पर धान्याम्ल (कांजी) का अनुपान करना चाहिये। जङ्गाल (एणादि) तथा धन्व (मरुस्थल) देश में उत्पन्न (वर्त्तकादि) के मांस पर पिप्पल्यासव, विष्किरों के मांस पर कोल तथा वदर का आसव, प्रतुद के मांस पर वट, गूलर आदि क्षीरी वृक्षों की छाल आदि से बने हुये आसव, गुहा में सोने वाले (शेर, चीता) प्राणियों के मांस पर खर्जूरासव तथा

नारिकेलासव, प्रसह प्राणियों के मांसरस पर अश्वगन्धासव, पर्णमृगों (वन्दरादि) के मांस पर कृष्णगन्धा (शोभाञ्जन) का आसव, बिल में सोने वाले प्राणियों के मांस पर मृद्वीकादि फल तथा शालसारादि के सार का आसव, घोडे आदि एकशफ के प्राणियों के मांस पर त्रिफलासव, अनेक शफ (खुर) वाले प्राणियों के मांस पर खदिरासव, जलाशयों के कूल (तटों) पर घूमने वाले प्राणियों के मांस पर सिंघाडे तथा कशेरुक से बने हुये आसव, कोशवासी तथा पादिनों के मांस पर भी शृङ्गाटक-कशेरुकासव, जल में तैरने वाले के मांस पर इक्षुरसासव, नदी के मत्स्यों के मांस पर मृणालासव, समुद्री मत्स्यों के मांस पर मातुलुङ्गासव, खट्टे फलों के खाने पर पद्मोत्पलकन्दासव, कषायफलों के खाने पर दाडिमवेत्रासव, मधुरफलों के खाने पर त्रिकटुचूर्णयुक्त खण्डासव, तालफलादिकों के खाने पर धान्याम्ल (काञ्जी), कटुफलों के खाने पर दूर्वानलवेत्रासव, पिप्पल्यादिकों के खाने पर श्वदंष्ट्रावसुकासव, कूष्माण्डादि के खाने पर दार्वी (दारुहरिद्रा) और करीरफल का बना आसव, चुच्चुप्रभृति शाकों के खाने पर लोध्रासव, जीवन्त्यादिशाकों का त्रिफलासव, कुसुम्भशाक का भी त्रिफलासव, मण्डूकपर्ण्यादि का वृहत्पञ्चमूलासव, तालमस्तकादि का अम्लफलासव, सैन्धवादि लवणों के लिये सुरासव तथा काञ्जी का अनुपान उत्तम होता है। अथवा उक्त सर्व वर्गों के लिये जल का अनुपान श्रेष्ठ है ॥ ४३८ ॥

भवन्ति चात्र—

सर्वेषामनुपानानां माहेन्द्रं तोयमुत्तमम् ।
सात्म्यं यस्य तु यत्तोयं तत् तस्मै हितमुच्यते ॥४३९॥
उष्णं वाते कफे तोयं पित्ते रक्ते च शीतलम् ॥४४०॥

इस विषय में कहा है कि सर्व अनुपानों में माहेन्द्र अर्थात् आन्तरिक्ष जल उत्तम अनुपान है। अथवा जिस व्यक्ति के लिये नदी, कूप, तालाब आदि का जो भी जल सात्म्य (अभ्यस्त या हितकारी)हो वह उसके लिये अनुपान में पिलाना उत्तम है। वात और कफ की प्रकृति या रोगों में उष्ण जल तथा पित्त प्रकृति या पित्त के रोग एवं रक्त के रोगों में शीतल जल का अनुपान हितकर होता है ॥ ४३९-४४० ॥

दोषवद् गुरु वा भुक्तमतिमात्रमथापि वा ।
यथोक्तेनानुपानेन सुखमन्नं प्रजीर्यति ॥ ४४१ ॥

दोषयुक्त, भारी, किंवा अधिक मात्रा में खाया हुआ भोजन उचित यथोक्त अनुपान से सुखपूर्वक पच जाता है ॥ ४४१ ॥

रोचनं बृंहणं वृष्यं दोषसङ्घातभेदनम् ।
तर्पणं मार्दवकरं श्रमक्लमहरं सुखम् ॥ ४४२ ॥
दीपनं दोषशमनं पिपासाच्छेदनं परम् ।
बल्यं वर्णकरं सम्यगनुपानं सदोच्यते ॥ ४४३ ॥

अनुपान गुण—ठीक तरह से विचार कर प्रयुक्त किया हुआ अनुपान-रोचक, शरीरपुष्टिकर, वृष्य, दोषों के समूह का नाशक, तृप्तिकारक, मृदुता करने वाला, थकावट तथा क्लम का नाशक, सुखकारक, पाचकाग्नि-दीपक, दोषों का शामक, प्यास का नाशक, बल तथा वर्ण को बढ़ाने वाला होता है ॥ ४४२-४४३ ॥

तदादौ कर्शयेत्पीतं स्थापयेन्मध्यसेवितम् ।
पश्चात्पीत बृंहयति तस्माद्वीक्ष्य प्रयोजयेत् ॥ ४४४ ॥

भोजन के पूर्व किया हुआ अनुपान शरीर को दुबला करता है। भोजन के मध्य में किया हुआ अनुपान शरीर को उसी अवस्था में स्थिर रखता है एवं भोजन के पश्चात् किया हुआ अनुपान शरीर को पुष्ट करता है अतएव विचार कर अनुपान का प्रयोग करना चाहिये ॥ ४४४ ॥

स्थिरतां गतमक्लिन्नमन्नमद्रवपायिनाम् ।
भवत्याबाधजननमनुपानमतः पिबेत् ॥ ४४५ ॥

जो मनुष्य भोजन के किसी भी योग्य समय में अनुपान नहीं करते हैं उनका अन्न आमाशय में स्थिर हो जाता है तथा क्लिन्न (गीला) नहीं होता है जिससे वह अन्न उदर में बाधा उत्पन्न करता है इस लिये भोजन के पश्चात् अनुपान अवश्य करना चाहिये ॥ ४४५ ॥

विमर्शः—वाग्भटादौ भोजने जलपाननिषेधमाह-भक्तस्यादौ जलं पीतमग्निसादं कृशाङ्गताम् । अन्ते करोति स्थूलत्वमूर्ध्वञ्चामाशयात् कफम् ॥ मध्ये मध्याङ्गता साम्य धातूना जरण सुराम् । (अ सं.) । समस्थूलकृशा भक्तमध्यान्तप्रथमाम्बुपा.' (वाग्भटः)।

न पिबेच्छ्वासकासार्त्तो रोगे चाप्यूर्ध्वजत्रुगे ।
क्षतोरस्कः प्रसेकी च यस्य चोपहतः स्वरः ॥ ४४६ ॥
पीत्वाऽध्वभाष्याध्ययनगेयस्वप्नान्न शीलयेत् ।
प्रदूष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितम् ॥
स्यन्दाग्निसादच्छर्दादीनामयाञ्जनयेद् बहून् ॥४४७॥

श्वास तथा कास पीडित, ऊर्ध्व जत्रु (मुख, नासा, नेत्र, कर्ण, शिर) के रोग, जिसकी छाती या फेफड़ों में क्षत (व्रण) हो, लाला तथा सेडा का स्राव होता हो, स्वरभङ्ग वाले-ऐसे मनुष्यों को अनुपान नहीं कराना चाहिये। अनुपान करने के पश्चात् मार्ग में चलना, जोर से भाषण देना, पढ़ना, गाना और सोना नहीं चाहिये। ऐसा करने से अनुपान आमाशय को दूषित कर कण्ठ तथा उर प्रदेश में स्थित होकर लालास्राव, अग्निमान्द्य और वमनादि अनेक रोगों को पैदा करता है ॥ ४४६-४४७ ॥

गुरुलाघवचिन्तेयं स्वभावं नातिवर्त्तते ।
तथा संस्कारमात्रान्नकालांश्चाप्युत्तरोत्तरम् ॥ ४४८ ॥

भक्ष्यादि पदार्थों के गुरु और लघु का विचार-उस पदार्थ या खाने वाले के स्वभाव एवं उस भक्ष्य के संस्कार, मात्रा, अन्न के प्रकार तथा समय इन सब पर निर्भर करता है ॥४४८॥

विमर्शः—उत्तरोत्तरम्=स्वभावात्संस्कार संस्कारान्मात्रा मात्रातोऽन्नम् अन्नात्काल गुरुलाघवचिन्ता नातिवर्तते नातिक्रामतीत्यर्थः । 'नातिवर्तते' इति क्रियापदमनुकृष्य संस्कारादावन्वयात् संस्कार नातिवर्तते, मात्रा नातिवर्तते, अन्न नातिवर्तते, काल नातिवर्तते इति बोध्यम्। संस्कार नातिवर्तते, यथा स्वभावाद् गुरोरपि व्रीहेर्लाजा-लघव , लघोरपि शाले संस्कारात् पिष्ट गुरु । आत्रेयोऽपि—'गुरूणा लाघव विद्यात्संस्कारात्तविपर्ययम्। व्रीहेर्लाजा यथा च स्यु सक्तूना सिद्धपिण्टका ॥' इति ।

मन्दकर्मानलारोग्याः सुकुमाराः सुखोचिताः ।

जन्तवो ये तु तेषां हि चिन्तेयं परिकीर्त्यते ॥४४६॥
बलिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः ।
कर्मनित्याश्च ये तेषां नावश्यं परिकीर्त्यते ॥ ४५० ॥

इति सर्वानुपानवर्गः ।

जो विशेष कर्म (परिश्रम-कार्य) नहीं करते हैं, जिनकी पाचकाग्नि मन्द हो, जिनका आरोग्य (स्वास्थ्य) ठीक न हो जो सुकुमार तथा आराम के अभ्यासी हों उन प्राणियों के लिये भक्ष्यादि पदार्थों के गुरु-लाघव का विचार किया जाता है किन्तु जो बलवान् हों, जो खर (चने, मकई, ज्वार आदि दुर्जर) पदार्थ खाते हों तथा जिनकी अग्नि प्रदीप्त हो और जो रात-दिन परिश्रम का कार्य करते हों उनके लिये द्रव्यों के गुरु-लाघव के विचार करने की कोई आवश्यकता नहीं है ॥

अथाहारविधिं वत्स ! विस्तरेणाखिलं शृणु ।
आप्तान्वितमसङ्कीर्णं शुचि कार्यं महानसम् ॥ ४५१ ॥
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
शुचौ देशे सुसंगुप्तं समुपस्थापयेद् भिषक् ॥ ४५२ ॥
विपन्नैरगदैः स्पृष्टं प्रोक्षितं व्यजनोदकैः ।
सिद्धैर्मन्त्रैर्हृतविषं सिद्धमन्नं निवेदयेत् ॥ ४५३ ॥

हे वत्स ! अब सम्पूर्ण आहार-विधि को विस्तार से कहता हूं सो सुनो। महानस (रसोई घर)-हित चाहने वाले नौकरों से युक्त, सङ्कीर्णता (स्थानतंगी) से रहित तथा पवित्र होना चाहिये। उस रसोई घर में हितकारी रसोइयों द्वारा अच्छी प्रकार से संस्कृत (सिद्ध) किया हुआ एवं गुणों से युक्त भोजन को महानस वैद्य पवित्र स्थान में छिपा कर सुरक्षित रखे। फिर विषनाशक ओषधियों से छुआ कर जलयुक्त पंखे से प्रोक्षित कर तथा सिद्ध मन्त्रों से भोजन के विष-प्रभाव को नष्ट कर सिद्ध हुये अन्न को राजा या अन्य गृहबन्धुओं को परोसना चाहिये ॥ ४५१-४५३ ॥

वक्ष्याम्यतः परं कृत्स्नमाहारस्योपकल्पनाम् ।
घृतं कार्ष्णायसे देयं पेया देया तु राजते ॥ ४५४ ॥
फलानि सर्वभक्ष्यांश्च प्रदद्याद्वै दलेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥ ४५५ ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत् ।
कटुवराणि खडांश्चैव सर्वान् शैलेषु दापयेत् ॥४५६॥
दद्यात्ताम्रमये पात्रे सुशीतं सुश्रुतं पयः ।
पानीयं पानकं मद्यं मृन्मयेषु प्रदापयेत् ॥ ४५७ ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्वैदूर्यपात्रेषु रागपाडवसट्टकान् ॥ ४५८ ॥
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥ ४५९ ॥
फलानि सर्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥ ४६० ॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खडान् यूपांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥४६१॥
सर्वान् गुडविकारांश्च रागपाडवसट्टकान् ।
पुरस्तात् स्थापयेत् प्राज्ञो द्वयोरपि च मध्यतः ॥४६२॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्पाते शुभे शुचौ ॥४६३॥
सुगन्धपुष्परचिते समे देशेऽथ भोजयेत् ॥ ४६४ ॥

अब इसके अनन्तर आहार की सम्पूर्ण उपकल्पना अर्थात् परोसने आदि विधि का वर्णन करता हूं। घृत-कृष्ण लोह के पात्र में परोसना चाहिये। पेय पदार्थ-चांदी के पात्र में, फल तथा सर्व प्रकार के भक्ष्य पदार्थ-ढाक, केला आदि के पत्रों पर परोसना चाहिये। सूखे तथा दही छाछ से प्रदिग्ध पदार्थ-सुवर्ण के पात्र में परोसे। द्रवपदार्थ तथा मांस-फलादि रस-चांदी के पात्र में देवें। कटुवर (तक्र) तथा खडयूषों को पत्थर की कटोरियों में परोसे। अच्छी प्रकार उबाल कर ठीक रूप से शीतल किया हुआ जल-ताम्बे के पात्र में भर कर देना चाहिये। अथवा पानी, पानक और मद्यों को मिट्टी के बने हुये कटोरों में भरकर देवें। अथवा शीतल और शुभ्र काच और स्फटिक के पात्रों में पानी, पानक और मद्य भर कर देवे एवं राग पाडव और सट्टक को वैडूर्य के विचित्र पात्रों में रख कर परोसे। सामने के निर्मल तथा चौड़े और मनोहर पात्र (कटोरी) में सूप (दाल) तथा थाली में चावल तथा चटनी, रायता आदि सुसस्कृत लेह्य पदार्थ परोसे। फल, सर्व प्रकार के भक्ष्य तथा अन्य सूखे (पापड़ फली) पदार्थ-भोजन करने वाले के दक्षिण पार्श्व में रखने चाहिये। अधिक द्रव पदार्थ, मांसादि रस, पीने का पानी, पानक (पना), दुग्ध, खड, यूष और अन्य पेय पदार्थों को भोक्ता के वामपार्श्व में रखे। गुड के बने हुये सर्व प्रकार के पदार्थ, रागपाडव और सट्टक इन्हें भोक्ता के सम्मुख तथा अन्य दायें-बायें रखे पदार्थों के मध्य में बुद्धिमान् परोसने वाला परोसे। इस प्रकार बुद्धिमान वैद्य अथवा पर्यवेषक (रसोइया) भोजन की परोसकारी करके भोक्ता को एक तरफ, रमणीक, बाधारहित, शुभ्र, पवित्र, सुगन्धित पुष्पों से रचित समान प्रदेश में बिठाकर भोजन करावे ॥ ४५४-४६४ ॥

विमर्श.—परिशुष्कमांसम्-सिक्त बहुघृते भृष्ट मुहुरुष्णाम्बुना मृदु। जीरकाद्यैर्घन मास परिशुष्क तदुच्यते ॥ प्रदिग्धमांसं—तदेव गोरसादाम प्रदिग्धमिति विश्रुतम्। कट्वरलक्षणम्-सौवीराम्लमथात्यम्ल काञ्जिक कट्वर विदु । अन्ये तु तदधोभाग तक्र वा ह्यम्लता गतम्। सस्नेह दधिज तक्रमाहुरन्ये तु कट्वरम्। रागः—सिताऽत्यकसिन्धूत्थैः सवृक्षाम्लपरूषकैः। जम्बूफलरसैर्युक्तो रागो राजिकया कृतः ॥ सट्टकम्—लवङ्ग व्योषखण्डैस्तु दधि निर्मथ्य गालितम्। दाडिमबीजसयुक्त चन्द्रचूर्णावचूर्णितम्। सट्टकन्तु प्रमोदास्य नलादिभिरुदाहृतम् ॥

विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टै रसादिभिः ।
मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम् ॥ ४६५ ॥

स्वाभीष्ट कल्पनाविधि से बनाया हुआ तथा पथ्यकर और अनुकूल रसादियों से युक्त, मनोज्ञ, पवित्र, न अधिक उष्ण तथा तुरन्त का बना भोजन हितकर होता है ॥ ४६५ ॥

पूर्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ।
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ॥४६६॥

भोजन विधि—भोजन में प्रथम मधुर पदार्थों का सेवन करना चाहिये। मध्य में अम्ल तथा लवण रस वाले पदार्थ खाने चाहिये। अन्त में शेष कटु-तिक्तादि रसों वाले पदार्थों का सेवन करना चाहिये ॥ ४६६ ॥

विमर्शः—पक्वाशयादिगत वातशान्त्यर्थ प्रथम मधुर रस, पित्ताशयगत पित्त तथा अग्न्याशयस्थ अग्निदीप्त्यर्थ मध्य में अम्ल, लवण रस और भोजन के अनन्तर उत्पन्न होने वाले कफ के शमनार्थ अन्त में कटु-तिक्तोपणादि रसप्रधान द्रव्यों के सेवन का विधान किया गया है।

आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान्।
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततः परम् ४६७

बुद्धिमान् भोक्ता भोजन में प्रथम दाडिमादि फलों का सेवन करे उसके पश्चात् पेय पदार्थ तथा उनके बाद अन्त में विविध भोज्य और भक्ष्य पदार्थों का सेवन करे ॥ ४६७ ॥

घनं पूर्वं समश्नीयात् केचिदाहुर्विपर्ययम् ॥ ४६८ ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते।
निरत्ययं दोषहरं फलेष्वामलकं नृणाम् ॥ ४६९ ॥
मृणालबिसशालूककन्देक्षुप्रभृतीनि च।
पूर्वं योज्यानि भिषजा न तु भुक्ते कदाचन ॥४७०॥

भोजन में प्रथम घन पदार्थों का सेवन करना चाहिये। कई आचार्य इसके विपरीत भोजन के प्रथम द्रव पदार्थों के सेवन का उपदेश करते हैं। भोजन के आदि (प्रथम), भोजन के अन्त तथा भोजन के मध्य में किसी प्रकार की बाधा न करने वाला तथा सर्वदोषनाशक तथा फलों में श्रेष्ठ आंवले के फलों को या उसके चूर्ण को सेवन करना मनुष्यों के लिये प्रशस्त है। मृणाल (कमल नाल), बिस (भिस या कमलतन्तु), कन्द तथा इक्षु (सांठे) प्रभृति पदार्थों का उपयोग सदा भोजन के पूर्व करना चाहिये। वैद्य इन पदार्थों का सेवन भोजन के पश्चात् न करावे ॥४६८-४७०॥

सुखमुच्चैः समासीनः समदेहोऽन्नतत्परः।
काले सात्म्य लघु स्निग्धं क्षिप्रमुष्णं द्रवोत्तरम्।
बुभुक्षितोऽन्नमश्नीयाद् मात्रावद्विदितागमः ॥४७१॥

सुखपूर्वक उच्चासन पर बैठ कर, देह को समावस्था में (सीधी) रख कर एव अन्न सेवन में चित्त लगाता हुआ स्वास्थ्यशास्त्र के नियमों को जानने वाला बुभुक्षित (क्षुधी) मनुष्य योग्य समय में सात्म्य (अभ्यस्त तथा स्वहितकर), पचने में हलका, घृतादि से स्निग्ध, उष्ण तथा द्रवप्रधान ऐसा भोजन मात्रापूर्वक न अधिक धीरे और न अधिक जल्दी किन्तु आहिस्ते आहिस्ते ठीक चवा कर भोजन करे ॥ ४७१ ॥

विमर्शः—अन्यत्र भोजनविधिर्यथा—'अजल्पन्नहसन् तन्मना भुञ्जीत' इति। काले = नित्यगे आवस्थिके च द्विविधे काले, तत्र नित्यग—'याममध्ये न भोक्तव्य यामयुग्म न लङ्घयेत्। याममध्ये रसोत्पत्तिर्यामयुग्माद् बलक्षय ॥' इति। आवस्थिक—क्षुत्सम्भवति पक्वेषु रसदोषमलेषु च। काले वा यदि वाऽकाले सोऽन्नकाल उदाहृत. ॥' इति। सात्म्य हितकारि, लघु, स्निग्ध, क्षिप्र नातिद्रुत नातिविलम्बितम्, तथा चात्रेयः—'नातिद्रुतमश्नीयात् तथा नातिविलम्बितमश्नीयात्' इति। उष्ण द्रवोत्तर द्रवप्रधानम्, बुभुक्षित. भोजनकाले बुभुक्षित, अकाले बुभुक्षानिषेधं स्वयमेव वक्ष्यति—'भवत्यकालेऽपि तदा बुभुक्षा या मन्दबुद्धिं विषवन्निहन्ति'। मात्रावत्, न त्वमात्रावत्; अन्यथाऽशुभ स्यात्। तदुक्त चरके—'त्रिविध कुक्षी स्थापयेदन्नकाशाशमाहारमुपयुञ्जान, तथथा—एकमवकाशाश मूर्त्तानामाहारविकाराणामेक द्रवाणामेक पुनर्वातपित्तश्लेष्मणाम्, एतावती ह्याहारमात्रामुपयुञ्जानो नामात्राहारज किञ्चिदशुभ प्राप्नोति'। अपीडन भवेत्कुक्षे पार्श्वयोरविपाटनम्। अन्नेन हृदयावाधो जठरस्य तु गौरवम्॥ प्रीणन चक्षुरादीनां शमन क्षुत्पिपासयोः। उच्छ्वासश्वासहास्यादिकथासु सुखवर्तनम्। सुखेन परिणाम स्यादन्ने मुक्ते दिवा निशि'॥

काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते।
लघु शीघ्रं व्रजेत् पाकं स्निग्धोष्णं बलवह्निदम् ॥४७२॥
क्षिप्रं भुक्त समं पाकं यात्यदोषं द्रवोत्तरम्।
सुखं जीर्यति मात्रावद्धातुसाम्यं करोति च ॥ ४७३ ॥

योग्य समय में किया हुआ भोजन—देह, इन्द्रियां तथा आत्मा और मन को तृप्त करता है। सात्म्य अन्न चाहे कैसा भी हो वह मनुष्य को बाधा नहीं पहुँचाता है। हलका भोजन शीघ्र ही पच जाता है। तथा स्निग्ध और उष्ण भोजन शरीर के बल तथा पाचकाग्नि को बढ़ाता है। न जल्दी तथा न धीरे-धीरे उचित रीति से चवा कर खाया हुआ भोजन समानरूप से पच जाता है। द्रवप्रधान भोजन अदोष (दोषों को न बढ़ाता हुआ) आमाशयादि में चला जाता है या पच जाता है, मात्रापूर्वक खाया हुआ भोजन सुखपूर्वक पच जाता है तथा रस-रक्तादि धातुओं को समान रखता है ॥ ४७२-४७३ ॥

अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः।
तेषु तत् प्रत्यनीकाख्यं भुञ्जीत प्रातरेव तु ॥ ४७४ ॥
येषु चापि भवेयुश्च दिवसा भृशमायताः।
तेषु तत्कालविहितमपराह्णे प्रशस्यते ॥ ४७५ ॥
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः।
कृत्वा सममहोरात्रं तेषु भुञ्जीत भोजनम् ॥ ४७६ ॥

हेमन्त-शिशिरादि जिन ऋतुओं में अधिक लम्बे आयाम (प्रहर) वाली रात्रियां होती हैं उन ऋतुओं में तत्काल-चलप्रवृत्त दोषों के प्रतीकार के अनुसार स्निग्ध और उष्ण भोजन प्रातःकाल ही कर लेना चाहिये तथा जिन ऋतुओं (ग्रीष्म तथा प्रावृट्) में दिन अत्यन्त लम्बे (मोटे) हैं उनमें उस काल के अनुसार द्रव, लघु तथा शीतल भोजन अपराह्ण में खाना चाहिये। जिन ऋतुओं (शरद् और वसन्त) में रात्रि और दिन समान होते हैं उन ऋतुओं में अहोरात्र का समान भाग (विभाजन) करके मध्याह्न में भोजन कर लेना चाहिये ॥

नाप्राप्तातीतकालं वा हीनाधिकमथापि वा।
अप्राप्तकाले भुञ्जानः शरीरे ह्यलघौ नरः ॥ ४७७ ॥
तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति।
अतीतकाले भुञ्जानो वायुनोपहतेऽनले ॥ ४७८ ॥
कृच्छ्राद्विपच्यते भुक्तं द्वितीयञ्च न काङ्क्षति।

हीनमात्रमसन्तोषं करोति च बलक्षयम् ॥ ४७९ ॥
आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम्।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्जितम् ॥४८०॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्।
विभज्य दोषकालादीन् कालयोरुभयोरपि ॥ ४८१ ॥

अप्राप्त काल तथा अतीत काल में भोजन भी नहीं करना चाहिये एवं हीन मात्रा में तथा अधिक मात्रा में भोजन नहीं करना चाहिये। अप्राप्त काल में भोजन करने वाला मनुष्य शरीर के हलके नहीं होने से भिन्न-भिन्न अजीर्ण, विसूचिकादि रोगों को प्राप्त करता है अथवा कभी कभी मृत्यु तक को प्राप्त करता है। अतीत काल में भोजन करने वाले का अन्न वायु-वृद्धि से पाचकाग्नि के नष्ट होने के कारण कष्ट से पचता है तथा दूसरे (रात्रि के) समय भोजन करने की इच्छा नहीं होती। अल्पमात्रा में किया हुआ भोजन असन्तोष (अतृप्ति) करता है तथा शरीर के बल को भी क्षीण करता है। अधिक मात्रा में किया हुआ भोजन-आलस्य, भारीपन, आटोप तथा अग्निमान्द्य इन्हें अधिक करता है इसलिये उत्तम विधि से संस्कृत किया हुआ तथा युक्तिपूर्वक और उपर्युक्त दोषों से रहित एवं शास्त्रीय अन्नके गुणों से सम्पन्न एवं दोष तथा काला-दिकों का विभाग करके दोनों समय भोजन करना चाहिये॥

विमर्शः—अधिकभोजने मनुरपि दोषमाह-'अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्। अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत्॥' इति। 'सायं प्रातर्द्विजातीनामशनं श्रुतिनोदितम्। नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः॥'

अचोक्षं दुष्टमुत्सृष्टं पाषाणतृणलोष्टवत्।
द्विष्टं व्युषितमस्वाद्वु पूति चान्नं विवर्जयेत् ॥ ४८२ ॥
चिरसिद्धं स्थिरं शीतमन्नमुष्णीकृतं पुनः।
अशान्तमुपदग्धं च तथा स्वाद्वु न लक्ष्यते ॥ ४८३ ॥

निन्दितान्न—अचोक्ष (अपवित्र), विषादि से दुष्ट, खाकर शेष छोड़ा हुआ (झूठन), पाषाण, तृण तथा मिट्टी के लोष्ट (ढेले) से व्याप्त, द्विष्ट (चित्त विपरीत), व्युषित (रात का बासी), बेस्वाद, दुर्गन्धित, ऐसे को वर्जित कर देना चाहिये एवं जो बहुत समय से बनाकर रखा हुआ हो, स्थिर (सख्त), ठण्डा, फिर से गरम किया हुआ, अशान्त (अधिक गरम), जला हुआ तथा जो स्वादु नहीं लगता हो उसे भी वर्जित कर देना चाहिये ॥ ४८२-४८३ ॥

यद्यत् स्वादुतरं तत्तद्विद्यादुत्तरोत्तरम्।
प्रक्षालयेदद्भिरास्यं भुञ्जानस्य मुहुर्मुहुः ॥ ४८४ ॥
विशुद्धरसने तस्मै रोचतेऽन्नमपूर्ववत्।
स्वादुना तस्य रसनं प्रथमेनातितर्पितम् ॥ ४८५ ॥
न तथा स्वादयेदन्यत्तस्मात् प्रक्षाल्यमन्तरा।
सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखम् ॥ ४८६ ॥
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्ययम्।
भुक्त्वाऽपि यत् प्रार्थयते भूयस्तत् स्वादु भोजनम् ४८७

भोक्ता को जो जो भक्ष्य पदार्थ अधिक स्वादु हो उन्हें उत्तरोत्तर परोसने चाहिये। अर्थात् प्रथम कम स्वाद की, उसके बाद अधिक स्वाद की और उसके भी बाद और अधिक स्वाद की वस्तु दे। भोजन करते समय एक प्रकार की या रसवाली वस्तु खा लेने के बाद तथा दूसरे रस की वस्तु खाने के पूर्व मुख को जल के द्वारा कुरला करके साफ कर लेना चाहिये क्योंकि ऐसा करने से मुख तथा रसना साफ हो जाती है जिससे बाद में खाया हुआ अन्न पूर्व से भी अधिक रुचिकर प्रतीत होने लगता है। प्रथम खाये हुये स्वादु पदार्थ से अधिक तर्पित जिह्वा दूसरे पदार्थ से वैसी तर्पित नहीं हो सकती इसलिये दोनों के मध्य में मुख का प्रक्षालन कर लेना आवश्यक है। स्वादु अन्न-मन की प्रसन्नता, शरीर का बल, पुष्टि, उत्साह, हर्ष और सुख को उत्पन्न करता है तथा अस्वादु अन्न इससे विपरीत होता है। पूरा भोजन करने के बाद भी जिस पदार्थ को खाने की इच्छा होती हो उसे स्वादु भोजन कहते हैं ॥ ४८४-४८७ ॥

अशितश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिबेत् ॥४८८॥
दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः।
कुर्यादनिर्हृतं तद्धि मुखस्यानिष्टगन्धताम् ॥ ४८९ ॥

भोजन कर लेने पर तथा भोजन के मध्य में युक्तिपूर्वक स्वल्प मात्रा में जल पीना चाहिये। दांतों के बीच में घुसे हुये अन्न को किसी चांदी या ताम्र की पतली शलाका से या नीम के तिनके से धीरे धीरे निकाल लेना चाहिये। यदि इसे न निकाला जाय तो मुख में दुर्गन्ध पैदा कर देता है॥४८८-४८९॥

विमर्शः—भोजन के पूर्व या अन्त में जल पीने से पाचक रस दुर्बल हो जाते हैं अतः मध्य में थोड़ा सा जल आवश्यकता हो तो पीना चाहिये। अच्छा हो कि भोजन के एक दो या तीन घण्टे के बाद थोड़ा थोड़ा जल पिया करे। भोजनान्ते विषं वारि जीर्णे वारि बलप्रदम्। अत्यम्बुपानान्न विपच्यतेऽन्न निरम्बु-पानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि॥ (भावप्र०)। दांतों में फँसे अन्न को न निकालने से वहां सड़न होने लगती है। मुख से बदबू आने लगती है। दांतों की जड़ खराब होकर उस पर शर्करा (Terter) जमने लगती है तथा मसूड़ों में पूयजनक जीवाणु अपना निवास करके दन्तवेष्ट (Pyorrhoea) नामक रोग पैदा कर देता है जिससे धीरे धीरे दांत भी गिरने लगते हैं। इसका पूय तथा जीवाणु विष थोड़ा थोड़ा लाला के साथ या खाद्य-पेय के साथ आमाशय में जाता है जिससे मन्दाग्नि रोग हो जाता है और खून में भी पूय व विष के मिलते रहने से हलका सा ज्वर रहने लगता है तथा दिन-प्रतिदिन स्वास्थ्य गिरने लगता है अतएव भोजन के बाद अन्नकणों को निकाल कर ठीक तरह से जल द्वारा मुख साफ कर लेना चाहिये। वाग्भट तो भोजन के बाद भी दन्तधावन करना बताते हैं—प्रातर्मुक्त्वा च सुदृढं कषायकटुतिक्तकम्। भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन्।

जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेव तु।
भुक्तमात्रे कफश्चापि तस्माद् भुक्तेरितं कफम् ॥४९०॥
धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः।
पूगकङ्कोलकर्पूरलवङ्गसुमनःफलैः ॥ ४९१ ॥
कटुतिक्तकषायैर्वा मुखवैशद्यकारकैः।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥ ४९२ ॥

अन्न के पच जाने पर वायु बढ़ती है तथा विदग्धावस्था (पाकावस्था) में पित्त बढ़ता है एवं भोजन करने के बाद ही कफ बढ़ता है इस लिये भोजन के बाद उत्पन्न हुये या उत्पन्न होने वाले कफ को धूम-पान के द्वारा अथवा कषाय, कटु (चरपरे), तिक्त (कडवे) जैसे-सुपारी, कंकोल, कपूर, लौंग जायफल (जावित्री, इलायची, दालचीनी) आदि हृद्य पदार्थों के सेवन द्वारा किंवा ताम्बूल पत्र के साथ दूसरे सुगन्धित कटु, तिक्त, कषाय तथा मुख को स्वच्छ करने वाले द्रव्यों से विचक्षण (बुद्धिमान्) मनुष्य उसे (कफ को) नष्ट करे॥

विमर्शः—आयुर्वेद का धूमपान औषधों से बनता है अतः उसका प्रयोग ठीक है किन्तु वर्तमान में जो बीड़ी, सिगरेट आदि का प्रचार अत्यधिक बढ़ गया है वह देश के लिये तथा स्वास्थ्य के लिये घातक है। तमाखू में निकोटीन नामक सञ्चारी विष होता है वह धीरे २ शरीर में जमा होकर भयङ्कर नुकसान पहुंचाता है। धूम्रपान से फेफडे के रोग-कास, श्वास, उरःक्षत तथा क्षय सरीखे धन और प्राणों के नाशक रोग पैदा होते हैं अत एव इसे सर्वथा वर्जित करना चाहिये।

भुक्त्वा राजवदासीत यावदन्नक्लमो गतः।
ततः पादशतं गत्वा वामपार्श्वेन संविशेत्॥ ४९३॥
शब्दरूपरसान् गन्धान् स्पर्शांश्च मनसः प्रियान्।
भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति॥ ४९४॥
शब्दरूपरसाः स्पर्शा गन्धाश्चापि जुगुप्सिताः।
अशुद्ध्यन्नं तथा भुक्तमतिहास्यं च वामयेत्॥४९५॥
शयनं चासनं वाऽपि नेच्छेद्वाऽपि द्रवोत्तरम्।
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम्॥४९६॥

भोजन करने के बाद जब तक अन्न का क्लम (भारीपन) न गया हो तब तक ५-१० मिनिट राजा के समान अर्थात् सीधा सोना, शिर और कमर करके बैठना चाहिये। इसके अनन्तर सौ पांवडे इतस्ततः भ्रमण कर वापस आके वामपार्श्व से अर्थात् बांई करवट लेट जाना चाहिये। भोजन किया हुआ मनुष्य मन को प्रिय लगने वाले गायन या बच्चों के कर्णप्रिय शब्द, अच्छे रूप, रस, गन्ध और स्पर्श का सेवन करे जिससे उसका खाया हुआ अन्न भली प्रकार से आमाशयादि में रहता है तथा ठीक पचता है। मन को अप्रिय लगने वाले शब्द, रूप, रस, स्पर्श तथा गन्ध, खराब तथा ज्यादा मात्रा में खाया हुआ अन्न एवं भोजन के समय या पश्चात् अधिक हँसना-ये अन्न का वमन करा देते हैं। भोजन के अनन्तर अधिक देर तक सोना, बैठना, अधिक पतली वस्तु का पीना, अग्नि और धूप का सेवन, पानी में तैरना, जोर से चलना तथा घोड़े आदि पर बैठना-ये सब वर्जित करना चाहिये॥

विमर्शः—भोजन के अनन्तर कम से कम एक मुहूर्त्त (४८ मिनट) अवश्य आराम करना चाहिये। व्यायामञ्च व्यवायञ्च धावनं यानमेव च। युद्धं गीतञ्च पाठञ्च मुहूर्त्तं मुक्तवान् त्यजेत्॥ भुक्त्वोपविशतस्तन्द्रा शयानस्य तु पुष्टता। आयुश्चङ्क्रममाणस्य मृत्युर्धावति धावतः॥ (योग र०)। आयुर्वेद के ये उक्त वाक्य अक्षरशः सत्य व पूर्ण वैज्ञानिक है। भोजन के बाद शारीरिक तथा मानसिक आराम अत्यावश्यक है; कहा भी है—Sit a while after dinner। पाचन के समय और आमाशयादि पाचनसंस्थान की तरफ पाचक रसों के अधिक स्राव कराने के लिये रक्तसञ्चार अधिक आरम्भ हो जाता है तथा त्वचा मस्तिष्क की तरफ रक्त कम जाता है जिससे ठंढ लगना तथा तन्द्रादि लक्षण होते हैं। यदि भोजन के बाद श्रम किया जाय तो रक्त उन अङ्गों में अधिक जाने लगेगा और पाचन ठीक न होगा। भोजन के अनन्तर दौड़ना, व्यायाम करना, मैथुन करना प्राणघातक हैं। 'मृत्युर्धावति धावतः'।

न चैकरससेवायां प्रसज्येत कदाचन।
शाकावरान्नभूयिष्ठमम्लं च न समाचरेत्॥
एकैकशः समस्तान् वा नाभ्यश्नीयाद्रसान् सदा॥४९७॥

सदा एक ही प्रकार के रस के सेवन में आसक्त नहीं होना चाहिये तथा अधिक शाक, अवर (कुत्सित) अन्न और अम्ल पदार्थ अधिक मात्रा में नहीं खाने चाहिये। एक एक अथवा समस्त रसों को भी अधिक प्रमाण में सदा सेवन नहीं करने चाहिये॥ ४९७॥

प्राग्भुक्ते त्वविविक्तेऽग्नौ द्विरन्नं न समाचरेत्।
पूर्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्॥४९८॥
मात्रागुरुं परिहरेदाहारं द्रव्यतश्च यः।
पिष्टान्नं नैव भुञ्जीत मात्राया वा बुभुक्षितः॥ ४९९॥
द्विगुणं च पिबेत्तोयं सुखं सम्यक् प्रजीर्यति।
पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरम्॥ ५००॥
गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते॥ ५०१॥

पूर्व या प्रातःकाल के प्रथम भोजन के पश्चात् जब तक पाचकाग्नि शुद्ध या तीक्ष्ण न हो जाय दुबारा संध्या को अन्न नहीं देना चाहिये क्योंकि पूर्व का खाया हुआ अन्न विदग्ध (अधपचा) होने पर दुबारा भोजन करने वाला मनुष्य अपनी पाचकाग्नि को नष्ट करता है। मात्रा से भारी अर्थात् अधिक प्रमाण में और द्रव्य की दृष्टि से भारी आहार को वर्जित कर देना चाहिये। पिष्टान्न या गरिष्ठ पदार्थ नहीं खाने चाहिये अथवा क्षुधा पीडित मनुष्य मात्रापूर्वक ही उन्हें सेवन करे तथा उन्हें खाने पर द्विगुण जलपान करे। ऐसा करने से वे पिष्टान्न (गरिष्ठ पदार्थ) सुख से पच जाते हैं। पेय, लेह्य (मधु, श्रीखण्ड), अद्य (खाद्य जैसे चावल) तथा भक्ष्य (लड्डू, चने आदि) ये उत्तरोत्तर एक दूसरे से भारी होते, हैं। जो पदार्थ भारी होते हैं उन्हें आधी तृप्ति तक सेवन करना चाहिये तथा जो लघु होते हों उन्हे पूर्ण तृप्ति तक की मात्रा में खा सकते हैं॥ ४९८-५०१॥

विमर्शः—गुरु पिष्टमय द्रव्य तण्डुलान् पृथुकानपि। न जातु मुक्तवान् खादेन्मात्रा खादेद् बुभुक्षितः॥ द्रव्यापेक्षया च त्रिभाग-सौहित्यमर्धसौहित्य वा गुरूणामुपदिश्यते (चरकः)।

द्रवोत्तरो द्रवश्चापि न मात्रागुरुरिष्यते।
द्रवाद्यमपि शुष्कं तु सम्यगेवोपपद्यते॥ ५०२॥
विशुष्कमन्नमभ्यस्त न पाकं साधु गच्छति।
पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति॥ ५०३॥
स्रोतस्यन्नवहे पित्तं पक्वौ वा यस्य तिष्ठति।

विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते ॥ ५०४ ॥
शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत् ॥ ५०५ ॥

द्रव जिसमें अधिक हो ऐसे पदार्थ तथा केवल द्रव पदार्थों को प्रमाण (मात्रा) से गुरु (अधिक) रूप में नहीं सेवन करने चाहिये किन्तु द्रव की आढ्यता (अधिकता) से युक्त सूखे पदार्थ अच्छी प्रकार से पचते हैं। केवल विशुष्क अन्न का सेवन करने से वह ठीक रूप से नहीं पचता है। पिण्ड रूप में किया हुआ तथा द्रवादि से गीला नहीं किया हुआ अन्न सेवन करने से विदाह को प्राप्त हो जाता है। अन्नवाहक स्रोतस (Stomach) में तथा पित्त के स्थान (निर्माणदृष्टि से यकृत् Liver तथा सञ्चय-दृष्टि से Gall Bladder और कार्यकारण-दृष्टि से ग्रहणी (Deodenum) में जब पित्त रुक जाता है उस दशा में खाया हुआ विदाही अन्न तथा अविदाही अन्न दोनों विदग्ध हो जाते हैं। शुष्कभोजन, विरुद्ध भोजन तथा विष्टम्भ (कब्ज, शूल, आनाह) करने वाला भोजन जाठराग्नि को नष्ट कर देता है ॥ ५०२-५०५ ॥

आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥५०६॥

कफ की दुष्टि से आमाजीर्ण, पित्त की दुष्टि से विदग्धाजीर्ण तथा वात की दुष्टि से विष्टब्धाजीर्ण होता है। कई आचार्य एक चौथा रसशेषाजीर्ण भी मानते हैं ॥ ५०६ ॥

अत्यम्बुपानाद्विषमाशनाद्वा
सन्धारणात् स्वप्नविपर्ययाच्च ।
कालेऽपि सात्म्यं लघु चापि भुक्त-
मन्नं न पाकं भजते नरस्य ॥ ५०७ ॥
ईर्ष्याभयक्रोधपरिप्लुतेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
प्रद्वेषयुक्तेन च सेव्यमान-
मन्नं न सम्यक् परिणाममेति ॥ ५०८ ॥

अधिक जल पीने से, विषम अशन (भोजन) करने से, अधारणीय वेगों के धारण करने से, सोने में अनियमितता करने से, योग्य समय में तथा लघु भोजन करने पर भी वह ठीक तरह से नहीं पचता है। ईर्ष्या, भय तथा क्रोध से व्याप्त, लोभी तथा रोग और दीनता से युक्त एवं मात्सर्य युक्त पुरुष के द्वारा सेवन किया हुआ अन्न ठीक तरह से नहीं पचता है ॥ ५०७-५०८ ॥

माधुर्यमन्नं गतमामसंज्ञं
विदग्धसंज्ञं गतमम्लभावम् ।
किञ्चिद्विपक्वं भृशतोदशूलं
विष्टब्धमानद्धविरुद्धवातम् ॥ ५०९ ॥
उद्गारशुद्धावपि भक्तकाङ्क्षा
न जायते हृद्गुरुता च यस्य ।
रसावशेषेण तु सप्रसेकं
चतुर्थमेतत् प्रवदन्त्यजीर्णम् ॥५१०॥

कफ के प्रभाव से माधुर्य को प्राप्त अन्न आमाजीर्ण-संज्ञक, पित्त के कारण अम्लता को प्राप्त अन्न विदग्धाजीर्ण-संज्ञक एवं जब वायु के कारण कुछ पका हुआ तथा पेट में अत्यन्त सूई चुभोने की सी पीड़ा और शूल होताहै तथा वात का अवरोध हो जाता है या वायु खुल कर नहीं सरती है तब उसे विष्टब्धाजीर्ण संज्ञक कहते हैं। डकार के शुद्ध होने पर भी भोजन करने की आकांक्षा न होती हो तथा हृदय में जब भारीपन एवं मुख में पानी, थूक या लार भरी रहती हो तब उसे चतुर्थ रसशेषाजीर्ण कहते हैं ॥ ५०९-५१० ॥

विमर्शः—आमाद्यजीर्णलक्षणानि-तत्रामे गुरुतोल्लेद शोथो गण्डाक्षिकूटयो । उद्गारश्च यथाभुक्तमविदग्ध प्रवर्तते ॥ विष्टब्धे शूलमाध्मान विविधा वातवेदना । मलवातप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनम् ॥ विदग्धे भ्रमतृष्मूर्च्छा पित्ताच्च विविधा रुजः । उद्गारश्च सधूमाम्ल स्वेदो दाहश्च जायते । रसशेषोऽन्नविद्वेषो हृदयाशुद्धिगौरवे ॥ (अ सं.) । अजीर्णभेदाः—'माधवकर' ने अजीर्ण के ६ भेद लिखे हैं—आम विदग्ध विष्टब्ध कफपित्तानिलैस्त्रिभिः । अजीर्ण केचिदिच्छन्ति चतुर्थं रसशेषत ॥ अजीर्ण पञ्चम केचिन्निर्दोष दिनपाकि च । वदन्ति षष्ठ चाजीर्ण प्राकृत प्रतिवासरम् ॥

मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः ॥ ५११ ॥

मूर्च्छा, प्रलाप, वमन, लालादिस्राव, अङ्गों का टूटना या उनकी निर्बलता या ग्लानि तथा भ्रम ये अजीर्ण के उपद्रव होते हैं। कभी कभी अजीर्ण से मृत्यु भी हो जाती है ॥५११॥

तत्रामे लङ्घनं कार्यं विदग्धे वमनं हितम् ।
विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च ॥ ५१२ ॥

अजीर्णचिकित्सा सूत्र—आमाजीर्ण में लंघन, विदग्धाजीर्ण में वमन, विष्टब्धाजीर्ण में स्वेदन और रसशेषाजीर्ण में शयन हितकारी होता है ॥ ५१२ ॥

वामयेदाशु तं तस्मादुष्णेन लवणाम्बुना ।
कार्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् ॥ ५१३ ॥
लघुकायमतश्चैनं लङ्घनैः समुपाचरेत् ।
यावन्न प्रकृतिस्थ स्याद्दोषतः प्राणतस्तथा ॥ ५१४ ॥

अजीर्ण के रोगी को शीघ्र ही उष्णजल में लवण मिला कर वमन कराना चाहिये तथा जब तक अजीर्ण ठीक न होकर प्रकृतिस्थ न हो जाय तब तक अनशन या लंघन करना चाहिये। इस तरह काया के हलकी होने तक और रोगी के दोषदृष्टि से एवं प्राण (जीवन) दृष्टि से प्रकृतिस्थ होने तक लंघन द्वारा उपचार करना चाहिये ॥ ५१३-५१४ ॥

हिताहितोपसंयुक्तमन्नं समशनं स्मृतम् ।
बहु स्तोकमकाले वा विज्ञेयं विषमाशनम् ॥ ५१५ ॥
अजीर्णे भुज्यते यत्त तदध्यशनमुच्यते ।
त्रयमेतन्निहन्त्याशु बहून् व्याधीन् करोति वा ॥५१६॥

हित तथा अहितकर दोनों प्रकार के पदार्थ संयुक्तकर भोजन करना 'समशन' कहलाता है तथा कभी अधिक मात्रा में या कभी अल्पमात्रा में और वे समय में भोजन करना 'विषमाशन' कहलाताहै। पूर्व खाये भोजन के ठीक तरह से न पचने पर फिर दुबारा जो भोजन कर लिया जाता है उसे

'अध्यशन' कहते हैं। ये तीनों प्रकार के भोजन शीघ्र ही मनुष्य को मार डालते हैं अथवा अनेक प्रकार के (विसूचिका, अलसक, विलम्बिकादि) रोग उत्पन्न करते हैं ॥ ५१५-५१६ ॥

अन्नं विदग्धं हि नरस्य शीघ्रं
शीताम्बुना वै परिपाकमेति।
तद्धत्यस्य शैत्येन निहन्ति पित्त-
माक्लेदिभावाच्च नयत्यधस्तात् ॥ ५१७ ॥

पित्त की दुष्टि से मनुष्य का विदग्ध हुआ अन्न शीतल जल के पान से शीघ्र ही परिपाक को प्राप्त होता है कारण कि वह शीतल जल अपने शैत्यभाव से प्रकुपित पित्त को नष्ट कर देता है तथा अपने आर्द्रभाव से उसे नीचे दस्त के द्वारा निकाल देता है ॥ ५१७ ॥

विदह्यते यस्य तु भुक्तमात्रे
दह्येत हृत्कोष्ठगलं च यस्य।
द्राक्षाऽभयां माक्षिकसम्प्रयुक्तां
लीढ्वाऽभयां वा स सुखं लभेत ॥ ५१८ ॥

जिस मनुष्य के भोजन के बाद ही हृदय, कण्ठ और गले में जलन होने लग जाय उसे मुनक्का तथा हरड़ के चूर्ण को शहद के साथ चटाने से अथवा केवल हरड़ के चूर्ण को शहद के साथ चाटने से वह सुख को प्राप्त करता है ॥ ५१८ ॥

भवेदजीर्णं प्रति यस्य शङ्का
स्निग्धस्य जन्तोर्बलिनोऽन्नकाले।
प्रातः स शुण्ठीमभयामशङ्को
भुञ्जीत सम्प्राश्य हितं हितार्थी ॥ ५१९ ॥
स्वल्पं यदा दोषविबद्धमामं
लीनं न तेजःपथमावृणोति।
भवत्यजीर्णेऽपि तदा बुभुक्षा
सा मन्दबुद्धिं विषवन्निहन्ति ॥ ५२० ॥

बलवान् तथा स्निग्ध शरीर वाले जिस मनुष्य को भोजन के समय अजीर्ण की शङ्का हो जाय तब वह निज हितार्थ सोंठ के चूर्ण के सहित हरड़ के चूर्ण को शङ्कारहित होकर सेवन करके हितकर भोजन कर लेवे। जब दोषों से विबद्ध हुआ थोड़ा सा भोजन का आमांश अन्नादिवाहक स्रोतसों में लीन होकर पित्त के मार्ग को नहीं रोकता है तब अजीर्ण होने पर भी भूख लगी रहती है किन्तु वह झूठी भूख उस मन्द बुद्धि वाले मनुष्य को विष के समान मार डालती है ॥

अत ऊर्ध्वं प्रवक्ष्यामि गुणानां कर्मविस्तरम्।
कर्मभिस्त्वनुमीयन्ते नानाद्रव्याश्रया गुणाः ॥ ५२१ ॥

अब इसके अनन्तर द्रव्य में रहने वाले गुणों के कर्म का विस्तार से वर्णन करते हैं। नाना द्रव्यों के आश्रित गुणों का ज्ञान उनके कर्म से ही अनुमेय (ज्ञेय) होता है ॥ ५२१ ॥

ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाहजित्।
उष्णस्तद्विपरीतः स्यात् पाचनश्च विशेषतः ॥ ५२२ ॥
स्नेहमार्दवकृत् स्निग्धो बलवर्णकरस्तथा।
रूक्षस्तद्विपरीतः स्याद्विशेषात् स्तम्भनः खरः ॥ ५२३ ॥
पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरुः।
विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः ॥ ५२४ ॥
दाहपाककरस्तीक्ष्णः स्रावणो, मृदुरन्यथा।
साटोपलेपबलकृद् गुरुस्तर्पणबृंहणः ॥ ५२५ ॥
लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा।
दशाद्याः कर्मतः प्रोक्तास्तेषां कर्मविशेषणैः ॥
दशैवान्यान् प्रवक्ष्यामि द्रवादीस्तान्निबोध मे ॥५२६॥

द्रव्याश्रित शीत गुण-उष्णता से पीड़ित मनुष्यों को सुख पहुचाने वाला, स्तम्भक तथा मूर्च्छा, तृष्णा, स्वेद और दाह को नष्ट करता है किन्तु उष्ण गुण-शीतगुणों से विपरीत होता है और विशेषकर पाचक होता है। स्निग्ध गुण-शरीर में स्निग्धता तथा मृदुता का जनक एवं देह के बल और वर्ण को बढ़ाता है। रूक्षगुण-स्निग्ध के विपरीत होता है परन्तु वह विशेषकर अतिसारादि में स्तम्भन कार्य करता है तथा खर-स्पर्शयुक्त होता है। पिच्छिलगुण-जीवन शक्ति का वर्द्धक, बलजनक, भग्नास्थियों का संधान करने वाला कफ-कारक और भारी होता है। विशद गुण-इससे विपरीत होता है तथा क्लेद का शोषण करने वाला एवं व्रण का रोपक होता है। तीक्ष्ण गुण-दाह, पाक और व्रणादि से स्राव कराता है किन्तु मृदुगुण-इससे विपरीत होता है। गुरु गुण-साद (ग्लानि), उपलेप (देह में मलवृद्धि) तथा बल को बढ़ाता है तथा शरीर, इन्द्रियां, मन और आत्मा को तृप्त करने वाला तथा देह का पोषक होता है किन्तु लघुगुण-इसके विपरीत लेखन करने वाला एवं व्रण का रोपक होता है। इस तरह आदि के दशगुण उनके विशिष्ट कर्मों के अनुसार कह दिये हैं। अब द्रवादि अन्य दश गुणों का वर्णन करता हूं उन्हें सुनो ॥ ५२२-५२६ ॥

विमर्शः—द्रवादीन् = द्रवसान्द्रश्लक्ष्णकर्कशसुगन्धदुर्गन्धसरमन्द-व्यवायिविकास्याशुकारिसूक्ष्मगुणान्।

द्रवः प्रक्लेदनः, सान्द्रः स्थूलः स्याद् बन्धकारकः।
श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा ॥५२७॥
सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः।
दुर्गन्धो विपरीतोऽस्माद् घृल्लासारुचिकारकः ॥ ५२८ ॥
सरोऽनुलोमनः प्रोक्तो, मन्दो यात्राकरः स्मृतः।
व्यवायी चाखिल देहं व्याप्य पाकाय कल्पते ॥ ५२९ ॥
विकासी विकसन्नेवं धातुबन्धान् विमोक्षयेत्।
आशुकारी तथाऽऽशुत्वाद्धावत्यम्भसि तैलवत् ॥ ५३०॥
सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतःस्वनुसरः स्मृतः।
गुणा विंशतिरित्येवं यथावत्परिकीर्त्तिताः ॥ ५३१ ॥

द्रवगुण-शरीर में क्लेद करने वाला है। सान्द्रगुण-देह को स्थूल करने वाला तथा बन्धन (उपचय) कारक है। श्लक्ष्णगुण-पिच्छिल के समान होता है तथा कर्कशगुण-विशद के समान होता है। सुगन्धगुण-सुख का जनक, सूक्ष्म, रोचक, तथा मृदु होता है। दुर्गन्धगुण-इसके विपरीत होता है तथा हृल्लास और अरुचिकारक होता है। सरगुण-वातादि का अनुलोमक

होता है तथा मन्दगुण–देह की यात्रा को करने वाला है। व्यवायी गुण–प्रथम समस्त शरीर में व्याप्त होकर पश्चात् परिपक्व होता है। विकासीगुण–अपक्वावस्था में ही समग्र शरीर में फैलकर मद्य तथा विष के समान शरीर की धातुओं को तथा सन्धिबन्धनों को शिथिल करता है। आशुकारी गुण–जल में डाले हुये तैल की तरह अपनी शीघ्रगति से समस्त शरीर में फैलता है। सूक्ष्मगुण–अपनी सूक्ष्मता से शरीर के सूक्ष्म स्रोतसों में प्रविष्ट करता है। इस तरह इन बीस गुणों का यथावत् वर्णन कर दिया है ॥ ५२७–५३१ ॥

विमर्शः—यद्यपि गणना के नाम से सुश्रुत बीस गुणों का नाम लेता है किन्तु इन अन्तिम द्रवादि गुण दश न होकर बारह हैं अतएव असली सुश्रुत का पाठ अन्य ही होना चाहिये था। वाग्भट भी बीस गुण ही मानता है जैसे—गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः। गुणाः सुसूक्ष्मविशदा विंशतिः सविपर्ययाः ॥ चरक ने भी बीस गुण लिखे हैं यथा— विंशतिगुणो गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवानुगमात् ॥ श्रीभावमिश्रः–'सुश्रुते तु गुणा एते विंशतिस्तान् ब्रुवे शृणु। गुरुर्लघु स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः ॥ पिच्छिलो विशदः शीत उष्णश्च मृदुकर्कशौ। स्थूल सूक्ष्मो द्रव शुष्क आशुर्मन्द. स्मृता गुणा.॥' इति। 'पूर्वं व्याप्याखिल कायं ततः पाक च गच्छति। व्यवायि तथा भङ्गा फेनं चाहिसमुद्भवम् ॥' इति। 'सन्धिबन्धांस्तु शिथिलान् यत्करोति विकासि तत्। विश्लेष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवा ॥' इति।

सम्प्रवक्ष्याम्यतश्चोर्ध्वमाहारगतिनिश्चयम् ॥ ५३२ ॥

अब इसके अनन्तर आहार की गति के निश्चय के विषय में वर्णन करता हूँ ॥ ५३२ ॥

विमर्शः—आहार की गति या परिवर्तन फूड मेटाबोलिज्म (Food metabolism) है। शरीर में एनाबोलिज्म (Anabolism) या रचनात्मक क्रिया तथा केटाबोलिज्म (Katabolism) या विनाशात्मक क्रिया करके दो कार्य होते रहते हैं। ये दोनों क्रियाएँ साथ साथ चलती रहती हैं। प्रथम क्रिया से सेवित-खाद्य द्रव्यों के रस–रक्तादि बन कर शरीर की वृद्धि, क्षतिपूर्ति और रक्षा होती है। द्वितीय क्रिया से शारीरिक धातुओं में Co_2 गैस, जल, अमोनिया यूरिया आदि अनुपयोगी त्याज्य पदार्थ बन कर स्वेद, मूत्र और प्रश्वास बाहर निकलते हैं।

पञ्चभूतात्मके देहे ह्याहारः पाञ्चभौतिकः।
विपक्वः पञ्चधा सम्यग्गुणान् स्वानभिवर्द्धयेत् ॥५३३॥

पृथिवी आदि पञ्च महाभूतों से बने हुये देह में गया हुआ पाञ्चभौतिक आहार पाचक पित्त या अग्नि (पाचक रसों) द्वारा ठीक तरह से पक्व होकर अपने अपने गुण वाले शारीरिक अङ्ग या धातुओं को बढ़ाता है ॥ ५३३ ॥

विमर्शः—आयुर्वेद देह को पञ्चभूतनिर्मित मानता है। पाश्चात्यविज्ञान समस्त पदार्थों को नव्वे तत्त्वों (Elements) से बना मानते हैं जिनमें से शरीर में २३ मूल तत्त्व पाये जाते हैं। आक्सिजन, कार्बन, हैड्रोजन, नैट्रोजन, फोस्फोरस, चूना, गन्धक, क्लोरीन, सोडियम, लोह, पुटेशियम, मेग्नेशियम तथा फ्लोरिन ये मुख्य है। देह में प्रोटीन, फैट, कार्बो हैड्रेट, साल्ट और जल ये पांच मुख्य हैं तथा देह-पोषणार्थ भोजन में भी ये पञ्च तत्त्व अवश्य होने चाहिये। आयुर्वेद आहार को पाञ्चभौतिक मानता है किन्तु डाक्टरी इन्हीं प्रोटीनादि पांच तथा विटामिन से युक्त आहार को मानते हैं। चरके अन्नपरिपाकक्रियावर्णनम्–अन्नमादानकर्मा तु प्राण कोष्ठ प्रकर्षति। तद् द्रवैर्भिन्नसघात स्नेहेन मृदुता गतम् ॥ समानेनावधूतोऽग्निरुदर्य पवनेन तु। काले मुक्त सम सम्यक् पचत्यायुर्विवृद्धये ॥ एव रसमलायान्नमाशयस्थमध. स्थित। पचत्यग्निर्यथा स्थाल्यामोदनायास्तु तण्डुलम् ॥ अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः। मधुरात्प्राक् कफोऽम्लात् फेनभूत उदीर्यते ॥ परन्तु पच्यमानस्य विदग्धस्याम्लभावत। आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते ॥ पक्वाशयन्तु प्राप्तस्य शोष्यमाणस्य वह्निना। परिपिण्डितपक्वस्य वायु स्थात्कटुभावत ॥ अन्नमिष्ट द्युपक्वमिष्टैर्गन्धादिभि. पृथक्। देहे प्रीणाति गन्धादीन् घ्राणादीनीन्द्रियाणि च ॥ भौमाप्याग्नेयवायव्या पञ्चोष्माणः सनाभसा'। पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्ति हि ॥ यथास्व स्वञ्च पुष्यन्ति देहद्रव्यगुणा पृथक्। पार्थिवाः पार्थिवानेव शेषाः शेषाश्च कृत्स्नश ॥ सप्तभिर्दैहधातारो द्विविधाश्च पुनः पुन'। यथास्वमग्निभि पाक यान्ति किट्टप्रसादवत् ॥ (च. ग्रहणीचिकित्सा)। डाक्टरी में आहार के कार्बोहैड्रेट का पाचन मुख के लालारस से तथा वहां से आमाशय में जाने पर आमाशयिक रस (Gastric juice) द्वारा पाचन तथा वहां से ग्रहणी में जाने पर भोजन के फैट, प्रोटीन तथा कार्बो हैड्रेटस का पाचन यकृत् तथा पित्ताशय से आये हुये पित्त (Bile), अग्न्याशय (Pancrease) से आये हुये अग्निरस (Pancratic juice) एवं आन्त्रिक रस (सकस इण्टेटिकस) के द्वारा होता है। इस प्रकार सम्यक् पचे हुये भोजन का द्रवांश या रसांश ग्रहणी से आगे क्षुद्रान्त्र में पहुंचता है। क्षुद्रान्त्र की दीवारों में लगी हुई रसाङ्कुरिकाएं (Villi) फैट के पाचन से बने हुये सारभूत रसांश का शोषण कर रस प्रपा (Cisterna chyle) में जाता है तथा वहां से रसकुल्या में और रसकुल्या से अक्षका धरा सिरा (Subclavian vein) के रक्त में मिल जाता है। पचे भोजन के प्रोटीन तथा शर्करा जातीय पदार्थ के सूक्ष्मरसांश प्रतिहारिणी सिरा की सूक्ष्म शाखा द्वारा प्रथम यकृत् में तथा वहां से अधरा महासिरा में होते हुये हृदय के दक्षिणालिन्द में पहुच जाते हैं। रसों से बचे हुये शेष स्थूल भाग बृहदन्त्र में घूमते हुये मल के रूप में गुद द्वारा बाहर निकल जाते हैं।

अविदग्धः कफं पित्तं विदग्धः पवनं पुनः।
सम्यग्विपक्वो निस्सार आहारः परिवृंहयेत् ॥ ५३४ ॥

अविदग्ध (मधुरावस्था को प्राप्त) आहार कफ को बढ़ाता है। विदग्ध (अम्लावस्था को प्राप्त) आहार पित्त को बढ़ाता है तथा ठीक तरह से पकने पर (रसादि के शोषण से बचा हुआ) निःसार (मल या किट्टरूपी) आहार वायु को बढ़ाता है ॥ ५३४ ॥

विमर्शः—'आहार के प्रथम कफ बनाने का तात्पर्य लाला रस को उत्तेजित करना तथा विदग्धावस्था में पित्त बनाने का तात्पर्य Bile को उत्तेजित करना एवं पाकानन्तर बृहदन्त्र में जाकर वायु बनाने का तात्पर्य वहां सडन से Gases बनती हैं' ऐसे समन्वय समझना चाहिये।

विण्मूत्रमाहारमलः सारः प्रागीरितो रसः।
स तु व्यानेन विक्षिप्तः सर्वान् धातून् प्रतर्पयेत् ॥५३५॥

पचे हुये आहार का मल-विष्ठा और मूत्र हैं तथा सार-भाग रस कहलाता है। यह रस व्यान वायु से प्रेरित होकर शरीर की समस्त रस-रक्तादि धातुओं को तृप्त करता रहता है॥

किलासमपि कुष्ठविकल्प एव; तच्त्रिविधम्-वातेन पित्तेन श्लेष्मणा चेति । 'कुष्ठकिलासयोरन्तरं-त्वग्गतमेव किलासमपरिस्रावि च । तद्वातेन मण्डलमरुणं परुषं परिध्वंसि च, पित्तेन पद्मपत्रप्रतीकाशं सपरिदाहं च, श्लेष्मणा श्वेतं स्निग्धं बहलं कण्डूमच्च । तेषु सम्बद्धमण्डलमन्तेजातं रक्तरोम चासाध्यमग्निदग्धं च ॥१७॥

किलास भी कुष्ठ का ही एक भेद तथा यह वात से, पित्त से और कफ से ऐसे तीन प्रकार का होता है। कुष्ठ और किलास का भेद यह है कि किलास केवल त्वचागत ही रोग होता है तथा यह स्रावरहित होता है। यह किलास वात से मण्डलयुक्त, अरुण, स्पर्श में कठिन तथा त्वचा और वहाँ के केशों का नाशक होता है। पित्त से कमलपत्र के समान तथा दाहयुक्त होता है। कफ से श्वेत, स्पर्श में स्निग्ध, स्थूल और कण्डूयुक्त होता है। इन तीनों प्रकारों में जिसके मण्डल (चकत्ते) परस्पर मिले हुये हों तथा जो 'अन्तस्थान अर्थात् ओष्ठ, पाणि-पाद तथा गुह्यस्थान में उत्पन्न हुआ हो तथा जिसके बाल लाल हो गये हों एवं जो अग्नि से जल जाने पर उत्पन्न हुआ हो ऐसा किलास असाध्य होता है ॥ १७ ॥

विमर्शः—किलास को श्वित्र तथा लोक में सफेद दाग एवं डाक्टरी में ल्यूकोडर्मा (Leucoderma) कहते हैं। भेद—यह दोषज तथा व्रणज ऐसे दो प्रकार का होता है—श्वित्रन्तु द्विविधं विद्याद्दोषजं व्रणजं तथा। तत्र मिथ्योपचाराद्धि व्रणस्य व्रणजं स्मृतम् ॥ (भोज०)। भालुकिना धातुभेदेन किलासस्य संज्ञान्तरं दर्शितम्-वातात् तत्तु विशेषं मांसधातुसमाश्रयम्। मेदःश्रितमवेच्चित्रं दारुणं रक्तसंश्रयम् ॥ चरकेऽपि-दारुणं वातजं श्वित्रं किलासं नामभिर्लिभिः। किलास कारण—वर्चांस्यतीव्यानि कृतघ्नभावो निन्दा गुरूणां गुरुधर्षणञ्च । पापक्रिया पूर्वकृतञ्च कर्म हेतु, किलासस्य विरोधि चात्रम् ॥ (चरक)। वर्तमान विज्ञान ने इस रोग का कारण अभी तक अज्ञात ही लिखा है 'The etiology is quite unknown' कुष्ठकिलास भेद.—प्रपच्य धातून् व्याप्यान्त सर्वान् सङ्क्षेप चावहेत्। सत्वेदक्षेदमकोपात् कृमीन् सृजनान् सुदारुणान् ॥ लोमवक्त्रनाशुधमनीतन्त्रास्थीनि वै क्रमात्। भक्षयेत्, श्वित्रमस्माच्च कुष्ठवाग्भिरुदाहृतम् ॥ (अ० सं०)। अस्मात्कारणाच्चिरत्व बाह्यकुष्ठशब्देनोच्यते। क्षेत्रकृम्याद्यभावात् सत्यपि त्वग्रोगत्वम्। (इन्दुः)। अन्यत्रापि—त्वग्गतञ्च यदत्रावि तत्किलास प्रकीर्तितम्। यदा त्वचमतिक्रम्य तदाजूनवगाहते। हित्वा किलाससंज्ञञ्च कुष्ठसंज्ञां लभेत्तदा ॥ (विश्वामित्रः)। १. इन उक्त प्रमाणों से स्पष्ट है कि किलास त्वचागत रोग है अतएव इसे बाह्य कुष्ठ नाम भी दिया है तथा कुष्ठ रक्त-मांस-मेदोऽस्थि आदि गम्भीर धातुओं में होने वाला रोग है। २. किलास से किसी प्रकार का स्राव नहीं निकलता है किन्तु कुष्ठ में आभ्यन्तरीय धातुएँ गलगलकर स्रावरूप से झरती रहती हैं। ३. कुष्ठ बेसिलस लेप्री नामक जीवाणु से उत्पन्न होता है किन्तु किलास जीवाणुजन्य न होकर त्वचा के ऊपरी पर्त में रहने वाले मेल्यानिन (Melanin) नामक रङ्ग के अभाव से होता है। यह रङ्ग त्वचा को रङ्गीन रखता है तथा धूप से शरीर की रक्षा करता है। जो लोग उष्ण प्रदेशों में रहते हैं तथा गरमी में काम करते हैं उनमें इस रङ्ग की अधिकता हो जाने से वे लोग काले हो जाते हैं। किलास में त्वचा का यह रङ्ग जाता रहता है जिससे वह रङ्गहीन स्थान सफेद हो जाता है। ४ कुष्ठ के स्थान में सुन्नता रहती है किन्तु किलास के स्थान में वहाँ के वातसूत्रों में कोई विकृति न होने से स्पर्शज्ञान ज्यों का त्यों रहता है किन्तु त्वचा की मृदुता अवश्य जाती रहती है। ५. कुष्ठ फैलने वाला औपसर्गिक (Infective) रोग है किन्तु किलास औपसर्गिक न होने से रोगी से घृणा करना उचित नहीं है। परिध्वंसि=रोमापहारि। तदुक्तम्—'सदाहं रोमविध्वंसि' इति। अन्ते जातम्=ओष्ठपाणिपादगुह्योत्पन्नमित्यर्थः। तदुक्तमष्टाङ्गसङ्ग्रहे-'गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्। वर्जनीयं विशेषेण किलासं मिडिमिच्छता ॥' इति। तलमत्र पादतलमिति विजयरक्षितः। रक्तरोम=शुक्लरोम, असाध्यलक्षणे चरकेण—'यच्छुक्लरोमबहुलं यत्सलग्नं परस्परम्। यच्च वर्षगणोपेतं तच्छ्वित्रं नैव सिद्धयति ॥' इति।

कुष्ठेषु तु त्वक्सङ्कोचस्वापस्वेदशोफसेदकौण्यस्वरोपघाता वातेन, पाकावदरणाङ्गुलिपतनकर्णनासाभङ्गाचिरागसत्त्वोत्पत्तयः पित्तेन, कण्डूवर्णभेदशोफास्रावगौरवाणि श्लेष्मणा।
तत्राविवलप्रवृत्तं पौण्डरीकं काकणं चासाध्यम् ॥ १८ ॥

कुष्ठों में वायु की अधिकता से त्वचा का सङ्कोच, सुन्नता, स्वेद का अभाव या आधिक्य, शोथ, त्वगादि का भेद (दारण), कौण्य (हस्त-पाद की विकलता), स्वरभङ्ग ये लक्षण होते हैं तथा पित्त की अधिकता से पाक, भेदन, अङ्गुलियों का गल कर गिर (झड) जाना, कान और नासिका का गल जाना, नेत्रों में लाली तथा सत्त्व (कृमि आदि जीवों) की उत्पत्ति ये लक्षण होते हैं एवं कफ की अधिकता से त्वचा में कण्डू, वर्णभिन्नता, शोथ, स्राव तथा भारीपन ये लक्षण होते हैं। इन कुष्ठों में से जो आदि बल (माता-पितृ दोष) से प्रवृत्त (उत्पन्न) हुआ पौण्डरीक और काकणक कुष्ठ असाध्य होते हैं ॥ १८ ॥

विमर्शः—डाक्टरी में कुष्ठ के तीन भेद किये गये हैं यहां पर कुष्ठ का जो वातिक भेद किया गया है उसे नर्व लेप्रोसी (Nerve Leprosy) कह सकते हैं। इसमें जीवाणु शरीर के विविध वातसूत्रों को आक्रान्त करते हैं जिससे सुप्ति, सरसराहट, कौण्य आदि लक्षण होते हैं। २ ग्रन्थिक कुष्ठ (Nodular Leprosy) इसमें शरीर की त्वचा में छोटी छोटी गाठें लाल धब्बे बन जाते हैं तथा त्वचा मोटी पड़ जाती हैं।

ग्रन्थियां फूट कर व्रण बन जाती हैं। अंगुलियां, मुख, कर्ण, नासा में होने से वे गलते जाते हैं। यह पित्तकफज कुष्ठ हो सकता है। ३. मिश्र (Mixed) प्रकार ही अधिक मिलता है। 'न च किञ्चिदस्ति कुष्ठमेकदोषप्रकोपनिमित्तम्' (चरकः)। असाध्यकुष्ठलक्षणम्—अस्याग्रैवास्थायामुद्भवा कुष्ठिनं स्पृशन्ति तथा प्रस्रवणमङ्गभेदः, पतनान्यङ्गावयवानां, तृष्णाज्वरातिसारदाहदौर्बल्यारोचकाविपाकाश्च, तद्विधमसाध्यं विद्यात् । (च. नि)। निदाने साध्यासाध्यविचारः—साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्। मेदसि द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंस्थितम्॥ कृमिदूषीविसन्दाग्निसंयुक्तं यत्त्रिदोषजम्। प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम्॥ पञ्चकर्मगुणातीतं कुष्ठं हन्तीह मानवम्॥

भवन्ति चात्र—

यथा वनस्पतिर्जातः प्राप्य कालप्रकर्षणम्।
अन्तर्भूमिं विगाहेत मूलैर्वृष्टिविवर्द्धितैः॥ १९॥
एवं कुष्ठं समुत्पन्नं त्वचि कालप्रकर्षतः।
क्रमेण धातून् व्याप्नोति नरस्याप्रतिकारिणः॥ २०॥

जिस तरह उत्पन्न हुई वनस्पति (वृक्ष) काल की अधिकता से तथा वृष्टि से बढ़ कर जड़ों के द्वारा भूमि के भीतर जम (फैल) जाती है उसी प्रकार से प्रथम त्वचा में उत्पन्न हुआ कुष्ठ चिकित्सा नहीं करने से कुछ समय के पश्चात् क्रम से रक्त-मांसादि धातुओं में व्याप्त हो जाता है ॥ १९-२० ॥

विमर्शः—कुष्ठ किसी भी प्रकार का हो किन्तु उसकी सर्वप्रथम उत्पत्ति त्वचा से ही सुप्ति, मण्डलोत्पत्ति और वर्णभेद के रूप में प्रारम्भ होती है—सर्वकुष्ठेषु प्रथमं त्वच्यवदर्यं वैकृतं भवति विशेषेण, पश्चाद्वैशेषिकी दुष्टिः कालप्रकर्षाद्रक्तादिषु भवति। (चक्रपाणिः)।

स्पर्शहानिः स्वेदनत्वमीषत्कण्डूश्च जायते।
वैवर्ण्यं रूक्षभावश्च कुष्ठे त्वचि समाश्रिते॥ २१॥
त्वक्स्त्रावो रोमहर्षश्च स्वेदस्याभिप्रवर्त्तनम्।
कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते॥ २२॥
बाहुल्यं वक्त्रशोफश्च कार्कश्यं पिडकोद्गमः।
तोदः स्फोटः स्थिरत्वं च कुष्ठे मांससमाश्रिते॥ २३॥
दौर्गन्ध्यमुपदेहश्च पूयोऽथ क्रिमयस्तथा।
गात्राणां भेदनं चापि कुष्ठे मेदःसमाश्रिते॥ २४॥
नासाभङ्गोऽक्षिरागश्च क्षते च क्रिमिसम्भवः।
भवेत् स्वरोपघातश्च ह्यस्थिमज्जसमाश्रिते॥ २५॥
कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम्।
शुक्रस्थानगते लिङ्गं प्रागुक्तानि तथैव च॥ २६॥

त्वगादिगत कुष्ठ लक्षण—त्वचा में कुष्ठ के उत्पन्न होने पर स्पर्शहानि, स्वेद आना, कुछ कण्डू, विवर्णता तथा रूक्षता ये लक्षण होते हैं। कुष्ठ के रक्त में होने से त्वचा में सुप्तता, रोमहर्ष, पसीने का अधिक आना, खुजली चलना तथा दुर्गन्धित पूय का निकलना ये लक्षण उत्पन्न होते हैं। कुष्ठ के मांसधातु में होने से शरीर में मोटापन, मुखशोष, कर्कशता, शरीर पर पिडकोत्पत्ति, सूई चुभोने की सी पीड़ा, त्वचा में या शरीर में दरारें पड़ना और स्थिरता ये लक्षण पैदा होते हैं। मेदोधातु में कुष्ठ के आश्रित होने पर शरीर में दुर्गन्धि तथा मलवृद्धि, पूय, कीडे पडना, शरीराङ्गों का भेदन (विदारण) होना ये लक्षण होते हैं। अस्थि तथा मज्जा में कुष्ठ के उपस्थित होने पर नासाभङ्ग, नेत्रों में लाली, व्रण में कृमियों की उत्पत्ति तथा स्वरभङ्ग ये लक्षण होते हैं। शुक्र स्थान में कुष्ठ के संश्रित होने पर कौण्य (अङ्गुलिवैकल्य), चलनक्रियानाश, अङ्गों में पीडा अथवा भेद (विदार), क्षत (व्रण) का फैलना तथा पूर्व में कहे हुये लक्षण होते हैं २१-२६

स्त्रीपुंसयोः कुष्ठदोषाद् दुष्टशोणितशुक्रयोः।
यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितम्॥ २७॥

अनुवंशपरम्परा—कुष्ठ दोष से स्त्री के शोणित (अन्तरार्तव=(Ova) तथा पुरुष के शुक्र (कीट) के दूषित होने पर उनसे जो सन्तान पैदा होती है वह कुष्ठप्रकृतिक होती है॥

विमर्श—पुरुष के वीर्य (शुक्रकीट) में कुष्ठ होने से वह पण्ड तथा स्त्री के बीजग्रन्थि (Ovary) या अण्ड (Ova) पर कुष्ठ प्रभाव होने से वह वन्ध्या हो जाती है—यदा स्त्रीपुंसयो कुष्ठिनोर्बीजमुपहत स्यात्तदा तयो प्रजा नोत्पद्यते इति डल्हण.। दुष्ट शुक्रमार्तव वा सर्वथा बीजत्वानुपघातादपत्यजनकं, परन्तु विकृतं जनयतीति द्रष्टव्यमिति विजयरक्षित । किन्तु इन अङ्गों पर प्रभाव न हो तो कुष्ठी माता-पिता के सन्तान हो सकती है। जातमात्र सन्तान कुष्ठी नहीं हो सकती है किन्तु उन माता-पिता के सम्पर्क में रहने से बच्चों में कुष्ठ होता है। यदि जन्मते ही बच्चे पृथक् कर दिये जांय तो उनमें रोग नहीं हो सकता। 'नैवं नहि प्रमेहिना जात इत्येतावता उत्पन्नमात्र एव प्रमेही भवति किं तर्हि कालवशेन, दुष्टेरभिव्यक्त्या तथा कुष्ठिजातस्य कुष्ठम् (मधुकोपव्याख्या)।

कुष्ठमात्मवतः साध्यं त्वग्रक्तपिशिताश्रितम्।
मेदोगतं भवेद्याप्यमसाध्यमत उत्तरम्॥ २८॥

आत्मवान् (जितेन्द्रिय) मनुष्य के त्वचा, रक्त और मांस में उत्पन्न कुष्ठ साध्य होता है तथा मेदोधातु में चले जाने पर याप्य होता है तथा इनसे उत्तर (आगे) की धातुओं (अस्थि, मज्जा और शुक्र) में जाने पर असाध्य हो जाता है॥ २८॥

ब्रह्मस्त्रीसज्जनवधपरस्वहरणादिभिः।
कर्मभिः पापरोगस्य प्राहुः कुष्ठस्य सम्भवम्॥ २९॥

कुष्ठहेतु—ब्राह्मण, स्त्री और सज्जन (साधु, महात्मा) पुरुषों की हत्या एवं दूसरे के धन को अपहरण आदि कर्मों से इस पापजन्य कुष्ठ रोग की उत्पत्ति होती है॥ २९॥

म्रियते यदि कुष्ठेन पुनर्जातेऽपि गच्छति।
नातः कष्टतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्॥ ३०॥

यदि कोई कुष्ठ रोगी मर जाता है तब वह दूसरे जन्म में भी कुष्ठ रोग से ग्रस्त होता है इस लिये जैसा यह कुष्ठ खराब रोग कहा गया है वैसा दूसरा कष्टदायी कोई रोग नहीं है॥३०॥

आहाराचारयोः प्रोक्तामास्थाय महतीं क्रियाम्।
ओषधीनां विशिष्टानां तपसश्च निषेवणात्॥
यस्तेन मुच्यते जन्तुः स पुण्यां गतिमाप्नुयात्॥ ३१॥

कुष्ठमोक्षोपायफल—जो व्यक्ति उचित तथा पथ्यकर आहार और विहार में महान् श्रद्धा करके उसका सेवन करने से तथा विशिष्ट ओषधियों और तपश्चर्या के सेवन करने से इस कुष्ठ रोग से मुक्त हो जाता है वह उत्तम गति को प्राप्त होता है॥३१॥

विमर्श—कुष्ठ रोग दुष्ट कर्म तथा दोष जन्य व्याधि है जैसा कि कहा है—यथाशास्त्रं विनिर्गातो यथाविधि चिकित्सित। न शमं याति यो व्याधि स ज्ञेय कर्मजो बुधैः॥ अन्यच्च—कर्मजा व्याधय केचिद्दोषजा सन्ति चापरे। कर्मदोषोद्भवाश्चान्ये। (उ तं. अ. ४०)। अतः इस लिये इसकी चिकित्सा भी कर्म तथा दोष दोनों को नष्ट करने वाली होनी चाहिये—'कर्मदोषक्षयकृता तेषां सिद्धिर्विधीयते'। अन्यच्च—कर्मक्षयात् कर्मकृता दोषजा स्वस्थमेव हि। कर्मदोषोद्भवा याति कर्मदोषक्षयात् क्षयम्॥ इसी लिये कुष्ठ की तपश्चरण द्वारा कर्म क्षय एवं तुवरक, खदिर, रसमाणिक्यादि द्वारा दोषक्षयकारक चिकित्सा लिखी है।

प्रसङ्गान्नात्रसंस्पर्शान्निश्वासात्सहभोजनात्।
सहशय्याऽऽसनाच्चापि वस्त्रमाल्यानुलेपनात्॥ ३२॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम्॥ ३३॥

इति सुश्रुतसंहितायां निदानस्थाने कुष्ठनिदानं नाम पञ्चमोऽध्यायः॥ ५॥

औपसर्गिक-रोगप्रसरण-हेतु—रोगग्रस्त स्त्री का स्वस्थ पुरुष के तथा रोगग्रस्त पुरुष का स्वस्थ स्त्री के साथ मैथुन करने से (कुष्ठ, उपदंश, पूयमेह), शरीर के संस्पर्श से (कुष्ठ, शीतला), श्वास में श्वास मिलाने से (राजयक्ष्मा, न्यूमोनिया, रोहिणी, कुक्कुर खांसी), सहभोजन से (मोतीझरा, अतिसार, हैजा), साथ में सोने से (कुष्ठ, शीतला), रोगी के वस्त्र, माला तथा लगाये हुये चन्दन इनके सेवन से कुष्ठ, (कुष्ठ, चेचक) ज्वर, शोष (राजयक्ष्मा), नेत्राभिष्यन्द तथा अन्य औपसर्गिक रोग एक मनुष्य से दूसरे मनुष्य को संक्रान्त होते हैं॥ ३२-३३॥

विमर्श—अनुलेपन का अर्थ धारण है—उपानहौ च वासश्च धृतमन्यैर्न धारयेत्। उज्झेन्मल्लकं चैव करकमेव च। (मनुः)। औपसर्गिक रोगों को छूत की बीमारियां या संक्रामक (Infections) रोग कहते हैं। स्पर्शनिश्वास सहान्नपानाद्यैरन्यदीयैर्य एव च। उपद्रवाश्च कुष्ठानां औपसर्गिकसंज्ञका॥ अन्यच्च—स्पर्शनिश्वासहारशय्यादिसेवनात् प्राणिनो गदाः। सर्वे सञ्चारिणो नेत्रत्वग्विकारा विशेषतः॥ (भ० सं०)। कुष्ठज्वरोपदंशाश्च मूत्रोन्मादव्रणज्वराः। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्॥ (भाव प्र०)। अन्यच्च—त्वगक्षिरोगान्स्मारगात्रसङ्गमनश्वासा। दर्शनात् स्पर्शनाद् दानात् संक्रामन्ति नरान्नरम्॥ (उत्तर)। 'तत्र नासास्रावानुगतेन वायुना श्वासक उपदिश्यते', त्वगिन्द्रियगतेन त्वग्मसूरिकादयः' इति डल्हण। पुनश्च—जतूकाचार्योऽपि लिखति-'अन्नार्कं शरीराणि व्रणमुखेन अन्नरसादिद्वारेण वा प्रविष्टा' डाक्टरी में रोग फैलने या प्रवेश के त्वचा, श्वासपथ और मुख ये तीन प्रधान मार्ग हैं। त्वचा से उपदंश, फिरङ्ग, पूयमेह, धनुर्वात, विसर्प, जलसंत्रास तथा मसूरिका। श्वासपथ से न्यूमोनिया, राजयक्ष्मा, एनफ्लुएञ्जा, कुक्कुरखांसी, रोहिणी, रोमान्तिका, फुप्फुस प्लेग। मुख (खाद्य-पेय) द्वारा—हैजा, मोतीझरा, डिसेण्टरी (अतिसार), आदि। कीटदंश से जैसे पिस्सू के काटने से प्लेग, मच्छर काटने से मलेरिया, श्लीपद, पीतज्वर तथा डेंग्यूफीवर, मत्कुण तथा जुओं के काटने से टायफस फीवर आदि। यह कीटदंश त्वग्मार्ग के अन्तर्गत ही है। कुष्ठ का प्रसार मैथुन से, सहशयन से, उसके वस्त्र-पात्र के इस्तेमाल करने से, उसकी सेवा करने के कारण सम्पर्क में आने से त्वचा में रगड हो कर क्षत से जीवाणु अन्य मनुष्य के शरीर में प्रविष्ट होते हैं। कुष्ठी के नासास्राव, उसके व्रणों के स्राव या पूय में रोग के जीवाणु होते हैं। अच्छा हो कि कुष्ठियों को अलग आश्रम बना के वहां रख दिया जाय। प्रायः मन्दिरों के बाहर एवं पवित्र नदियों (गंगा, यमुना, सरयू) के तटों पर तथा धार्मिक कुम्भादि मेलों पर कुष्ठी भोजन-वस्त्रादि मांगने के लिये इकट्ठे होते हैं। यदि इन्हें एक स्थान में बसा कर वस्त्र-भोजन का प्रबन्ध कर दें तो कुष्ठ रोग के फैलने को रोका जा सकता है। भारत में आसाम, बिहार, युक्तप्रान्त, पञ्जाब, काठियावाड़, मध्यप्रान्त, राजपूताना आदि प्रान्तों में कुष्ठभवन बने हैं। उन्हीं में सर्व कुष्ठियों को भेज देने का प्रबन्ध राज्य तथा जनता की ओर से होना कानून न आवश्यक है।

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां कुष्ठनिदानं नाम पञ्चमोऽध्यायः॥ ५॥

षष्ठोऽध्यायः।

अथातः प्रमेहनिदानं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

अब इसके अनन्तर प्रमेह-निदान का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था॥ १-२॥

विमर्शः—प्रकर्षेण मेहतीति वा प्रकर्षेण मेहनमिति प्रमेहः। प्रमेह को Anomlies of urinary secretion कहते हैं।

दिवास्वप्नाव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमेद्योवर्द्धकं बल्वाद्यन्नपानसेविनं पुरुषं जानीयात् प्रमेही भविष्यतीति॥ ३॥

प्रमेह कारण—दिन में शयन करने वाले, व्यायाम न करने वाले तथा आलस्ययुक्त पुरुष को एवं शीतल, स्निग्ध, मधुर मेदोवर्द्धक तथा अधिक पतले अन्न और पान का सेवन करने वाले मनुष्य को प्रमेह होगा ऐसा जान लेना चाहिये॥ ३॥

विमर्शः—पुरुषमिति कथनेन स्त्रीणां प्रमेहा न भवन्ति। तथा च तन्त्रान्तरे—'रजःप्रसेकान्नारीणां मासि मासि विशुद्ध्यति। सर्वे शरीरदोषाश्च न प्रमेहन्त्यतः स्त्रियः॥' इति, एतत्तु न युक्तम्, सर्वतन्त्राप्रसिद्धेः प्रत्यक्षविरोधाच्चेति डल्हणः। प्रमेहस्य चरकोक्तं निदानं यथा—यश्च कश्चिद्विधिरन्योऽपि श्लेष्ममेदोमूत्रसञ्जननः सर्वः स निदानविशेषः। बहुद्रवश्लेष्मा दोषविशेषः। बहवश्च मेदो मांसं च शरीरजक्लेदं शुक्रं शोणितं च वसां मज्जा लसीका रसश्चौज इत्यन्ये इति दूष्यविशेषः। अन्यच्च—आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसा पयांसि। नवान्नपानं गुडवैकृतञ्च प्रमेहहेतुः कफकृच्च सर्वम्॥ (माधवः)।

तस्य चैवंप्रवृत्तस्यापरिपक्वा एव वातपित्तश्लेष्माणो

यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्यावोगत्वा बस्तेर्मुखमाश्रित्य निर्मिमते तदा प्रमेहान् जनयन्ति ॥ ४ ॥

सम्प्राप्ति—ऊपर में कहे हुये प्रमेहजनक आहार-विहार का सेवन करने वाले मनुष्य के अपरिपक्व (आम) वात, पित्त और कफ जब मेदोधातु के साथ संयुक्त होकर मूत्रवाहक स्रोतसों (वृक्क, गवीनियां और बस्ति) का अनुसरण कर नीचे की ओर जा के बस्ति के मुख को घेर कर वहीं स्थिति कर देते हैं तब प्रमेहों को उत्पन्न करते हैं ॥ ४ ॥

विमर्श—निर्मिमते—निःसरन्ति, अन्ये तु विनिर्मिमत इति पठित्वा तत्रैव स्थितिं कुर्वन्ति इति व्याख्यानयन्ति। अपरे अतिद्रवत्वं यान्ति इत्याहु। (नि० सं०) न्यायचन्द्रिकायाञ्च—विनिर्मिमते प्रतिबध्नन्ते, तत्रैवास्थां कुर्वन्तीति यावत्। एतेन स्थानसंश्रय उक्तः।

तेषां तु पूर्वरूपाणि-हस्तपादतलदाहः स्निग्धपिच्छिलगुरुता गात्राणां मधुरशुक्लमूत्रता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालुगलजिह्वादन्तेषु मलोत्पत्तिर्जटिलीभावः केशानां वृद्धिश्च नखानाम् ॥ ५ ॥

पूर्वरूप—प्रमेहों की पूर्वरूपावस्था में रोगी के हस्ततल तथा पादतल में दाह, अङ्गों में चिकनाई, चिपचिपापन तथा भारीपन, मूत्र में मधुर तथा श्वेत होना, एवं तन्द्रा, साद (थकावट), पिपासा, शरीर पर दौर्गन्ध्य, श्वास की अधिकता तथा तालु, गला, जिह्वा और दांतों में मल की उत्पत्ति, केशों का जटिलीभाव (परस्पर गुथ जाना) एवं नाखूनों की वृद्धि आदि लक्षण होते हैं ॥ ५ ॥

विमर्श—तन्द्रादीना मलाक्ष्यन्तं प्राग्रूप पाणिपादयोः। दाहश्चिक्कणता देहे तृट् स्वाद्वास्यञ्च जायते ॥ (माधवः)।

तत्राविलप्रभूतमूत्रलक्षणाः सर्व एव प्रमेहाः ॥ ६ ॥

सामान्य लक्षण—कलुषित तथा अधिक मूत्र का निकलना यह लक्षण सर्व प्रकार के प्रमेहों में होता है ॥ ६ ॥

विमर्श—'सामान्य लक्षणं तेषां प्रभूताविलमूत्रता' (वाग्भट.)।

सर्व एव सर्वदोषसमुत्थाः सह पिडकाभिः ॥ ७ ॥

प्रमेहपिडकाएँ तथा सर्व प्रकार के प्रमेह सर्व दोषों (त्रिदोष) से उत्पन्न होते हैं ॥ ७ ॥

विमर्श—प्रमेह बीस होते हैं तथा वात, पित्त और कफ ये तीन दोष हैं एवं मेदोधातु, रक्त, शुक्रादि दूष्य होते हैं। कफः सपित्त पवनश्च दोषा मेदोऽम्बशुक्रास्रवसालसीकाः। मज्जा रसौजः पिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः ॥ (माधवः)।

तत्र, कफादुदकेक्षुवालिकासुरासिकताशनैर्लवणपिष्टसान्द्रशुक्रफेनमेहा दश साध्याः, दोषदूष्याणां समक्रियत्वात् ॥ ८ ॥

उनमें कफ से उदकमेह, इक्षुमेह, सुरामेह, सिकतामेह, शनैर्मेह, लवणमेह, पिष्टमेह, सान्द्रमेह, शुक्रमेह और फेनमेह ये दश प्रमेह उत्पन्न होते हैं तथा इनमें दोष और दूष्यों की चिकित्सा समान होने से ये साध्य होते हैं ॥ ८ ॥

विमर्श—सुश्रुत की तरह चरक तथा वाग्भट ने भी कफजन्य प्रमेह दश ही माने हैं किन्तु उन्होंने उनके कहीं-कहीं नाम बदल दिये हैं। जैसे चरक में सान्द्रप्रमादमेह, शुक्रमेह, शीतमेह और लालामेह एवं वाग्भट में लवणमेह और फेनमेह की जगह शीतमेह और लालामेह नाम दिये हैं। कफजमेह साध्य हैं क्योंकि दोष (कफ) तथा दूष्य (मेदो-मज्जा) दोनों ही रूक्ष तथा उष्ण होते हैं और कटु तिक्त और कषाय से शान्त होते हैं अतः चिकित्सा समान है तथा प्रमेहों में दोष तथा दूष्यों का तुल्य होना सुखसाध्यता का लक्षण भी माना है—क्वचे तुल्यदुष्टदोषत्व प्रमेहे सुखसाध्यता। रक्तजे पुराणत्व सुखसाध्यस्य लक्षणम्॥ चरक ने भी लिखा है कि 'ते दश प्रमेहाः साध्याः। समानगुणमेदःस्थानकत्वात्, कफस्य प्राधान्यात्, समक्रियत्वाच्च' कफके श्वेत, शीत, मूर्त, पिच्छिल, अच्छ, स्निग्ध, गुरु, मधुर, सान्द्र, प्रसाद, मन्द ये गुण होते हैं तथा इन्हीं गुणों में से एक या अनेक गुण परस्पर तरतम भेद से मिलकर दश प्रमेहों को उत्पन्न करते हैं जैसे—तत्र श्वेतोच्छशीतगुर्वभ्यन्दकमेहः, मधुरशीताम्बामिषुमेहः, सान्द्रपिच्छिलाम्बा सान्द्रमेहः, अच्छेन पित्तानुरागिणा सुरामेहः, शुक्लेन पिष्टमेहः, श्वेतस्निग्धाम्बा शुक्रमेहः, सान्द्रमूर्त्याम्बा सिकतामेहः, गुरुमधुरशीतः शीतमेहः, सान्द्रमूर्त्याम्बा शनैर्मेहः, पिच्छिलेन लालामेहः। दशाधिकफजमेहेशङ्कानिरसन—'ननु वक्ष्यमिगुणैर्दशभेदान् करोति तथा नसर्गविकल्पान्तरेणान्यानपि कुतो न करोतीति नाशङ्कनीय, भावस्वभावस्यापर्यनुयोज्यत्वात्, अदृष्टकल्पनायाश्चानर्हत्वात्। (मधुकोषव्याख्या)।

पित्तान्नीलहरिद्राऽम्लक्षारमञ्जिष्ठाशोणितमेहाः षड् याप्याः, दोषदूष्याणां विषमक्रियत्वात् ॥ ९ ॥

पित्तजप्रमेह—पित्त से नीलमेह, हरिद्रामेह, अम्लमेह, क्षारमेह, मञ्जिष्ठामेह तथा रक्तमेह ये छ प्रमेह उत्पन्न होते हैं तथा दोष और दूष्यों की क्रिया (चिकित्सा) विषम (परस्पर प्रतिकूल) होने से याप्य माने गये हैं ॥ ९ ॥

विमर्श—दोषोऽत्र पित्त दूष्या मेद प्रभृतयस्तेषाम्, विषमक्रियत्वात्=पित्तमेदसो परस्पर विरुद्धक्रियत्वात्, पित्तस्य यद् मधुरशीतादि पथ्य, तन्मेदसोऽपथ्य, मेदसो यत्कटुकादि पथ्य, तत् पित्तस्यापथ्यमिति भाव। चरके याप्यत्वस्य हेत्वन्तरमपि दर्शितम्—'सर्व एव ते याप्या सनुष्टदोषमेदःस्थानकत्वात्' इति। चरक और वाग्भट ने अम्लमेह के स्थान पर कालमेह (Brown and black urins or carboluria) कहते हैं। मूत्र में कालापन के कई कारण हैं जैसे पुरानी कामला Indican uria, Melanuria, Alkaptonuria, आदि मूत्ररोगों में मूत्र का रङ्ग काला हो जाता है।

वातात्सर्पिर्वसाक्षौद्रहस्तिमेहाश्चत्वारोऽसाध्यतमाः, महात्ययिकत्वात् ॥ १० ॥

वातजप्रमेह—वातप्रकोप से सर्पिर्मेह, वसामेह, क्षौद्रमेह तथा हस्तिमेह ये चार प्रमेह उत्पन्न होते हैं तथा ये धातुओं का अधिक विनाश करने से अत्यन्त असाध्य हैं ॥ १० ॥

विमर्श—महात्ययिकत्वात्=आप्यायनार्हप्रचुरतरमज्जप्रभृतिसारतरधातुक्षयकत्वात्। 'विरुद्धोपक्रमत्वाच्च' इति, अत्रापि सम्बध्यते। तदुक्तं चरके—'श्रमाश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते भिषजः, महात्ययिकत्वाद्विरुद्धोपक्रमत्वाच्चेति' इति। तेनात्र यद्वायोः स्निग्धादि

पथ्य, तन्मेदसोऽपथ्यमित्यादिस्तदर्थो बोध्य। मधुर रस और स्निग्ध गुण दोनों वातशामक हैं परन्तु दोनों ही दूष्य मेद को बढाते हैं अत यहां भी विषम क्रिया होने से वातजप्रमेह असाध्य होते हैं।

तत्र, वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहाञ्जनयति, वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान्, कफपित्तवसामज्जमेदोभिरन्वितो वायुर्वातप्रमेहान्॥ ११॥

इन में वायु, पित्त और मेद से युक्त कफ पूर्वोक्त उदकमेहादि दश कफप्रमेहों को पैदा करता है वात, कफ ये दोष तथा रक्त और मेदो धातु पूर्वोक्त इन दूष्यों के साथ मिलकर पित्त पूर्वोक्त नीलमेहादि छ प्रकार के प्रमेहों को उत्पन्न करता है। इसी प्रकार कफ,पित्त इन दोषों तथा वसा, मज्जा और मेद इन दूष्यों से युक्त वायु पूर्वोक्त चार वातप्रमेहों को उत्पन्न करता है॥ ११॥

तत्र, श्वेतमवेदनमुदकसदृशमुदकमेही मेहति। इक्षुरसतुल्यमिक्षुबालिकामेही। सुरामेही सुरातुल्यम्। सरुजं सिकताऽनुविद्धं सिकतामेही। शनैः सकफं मूत्रं शनैर्मेही। विशदं लवणतुल्यं लवणमेही। हृष्टरोमा पिष्टरसतुल्यं पिष्टमेही। आविलं सान्द्रं सान्द्रमेही। शुक्रतुल्यं शुक्रमेही। स्तोकं स्तोकं सफेनं फेनमेही मेहति॥ १२॥

कफजप्रमेहलक्षण—उदकमेह वाला व्यक्ति श्वेत, वेदनारहित तथा जल के समान मूत्र का त्याग करता है। इक्षुमेह वाला व्यक्ति ऊख के रस के समान मूत्र त्यागता है। सुरामेह वाला व्यक्ति सुरा के समान (लाल-पीला जलन युक्त) मूत्र त्यागता है। सिकतामेह वाला व्यक्ति पीड़ा के सहित तथा कफ से बनी छोटी छोटी बालुका (रेत) के कणों से युक्त मूत्र त्यागता है। शनैर्मेह वाला व्यक्ति धीरे धीरे तथा कफमिश्रित व चिकना मूत्र त्यागता है। लवणमेहग्रस्त व्यक्ति स्वच्छ तथा नमक के (घोल के) समान मूत्र त्यागता है। पिष्टमेहग्रस्त व्यक्ति रोमाञ्चयुक्त हो के पिष्टरस (जल में घोले हुए आटे) के समान मूत्र त्यागता है। सान्द्रमेहग्रस्त व्यक्ति कलुषित (गन्दला) तथा गाढा मूत्र त्यागता है। शुक्रमेहग्रस्त व्यक्ति शुक्र के समान मूत्र त्यागता है। फेनमेह से ग्रस्त व्यक्ति थोड़ा थोड़ा तथा फेन (झाग) युक्त मूत्र त्यागता है॥ १२॥

विमर्शः—उदकमेहलक्षणम्-अच्छ बहु सित शीत निर्गन्धमुदकोपमम्। मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम्॥ इसे बहुमूत्रमेह (Polyuria) कह सकते हैं। इस के दो भेद हैं। (१) स्थायी उदकमेह—वृक्कशोथ एवं धमनीदार्ढ्य से होता है तथा पिटयूईटरी (Pituitary) ग्रन्थि की खराबी से होता है इसे डायबेटिज इन्सीपीडस (Diabetes insipidus) कहते हैं। (२) अस्थायी उदकमेह चाय, कोको तथा द्रवपदार्थों के अधिक सेवन एवं भय तथा मानसिक उत्तेजना से होता है। इक्षुमेहलक्षणम्—इक्षो रसमिवात्यर्थं मधुर चेक्षुमेहतः। इस में मूत्र में शर्करा आती है अतः इसे ग्लायकोसूरिया (Glycosuria) कहते हैं। वृक्क की शर्करावन्धन मर्यादा के अल्प होने से होनेवाले इक्षुमेह को (Renal glycosuria) कहते हैं। (३) सुरामेह—फास्फेट यूरिया हो सकता है। गन्ध की दृष्टि से (Acetonuria) हो सकता है। सिकतामेह को (Passing of gravel) कह सकते हैं। 'मूर्त्राणून् सिकतामेही सिकतारूपिणो मलान्' पथरी के टूटने पर उसके छोटे २ कण मूत्र में आते हैं। शनैर्मेह—मन्देन मूत्रेण शनै प्रमेह। पिष्टमेह—के लक्षण वाला मूत्र अल्ब्यूमिन, पूय, अथवा काईल मूत्र में आने से होता है। श्लीपद के कारण मूत्र में काईल आता है इसे कायल्यूरिया (Chyluria) कहते हैं। सान्द्रमेह—'यस्य पर्युषित मूत्र सान्द्रीभवति भाजने' (चरकः)। मूत्र में फायब्रिन या पीव के आने से ऐसा होता है। शुक्रमेह—शुक्रसदृश मूत्र का रंग हो तो अल्ब्यूमिन्यूरिया (Albuminuria) तथा शुक्रमिश्र मूत्र आता हो तो स्पर्मेटयूरिया (Spermaturia) कहना चाहिये। वृक्करोग, पाण्डुरोग, यकृद्दाल्युदर, सगर्भावस्था आदि के कारण मूत्र में अल्ब्यूमिन आता है। फेनमेह को न्यूमाटयूरिया (Pneumaturia) कह सकते हैं।

अत ऊर्ध्वं पित्तनिमित्तान् वक्ष्यामः-सफेनमच्छं नीलं नीलमेही मेहति। सदाहं हरिद्राऽऽभं हरिद्रामेही। अम्लरसगन्धमम्लमेही। क्षुतक्षारप्रतिमं क्षारमेही। मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही। शोणितप्रकाशं शोणितमेही मेहति॥ १३॥

पित्तप्रमेहलक्षण—अब इस के अनन्तर पित्त के कारण होने वाले प्रमेहों को कहते हैं। नीलमेहग्रस्त व्यक्ति फेनयुक्त, निर्मल तथा नीले रंग का मूत्र त्यागता है। हरिद्रामेहग्रस्त व्यक्ति जलन के सहित हलदी के रंग कासा मूत्र त्यागता है। अम्लमेहग्रस्त व्यक्ति अम्लरस एवं अम्लगन्धयुक्त मूत्र त्यागता है। क्षारमेहग्रस्त व्यक्ति क्षुतक्षार या क्षारोदक के समान मूत्र त्यागता है। मञ्जिष्ठामेहग्रस्त व्यक्ति मजीठ के क्वाथ के समान वर्ण का मूत्र त्यागता है तथा शोणितमेही शोणित (रक्त) के समान मूत्र त्यागता है॥ १३॥

विमर्शः—नीलमेह को इण्डिकन्यूरिया (Indican uria) कहते हैं क्यों कि इस में रोगी के मूत्र में अन्त्रगत अल्ब्यूमिन की सड़ान से उत्पन्न इण्डिकन आता रहता है।

मञ्जिष्ठामेह को कोल्यूरिया (Choluria) कहते हैं। मूत्र में पित्त का विलीरुबिन (Bilirubin) रंग आने से मञ्जिष्ठोदक समान पीत मूत्र हो जाता है। कामला में ऐसा प्रमेह होता है। मूत्र में युरोबिलीन की राशि अधिक हो ने से भी पीत वर्ण हो जाता है और उसे यूरोबिलीन्यूरिया (Urobilinuria) कहते हैं। अम्लमेह मूत्र में यूरिकाम्ल तथा थूरेट्स अधिक आने से होता है तथा इसे लिथ्यूरिया (Lithura) कहते हैं। क्षारमेह को (Alkalinuria) कहते हैं। इस का कारण मूत्रवेग का रोकना, प्रोस्टेट वृद्धि, मूत्रमार्ग-सङ्कोच, फास्फेट की अधिकता तथा जीर्ण वस्तिशोथ है। 'गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत्' हारिद्रमेह को हीमोग्लोबिन्यूरिया (Haemoglobinuria) कहते हैं तथा रक्तमेह को हीमाटयूरिया

(Haematuria) कहते हैं। वृक्कार्बुद वृक्कारमरी, मलेरिया, हीमोक्रायलिया, पर्प्यूरा, स्कर्वी आदि में ऐसा होता है।

अत ऊर्ध्वं वातनिमित्तान् वक्ष्यामः—सर्पिःप्रकाशं सर्पिर्मेही मेहति। वसाप्रकाशं वसामेही। क्षौद्ररसवर्णं क्षौद्रमेही। मत्तमातङ्गवदनुप्रवन्धं हस्तिमेही मेहति॥१४॥

अब इस के अनन्तर वात के कारण उत्पन्न होने वाले प्रमेहों का वर्णन करते हैं। सर्पिर्मेही घृत के समान मूत्र त्यागता है। वसामेही वसा (फेट) के सदृश मूत्र त्यागता है। क्षौद्रमेही शहद के समान रस और रंग का मूत्र त्यागता है। हस्तिमेही मतवाले हस्ती की तरह निरन्तर मूत्र त्यागता है॥ १४॥

विमर्शः—सर्पिर्मेह तथा वसामेह को Pyuria अथवा Lipuria कह सकते हैं। क्षौद्रमेह को मधुमेह या डायाबेटिज मेलिटस (Diabetes Mellitus) कहते हैं। मूत्र में मधु या Glucose की उपस्थिति ही मधुमेह है। शालिपिष्टमय पदार्थ शरीर में जाकर पाचन द्वारा (Glucose) में बदल जाते हैं। रक्त में जब शर्करा की राशि अधिक हो जाती है तब यह रोग होता है तथा प्रधानतया अग्न्याशय के लैंगरहैंसद्वीप में बनने वाले इन्स्यूलीन के न बनने से यह रोग होता है। इन्स्यूलीन पेशियों को शर्करा का खर्च करने तथा यकृत् को उस का सञ्चय करने में मदद देता है किन्तु इस के न बनने से रक्तस्थ शर्करा का स्वाभाविक प्रमाण अधिक होकर मूत्र द्वारा बाहर निकलने लगती है। हस्तिमेह को फाल्स इन्कण्टिनेन्स ऑफ् यूरिन कह सकते हैं। हस्ती मत्त इवाजस्र मूत्र वेगविवर्जितम्। सलसीक विबद्धञ्च हस्तिमेही प्रमेहति॥ (वाग्भटः)। इसका कारण सुषुम्नास्थित मूत्रकेन्द्रघात, वस्तिघात, अश्मरी, प्रोस्टेटग्रन्थिवृद्धि आदि है।

मक्षिकोपसर्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्दिनिद्राकासश्वासाश्चेति श्लेष्मजानामुपद्रवाः, वृषणयोरवदरणं बस्तिभेदो मेढ्रतोदो हृदि शूलमम्लीकाज्वरातीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वं चेति पैत्तिकानाम्। हृद्ग्रहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं बद्धपुरीषत्वं चेति वातजानाम्। एवमेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः॥ १५॥

प्रमेहोपद्रव—मक्षिकाओं का प्रमेही पर तथा उस के मूत्र पर बैठना, आलस्य, स्थूलता, प्रतिश्याय, अङ्गशैथिल्य, अरुचि, अपचन, कफस्राव, वमन, निद्राधिक्य, कास, श्वास ये श्लेष्मज प्रमेहों के उपद्रव हैं। दोनों वृषणों (अण्डकोषों) का फटना, बस्ति का फटना, लिङ्ग में सूई चुभोने की सी पीड़ा, हृच्छूल, अम्लिका (खट्टी डकारें आना), ज्वर, अतिसार, अरोचक, वमन, डकार में धूआं आना, दाह, मूर्च्छा, प्यास, निद्रानाश, पाण्डु रोग, एवं मल, मूत्र तथा आंखों इन में पीलापन होना आदि पित्तजन्य प्रमेहों के उपद्रव हैं। हृदय की जकड़ाहट, हरएक रस चखने की लालसा, अनिद्रा, शरीर का स्तम्भ (अकड़ जाना), शरीर में कम्पन, शूल, गाढा दस्त आना ये वातजन्य प्रमेहों के उपद्रव हैं। इस तरह इन बीस प्रकार के प्रमेहों तथा इन के उपद्रवों का वर्णन कर दिया गया है॥ १५॥

विमर्शः—मक्षिकोपसर्पणमनेन शरीरे मूत्रे च मक्षिकाभिसरणं बोद्धव्य तदुक्त चरके—'षट्पदपिपीलिकाभिश्च शरीरमूत्राभिसरणम्। सोपद्रवा.—चरकोक्तोपद्रवा यथा—उपद्रवास्तु खलु प्रमेहिणा तृष्णाऽतीसारज्वरदाहदौर्बल्यारोचकाविपाका. पूतिमासपिटकाऽलजीविद्रध्यादयश्च तत्प्रसङ्गाद्भवन्ति।

तत्र, वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पिडका जायन्ते। तद्यथा—शरावि का, सर्षपिका, कच्छपिका, जालिनी, विनता, पुत्रिणी, मसूरिका, अलजी, विदारिका, विद्रधिका चेति॥

प्रमेहपिडका वर्णन—वसा तथा मेदोधातु से व्याप्त शरीर वाले एवं प्रकुपित वातादि तीनों दोषों से आक्रान्त धातुवाले प्रमेही के शरीर में दश पिडकाएं उत्पन्न होती हैं। उन के नाम—शरावि का, सर्षपिका, कच्छपिका, जालिनी, विनता, पुत्रिणी, मसूरिका, अलजी, विदारिका तथा विद्रधि॥ १६॥

विमर्शः—प्रमेहपिडकाओं को कार्बङ्किल (Carbuncle) कहते हैं। इनका मुख्य कारण मधुमेह, इक्षुमेह तथा वसामेह है। उपेक्षयाऽस्य जायन्ते पिडका सप्त दारुणा.। मासलेष्मवकाशेषु मर्मस्वपि च सन्धिषु॥ विना प्रमेहमप्येता जायन्ते दुष्टमेदसः॥ (चरकः)। चरक ने इनके सात भेद माने हैं। कई छोटी छोटी फुन्सियां आपस में मिलकर एक चालनी के समान छेदों वाला व्रण बन जाता है। तथा उससे पूय निकलता है और उसमें स्टेफिलोकोकस पायोजीनस आरस जीवाणु होते हैं। इसके स्थान ग्रीवा के पीछे, पीठ, स्कन्ध, ओष्ठ, चेहरा और नितम्ब होते हैं।

शरावमात्रा तद्रूपा निम्नमध्या शरावि का।
गौरसर्षपसंस्थाना तत्प्रमाणा च सार्षपी॥ १७॥
सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः।
जालिनी तीव्रदाहा तु मांसजालसमावृता॥ १८॥
महती पिडका नीला पिडका विनता स्मृता।
महत्यल्पाचिता ज्ञेया पिडका सा तु पुत्रिणी॥ १९॥
मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका।
रक्ता सिता स्फोटवती दारुणा त्वलजी भवेत्॥ २०॥
विदारीकन्दवद् वृत्ता कठिना च विदारिका।
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः॥ २१॥

पिडका लक्षण—शराव (सकोरा या तश्तरी) के समान तथा वैसी आकार वाली एवं मध्यभाग में दबी हुई शरावि का होती है। श्वेत सरसों की आकृति और प्रमाण वाली सर्षपिका, दाहयुक्त एवं कच्छपपृष्ठ स्वरूप की कच्छपिका, मांसजाल से घिरी हुई तथा तीव्र दाहयुक्त जालिनी, नीले वर्ण की तथा आकार में बड़ी विनता, आकार में बडी किन्तु छोटी छोटी फुन्सियों से युक्त पिडका पुत्रिणी, मसूर के समान आकृति वाली मसूरिका एवं लाल, काली, फुन्सियों से व्याप्त तथा दारुण दुःखदायिनी अलजी और विदारीकन्द की तरह गोल तथा कठिन विदारिका एवं विद्रधि के लक्षणों वाली विद्वानों द्वारा विद्रधिका कही जाती है॥ १७-२१॥

विमर्शः—कच्छपिकालक्षणम्—अवगाढार्तिनिस्तोदा महावास्तु-परिग्रहा। श्लक्ष्णा कच्छपपृष्ठाभा पिडका कच्छपी मता॥ जालिनी-लक्षणम्—स्तब्धा सिराजालवती स्निग्धस्रावा महाशया। रुजानिस्तोद-बहुला सूक्ष्मच्छिद्रा च जालिनी॥ (चरकः)। अन्यत्रापि—परस्पराभि-सम्बन्धात् पिडका चैकदेशजा। पित्तोत्कटा दाहवती मृशरुग्जालिनी मता॥ सर्षपिकालक्षणम्—सर्षपी सर्षपाभाभिः पिडकाभिश्चिता भवेत्। अलजीलक्षणम्—दहति त्वचमुत्थाने तृष्णामोहज्वरप्रदा। विसर्पत्यनिशं दु खाद्दहत्यग्निरिवालजी॥ (चरकः)।

ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तत्कृताः ॥२२॥

जिन दोषों से जो प्रमेह उत्पन्न हुये हों उन्हीं दोषों से इन प्रमेहपिडकाओं को पैदा हुई जाननी चाहिये॥ २२॥

विमर्शः—चरक ने सात के अतिरिक्त भी पिडकाएं मानी है तथा उनकी भी दोषानुसार चिकित्सा कही है—तथान्या पिड-काः सन्ति रक्तपीतासितारुणाः। पाण्डुराः पाण्डुवर्णाश्च भस्माभा मेचक-प्रभाः॥ मृद्वयश्च कठिनाश्चान्या स्थूलाः सूक्ष्मास्तथाऽपराः। मन्द-वेगा महावेगाः स्वल्पमूला महारुजः॥ ता बुद्ध्या मानसादीना यथास्वै-र्हेतुलक्षणैः। नयादुपचरेच्चाशु प्रागुपद्रवदर्शनात्॥

गुदे हृदि शिरस्यंसे पृष्ठे मर्मणि चोत्थिताः।
सोपद्रवा दुर्बलाग्नेः पिडकाः परिवर्धयेत्॥ २३॥

असाध्य पिडकाएं—कृश मनुष्य के गुदा, हृदय, शिर, स्कन्ध, पीठ तथा मर्मस्थान में उत्पन्न एवं उपद्रवों से युक्त पिडकाओं की चिकित्सा न करें॥ २३॥

विमर्शः—चरकोक्तपिडकोपद्रवा—मृट्कासमाससङ्कोचमोहहि-क्कामदज्वराः। विसर्पमर्मसरोधाः पिटकानामुपद्रवाः॥

कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः।
अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः॥ २४॥

असाध्यवातजप्रमेह—वायु सारे शरीर को निचोड कर मेद, मज्जा और वसा के साथ नीचे वस्ति प्रदेश की तरफ जा कर प्रमेह उत्पन्न करती है तथा मूत्र के साथ इन धातुओं को उत्सर्गित करता है अतएव वातज प्रमेह असाध्य होते हैं॥२४॥

विमर्शः—अष्टाङ्गसंग्रहकार ने भी इन्हें इसी तरह असाध्य माना है—'वायुर्वसादीन् धातून् शरीरस्य परमसारभूतान् वस्ति-माकृष्य मूत्रेण सह विसृजति, तस्माद्वातजा असाध्याः। क्षीणेषु धातुषु महात्मतया विरूढोपक्रमत्वाच्च'। जातप्रमेही मधुमेहिनो वा न साध्य-रोग स हि बीजदोषात्। ये चापि केचित्कफजा विकारा भवन्ति ताश्चापि वदन्त्यसाध्यान्॥ (भावप्र०)।

प्रमेहपूर्वरूपाणामाकृतिर्यत्र दृश्यते।
किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत्॥ २५॥
कृत्स्नान्यर्द्धानि वा यस्मिन् पूर्वरूपाणि मानवे।
प्रवृद्धमूत्रमत्यर्थं तं प्रमेहिणमादिशेत्॥ २६॥

जिस मनुष्य में प्रमेह के पूर्वरूप के लक्षण दिखाई देने लगे तथा मूत्र की राशि भी कुछ अधिक हो जाय उसे प्रमेही समझना चाहिये। जिस मनुष्य में प्रमेह के पूर्वरूप के पूरे या आधे लक्षण दिखाई देने लगें तथा मूत्र की मात्रा भी अत्यधिक बढ जाय उसे प्रमेही समझना चाहिये॥ २५-२६॥

विमर्शः—पूर्व में दन्तादीना मलाढ्यत्वम्, एव पाणि-पाददाह ये प्रमेह के पूर्वरूप के लक्षण एवं प्रभूताविलमूत्रता इस सामान्य लक्षण से प्रमेह का होना ज्ञात होता है इसी तरह प्रमेह के पूर्वरूप-लक्षणों (हस्तपाद-दाहादि) के विना केवल मूत्र का हारिद्र वर्ण मात्र होने से प्रमेह नहीं समझना चाहिये। हारिद्रवर्णं रुधिरञ्च मूत्रं विना प्रमेहस्य हि पूर्वरूपैः। यो मूत्रयेत्त न वदेत्प्रमेहं रक्तस्य पित्तस्य हि स प्रकोपः॥ (च० प्रमेहचि०)।

पिडकापीडितं गाढमुपसृष्टमुपद्रवैः।
मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः॥ २७॥

असाध्य मधुमेह लक्षण—प्रमेहपिडकाओं से अत्यधिक पीडित तथा पूर्वोक्त उपद्रवों से युक्त प्रमेही को मधुमेहग्रस्त कहा जाता है तथा वह असाध्य होता है॥ २७॥

स चापि गमनात् स्थानं स्थानादासनमिच्छति।
आसनाद् वृणुते शय्यां शयनात् स्वप्नमिच्छति॥२८॥

मधुमेही चलने से खडे रहना, खडे रहने से बैठना और बैठने से लेटना तथा लेटने से निद्रा लेना अधिक अच्छा मानता है॥

यथा हि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयो-गविशेषेण शबलवभ्रुकपिलकपोतमेचकादीनां वर्णाना-मनेकेषामुत्पत्तिर्भवति, एवमेव दोषधातुमलाहारनिशे-षेणोत्कर्षापकर्षकृतेन संयोगविशेषेण प्रमेहाणां नाना-करणं भवति॥ २९॥

जिस तरह श्वेत, हरा, काला, पीला और लाल इन पांच रंगों को हीनाधिक मात्रा में मिला कर किये गये संयोग विशेष से शबल (कर्बुर=चितकबरा), वभ्रु (पिङ्गलवर्ण), कपिल, कपोत (कबूतर सा) और मेचक (श्याम) आदि अनेक वर्णों (रंग=Colours) की उत्पत्ति होती है उसी प्रकार वातादि दोष, रक्तादिधातु, विण्मूत्रस्वेदादिमल तथा खाद्यपे-यादि आहार इनके हीनाधिक संयोग विशेष से प्रमेहों के भी अनेक भेद उत्पन्न होते हैं॥ २९॥

भवति चात्र—

सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः।
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि॥ ३०॥

इति सुश्रुतसंहितायां निदानस्थाने प्रमेहनिदानं नाम षष्ठोऽध्यायः॥ ६॥

सर्व प्रकार के प्रमेहों की प्रारम्भावस्था में चिकित्सा न करने से वे मधुमेह का रूप धारण कर लेते हैं तथा इस अवस्था में असाध्य हो जाते हैं॥ ३०॥

विमर्शः—प्रमेह मधुमेह में कैसे परिवर्तित होते हैं यह चरक में बताया है—तैरावृतगतिर्वायुरोज आदाय गच्छति। यदा वस्तिं तदा कुच्छ्रो मधुमेहः प्रवर्तते। वाग्भट ने मधुमेह का स्वरूप तथा सर्व प्रमेहों को मधुमेह से ही माना है—मधुर यच्च मेहेषु प्रायो मधिव मेहति। सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनो-रतः। किन्तु डाक्टरीमत से सर्व प्रमेह भिन्न भिन्न कारणादि से होने से मधुमेह में परिवर्तित नहीं हो सकते।

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायां प्रमेहनिदान नाम षष्ठोऽध्यायः॥ ६॥

सप्तमोऽध्यायः ।

अथातो उदराणां निदानं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

अब इसके अनन्तर उदर रोगों के निदान का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था ॥

विमर्श—उदर (Abdomine) शब्द से रोग के स्थान का तथा रोग के खास लक्षण उत्सेध का ज्ञान होता है यह उदर शब्द की विशेषता है। जैसा कि कहा है—तात्स्यतद्धर्मनाम्याच्च तत्समीपतमाऽपि च। तत्साहचर्याच्च शब्दानां वृत्तिरेषा चतुर्विधा ॥

उदरोत्सेधकारण—नं० १ मेदोवृद्धि—मेद का सञ्चय होने से उदर फूलता है। अन्य स्थानों में भी मेदोवृद्धि के लक्षण होते हैं—'चलस्फिगुदरस्तनः'।

नं० २ वात—के आंतों में सञ्चय होने से भी उदरोत्सेध होता है। पेट पर अङ्गुलिताडन करने से ढोल सदृश निनाद (प्रतिध्वनि) सुनाई देता है। 'आहतानद्धनादवत्' ।

नं० ३ जल—उदरावरण की गुहा में जल के सञ्चित होने से भी उदरोत्सेध होता है।

नं० ४ मल—के सञ्चय से जीर्णविबन्ध होने पर उदरोत्सेध होता है। साथ में सिर दर्द, मन्दाग्नि, आध्मान आदि लक्षण होते हैं।

नं० ५ यकृत्, प्लीहा, वस्ति, गर्भाशय इनके बढ़ने से या इनमें अर्बुद आदि होने से भी उदरोत्सेध होता है।

नं० ६ दुष्ट व्रातकव्रण या केन्सर (Cancer)—उदर के आवरण में इस व्रण के होने से पर भी उदरोत्सेध होता है। उदररोगों के निदान में इतनी अवस्थाओं का विचार करना आवश्यक है।

धन्वन्तरिर्धर्मभृतां वरिष्ठो
राजर्षिरिन्द्रप्रतिमोऽभवद्यः ।
ब्रह्मर्षिपुत्रं विनयोपपन्नं
शिष्यं शुभं सुश्रुतमन्वशात् सः ॥ ३ ॥

धर्म जानने वालों में श्रेष्ठ एवं ज्ञानैश्वर्यादि में ऋषियों के राजा तथा आयुर्वेद के ज्ञान में इन्द्र के समान ऐसे धन्वन्तरि भगवान् का अवतार हुआ था तथा इन धन्वन्तरि ने विनयोपपन्न तथा शिष्यरूप से उपस्थित ब्रह्मर्षि विश्वामित्र के पुत्र सुश्रुत को उदरादि रोगों के विषय में उपदेश दिया ॥ ३ ॥

पृथक्समस्तैरपि चेह दोषैः
प्लीहोदरं बद्धगुदं तथैव ।
आगन्तुकं सप्तममष्टमञ्च
दकोदरञ्चेति वदन्ति तानि ॥ ४ ॥

उदररोग भेद—वातोदर, पित्तोदर तथा कफोदर ऐसे पृथक् पृथक् दोषों से तीन तथा तीनों दोषों से मिलित चौथा सन्निपातोदर, पांचवां प्लीहोदर, छठां बद्धगुदोदर, सातवां आगन्तुक क्षतोदर एवं आठवां दकोदर (जलोदर) ऐसे आठ उदररोग कहे जाते हैं ॥ ४ ॥

विमर्शः—पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः। सम्भवन्त्युदराण्यष्टौ। (माधवः)। प्लीहोदर में ही यकृद्दाल्युदर का समावेश है। वामभाग में प्लीहोदर तथा दक्षिण भाग में यकृद्दाल्युदर होता है। सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं नदेव ॥ (माधवः)।

सुदुर्बलाग्नेरहिताशनस्य
संशुष्कपूत्यन्ननिषेवणाद्वा ।
स्नेहादिमिथ्याचरणाच्च जन्तो-
र्वृद्धिं गताः कोष्ठमभिप्रपन्नाः ।
गुल्माकृतिव्यक्तितलक्षणानि
कुर्वन्ति घोराण्युदराणि दोषाः ॥ ५ ॥

उदररोग कारण—दुर्बल-पाचकाग्नि मनुष्य के मिथ्या आहार करने से तथा सूखे और सडे-गले वासी अन्न के सेवन करने से स्नेहन, स्वेदन तथा वमनादि पञ्चकर्मों के मिथ्यारूप से प्रयोग करने से प्रकुपित वातादि दोष कोष्ठ (उदर) में जाकर गुल्म (गोले) के समान आकृति के तथा स्पष्ट लक्षणयुक्त भयङ्कर उदर रोगों को पैदा करते हैं ॥ ५ ॥

विमर्शः—प्रायः उदर तथा सर्व रोगों का कारण अजीर्ण और मलिन अन्न सेवन हैं—रोगा सर्वेऽपि जायन्ते सुतरामुदराणि च । अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात् ॥ चरकोक्त उदररोगहेतुः—अतिसञ्चितदोषाणां पार्थं कर्म च कुर्वताम्। उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः ॥

कोष्ठादुपस्नेहवदन्नसारो
निःसृत्य दुष्टोऽनिलवेगनुन्नः ।
त्वचः समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति ॥ ६ ॥

उदररोग सम्प्राप्ति—दूषित हुआ अन्न का सारभूत रसभाग वायु के वेग से प्रेरित होके आहार के पाक के प्रधानाधारभूत कोष्ठ (ग्रहणी=Deodinum) से जैसे नूतन मृत्तिकावट के सूक्ष्म छिद्रों से स्नेह भाग बाहर स्रवित होता हुआ दिखाई देता है उसी तरह बाहर (उदरगुहा में) निकल कर उदर की त्वचा को चारों ओर से उन्नत करके धीरे धीरे बढता हुआ उदर रोगों को उत्पन्न करता है ॥ ६ ॥

विमर्शः—दृष्ट्वा स्वेदाम्बुवाहीनि दोषा स्रोतांसि सञ्चिताः। प्राणान्व्यपानान् सन्दूष्य जनयन्त्युदरं नृणाम्। (माधवः)। स्रोतसां दूषणादामात् संक्षोभादतिपूरणात्। वाह्या सिराः प्राप्य तदा कफासृक्पित्तानि संदूषयतीह वायुः ॥ तैर्बद्धमार्गं स यदा विसर्पन्नुत्सेधनिम्नं श्वयथुं करोति। (चरकः)। नीरोगावस्था में अन्न रस जो कि रक्त के साथ मिला हुआ होता है स्रोतसों (केशिकाओं) की पतली दीवारों से चू चू कर शरीरावयवों का पोषण करके पुनः लसीकावाहिनियों द्वारा रक्त में मिल जाता है। रोगावस्था में उन स्रोतसों की दीवारों की स्रवणक्षमता अधिक हो जाती है जिससे रक्त से रस का अधिक स्रवण होकर उन स्थानों में उत्सेध या शोथ उत्पन्न होता है। इस तरह लसीकावाहिनियों से लसीका (Lymph) अथवा रक्तवाहिनियों से रक्तरस (Plasma) जिन जिन अवकाश युक्त स्थानों में इकट्ठा होता है, उनके नाम भिन्न भिन्न रख दिये हैं जैसे

उदर में जलोदर (Ascites), छाती में जलोरस (Hydrothorax), फुफ्फुसावरण में उरस्तोय (प्लुरिसी Pleurisy), मस्तिष्क गुहाओं में जलमस्तिष्क (Hydrocephlus), वृषण में जलवृषण (Hydrocele), हृदयावरण में (Hydroperi Cardium) आदि नाम रखे गये हैं।

तत्पूर्वरूपं वलवर्णकाङ्क्षा-
वलीविनाशो जठरे हि राज्यः।
जीर्णापरिज्ञानविदाहवत्यो
वस्तौ रुजः पादगतश्च शोफः ॥ ७ ॥

उदररोग पूर्वरूप—उदर रोगों की पूर्वावस्था में बल, वर्ण भोजनादि आकांक्षा और उदर त्वचा की साधारण वलियों (सलवटों) का नाश, पेट पर नीली रेखाएं निकल आना, भोजन के पचने या न पचने का ज्ञान नहीं होना, गले में दाह, वस्ति (मूत्राशय) में पीडा तथा पावों में सूजन आदि लक्षण उत्पन्न होते हैं ॥ ७ ॥

विमर्शः—क्षीयते वलम्. शश्वच्छ्वसित्यल्पेऽपि चेष्टिते। (अ० सं०)। 'जीर्णाजीर्णं न वेत्ति च' (चरकः)। जठराग्नि से यहां Enlarged Superficial veins का ग्रहण करना चाहिये।

सङ्गृह्य पार्श्वोदरपृष्ठनाभी
यद्वर्द्धते कृष्णसिरावनद्धम्।
सशूलमानाहवदुग्रशब्दं
सतोदभेदं पवनात्मकं तत् ॥ ८ ॥

वातोदर—में पार्श्व, उदर, पीठ तथा नाभि का आश्रय लेकर काली सिराओं के उभारसहित तथा शूल, आनाह, उग्र शब्द एवं सूई चुभोने की सी पीडा तथा भेदने की सी पीडासहित उदर की वृद्धि होती है। इन लक्षणों के हानि से उसे वातोदर कहते हैं ॥ ८ ॥

यच्चोपतृष्णाज्वरदाहयुक्तं
पीतं सिरा भान्ति च यत्र पीताः।
पीतात्तिविण्मूत्रनखाननस्य
पित्तोदरं तत्त्वचिराभिवृद्धिः ॥ ९ ॥

पित्तोदर में चोप, तृष्णा, ज्वर, दाह से युक्त तथा पीला उदर हो जाता है एवं जिस पर पीली सिराओं का भान होता हो तथा जिसके नेत्र, विष्ठा, मूत्र, नख और मुख पीले रङ्ग के प्रतीत होते हों तथा जल्दी ही जिसका आविर्भाव हुआ हो उसे पित्तोदर कहते हैं ॥ ९ ॥

यच्छ्वेतलं शुक्लसिराऽवनद्धं
गुरु स्थिरं शुक्लनखाननस्य।
स्निग्धं महच्छोफयुतं ससादं
कफोदरं तत्तु चिराभिवृद्धि ॥ १० ॥

कफोदर में उदर स्पर्श में ठंढा, श्वेत सिराओं से व्याप्त, भारी तथा स्थिर (कड़ा) होता है तथा उन मनुष्यों के नख और मुख भी श्वेत हो जाते हैं। उदर पर चिकनाई, महान् शोथ तथा अवसाद (अंग ग्लानि) के लक्षण दिखाई देते हैं तथा रोग की वृद्धि या प्रकटन देर से होता है। ऐसे लक्षणों के होने पर उसे कफोदर कहते हैं ॥ १० ॥

स्त्रियोऽन्नपानं नखरोममूत्र-
विडार्त्तवैर्युक्तमसाधुवृत्ताः।
यस्मै प्रयच्छन्त्यरयो गरांश्च
दुष्टाम्बुदूषीविषसेवनाद्वा ॥ ११ ॥
तेनाशु रक्तं कुपिताश्च दोषाः
कुर्वन्ति घोरं जठरं त्रिलिङ्गम्।
तच्छीतवाताभ्रसमुद्भवेषु
विशेषतः कुप्यति दह्यते च ॥ १२ ॥
स चातुरो मूर्च्छति सम्प्रसक्तं
पाण्डुः कृशः शुष्यति तृष्णया च।
प्रकीर्त्तितं दूष्युदरं तु घोरं
प्लीहोदरं कीर्तयतो निबोध ॥ १३ ॥

सन्निपातोदर—असाधुओं (दुष्टों) का सा वर्ताव करने वाली स्त्रियां नख, रोम, मूत्र, विष्ठा, रज से युक्त अन्न या पेय पदार्थ खिला देती हैं तथा दुश्मन गर (संयोगज कृत्रिम) विष दे देते हैं उससे एवं दूषित पानी और दूषीविष के सेवन करने से शीघ्र ही रक्त तथा वातादि दोष कुपित होकर भयङ्कर त्रिदोषलक्षणयुक्त उदर रोग को उत्पन्न कर देते हैं। यह उदर रोग शीत और वायु से तथा अधिक मेघाच्छादित दिन में विशेषरूप से कुपित होता है तथा जलन पैदा करता है इस तरह इस सन्निपातोदर से पीड़ित रोगी बार बार मूर्च्छित हो जाता है तथा पाण्डु और दुर्बल हो जाता है, प्यास से सूखता है इस तरह इस भयङ्कर दूष्योदर का वर्णन किया है। अब आगे प्लीहोदर का वर्णन मुझसे सुनो ॥११-१३॥

विमर्शः—स्त्रियः-स्त्रीग्रहणमत्रोपलक्षणं तेनान्येऽपि सन्निहिता अविवेकिनो ग्राह्या इति डल्हण। अष्टाङ्गसंग्रहे गरविषलक्षणं यथा—'नानाप्राण्यङ्गशमलविरुद्धौषधिभस्मनाम्। विषाणां चाल्पवीर्याणां योगो गर इति स्मृतः। कृत्रिमं गरसंज्ञं तु क्रियते विविधौषधैः। जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवाततपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति॥' दूषीविषकारणानि चरके-दुर्बलाग्नेरपथ्याम—विरोधिगुरुभोजनैः। भेलसंहितायामपि-समक्षतः सर्वरसान् मिथ्याहारविहारिणः। तथा नानावेदनाधमुदरं सान्निपातिकम्। क्षीणा दूष्योदरं नाम जायते सान्निपातिकम्॥त्रिदोषकोपनैस्तैस्तैः क्षीदत्तैश्च रजोमलैः। (अं० सं०)। दूष्योदरपरिभाषा—रक्तं दूष्यं दूषयित्वा भवतीति दूष्योदरं किंवा परस्परं दूषयन्तीति दोषा एव दूष्यास्तैः कृतमुदरमिति। (श्रीकण्ठदत्तो मधुकोषे)।

विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं सततं करोति
प्लीहोदरं तत् प्रवदन्ति तज्ज्ञाः ॥ १४ ॥

प्लीहोदर—विदाहकारक तथा अभिष्यन्दी वस्तुओं के अधिक खाने वाले मनुष्य का रक्त और कफ प्रबलरूप से कुपित होकर निरन्तर प्लीहा को बढ़ाते रहते हैं इसी को तज्ज्ञ वैद्य प्लीहोदर कहते हैं। प्लीहा वामपार्श्व में बढ़ती है तथा इसके बढ़ने से रोगी विशेष रूप से ग्लानियुक्त रहता है तथा मन्दज्वर, मन्दाग्नि, कफ और पित्त के लक्षणों वाले उपद्रवों

से युक्त, क्षीणबल और अधिक पाण्डु वर्ण का हो जाता है॥

विमर्शः—'विदाहिद्रव्यमुद्गारमम्ल कुर्यात्तथा तृषाम्। हृदि दाह च जनयेत्पाक गच्छति तच्चिरात्॥ 'पैच्छिल्याद् गौरवाद् द्रव्य रुद्ध्वा रसवहा सिरा। धत्ते यद् गौरव तत्स्यादभिष्यन्दि यथा दधि॥' इति। प्लीहा उदरवामपार्श्वस्थस्तस्य क्रमेणाभिवृद्धिम्। 'तस्य प्लीहा कठिनोऽष्ठीलेवादौ वर्धमान· कच्छपसंस्थान उपलभ्यते, स चोपेक्षित क्रमेण कुक्षिं जठरमग्न्यधिष्ठानं च परिक्षिप·नुदरमभिनिर्वर्तयति' इति चरक.।

प्लीहावृद्धि (Chronic enlargement of the spleen) के मुख्य कारण-जीवाणुओं से होने वाले रोग जैसे पुराना मलेरिया, काला अजार, हजकीन्स रोग तथा फिरङ्ग, सिरोसिस ऑफ् दी लिवर (Cirrhosis of the Liver), प्लीहा के अर्बुद, रक्तके रोग जैसे-श्वेत कणवृद्धि (Leukaemia), प्लैहिक पाण्डुरोग (Splenic anaemia) तथा दुष्टपाण्डुरोग (Pernicious anaemia) आदि। इन रोगों के सिवाय रक्त के दूषित हो जाने से रक्त में रोगों के जीवाणुओं के प्रविष्ट होने से प्लीहा का कार्य भी बढ़ जाता है तथा इस बढे हुये कार्य को पूर्ण करने के लिये प्लीहा की भी धीरे धीरे वृद्धि हो जाती है।

वामे च पार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥ १५॥*
सव्येतरस्मिन् यकृति प्रदुष्टे
ज्ञेयं यकृद्दाल्युदरं तदेव॥ १६॥

यकृद्दाल्युदर—सव्य (वाम) से इतर (दक्षिण) पार्श्व में यकृत् के प्रदुष्ट होने से उसी को यकृद्दाल्युदर कहते हैं॥१६॥

विमर्शः—यकृद्दालयति भेदयतीति यकृद्दाल्युदरम्। इसे Enlargement of the liver or enlarged liver कहते हैं। आयुर्वेद में प्लीहोदर को ही यकृद्दाल्युदर कहा है जैसे—'तदेव प्लीहोदर यकृद्दाल्युदर ज्ञेयम् क्व ज्ञेयमित्याह-यकृति कालखण्डे-किंभूते प्रदुष्टे' इति टल्हणः। भावप्रकाशेऽपि—प्लीहोदरस्यैव भेदो यकृद्दाल्युदर तथा। चरकेऽपि-तुल्यहेतुलिङ्गौषधत्वात्तस्य प्लीहजठरएवावरोध इत्येतद्यकृ·प्लीहोदर विद्यात्। डाक्टरी में भी प्लीहावृद्धि के कारणभूत रोगों में बाद में यकृत् भी बढ़ता देखा गया है।

यस्यान्त्रमन्नैरुपलेपिभिर्वा
बालाश्मभिर्वा सहितैः पृथग् वा।
सञ्चीयते तत्र मलः सदोषः
क्रमेण नाड्यामिव सङ्करो हि॥ १७॥
निरुध्यते चास्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
हृन्नाभिमध्ये परिवृद्धिमेति
तच्चोदरं विट्समगन्धिकं च॥ १८॥
प्रच्छर्दयन् वद्धगुदो विभाव्य-
स्ततः परिस्राव्युदरं निबोध॥ १९॥

* इसकी भाषा पूर्व के श्लोक १४ के साथ है।

वद्धगुदोदर—जिस मनुष्य की आंत चिपचिपे अन्न, बाल अथवा छोटे छोटे अश्म (पत्थर कंकर) से व्याप्त हो गई हो तथा जैसे नाली में धीरे धीरे कूड़ा कर्कट (संकर) इकट्ठा होता रहता है वैसे ही उस आंत में वातादि दोषों के साथ साथ मल सञ्चित होता रहता है। इस तरह उस मनुष्य की गुदा में मल का निरोध हो जाता है तथा थोडी थोड़ी मात्रा में बड़ी कठिनाई से निकलता है एवं हृदय और नाभि के मध्य में उदर (आंतें) फूलता है तथा दस्त के समान बदबूदार वमन होता है। इन लक्षणों से वद्धगुद का निदान करना चाहिये। इसके बाद परिस्रावी उदर का लक्षण सुनो॥१७-१९॥

विमर्शः—चरके वद्धगुदोदरवर्णन यथा—'पक्वमवाले सहान्नेन मुक्तेर्वद्धायने गुदे। उदावर्तैस्तथाऽर्शोभिरन्त्रसम्मूर्च्छनेन वा। अपानो मार्गसरोधाद् धात्वग्निं कुपितोऽनिल। वर्चं पित्तकरान् रुद्ध्वा जनयत्युदर तत॥'

डाक्टरी में वद्धगुदोदर को (Pelvi-rectal constipation) कहते हैं। आन्त्रमार्ग में अवरोध होने के कारण यह रोग उत्पन्न होता है। अवरोध निम्न कारणों से होता है—(१) बालाश्मादि तथा कठिन मल (Due to hard and bulky faeces)। (२) मलाशय या गुदभाग का संकोच (Stricture of the Rectum or Anus)। (३) स्फिक्टर एनाई नामक मांसपेशी सङ्कोच (Spasm of the sphincter ani or entero-spasm)। (४) अर्श (Haemorrhoids)। (५) आन्त्र-दौर्बल्य (Due to weakness of the intestine)। (६) तात्कालिक आन्त्रिकावरोध (Acute Intestinal obstruction) ये ही कारण चरक के उक्त पक्वमवालैः सहान्नेन से कहे गये हैं।

शल्यं यदन्नोपहितं तदन्त्रं
भिनत्ति यस्यागतमन्यथा वा।
तस्मात् स्रुतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः॥ २०॥
नाभेरधश्चोदरमेति वृद्धि
निस्तुद्यतेऽतीव विदह्यते च।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्तयतो निबोध॥ २१॥

परिस्राव्युदर—अन्न के साथ खाया मत्स्यकण्टकादिरूपी शल्य अथवा टेढा आया हुआ शल्य आन्त्र का भेदन कर देता है तथा उस भिन्न आंत से जल के समान रंग रूपवाला स्रवित (चुआ) हुवा स्राव पुनः गुदा से बाहर चूता (निकलता) है तथा कुछ स्राव के उदर गुहा में चले जाने से नाभि के नीचे उदर फूल जाता है तथा सूई चुभोने की सी तीव्र पीड़ा होती है एवं उदर में दाह होता है। इसको परिस्रावी उदर कहते हैं। अब आगे दकोदर का वर्णन करता हूं सो सुनो॥ २०-२१॥

विमर्शः—मधुकोष व्याख्या में लिखा है कि विलोम (टेढा) आया हुआ शल्य आन्त्रभेदक होता है सीधा नहीं होता—विलोमेनागतमन्त्र भिनत्ति, ऋज्वागत हि शल्यमपि नान्त्र-भेदकम्। अन्यथा वेति जृम्भणात्यशनाभ्यामन्त्र भिद्यते (मधुकोषः)। चरकेऽपि—शर्करातृणलोष्टास्थिकण्टकैरन्त्रसयुतै.। भिद्येतान्त्र यदा

मुक्तैर्जम्भयाऽत्यशनेन वा॥ आन्त्रच्छेद का कुछ स्राव आन्त्र ही में जाने से वह गुदमार्ग से बाहर निकलता है तथा शेष स्राव आन्त्र के बाहर उदर गुहा (Abdominal cavity) में स्रवता है जो नाभि के नीचे के हिस्से में इकट्ठा होकर उदर की वृद्धि करता है। यही भाव अष्टाङ्गसंग्रह में लिखा है—शेष चापूर्य जठर जठर घोरमावहेत्। पर्धते तदधो नाभेः। परिस्रावी उदर को छिद्रोदर या स्रतोदर भी कहते हैं—छिद्रोदरमिति प्राहुः परिस्रावीति चापरे। (अ० सं०)। डाक्टरी मत से यह आन्त्रछेदज उदरावरणशोथ (Peritonitis due to perforation of the bowel) है।

यः स्नेहपीतोऽप्यनुवासितो वा
वान्तो विरिक्तोऽप्यथवा निरूढः॥ २२॥
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि।
स्नेहोपलिप्तेष्वथवाऽपि तेषु
दकोदरं पूर्ववदभ्युपैति॥ २३॥
स्निग्धं महत्सम्परिवृत्तनाभि
भृशोन्नतं पूर्णमिवाम्बुना च।
यथा हृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत्॥ २४॥

दकोदर—जिसने स्नेहपान किया हो, अनुवासनवस्ति ली हो, वमन किया हो, विरेचन लिया हो अथवा निरूहण वस्ति ली हो और उसके बाद तुरन्त ही शीतल जल पीले तो उसके जलवाहक स्रोतस दूषित हो जाने से जलोदर हो जाता है। अथवा उन स्रोतसों के स्नेह द्वारा उपलिप्त होने पर शीतल जल पी लेने से भी पहले के परिस्राव्युदर की भांति आन्त्र से या जलवाहक स्रोतसों से रस चू चू कर उदरगुहा में सञ्चित हो के जलोदर हो जाता है। जलोदर में ऊपर से पेट चिकना, आकार में बडा, भीतरी जल के दबाव से नाभि का गर्त नष्ट होकर सपाट होना अथवा नाभि का उलट कर बाहर की ओर हो जाना तथा उदर अत्यधिक उठा हुआ प्रतीत होना ये लक्षण होते हैं तथा इनके सिवाय जैसे जल से पूर्ण भरी हुई मशक क्षुभित होती है, कम्पन करती है तथा शब्द करती है उसी तरह उदर भी क्षुभित होता है, हिलता है, गति करता है तथा शब्द करता है, इसको दकोदर कहते हैं॥ २२-२४॥

विमर्शः—जलोदर या दकोदर को एसाइटिस (Ascites) कहते हैं। इसकी उत्पत्ति के डाक्टरी में ६ कारण हैं। (नं० १) यकृद्वृद्धि के कारण प्रतिहारिणी महासिरा (Portal vein) के रक्तपरिभ्रमण में बाधा। (नं० २) हृदय के रोग जैसे माईट्रल स्टिनोसिस आदि। (नं० ३) वृक्क के विकार—Chronic and acute nephritis (नं० ४) उदरावरण शोथ (Peritonitis)। (नं० ५) रक्त के रोग। (नं० ६) रसप्रवाह का ठीक न होना। इन कारणों के अनुसार जलोदर भी ६ प्रकार का होता है। प्रतिहारिणी सिरावरोधजन्य जलोदर में अग्निमान्द्य, यकृत्प्लीहा वृद्धि, हृद्रोगज में हृत्कम्पन तथा पादशोथ, वृक्कविकृतिजन्य में समस्त शरीर तथा विशेषरूप से अक्षिपलक के नीचे और पावों पर शोथ तथा मूत्र में कास्ट मिलना आदि लक्षण मिलते हैं। जलोदर के निदान (Diagnosis) के लिये तीन परीक्षायें हैं जैसे—(१) कम्पनपरीक्षा (Fluctuation test) उदर पर अङ्गुलियों द्वारा आघात करने से उदर थलथलाता या कांपता है। (२) क्षोभपरीक्षा (Percussion test)—एक पार्श्व में हाथ रख कर दूसरे पार्श्व पर हस्त से आघात करने पर भीतरी जल में उत्पन्न क्षोभ पूर्व हस्त को प्रतीत होगा। (३) शब्द परीक्षा (Percussion) जल पूर्ण मशक पर आघात करने की भांति उदर पर आघात करने से मन्द Dull) शब्द सुनाई देता है। 'तोयपूर्णवृतिस्पर्शशब्दप्रक्षोभवेषयु' ऐसा अष्टाङ्गसंग्रह में भी लिखा है।

आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता।
शोफः सदनमङ्गानां सङ्गो वातपुरीषयोः।
दाहस्तृष्णा च सर्वेषु जठरेषु भवन्ति हि॥ २५॥

लक्षण—आध्मान, चलने में असमर्थता, दुर्बलता, मन्दाग्नि, शोथ, अगों की ग्लानि, अधोवात तथा मल में रुकावट, दाह और प्यास ये सामान्य लक्षण सर्व प्रकार के उदर रोगों में होते हैं॥ २५॥

अन्ते सलिलभावं हि भजन्ते जठराणि तु।
सर्वाण्येव परीपाकात्तदा तानि विवर्जयेत्॥ २६॥

इति सुश्रुतसंहितायां निदानस्थाने उदरनिदानं नाम सप्तमोऽध्यायः॥ ७॥

सर्व प्रकार के उदर रोग अधिक समय बीतने पर सलिलभाव (जलोदरता) को प्राप्त हो जाते हैं उस अवस्था में उन की चिकित्सा वर्जित है॥ २६॥

विमर्शः—असाध्योदरलक्षणानि-जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम्। बलिनस्तदजातास्तु यत्नसाध्यं नवोत्थितम्॥ पक्षाद्बद्धगुदं तूर्ध्वं सर्वं जातोदकं तथा। प्रायो भवत्यभावाय छिद्रान्त्रं चोदरं नृणाम्॥ शूनाक्षं कुटिलोपस्थमुपच्छिन्नतनुत्वचम्। बलमांसितमासाग्निपरिक्षीणञ्च वर्जयेत्॥ पार्श्वभङ्गान्नविद्वेषशोफानीसारपीडितम्। विरिक्तं चाप्युदरिणं पूर्यमाणं विवर्जयेत्॥ (भावप्रकाशः)

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषायामुदरनिदानं नाम सप्तमोऽध्यायः॥ ७॥

अष्टमोऽध्यायः

अथातो मूढगर्भनिदानं व्याख्यास्यामः॥ १॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

अब इसके अनन्तर मूढगर्भ निदान का वर्णन करते हैं जैसा कि भगवान् धन्वन्तरि ने सुश्रुत के लिये कहा था॥१-२॥

ग्राम्यधर्मयानवाहनाध्वगमनप्रस्खलनप्रपतनप्रपीडनधावनाभिघातविषमशयनासनोपवासवेगाभिघातातिरूक्षकटुतिक्तभोजनशोकातिचारसेवनातिसारवमनविरेचनप्रद्वोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः, फलमिव वृन्तबन्धनादभिघातविशेषैः॥

(शस्त्रकर्म) न करने पर रोगी की मृत्यु निश्चित रहती है तथा शस्त्रकर्म करने पर भी सशय बना रहता है इसलिये

कल्याण करने वाले वैद्य को राजा की (अथवा रोगी के अभिभावक की) अनुमति लेकर शस्त्रकर्म करना चाहिये ॥ २९ ॥

अथ रोगान्वितमुपस्निग्धमपकृष्टदोषमीषत्कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतबलिमङ्गलस्वस्तिवाचनमग्रोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य, ततो बलवन्तमविक्लवमाजानुसमे फलके प्रागुपविष्टान्यपुरुषस्योत्सङ्गे निषण्णपूर्वकायमुत्तानमुन्नतकटीकं वस्त्राधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहाववद्धं सूत्रेण शाटकैर्वा, ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनाऽवपीडयेदधोनाभेर्यावदश्मर्यधः प्रपन्नेति, ततः स्नेहाभ्यक्ते क्लृप्तनखे वामहस्तप्रदेशिनीमध्यमे अङ्गुल्यौ पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय, निर्व्रणीकमनायतमविषमं च वस्तिं सन्निवेश्य, भृशमुत्पीडयेदङ्गुलिभ्यां यथा ग्रन्थिरिवोन्नतं शल्यं भवति ॥३०॥

इसके अनन्तर रोगी का स्नेहन करके, (वमन-विरेचन द्वारा) दोषों को दूरकर, कुछ दुर्बल करे और अभ्यङ्ग (स्नेहन) तथा स्वेदन से शरीर को शुद्धकर भोजन करावे। फिर बलिप्रदान, मंगल-पाठ, स्वस्तिवाचन कर्म करे तथा अग्रोपहरणीय अध्याय में कही गई विधि के अनुसार (यन्त्र, शस्त्र, क्षार, शलाका आदि) सभी साधनों को एकत्रित कर रोगी को आश्वासन दे। फिर बल सम्पन्न एवं न घबड़ाने वाले रोगी को घुटने की ऊँचाई के बराबर चौकी पर पूर्वाभिमुख बैठावे और (पूर्वाभिमुख बैठे हुए) दूसरे पुरुष की गोद में रोगी का कटि से ऊपर का भाग, उत्तान रूप में रखे। कटिप्रदेश कुछ ऊँचा कर कपड़े की गद्दी नितम्ब के नीचे लगावे, घुटने और कुहनी को सिकोड कर एक दूसरे के साथ धागे या कपड़े से (पट्टी) बाँध दे। फिर भलीभाँति नाभिप्रदेश में स्नेह की मालिश करे और बाँये पसवाडे को मलकर नाभि के नीचे मुट्ठी से तब तक दबावे जब तक अश्मरी नीचे न आ जाय। फिर स्नेह से स्निग्ध, कटे हुए नाखून वाली बाँये हाथ की तर्जनी और मध्यमा अंगुलियों को गुदा में प्रवेश करे और सेवनी के नीचे ले जाकर, उपाय और बल से, गुदा तथा लिङ्ग के बीच लाकर, सिकुडन रहित, छोटी और सीधी वस्ति को सम्यक् स्थापित करके, अंगुलियों से जोर से दबावे जिससे शल्य (अश्मरी) गाँठ के समान ऊपर उठ जाय ॥३०॥

स चेद्गृहीतशल्ये तु विवृताक्षो विचेतनः।
हतवल्लम्बशीर्षश्च निर्विकारो मृतोपमः ॥ ३१ ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः।
विना त्वेतेषु रूपेषु निर्हर्तुं प्रयतेत वै ॥ ३२ ॥

यदि शल्य (अश्मरी) को पकड़ लेने पर रोगी के नेत्र स्तब्ध हो जांय, वह मूर्च्छित हो जाय, मुर्दे के समान गर्दन लटका दे तथा चेष्टारहित मृतक के समान प्रतीत हो तो उस रोगी का शल्य नहीं निकालना चाहिये। शल्य निकाला जाय तो उसकी मृत्यु हो जाती है। इन लक्षणों से रहित रोगी के शल्य को निकालने का प्रयत्न करना चाहिये ॥३१-३२॥

ततः सव्ये पार्श्वे सेवनीं यवमात्रेण मुक्त्वाऽवचारयेच्छस्त्रमश्मरीप्रमाणं, दक्षिणतो वा क्रियासौकर्यहेतोरित्येके, यथा सा न भिद्यते चूर्ण्यते वा तथा प्रयतेत, चूर्णमल्पमप्यवस्थितं हि पुनः परिवृद्धिमेति, तस्मात् समस्तामग्रवक्त्रेणाददीत;

वामपार्श्व में सेवनी को एक जौ छोडकर, अश्मरी के प्रमाण (लम्बाई) के अनुसार, शस्त्र कर्म करे (चीरा लगावे)। कुछ आचार्यों का मत है कि क्रिया में सुविधा की दृष्टि से दाहिनी ओर शस्त्रकर्म करना चाहिए। अश्मरी के टुकडे न हों या वह चूर-चूर न हो जाय इसका प्रयत्न करना चाहिये क्योंकि यदि थोड़ा भी चूर्ण निकालने में शेष रह जाय तो वह पुनः बडा आकार धारण कर लेता है। इसलिए समस्त अश्मरी को अग्र वक्त्र (आहरण यन्त्र) से निकालना चाहिये ॥ ३३ ॥

विमर्शः—अपकृष्टदोषमूर्ध्वाधोदोषनिर्हरणेन दोषरहितम्। ईषत् कर्शितमिति अतिकर्शनेन कर्माक्षमता, अकर्शनेनोपचितानल्पवस्तिकायत्वादश्मर्या अप्राप्तिरिति। बलवन्तमिति अपकृष्टदोष विशुद्धमन्नससर्जनेन सञ्जनितबलम्। अश्मरी निकालने की जिस प्रक्रिया का वर्णन सुश्रुत ने किया है उसे पाश्चात्य-चिकित्सा-विज्ञान के अनुसार 'Lateral perineal lithotomy' कह सकते हैं। Lateral perineal lithotomy, where the stone is removed through the lateral portion of the perineum by incising the prostate This operation is no longer performed, except upon African natives who will insist on going out of hospital on the next day. आजकल Lithotrity और Lithotomy दो प्रकार की शस्त्र क्रियायें अश्मरी निकालने के लिये प्रयुक्त होती हैं। 'Two typs of operation are practised that of Cutting for the stone (Lithotrity) and crushing the stone (Lithotomy) Lithotomy क्रिया का प्रयोग तीन प्रकार से किया जाता है। (१) Lateral perineal lithotmy:—इस क्रिया का वर्णन ऊपर किया जा चुका है। प्राचीन युग में अश्मरी निकालने के लिए इसी क्रिया का व्यवहार होता था। (२) प्रक्रिया का नाम है Median perineal lithotomy और (३) प्रक्रिया Suprapubic lithotomy कहलाती है। इस तीसरी प्रक्रिया का व्यवहार आधुनिक युग में अश्मरी निकालने के लिए प्रायः किया जाता है 'This is the form of operation employed in practically all cases The bladder is opened above the pubes (as described on p 886) the stone is felt and removed with forceps If the urine is uninfected, the bladder may then be sutured with a continuous Catgutstitch, and the wound closed without drainage, but if cystitis and infection of the urine are present, the bladder must be drained for from five to seven days By this operation any other condition, such as enlarged prostate or growth of

the bladder, can be dealt with at the same time 'The Science and practice of Surgery'

स्त्रीणां तु वस्तिपार्श्वगतो गर्भाशयः सन्निकृष्टः, तस्मात्तासामुत्सङ्गवच्छस्त्रं पातयेत्, अतोऽन्यथा खल्वासां मूत्रस्रावी व्रणो भवेत्, पुरुषस्य वा मूत्रप्रसेकक्षणनान्मूत्रक्षरणम्; अश्मरीव्रणादृते भिन्नवस्तिरेकधाऽपि न भवति, द्विधा भिन्नवस्तिराश्मरिको न सिध्यति।

स्त्रियों का गर्भाशय वस्ति के पार्श्व में निकट में ही रहता है। इसलिये उनमें शस्त्र प्रयोग उत्तान रूप में, अर्थात् अधिक गहरा नहीं करना चाहिये, अन्यथा स्त्रियों को मूत्रस्रावी व्रण हो जाता है। पुरुषों में भी वस्ति-मुख के स्रोत में व्रण होने पर मूत्रस्राव होने लगता है। अश्मरी निकालने के लिए शस्त्र द्वारा किए गये व्रण के अतिरिक्त अन्य कारणों से फटी हुई वस्ति का सन्धान नहीं होता तथा दो भागों में फटी हुई वस्ति वाला अश्मरी का रोगी नीरोग नहीं होता ॥ ३३ ॥

विमर्शः-उत्सङ्गवदिति। ऊर्ध्वं सङ्गः मयस्थानीति तदुत्सङ्गवत् उत्तानमित्यर्थः। अन्यथेति। यदावगाढ. शस्त्रपात. स्यात् तदा बहिर्गत त्वङ्मान भित्त्वा वस्तित्वचा सह भगवन्तुवस्तिपार्श्वाश्रयस्य गर्भाशयस्यापि त्वचो भेदः स्यात्, ततस्तासा भगान्तर्गतो मूत्रस्रावी व्रणः स्यादित्यर्थ। तथा च वैतरण—'भगस्याधः स्त्रिया वस्तिरूर्ध्वं गर्भाशय. स्थित.। गर्भाशयश्च वस्तिश्च सहास्रोत समाश्रितौ। वस्तिमार्ग समुत्सृज्य व्रणमश्मरीं शुभः। स्त्रिणत्रे भेदन नास्ति हितमन्यत्र दोषकृत्।' (डल्हणः)

अश्मरीव्रणनिमित्तमेकधाभिन्नवस्तिर्जीवति, क्रियाभ्यासाच्छास्त्रविहितच्छेदान्नःस्यन्दपरिवृद्धत्वाच्च शल्यस्येति। उद्धृतशल्यं तूष्णोदकद्रोण्यामवतार्य स्वेदयेत्, तथा हि वस्तिरसृजा न पूर्यते; पूर्णे वा क्षीरवृक्षकषायं पुष्पनेत्रेण विदध्यात् ॥ ३३ ॥

अश्मरी-व्रण के कारण एक स्थान पर फटी हुई वस्ति वाला रोगी क्रियाभ्यास, शास्त्रविहित छेदनकर्म और मूत्र की मात्रा में वृद्धि होने के कारण जीवित रहता है। शल्य (अश्मरी) निकालने के बाद रोगी को उष्ण जल की द्रोणी (नौकाकृति टब) में बैठाकर स्वेदन करे इस विधि के प्रयोग से वस्ति में रक्त एकत्रित नहीं होता। यदि वस्ति में रक्त भर जाय तो क्षीरवृक्षकाथ का प्रयोग पुष्पनेत्र (उत्तरवस्ति) के द्वारा करना चाहिये ॥ ३३ ॥

विमर्श.—क्रियाभ्यासात्—क्रियाणामुष्णोदकस्वेदक्षीरवृक्षकषायभोजनादीनामभ्यसन क्रियाभ्यासस्तस्मात्। अश्मरीप्रमाणमुख मात्र. सेवनीयव्यपाश्रय. शास्त्रविहितच्छेदस्तस्मात्। नि.स्यन्दो मूत्रं तेन परिवृद्ध शल्य तस्मादित्यर्थ.। एतदुक्त भवति-येन निःस्यन्देन मूत्रेण वृद्धेन सता शल्य परिवृद्धम्, तस्य शल्यापहरणेऽपि निःशेषापरिक्षुतत्वाद् भिन्नवस्तिर्जीवति। यथा तु शल्यस्येतिपदं परित्यज्य निस्यन्दपरिवृद्धत्वादित्येव पठति व्याख्यानयति च-नि.स्यन्दस्य मूत्रस्य परिवृद्धत्वेन, अत एव मूत्रवृद्धिकरयवागूगुडक्षीरादिसौहित्यविधान, शास्त्रविहिताक्रमच्छेदे तु मूत्रनि.शेषक्षरणान्मरणमिति। (डल्हणः) यहाँ गयदास की उक्ति ही उचित प्रतीत होती है।

भवति चात्र—

क्षीरवृक्षकषायस्तु पुष्पनेत्रेण योजितः।
निर्हरेदश्मरीं तूर्णं रक्तं वस्तिगतं च यत् ॥ ३४ ॥

जैसा कि—उत्तरवस्ति के द्वारा प्रयुक्त क्षीरवृक्ष कषाय अश्मरी और वस्तिगत रक्त को शीघ्र बाहर निकाल देता है।

मूत्रमार्गविशोधनार्थं चास्मै गुडसौहित्यं वितरत्; उद्धृत्य चैनं मधुघृताभ्यक्तव्रणं मूत्रविशोधनद्रव्यसिद्धामुष्णां सघृतां यवागूं पाययेदुभयकालं त्रिरात्रं; त्रिरात्रादूर्ध्वं गुडप्रगाढेन पयसा मृद्वोदनमल्पं भोजयेद्दशरात्रं मूत्रासृग्विशुद्ध्यर्थं व्रणक्लेदनार्थं च, दशरात्रादूर्ध्वं फलाम्लैर्जाङ्गलरसैरुपाचरेत्; ततो दशरात्रं चैनमप्रमत्तः स्वेदयेत् स्नेहेन द्रवस्वेदेन वा; क्षीरवृक्षकषायेण चास्य व्रणं प्रक्षालयेत्; रोध्रमधुकमञ्जिष्ठाप्रपौण्डरीककल्कैर्व्रणं प्रतिग्राहयेत्; एतेष्वेव हरिद्रायुतेषु तैलं घृतं वा विपकं व्रणाभ्यञ्जनमिति; सप्तरात्राच्च स्वमार्गमप्रतिपद्यमाने मूत्रे व्रणं यथोक्तेन विधिना दहेदग्निना, स्वमार्गप्रतिपन्ने चोत्तरवस्त्यास्थापनानुवासनैरुपाचरेन्मधुरकपायैरिति; यदृच्छया वा मूत्रमार्गप्रतिपन्नामन्तरासक्तां शुक्राश्मरीं शर्करां वा स्रोतसाऽपहरेत्, एव चाशक्ये विदार्य वा नाडीं शस्त्रेण वडिशेनोद्धरेत्। रूढव्रणश्चाङ्गनाश्वनगनागरथद्रुमान् नारोहेत वपं, नाप्सु प्लवेत, भुञ्जीत वा गुरु ॥ ३५ ॥

मूत्रमार्ग के शोधन के लिये रोगी को गुड-मिश्रित भात खिलाना चाहिये। (उष्ण जल की द्रोणी से) रोगी को बाहर निकाल कर, मधु और घृत व्रण पर लगावे। मूत्रशोधन द्रव्यों (तृणपचमूल, गोखरू आदि) के द्वारा सिद्ध, उष्ण घृतयुक्त यवागू दोनों समय तीन दिन पिलावे। तीन दिन के बाद मूत्र और रक्त की शुद्धि तथा व्रण को आर्द्र करने के लिये, पर्याप्त गुड मिश्रित दूध के साथ नरम भात थोडी मात्रा में दस दिन खिलावे। दस दिन के पश्चात् खट्टेफल (दाडिम आदि) तथा जगली जीवों के मांसरस का सेवन करावे। इसके बाद दस दिन तक सावधानी के साथ रोगी का स्नेह या द्रव स्वेद के द्वारा स्वेदन करे। क्षीरवृक्ष के क्वाथ से रोगी का व्रण धोवे।

लोध, मुलेठी, मजीठ और पुण्डेरी (सुगन्ध द्रव्य) के कल्क का लेप व्रण पर लगावे। इन द्रव्यों में हल्दी मिलाकर इनके कल्क से सिद्ध तेल या घृत की मालिश व्रण पर करे। वस्ति में रक्त एकत्रित होने पर उत्तरवस्ति के द्वारा उपचार करे। सात दिन के अनन्तर जब मूत्र अपने स्वाभाविक मार्ग से न निकले तब कही गई विधि के अनुसार व्रण को अग्नि से जलावे। मूत्र के स्वाभाविक मार्ग से निकलने

पर मधुर और कषाय वर्ग (काकोल्यादिगण तथा क्षीरवृक्षादि) के क्वाथ से उत्तरवस्ति, आस्थापन और अनुवासन के द्वारा उपचार करे। अपने आप मूत्रमार्ग में पहुँचकर रुकी हुई शुक्राश्मरी या शर्करा को मूत्रमार्ग के द्वारा निकाले। इस प्रकार न निकलने वाली अश्मरी को, मूत्रमार्ग में चीरा लगाकर बडिश शस्त्र (Hook) से निकाले। व्रण के भर जाने पर भी एक वर्ष तक स्त्रीसेवन न करे, घोडा, हाथी, पर्वत, रथ और वृक्ष पर न चढे, जल में न तैरे एवं भारी भोजन न करे ॥ ३७ ॥

मूत्रवहशुक्रवहमुष्कस्रोतोमूत्रप्रसेकसेवनीयोनिगुदबस्तीन् परिहरेत्। तत्र मूत्रवहच्छेदान्मरणं मूत्रपूर्णबस्तेः, शुक्रवहच्छेदान्मरणं क्लैब्यं वा, मुष्कस्रोतउपघाताद् ध्वजभङ्गः मूत्रप्रसेकक्षणान्मूत्रप्रक्षरणं, सेवनीयोनिच्छेदाद्रुजः प्रादुर्भावः, बस्तिगुदविद्धलक्षणं प्रागुक्तमिति ॥ ३६ ॥

मूत्रवह, शुक्रवह, मुष्कस्रोत, मूत्रप्रसेक (वस्तिमुख स्रोत), सेवनी, योनि, गुदा और वस्ति को शस्त्रकर्म करने के समय कटने से बचावे। मूत्रवह के कटने से मृत्यु होती है तथा वस्ति मूत्र से भर जाती है। शुक्रवह के कटने से मृत्यु अथवा नपुंसकता होती है। मुष्कस्रोत के कट जाने पर ध्वजभङ्ग हो जाता है। मूत्रप्रसेक (वस्तिमुख) में व्रण होने पर मूत्रस्राव होने लगता है। सेवनी और योनि के कट जाने पर वेदना की उत्पत्ति होती है। बस्ति और गुदाविद्ध का लक्षण पहले (मर्मनिर्देश में) कहा जा चुका है ॥ ३६ ॥

भवतश्चात्र—

मर्माण्यष्टावसंवुध्य स्रोतोजानि शरीरिणाम्।
व्यापादयेद्बहून्मर्त्यान् शस्त्रकर्मापटुर्भिषक् ॥ ३७ ॥

जैसा कि—शस्त्रकर्म को भलीभाँति न जानने वाला वैद्य मनुष्यों के शरीर में स्थित आठ प्रकार के मर्मों को न पहचान कर अनेक व्यक्तियों को मार डालता है ॥ ३७ ॥

सेवनी शुक्रहरणी स्रोतसी फलयोर्गुदम्।
मूत्रसेकं मूत्रवहं योनिर्बस्तिस्तथाऽष्टमः ॥ ३८ ॥

इति सुश्रुतसंहितायां चिकित्सास्थानेऽश्मरीचिकित्सितं नाम सप्तमोऽध्यायः ॥ ७ ॥

(१) सेवनी, (२) शुक्रवह, (३) मुष्कस्रोत (४) गुदा, (५) मूत्रप्रसेक, (६) मूत्रवह, (७) योनि और (८) बस्ति ये आठ मर्म हैं ॥ ३८ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकायां भाषाटीकायां सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

अथातो भगन्दराणां चिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

इसके अनन्तर भगन्दरों की चिकित्साविधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

पञ्च भगन्दरा व्याख्याताः, तेष्वसाध्यः शम्बूकावर्तः शल्यनिमित्तश्चेति; शेषाः कृच्छ्रसाध्याः ॥ ३ ॥

पाँच प्रकार के भगन्दरों का वर्णन (निदान स्थान में) किया जा चुका है, इनमें शम्बूकावर्त (त्रिदोषज) और शल्य से उत्पन्न (क्षतज) भगन्दर असाध्य तथा शेष कष्टसाध्य होते हैं ॥ ३ ॥

तत्र भगन्दरपिडकोपद्रुतमातुरमपतर्पणादिविरेचनान्तैरेकादशविधैरुपक्रमैरुपक्रमेत्। पक्वपिडकं चोपलिङ्गमवगाहस्विन्नं शय्यायां सन्निवेश्यार्शसमिव यन्त्रयित्वा, भगन्दरं समीक्ष्य पराचीनमवाचीनं वा, ततः प्रणिधायैषणीमुन्नम्य साशयमुद्धरेच्छस्त्रेण; अन्तर्मुखे चैवं सम्यग्यन्त्रं प्रणिधाय प्रवाह्यमाणस्य भगन्दरमुखमासाद्यैषणीं दत्त्वा शस्त्रं पातयेत्; आसाद्य वाऽग्निं क्षारं चेति; एतत् सामान्यं सर्वेषु ॥ ४ ॥

भगन्दर पिडका से पीडित, अपक्व पिडका वाले रोगी की चिकित्सा, अपतर्पण से लेकर विरेचन पर्यन्त (द्विव्रणीय चिकित्सा में पठित) ग्यारह विधानों के द्वारा करनी चाहिए। पक्वपिडका वाले रोगी का स्नेहन कर अवगाह स्वेदन करे (उष्ण जल की द्रोणी में बिठाकर स्वेदन करना) और शय्या पर बिठावे। फिर अर्श चिकित्साविधि की भाँति (Lithotomy position) रोगी को बाँधकर पराचीन (बहिर्मुख) और अवाचीन (अन्तर्मुख) भगन्दर की परीक्षा करे तथा एषणीयन्त्र प्रवेश करके कुछ ऊँचा उठावे एवं आशयसहित शस्त्र से काट दे।

अन्तर्मुख वाले भगन्दर में उसी प्रकार भलीभाँति यन्त्र प्रवेश करके प्रवाहण करते हुए रोगी के भगन्दर-मुख की परीक्षा करे और एषणीयन्त्र डालकर चीरा लगावे। अथवा भगन्दर को देखकर अग्नि या क्षार कर्म का प्रयोग करे। सभी भगन्दरों के लिए यह सामान्य चिकित्साविधि है।

विशेषतस्तु—

नाड्यन्तरे व्रणान् कुर्याद्भिषक् तु शतपोनके।
ततस्तेषूपरूढेषु शेषा नाडीरुपाचरेत् ॥ ५ ॥
गतयोऽन्योन्यसम्बद्धा बाह्याश्छेद्यास्त्वनेकधा।
नाडीरनभिसंबद्धा यश्छिनत्त्येकधा भिषक् ॥ ६ ॥
स कुर्याद्विवृतं जन्तोर्व्रणं गुदविदारणम्।
तस्य तद्विवृतं मार्गं विण्मूत्रमनुगच्छति ॥ ७ ॥
आटोपं गुदशूलं च करोति पवनो भृशम्।
तत्राधिगततन्त्रोऽपि भिषङ्मुह्येदसंशयम्।
तस्मान्न विवृतः कार्यो व्रणस्तु शतपोनके ॥ ८ ॥

विशेष चिकित्सा—सुशिक्षित वैद्य को शतपोनक (चलनी के समान छिद्रवाले) भगन्दर में नाडियों के मध्य में व्रण बनाना चाहिए और इन व्रणों के भर जाने पर शेष नाडी (Sinus) की चिकित्सा करनी चाहिए। एक दूसरे से सम्बन्धित नाडियों में अनेक प्रकार के व्रण बाहर से बनाना चाहिए।

जो वैद्य एक दूसरे से सम्बन्ध-रहित नाडी में एक प्रकार का व्रण बनाता है वह रोगी के व्रण को फैला देता है तथा गुदा को विदीर्ण कर देता है। उस रोगी के फैले हुए व्रण-मार्ग से मल, मूत्र का स्राव होता है तथा प्रकुपित वायु आटोप और गुदा में अत्यन्त शूल उत्पन्न कर देता है। ऐसे अवसर पर शल्यशास्त्र निष्णात वैद्य भी निस्सन्देह घबडा जाता है। इसलिए शतपोनक भगन्दर में व्रण को चौड़ा नहीं करना चाहिए।

विमर्श—शतपोनक भगन्दर (Multiple fistula) चलनी के समान अनेक छोटे छोटे छिद्रों से युक्त होता है। अर्थात् इसमें छोटे-छोटे व्रण हो जाते है जिनसे निरन्तर झागदार स्वच्छ स्राव अधिक मात्रा में निकलता रहता है। सुश्रुत ने शल्यशास्त्र-निष्णात वैद्य को भी इसमें एक काल में सभी मार्गों के अन्दर शस्त्रक्रिया का निषेध करते हुए, सावधान किया है। पाश्चात्य चिकित्सा विज्ञान भी ऐसे अवसर पर यही सम्मति प्रदान करता है—'During the Operation the track must be examined carefully visually and with the probe, and all side tracks laid open freely and curetted, if they are very numerous deal with one side of the rectum alone and leave the other to be treated subsequently as it is useless to open the main track unless all its branches are also dealtwith. The same applies to horseshoe Fistula, and here a word of warning is necessary as to multiple division of the sphincter ani, which should not be cut in more than two places at one time'

The Seince & Practice of Surgery.

व्याधौ तत्र बहुच्छिद्रे भिषजा वै विजानता ॥ ९ ॥
अर्धलाङ्गलकश्छेदः कार्यो लाङ्गलकोऽपि वा।
सर्वतोभद्रको वाऽपि कार्यो गोतीर्थकोऽपि वा ॥१०॥

कुशल वैद्य इस अनेक छिद्र वाली व्याधि में अर्द्धलाङ्गलक (आधे हल की आकृति की भाँति) या लाङ्गलक (पूरे हल की आकृति की भाँति) व्रण भी बनावे। अथवा सर्वतोभद्रक (मण्डलाकार) या गोतीर्थक (गौ के खुर की आकृति का) व्रण बनावे ॥ ९-१० ॥

विमर्शः—लाङ्गल हलमुच्यते, अर्द्धलाङ्गल इव अर्द्धलाङ्गलक। सर्वतोभद्रस्त्वासनविशेष पर्यङ्किकाकारो मण्डलाकारसदृशो वा। गोतीर्थको गच्छतो गोर्मूत्रगतिसदृश, अथवा गोतीर्थं गोयोनिरुच्यते, तदाकारो गोतीर्थक, अथवा गोतीर्थं निपान येन गाव. पिबन्ति, तत्खुराङ्कितवच्छेदविशेष कर्तव्य'। तथा च तन्त्रान्तरम्—'द्वाभ्या समाभ्या पार्श्वाभ्या छेदो लाङ्गलको मतः हस्वमेकतर यच्च सोऽर्द्धलाङ्गलक' स्मृत। सेवनीं वर्जयित्वा तु चतुर्द्धा दारिते गुदे। सर्वतोभद्रक छेदमाहुश्छेदविदो जना। पार्श्वागतेन छिद्रेण छेदो गोतीर्थको भवेत्।'

सर्वतः स्रावमार्गास्तु दहेद्वैद्यस्तथाऽग्निना।
सुकुमारस्य भीरोर्हि दुष्करः शतपोनकः॥
रुजास्रावापहं तत्र स्वेदमाशु प्रयोजयेत् ॥ ११ ॥

वैद्य स्रावमार्गों को चारों ओर से अग्नि के द्वारा जलावे। सुकुमार एव भीरु व्यक्ति का शतपोनक-भगन्दर कष्टसाध्य होता है। उसमे वेदना तथा स्राव को बन्द करने के लिए स्वेदन का प्रयोग शीघ्र करना चाहिए ॥ ११ ॥

स्वेदद्रव्यैर्यथोद्दिष्टैः कृशरापायसादिभिः ॥ १२ ॥
ग्राम्यानूपौदकैर्मांसैर्लावाद्यैर्वाऽपि विष्किरैः।
वृक्षादनीमथैरण्डं बिल्वादिं च गणं तथा ॥ १३ ॥
कषायं सुकृतं कृत्वा स्नेहकुम्भे निषेचयेत्।
नाडीस्वेदेन तेनास्य तं व्रणं स्वेदयेद्भिषक् ॥ १४ ॥

पूर्वकथित स्वेदन द्रव्य, कृशरा, पायस, ग्राम्य, आनूप और उदक जीवों के मांस, लवा आदि या विष्किर (घोंसले मे रहने वाले) पक्षियों के मांस तथा वृक्षादनी (वन्दाक), एरण्ड एवं विल्वादिगण (बृहत्पञ्चमूल) के द्रव्यों का भली-भांति क्वाथ बनाकर स्नेहलिप्त घड़े में रखे और नाडीस्वेद के द्वारा वैद्य रोगी के व्रण का स्वेदन करे ॥ १२-१४ ॥

तिलैरण्डातसीमाषयवगोधूमसर्षपान् ।
लवणान्यम्लवर्गं च स्थाल्यामेवोपसाधयेत् ॥
आतुरं स्वेदयेत्तेन तथा सिध्यति कुर्वतः ॥ १५ ॥

तिल, एरण्ड, अलसी, उड़द, जौ, गेहूँ, सरसों, पंचलवण, और अम्लवर्ग का थाली में (चौडे पात्र में) क्वाथ बनाकर रोगी का स्वेदन करे। इस क्रिया से रोग की निवृत्ति होती है ॥ १५ ॥

स्विन्नं च पाययेदेनं कुष्ठं च लवणानि च ॥ १६ ॥
वचाहिङ्ग्वजमोदं च समभागानि सर्पिषा।
मार्द्वीकेनाथवाऽम्लेन सुरासौवीरकेण वा ॥ १७ ॥
ततो मधुकतैलेन तस्य सिञ्चेद्भिषग्व्रणम्।
परिषिञ्चेद् गुदं चास्य तैलैर्वातरुजापहैः ॥ १८ ॥
विधिनाऽनेन विण्मूत्रं स्वमार्गमधिगच्छति।
अन्ये चोपद्रवास्तीव्राः सिध्यन्त्यत्र न संशयः ॥१९॥

स्वेदन के उपरान्त रोगी को, कूठ, पंचलवण, वच, हींग और अजवायन समभाग में लेकर घी के साथ पिलावे। द्राक्षामद्य, काञ्जी, सुरा अथवा सौवीरक या मुलेठी के कल्क से सिद्ध तेल के द्वारा उस रोगी के व्रण का परिषेक करे। वातवेदना को शमन करने वाले (वातव्याधि में पठित) तेलों के द्वारा रोगी के गुदा का परिषेक करे। इन विधानों के द्वारा मल, मूत्र की प्रवृत्ति स्वाभाविक मार्ग से होने लगती है और अन्य भयकर उपद्रव (आध्मान-गुदभ्रंश आदि) निस्सन्देह शान्त हो जाते हैं ॥ १६-१९ ॥

शतपोनक आख्यात उष्ट्रग्रीवे क्रियां शृणु।
अथोष्ट्रग्रीवमेषित्वा छित्त्वा क्षारं निपातयेत् ॥ २० ॥
पूतिमांसव्यपोहार्थमग्निरत्र न पूजितः।
अथैनं घृतसंसृष्टैस्तिलैः पिष्टैः प्रलेपयेत् ॥ २१ ॥
बन्धं ततोऽनुकुर्वीत परिषेकं तु सर्पिषा।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक् ॥
ततः शुद्धं विदित्वा च रोपयेत्तु यथाक्रमम् ॥ २२ ॥

शतपोनक का वर्णन हो चुका, अब उष्ट्रग्रीव भगन्दर की क्रिया विधि सुनो—उष्ट्रग्रीव भगन्दर में एषण (Probing)

करे और व्रण में चीरा लगाकर क्षार लगावे। उसमें सड़े हुए दुर्गन्धित मांस को निकालने के लिए अग्निकर्म श्रेष्ठ नहीं होता। उष्ट्रग्रीव भगन्दर में तिलों को पीसकर घृत मिला, लेप करना चाहिये। उसके बाद पट्टी बाँध देनी चाहिए और घी से परिषेक करना चाहिए। वैद्य तीसरे दिन पट्टी खोलकर पित्त और ताप को दूर करने वाली औषधियों के द्वारा व्रण को शुद्ध करे और व्रण के शुद्ध होने पर जब रोपण की अवस्था प्राप्त हो तब रोपण करे ॥ २०-२२ ॥

उत्कृत्यास्रावमार्गांस्तु परिस्रावि बुद्धिमान् ॥ २३ ॥
क्षारेण वा स्रावगति दहेद्घृततप्तेन वा।
सुखोष्णेनाणुतैलेन सेचयेद् गुदमण्डलम् ॥ २४ ॥
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्विताः।
वामनीयौषधैः कार्याः परिषेकाश्च मात्रया ॥ २५ ॥
मृदुभूतं विदित्वैनमल्पस्रावरुगन्वितम्।
गतिमन्विष्य शस्त्रेण छिन्द्यात् खर्जूरपत्रकम् ॥ २६ ॥
चन्द्रार्धं चन्द्रचक्रं च सूचीमुखमवाङ्मुखम्।
छित्त्वाऽग्निना दहेत् सम्यगेवं क्षारेण वा पुनः ॥
ततः संशोधनैरेवं मृदुपूर्वैर्विशोधयेत् ॥ २७ ॥

बुद्धिमान वैद्य परिस्रावी भगन्दर में स्रावमार्गों को शस्त्र से काटकर क्षार या अग्नि से स्रावमार्ग को जलावे। सुखोष्ण अणुतैल से गुदाचक्र का सेक करे। गोमूत्र तथा क्षारयुक्त उपनाह (पुल्टिस) पूर्व प्रलेप लगावे। वमन कराने वाली (मदनफल आदि) औषधियों के क्वाथ से थोड़ा परिषेक करे। इसमें स्राव तथा पीड़ा की न्यूनता एवं कोमलता होने पर स्रावमार्ग का (एषणीसे) अन्वेषण करके शस्त्र से खजूर के पत्ते की आकृति का अर्धचन्द्राकार, चन्द्रमण्डल तुल्य, सूचीमुख अवाङ्मुख चीरा लगावे। शस्त्र से चीरा लगाने के बाद क्षार या अग्नि से भली भाँति पुनः जलावे। इसके बाद प्रथम संशोधन द्रव्यों के द्वारा मृदु संशोधन देकर (कोष्ठ की परीक्षा करके) तीक्ष्ण विरेचन का प्रयोग करे ॥

विमर्श—तत्र यत्र सर्वतः स्रोतुं शीलं यस्य स परिस्रावी सर्वतः स्रावमुखः। खर्जूरपत्रमिव पत्रकं यस्य तत् खर्जूरपत्रकम्, तच्च मध्यनाडीच्छेदस्य पार्श्वद्वयस्थाना मुखाना निर्वक्त्रं छेदेन पक्षद्वयेनभवति। अन्तर्मुखे स्थूल मूलेऽस्य तेन सूचीमुखम्, तदेव अवाङ्मुखं सर्वोमुखम्। ततः पूर्वं मृदु शोधयित्वा विशालकोष्ठस्य तीक्ष्णं शोधनम्।

बहिरन्तर्मुखस्यापि शिशोर्यस्य भगन्दरः ॥ २८ ॥
तस्याहितं विरेकाग्निशस्त्रक्षारावचारणम्।
यद्यन्मृदु च तीक्ष्णं च तत्तत्तस्यावचारयेत् ॥ २९ ॥

बालक के बहिर्मुख तथा अन्तर्मुख भगन्दर में भी विरेचन, अग्निकर्म, शस्त्र और क्षार का प्रयोग हानिकर होता है। इसमें मृदु और तीक्ष्ण अर्थात् न तो अधिक तीक्ष्ण और न अधिक मृदु औषधियों के द्वारा चिकित्सा करनी चाहिये ॥ २८-२९ ॥

आरग्वधनिशाकालाचूर्णं मधुघृताप्लुतम्।
अन्तर्वर्तिप्रणिहितं व्रणानां शोधनं हितम् ॥
योगोऽयं नाशयत्याशु गतिं मेघमिवानिलः ॥ ३० ॥

अमलतास, हल्दी और तगर का चूर्ण, मधु तथा घृत में मिलाकर सूत की मोटी बत्ती में लगावे तथा व्रण में प्रवेश करे। यह व्रणों के शोधन के लिए हितकर है। यह योग (वर्ति) गति (स्रावमार्ग) को उसी प्रकार शीघ्र नष्ट करता है जिस प्रकार वायु बादलों का नाश करता है ॥ ३० ॥

आगन्तुजे भिषङ्नाडीं शस्त्रेणोत्कृत्य यत्नतः ॥ ३१ ॥
जम्ब्वोष्ठेनाग्निवर्णेन तप्तया वा शलाकया।
दहेद्यथोक्तं मतिमांस्तं व्रणं सुसमाहितः।
कृमिघ्नं च विधिं कुर्याच्छल्यानयनमेव च ॥ ३२ ॥

बुद्धिमान् वैद्य आगन्तुक भगन्दर में नाडी (स्रावमार्ग) को शस्त्र द्वारा यत्नपूर्वक काटकर, जामुन के फल के समान अग्निवर्ण शलाकायन्त्र अथवा तप्तशलाका से पूर्वकथित विधि के अनुसार उस व्रण को जलावे। व्रण के अन्दर से शल्य निकालने का उपाय तथा कृमिनाशक क्रिया करे ॥ ३१-३२ ॥

प्रत्याख्यायैष चारभ्यो वर्ज्यश्चापि त्रिदोषजः।
एतत् कर्म समाख्यातं सर्वेषामनुपूर्वशः ॥ ३३ ॥

यह (आगन्तुक भगन्दर) असाध्य है ऐसा समझ कर इसकी चिकित्सा आरम्भ करे तथा त्रिदोषज भगन्दर को असाध्य समझ कर त्याग दे। सभी भगन्दरों के लिए क्रमशः इस चिकित्सा विधि का वर्णन किया गया है ॥ ३३ ॥

एषां तु शस्त्रपतनाद्वेदना यत्र जायते।
तत्राणुतैलेनोष्णेन परिषेकः प्रशस्यते ॥ ३४ ॥

इनमें शस्त्रकर्म के कारण जहाँ वेदना उत्पन्न हो वहाँ उष्ण अणुतैल के द्वारा परिषेक करना हितकर (श्रेष्ठ) होता है ॥ ३४ ॥

वातघ्नौषधसम्पूर्णां स्थालीं छिद्रशरावकाम् ॥ ३५ ॥
स्नेहाभ्यक्तगुदस्तप्तामध्यासीत सवाष्पिकाम्।
नाड्या वाऽस्याहरेत् स्वेदं शयानस्य रुजापहम्।
उष्णोदकेऽवगाहो वा तथा शाम्यति वेदना ॥ ३६ ॥

वातघ्न औषधियों (भद्रदार्वादि) के क्वाथ से पूर्ण, छिद्रयुक्त शराव से ढकी तथा वाष्प से भरी हुई, तप्त थाली पर गुदा में स्नेह लगाकर रोगी को बैठावे। अथवा रोगी को सुलाकर वेदना शान्त करने वाले नाडीस्वेद से स्वेदन करे। अथवा उष्ण जल में बिठाने से भी वेदना की शान्ति होती है ॥ ३५-३६ ॥

कदलीमृगलोपाकप्रियकाजिनसंभृतान्।
कारयेदुपनाहांश्च शाल्वणादीन् विचक्षणः ॥ ३७ ॥

बुद्धिमान् वैद्य कदलीमृग (बृहत्संहिताकारो विलेशयः) लोपाक (लोमड़ी) और प्रियक (अजगरत्वचः इत्यन्ये दीर्घ.) के चर्म को एकत्रित कर उनके द्वारा पुल्टिस बाँधे तथा शाल्वण (मांसमिश्रित) स्वेद करे ॥ ३७ ॥

कटुत्रिकं वचाहिङ्गुलवणान्यथ दीप्यकम्।
पाययेच्चाम्लकौलत्थसुरासौवीरकादिभिः ॥ ३८ ॥

त्रिकटु, वच, हींग, पंचलवण और अजवायन का चूर्ण

कांजी, कुलथी के क्वाथ, सुरा तथा सौवीरक आदि के साथ पिलावे ॥ ३८ ॥

ज्योतिष्मतीलाङ्गलकीश्यामादन्तीत्रिवृत्तिलाः ।
कुष्ठं शताह्वा गोलोमी तिल्वको गिरिकर्णिका ।
कासीसं काञ्चनक्षीर्यौ वर्गः शोधन इष्यते ॥ ३९ ॥

मालकांगनी, कलिहारी, काला निशोथ, दन्ती, श्वेत-निशोथ, तिल, कूठ, सौफ, श्वेतदूर्वा, लोध्र, श्वेतपुष्पा अपराजिता, कासीस, ककुष्ठ और यवतिक्ता यह वर्ग (भगन्दर में) शोधन के लिये उत्तम है ॥ ३९ ॥

त्रिवृत्तिला नागदन्ती मञ्जिष्ठा पयसा सह ।
उत्सादनं भवेदेतत् सैन्धवक्षौद्रसंयुतम् ॥ ४० ॥

श्वेतनिशोथ, तिल, दन्ती तथा मजीठ का दूध के साथ, सेन्धानमक और मधु मिलाकर लेप करने से निम्न व्रण भरता है ॥ ४० ॥

रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठानिम्वपल्लवाः ।
त्रिवृत्तेजोवतीदन्तीकल्को नाडीव्रणापहः ॥ ४१ ॥

रसोत, हल्दी, दारुहल्दी, मजीठ, नीम का पत्ता, श्वेत-निशोथ, तेजवल और दन्ती का कल्क नाडीव्रण (Sinus) का नाश करता है ॥ ४१ ॥

कुष्ठं त्रिवृत्तिला दन्ती मागध्यः सैन्धवं मधु ।
रजनी त्रिफला तुत्थं हितं स्याद् व्रणशोधनम् ॥४२॥

कुष्ठ, श्वेतनिशोथ, तिल, दन्ती, पिप्पल, सेन्धानमक, मधु, हल्दी, त्रिफला और तूतिया व्रणशोधन के लिए हितकर होते हैं ॥ ४२ ॥

मागध्यो मधुकं रोध्रं कुष्ठमेला हरेणवः ॥ ४३ ॥
समङ्गा धातकी चैव सारिवा रजनीद्वयम् ।
प्रियङ्गवः सर्जरसः पद्मकं पद्मकेसरम् ॥ ४४ ॥
सुधा वचा लाङ्गलकी मधूच्छिष्टं ससैन्धवम् ।
एतत् संभृत्य संभारं तैलं धीरो विपाचयेत् ॥ ४५ ॥
एतद्धि गण्डमालासु मण्डलेष्वथ मेहिषु ।
रोपणार्थं हितं तैलं भगन्दरविनाशनम् ॥ ४६ ॥

पिप्पल, मुलेठी, लोध्र, कूठ, इलायची, रेणुकाबीज, मजीठ, धाय के फूल, सारिवा, हल्दी, दारुहल्दी फूलप्रियङ्गु, राल, पद्माख, कमलकेशर, सेहुण्ड, वच, कलिहारी, मोम और सेन्धानमक इन द्रव्यों को पूर्ण रूप से एकत्रित कर इनके द्वारा धैर्यशील वैद्य तैल पाक करे। यह तैल गण्डमाला, मण्डल तथा प्रमेहजन्य व्रण के रोपण के लिए हितकर एव भगन्दरनाशक है ॥ ४३-४६ ॥

न्यग्रोधादिगणश्चैव हितः शोधनरोपणे ।
तैलं घृतं वा तत्पक्वं भगन्दरविनाशनम् ॥ ४७ ॥

न्यग्रोधादिगण के द्रव्य, शोधन-रोपण के लिए हितकर तथा इनके कल्क से सिद्ध तैल या घृत भगन्दरनाशक होता है ॥ ४७ ॥

त्रिवृद्दन्तीहरिद्राऽर्कमूलं लोहाश्वमारकौ ।
विडङ्गसारं त्रिफला स्नुह्यर्कपयसी मधु ॥ ४८ ॥
मधूच्छिष्टसमायुक्तैस्तैलमेतैर्विपाचयेत् ।
भगन्दरविनाशार्थमेतद्योज्यं विशेषतः ॥ ४९ ॥

श्वेत निशोथ, दन्ती, हल्दी, मदार की जड़, लोह (अगर), कनेर की जड, विडङ्ग, त्रिफला, सेहुण्ड का दूध, मदार का दूध, मधु और मोम के द्वारा तैल पाक करे। इस तैल का प्रयोग विशेष रूप से भगन्दर के नाश के लिए करना चाहिए॥

चित्रकार्कौ त्रिवृत्पाठे सलवूं हयमारकम् ।
सुधां वचां लाङ्गलकीं सप्तपर्णं सुवर्चिकाम् ॥ ५० ॥
ज्योतिष्मतीं च सम्भृत्य तैलं धीरो विपाचयेत् ।
एतद्धि स्यन्दनं तैलं भृशं दद्याद्भगन्दरे ॥ ५१ ॥
शोधनं रोपणं चैव सवर्णकरणं तथा ।
द्विव्रणीयमवेक्षेत व्रणावस्थासु बुद्धिमान् ॥ ५२ ॥

चित्रक, मदार, श्वेत निशोथ, पाठा, कठगूलर, कनेर, सेहुण्ड, वच, कलिहारी, सतवन, सज्जीखार और मालकांगनी को एकत्रित कर धैर्यवान् वैद्य तैल पाक करे। यह तैल दोषों को बाहर निकालने वाला है। इसका प्रयोग भगन्दर में प्रचुर परिमाण में करना चाहिये। यह व्रण का शोधन रोपण करता है एवं व्रणस्थान को त्वचा का रग प्रदान करता है। बुद्धिमान वैद्य व्रण की दशा के अनुसार द्विव्रणीय-चिकित्सा में पठित विधि का प्रयोग करे ॥ ५०-५२ ॥

छिद्रादूर्ध्वं हरेदोष्ठमर्शोयन्त्रस्य यन्त्रवित् ।
ततो भगन्दरे दद्यादेतदर्धेन्दुसन्निभम् ॥ ५३ ॥

यन्त्र प्रयोग को जानने वाला वैद्य अर्शयन्त्र के ओष्ठ को छिद्र से ऊपर पकडकर अर्धचन्द्राकार रूप में भगन्दर के अन्दर प्रवेश करे ॥ ५३ ॥

व्यायामं मैथुनं कोपं पृष्ठयानं गुरूणि च ।
संवत्सरं परिहरेदुपरूढव्रणो नरः ॥ ५४ ॥

इति सुश्रुतसंहिताया चिकित्सास्थाने भगन्दरचिकित्सितं नामाष्टमोऽध्याय ॥ ८ ॥

भगन्दर व्रण के भर जाने पर भी रोगी को व्यायाम, मैथुन, क्रोध, घोडे आदि की सवारी और भारी भोजन एक वर्ष तक त्याग देना चाहिये ॥ ५४ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकाया भाषाटीकायां पञ्चमोऽध्यायः ॥८॥

नवमोऽध्यायः

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

इसके अनन्तर कुष्ठ रोग की चिकित्सा-विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

विरुद्धाध्यशनासात्म्यवेगविघातैः स्नेहादीनां चाय-

थारम्भै. पापकियया पुराकृतकर्मयोगाच्च त्वग्दोषा भवन्ति ॥ ३ ॥

विरुद्ध भोजन, अध्यशन, असात्म्यसेवन, वेगावरोध, स्नेह स्वेद आदि का क्रम विरुद्ध प्रयोग, पापकर्म तथा पूर्व जन्म के कर्मों के फलस्वरूप त्वचा के रोग उत्पन्न होते हैं ॥३॥

विमर्शः—सयोग, देश, काल और मात्रा आदि के विरुद्ध भोजन करना विरुद्ध भोजन कहलाता है, जैसे मछली और दूध का सेवन संयोग विरुद्ध भोजन है। पहले खाये हुए अन्न के परिपाक होने से पूर्व ही पुनः भोजन करना अध्यशन कहलाता है। असात्म्य सेवन का तात्पर्य प्रकृति के विरुद्ध किसी पदार्थ के सेवन से है। वेगावरोध में मल, मूत्र आदि के वेगों को रोकने की गणना आती है। कुष्ठ एक भयङ्कर व्याधि है। आयुर्वेद ने मिथ्याहार-विहार के अतिरिक्त पाप एवं प्राक्तन कर्म को भी कुष्ठ का कारण माना है और ऐसा मानना आयुर्वेद शास्त्र की अपनी विशेषता है। कर्मज व्याधि का लक्षण करते हुए शास्त्रकार लिखते हैं—'यथाशास्त्र तु निर्णीतो यथाव्याधिचिकित्सित । न शम याति यो व्याधिः स ज्ञेय कर्मजो बुधै ।' कर्मज व्याधि का नाश भी आचार्यों ने भोग के द्वारा ही माना है—'कर्मक्षयात्कर्मकृता दोषजा स्वस्वभेषजै । कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम् ।'

तत्र त्वग्दोषी मांसवसादुग्धदधितैलकुलत्थमाषनिष्पावेक्षुपिष्टविकारास्लविरुद्धाध्यशनाजीर्णविदाह्यभिष्यन्दीनि दिवास्वप्नं व्यवायं च परिहरेत् ॥ ४ ॥

त्वचा रोग से पीडित व्यक्ति को मांस, वसा, दूध, दही, तेल, कुलथी, उडद, निष्पाव (राजशिम्बी), गन्ने के रस से बने पदार्थ, पिट्टी (उडद आदि) से बनी वस्तुएँ, अम्लद्रव्य विरुद्ध भोजन, अध्यशन, अजीर्णावस्था में भोजन, विदाही और अभिष्यन्दि पदार्थों का सेवन तथा दिन में सोना एवं मैथुन का परित्याग कर देना चाहिये।

विमर्श.—विदाही-'द्रव्यस्वभावाद्वथ गौरवाद्वा चिरेण पाक जठराग्नियोगात् । पित्तप्रकोप विदहत्करोति तदन्नपान कथित विदाहि ॥' अभिष्यन्दि—'पैच्छिल्याद् गौरवाद् द्रव्य रुद्ध्वा रसवहाः सिरा । धत्ते यद् गौरव तत्स्यादभिष्यन्दि यथा दधि ॥

ततः शालिषष्टिकयवगोधूमकोरदूषश्यामाकोद्दालकादीननवान् भुञ्जीत मुद्गाढक्योरन्यतरस्य यूषेण सूपेन वा निम्बपत्रारुष्करुग्यामिश्रेण, मण्डूकपर्ण्यवल्गुजाटरूषकरूपिकापुष्पैः सर्पिःसिद्धैः सर्षपतैलसिद्धैर्वा, तिक्तवर्गेण वाऽभिहितेन, मांससात्म्याय वा जाङ्गलमांसममेदस्क वितरेत्, तैल वज्रकमभ्यङ्गार्थे, आरग्वधादिकषायमुत्सादनार्थे, पानपरिषेकावगाहादिषु च खदिरकषायम्, इत्येष आहाराचारविभाग ॥ ५ ॥

पुराने शालि, साठी, जौ, गेहूँ, कोद्रव, सावां और अरण्य कोद्रव का भोजन, मूंग या अरहर किसी एक के यूष (पतली दाल) अथवा नीम के पत्ते और भिलावे के सूप (शाक का शोरवा) के साथ करना चाहिये। अथवा मण्डूकपर्णी, (ब्राह्मी भेद), चाकुची, अडूषा और रूपिका पुष्प (मदार का फूल) को घृत या सरसों के तेल में पकाकर अथवा पूर्वकथित तिल वर्ग (पनवाड, चाकुची, पटोल आदि) के साथ पुराने शालि आदि का भोजन करना चाहिये। मांसाहारी रोगियों को जांगल जीवों का मेदरहित मास भोजन के लिए देना चाहिये। मालिश के लिए वज्रक तैल (सप्तपर्ण, करञ्ज आदि से सिद्ध) का प्रयोग करना चाहिये। आरग्वधादि गण के कषाय (चूर्ण कल्क-स्वरस आदि) का प्रयोग व्रण के उत्सादन (निम्न व्रण को भरने के लिए) करना चाहिये। पान, परिषेक और स्नान में खदिर कषाय का प्रयोग करना चाहिये। (कुष्ठ रोग के लिए) यह आहार (आहार में प्रयुक्त होने वाले द्रव्य और रसों का विभाजन) तथा आचार की व्यवस्था है ॥ ५ ॥

तत्र पूर्वरूपेषूभयतः संशोधनमासेवेत । तत्र त्वक्संप्राप्ते शोधनालेपनानि, शोणितप्राप्ते संशोधनालेपनकषायपानशोणितावसेचनानि, मांसप्राप्ते शोधनालेपनकषायपानशोणितावसेचनारिष्टमन्थप्राशाः, चतुर्थकर्मगुणप्राप्तं याप्यमात्मवतः संविधानवतश्च, तत्र संशोधनाच्छोणितावसेचनाच्चोर्ध्वं भल्लातशिलाजतुधातुमाक्षीकगुग्गुल्वगुरुतुवरकखदिरासनायस्कृतिविधानमासेवेत, पञ्चमं नैव चोपक्रमेत् ॥ ६ ॥

कुष्ठ रोग के पूर्वरूपों में दोनों मार्गों के द्वारा (वमन तथा विरेचन) संशोधन का प्रयोग करे। त्वचागत (रसगत) कुष्ठ में शोधन द्रव्यों का लेप करे। रक्तगत में संशोधन, आलेपन, कषायपान तथा रक्तमोक्षण करे। मांसगत में शोधन, आलेपन, कषायपान, रक्तमोक्षण, अरिष्ट (आसवसुरा आदि), मन्थ (शीतल जल में औषधि का चूर्ण डाल मथकर बनाया गया पेय) और प्राश (अवलेह) का सेवन करे। चतुर्थकर्मगुणप्राप्त अर्थात् चतुर्थ धातु मेदगत कुष्ठ, आत्मवान (सम्यक् आहाराचार करने वाला) और संविधानयुक्त (प्रभूत उपकरण वाले) व्यक्ति का याप्य होता है। इनमें संशोधन और रक्तमोक्षण के पश्चात् भिलावा, शिलाजतु, स्वर्णमाक्षिक, गुग्गुलु, अगर, तुवरक (सौराष्ट्री मृत्तिका), खदिर, असन (विजयसार) और अयस्कृति विधान (महा कुष्ठ अध्याय में पठित) का सेवन करना चाहिये। पांचवीं अर्थात् अस्थि आदि गत धातुओं के कुष्ठ की चिकित्सा असाध्य समझकर त्याग देनी चाहिये ॥ ६ ॥

तत्र प्रथममेव कुष्ठिनं स्नेहपानविधानेनोपपादयेत्। मेषशृङ्गीश्वदंष्ट्राशार्ङ्गेष्टागुडूचीद्विपञ्चमूलीसिद्धं तैलं घृतं वा वातकुष्ठिनां पानाभ्यङ्गयोर्विदध्यात्, धवाश्वकर्णककुभपलाशपिचुमर्दपर्पटकमधुकरोध्रसमङ्गासिद्धं सर्पिः पित्तकुष्ठिनां, प्रियालशालारग्वधनिम्बसप्तपर्णचित्रकमरिचवचाकुष्ठसिद्धं श्लेष्मकुष्ठिनां, भल्लातकाभयाविडङ्गसिद्धं वा, सर्वेषां तुवरकतैलं भल्लातकतैलं वेति ॥ ७ ॥

कुष्ठ रोगी की चिकित्सा प्रथम स्नेहपानविधि (वमन-विरेचन आदि संशोधन के पश्चात्) के द्वारा करनी चाहिये। मेढ़ासिंगी, गोखरू, काकजंघा, गिलोय और दशमूल से सिद्ध

तैल या घृत का प्रयोग वातज कुष्ठ के रोगी के पान और अभ्यङ्ग में करना चाहिये। धव, अश्वकर्ण (शालवृक्ष), अर्जुन, पलाश, नीम, पित्तपापडा, मुलेठी, लोध्र और मजीठ से सिद्ध घृत का प्रयोग पित्तज कुष्ठ के रोगी के लिए करना चाहिये। चिरौंजी, शालवृक्ष, अमलतास, नीम, मतवन, चित्रक, मरिच, वच और कूठ से सिद्ध (घृत) अथवा भिलावा, हरड़ और विडङ्ग से सिद्ध (घृत) का प्रयोग कफज कुष्ठ में करना चाहिये। सभी कुष्ठों में तुवरक (सौराष्ट्र मृत्तिका) से सिद्ध तैल अथवा भल्लातक तैल का प्रयोग करना चाहिये ॥ ७ ॥

सप्तपर्णारग्वधातिविषेक्षुरपाठाकटुरोहिण्यमृतात्रिफलापटोलपिचुमर्दपर्पटकदुरालभात्रायमाणामुस्ताचन्दनपद्मकहरिद्रोपकुल्याविशालामूर्वाशतावरीमारिवेन्द्रयवाटरूपकपडङ्ग्रन्थामधुकभूनिम्बगृष्टिका इति समभागः कल्कः स्यात्, कल्काच्चतुर्गुणं सर्पिः प्रक्षिप्य तद्द्विगुणो धात्रीफलरसस्तच्चतुर्गुणा आपस्तदैकध्यं समालोड्य विपचेत्, एतन्महातिक्तक नाम सर्पिः कुष्ठविषमज्वररक्तपित्तहृद्रोगोन्मादापस्मारगुल्मपिडकासृग्दरगलगण्डगण्डमालाश्लीपदपाण्डुरोगविसर्पपाण्ड्यकण्डूपामादीञ्छमयेदिति ॥ ८ ॥

मतवन, अमलतास, इन्द्रजौ, पाठा, कुटकी, गिलोय, त्रिफला, परवल की पत्ती, नीम, पित्तपापडा, यवासा, त्रायमाणा, नागरमोथा, चन्दन, पद्माख, हल्दी, पिप्पली, इन्द्रायण, मूर्वा, शतावर, अनन्तमूल, इन्द्रयव, अडूषा, वच, मुलेठी, चिरायता और विदारीकन्द को समान भाग में लेकर कल्क बनावे, कल्क से चौगुना घृत और घृत से दुगना आँवले का रस तथा आँवले के रस से चौगुना जल लेकर, सभी द्रव्यों को एक साथ मिलाकर पकावे। यह महातिक्तक नामक घृत कुष्ठ, विषमज्वर, रक्तपित्त, हृद्रोग, उन्माद, अपस्मार, गुल्म, पिडका, रक्तप्रदर, गलगण्ड, गण्डमाला, श्लीपद, पाण्डुरोग, विसर्प, नपुंसकता, कण्डू और पामा आदि को शान्त करता है ॥ ८ ॥

त्रिफलापटोलपिचुमन्दाटरूपककटुरोहिणीदुरालभात्रायमाणा पर्पटकश्वेतेषां द्विपलिकान् भागाञ्जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्याणीमानि भेषजान्यर्धपलिकानि त्रायमाणामुस्तेन्द्रयवचन्दनकिरातविक्तानि पिप्पल्यश्चैतानि घृतप्रस्थे समावाप्य विपचेत्, एतत्तिक्तकं नाम सर्पिः कुष्ठविषमज्वरगुल्मार्शोग्रहणीदोषशोफपाण्डुरोगविसर्पपाण्ड्यशमनमूर्ध्वजत्रुगतरोगघ्नं चेति ॥ ९ ॥

त्रिफला, परवल की पत्ती, नीम, अडूषा, कुटकी, यवासा, त्रायमाणा और पित्तपापडा दो दो पल लेकर एक द्रोण जल में चतुर्थांश अवशेष रहने तक क्वाथ किया जावे और आधा आधा पल त्रायमाणा, नागरमोथा, इन्द्रयव, चन्दन, चिरायता और पिप्पली पीसकर कल्क बना (चतुर्थांश अवशिष्ट क्वाथ के साथ) एक प्रस्थ घृत का पाक किया जावे। यह तिक्तक नामक घृत कुष्ठ, विषमज्वर, गुल्म, अर्श, ग्रहणी दोष, शोथ, पाण्डुरोग, विसर्प और नपुंसकता को शमन तथा ऊर्ध्वजत्रुगत रोगों का नाश करता है ॥ ९ ॥

अतोऽन्यतमेन घृतेन स्निग्धस्विन्नस्यैकां द्वे तिस्रश्चतस्रः पञ्च वा सिरा विध्येत्; मण्डलानि चोत्सन्नान्यवलिखेद्भीदणं, प्रच्छयेद्वा, समुद्रफेनशाकगोजीकाकोदुम्बरिकापत्रैर्वाऽवघृष्यालेपयेल्लाक्षासर्जरसरसाञ्जनप्रपुन्नाडावल्गुजतेजोवत्यश्वमारकार्ककुटजारेवतमूलकल्कैर्मूत्रपिष्टैः पित्तपिष्टैर्वा, स्वर्जिकातुत्थकासीसविडङ्गागारधूमचित्रककटुकसुधाहरिद्रासैन्धवकल्कैर्वा, एतान्येवावाप्य क्षारकल्पेन निःस्रुते पालाशे क्षारे ततो विपाच्य फाणितमिव संजातमवतार्य लेपयेत्, ज्योतिष्कफललाक्षामरिचपिप्पलीसुमनःपत्रैर्वा, हरितालमनःशिलार्कक्षीरतिलशिग्रुमरिचकल्कैर्वा, स्वर्जिकाकुष्ठतुत्थकुटजचित्रकविडङ्गमरिचरोध्रमनःशिलाकल्कैर्वा, हरीतकीकरञ्जिकाविडङ्गसिद्धार्थकलवणरोचनावल्गुजहरिद्राकल्कैर्वा ॥ १० ॥

इनमें से किसी एक घृत के द्वारा रोगी का स्नेहन कर स्वेदन करे और एक, दो, तीन, चार या पाँच शिराओं का वेधन करे तथा उभरे हुये मण्डलों को अनेक बार खुरचे या पाछ लगावे। (१) अथवा समुद्रफेन, सिहोर, गोजिह्वा और कठगूलर आदि के पत्तों से रगड कर, लाख, राल, रसोन, चकवड के बीज, वाकुची, तेजबल, कनेर की जड, सदार, कुटज और अमलतास की जड को गोमूत्र या गोपित्त में पीस कर लेप लगावे। (२) अथवा सज्जीखार, तूतिया, कासीस, विडङ्ग, गृहधूम, चित्रक, कुटकी, सेहुण्ड, हल्दी और सेन्धानमक के कल्क का लेप करे। (३) इन्हीं द्रव्यों को क्षारनिर्माण-विधि के अनुसार जलाकर जल में छान लिया जावे और छने हुये पलाशक्षार के साथ पकाया जावे। जब फाणित (राब) के समान पाक हो जाय, अग्नि से उतार कर लेप लगाया जावे। (४) अथवा मालकांगनी के फल, लाख, मरिच, पिप्पल और चमेली के पत्ते या (५) हरिताल, मनःशिला, मदार का दूध, तिल, सहिजन के बीज और मरिच के कल्क का लेप करे। (६) अथवा सज्जीखार, कूठ, तूतिया, कुडे की छाल, चित्रक, विडङ्ग, मरिच और मैनशिल के कल्क या (७) हरीतकी, करञ्ज, विडङ्ग, पीली सरसों, सेन्धानमक, गोरोचन, वाकुची और हल्दी के कल्क (गोमूत्र या गोपित्त में पिसा हुआ) का लेप करे ॥ १० ॥

सर्वे कुष्ठापहाः सिद्धा लेपाः सप्त प्रकीर्तिताः।
वैशेषिकानतस्तूर्ध्वं दद्रूश्वित्रेषु मे शृणु ॥ ११ ॥

सभी प्रकार के कुष्ठों को नष्ट करने वाले सात सिद्ध (निश्चित फल देने वाले) लेपों का वर्णन किया गया है। इसके आगे दद्रु और श्वित्र में प्रयोग किये जाने वाले विशेष लेपों को मुझसे सुनो ॥ ११ ॥

लाक्षाकुष्ठं सर्षपाः श्रीनिकेत
रात्रिर्व्योषं चक्रमर्दस्य बीजम्।

कृत्वैकस्थं तक्रपिष्टः प्रलेपो
दद्रूपक्तो मूलकाद् बीजयुक्तः ॥ १२ ॥

लाख, कूट, मरमों, श्रीनिकेत (विरोजा), हल्दी, सोंठ, मरिच, पिप्पल, चक्रवड के बीज और मूली के बीज को एकत्र मट्ठे में पीसकर दद्रु पर लेप लगाना चाहिये ॥१२॥

मिन्धूद्भूतं चक्रमर्दस्य बीज-
मिक्षूद्भूतं केशरं तार्क्ष्यशैलम् ।
पिष्टो लेपोऽयं कपित्थाम्लसेन
दद्रून्मूलं नाशयत्येष योगः ॥ १३ ॥

सेन्धानमक, चक्रवड का बीज, गुड, नागकेशर और तार्क्ष्यशैल (रसौत) को कैथ के रस में पीस कर लेप लगाने से यह योग दद्रु का शीघ्र नाश करता है ॥ १३ ॥

हेमक्षीरी व्याधिघातः शिरीषो
निम्बः सर्जो वत्सकः साजकर्णः ।
शीघ्रं तीव्रा नाशयन्तीह दद्रूः
स्नानालेपोद्वर्षणेषु प्रयुक्ताः ॥ १४ ॥

स्वर्णक्षीरी, अमलतास, सिरीष, नीम, राल, इन्द्रजौ और अजकर्ण (शालवृक्ष भेद) का स्नान, लेप तथा उबटन में प्रयोग करने से तीव्र दद्रु का शीघ्र नाश होता है ॥ १४ ॥

भद्रासंज्ञोदुम्बरीमूलतुल्यं
दत्त्वा मूलं क्षोदयित्वा मलप्वाः ।
सिद्धं तोयं पीतमुष्णं सुखोष्णं
स्फोटाच्छित्रे पुण्डरीके च कुर्यात् ॥१५॥

बड़ी कण्टकारी की जड़ तथा छोटी कण्टकारी की जड समान भाग में लेकर कूट ली जावे। इस कल्क से सिद्ध सुखोष्ण जल का पान करने से श्वित्र और पुण्डरीक कुष्ठ में फफोले पड़ते हैं ॥ १५ ॥

द्वीपं दग्धं चर्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः ।
पूतिः कीटो राजवृक्षोद्भवेन
क्षारेणाक्तः श्वित्रमेको निहन्ति ॥ १६ ॥

चीता या हाथी के चाम को जलाकर तेल के साथ फूटे हुये फफोले पर लगावे। अमलतास वृक्ष के द्वारा निर्मित क्षार के साथ पूतिकीट को मिलाकर लगाना श्वित्र-नाश के लिये श्रेष्ठ योग है ॥ १६ ॥

विमर्श —पूतिः कीटः इत्यादौ वर्षाकाले कर्दुरक 'नलिनी'ति प्रसिद्ध, पूर्वदेशे 'पुण्डालिके'ति। स चारग्वधक्षारेण सहितो मिश्रितः। राजवृक्ष आरग्वध । एक श्रेष्ठ । बंगाल में पूतिकीट को 'गाँधी पोका' संज्ञा प्राप्त है। किसी किसी टीकाकार ने 'पूतिकीट' के नाम से 'खटमल' का ग्रहण किया है।

कृष्णस्य सर्पस्य मसी सुदग्धा
वैभीतकं तैलमथ द्वितीयम् ।
एतत् समस्तं मृदितं प्रलेपा-
च्छित्राणि सर्वाण्यपहन्ति शीघ्रम् ॥१७॥

काले साँप को भली भाँति जला कर बनाई गई राख (काली राख) और बहेड़े के तेल को मिलाकर लेप लगाने से सभी प्रकार के श्वित्र शीघ्र नष्ट होते हैं ॥ १७ ॥

अध्यर्धतोये सुमतिस्रुतस्य
क्षारस्य कल्पेन तु सप्तकृत्वः ।
तैलं घृतं तेन चतुर्गुणेन
श्वित्रापहं व्रणमेतदग्र्यम् ॥ १८ ॥

(काले साँप को जला कर बनाई गई श्वेत राख) डेढ गुना जल में चार निर्माण विधि के अनुसार सात बार भली-भाँति छान लिया जावे। इस चार-जल को चौगुना लेकर इसके द्वारा तैल-पाक किया जावे। श्वित्र को नष्ट करने के लिये यह उत्तम लेप है ॥ १८ ॥

विमर्श.—कृष्णसर्पो यदा दह्यमानोऽतिकृष्णत्वं गच्छति, तदा तच्चूर्णं मसीत्युच्यते, न त्वतिदह्यमानो यदा शुक्लत्वं याति तदा क्षार इत्युच्यते। (डल्हणः)

घृतेन युक्तं प्रपुनाडबीजं
कुष्ठं च यष्टीमधुकं च पिष्ट्वा ।
श्वेताय दद्याद् गृहकुक्कुटाय
चतुर्थभक्ताय बुभुक्षिताय ॥ १९ ॥
तस्योपसंगृह्य च तत् पुरीष-
मुत्पाचितं सर्वत एव लिम्पेत् ।
अभ्यन्तरं मासमिमं प्रयोगं
प्रयोजयेच्छित्रमथो निहन्ति ॥ २० ॥

चक्रवड के बीज, कूठ और मुलेटी को पीसकर घृत मिलावे, इसे सफेद रंग के घरेलू मुर्गे को एक दिन भूखा रख कर दूसरे दिन संध्या समय खिलावे। इस मुर्गे की विष्ठा को एकत्रित कर पाक को प्राप्त हुए कुष्ठ पर चारों ओर लेप करे। इस प्रयोग का व्यवहार एक मास तक करने से धात्वन्तरगत श्वित्र नष्ट होता है ॥ १९-२० ॥

विमर्शः—चतुर्थभक्तायेति । एकाहमुपोषिताय द्वितीयेऽहनि नायं श्वेताय ग्राम्यकुक्कुटाय अत्यन्तबुभुक्षिताय प्रपुन्नाडबीजादिक घृतयुक्तं भक्षयितुं दद्यात्। (डल्हणः)

क्षारे सुदग्धे गजगण्डजे तु
गजस्य मूत्रेण बहुप्लुते च ।
द्रोणप्रमाणे दशभागयुक्तं
दत्त्वा पचेद् बीजमवल्गुजस्य ॥ २१ ॥
एतद्यदा चिक्कणतामुपैति
तदा समस्तं गुटिका विदध्यात् ।
श्वित्रं प्रलिम्पेदथ संप्रघृष्य
तया व्रजेदाशु सवर्णभावम् ॥ २२ ॥

गजलेण्डज (जलपिप्पली) को भली-भाँति जला कर क्षार बनावे और उसे हाथी के मूत्र में घोल कर अनेक बार छाने। एक द्रोण परिमाण में इस क्षार जल को लेकर, इसमें बाकुची बीज दसवाँ भाग मिलावे और पाक करे। जब इसमें चिकनापन आ जाय अर्थात् पाक गाढ़ा हो जाय तब सबकी

गोलियाँ बना ले। श्वित्र को भली-भाँति घिस कर इस गोली का लेप करने से उस स्थान की त्वचा का रंग, शरीर के अन्य भाग की त्वचा के समान शीघ्र हो जाता है ॥२१-२२॥

विमर्शः—गजलेण्ड गजगण्डीरक, नदीपिप्पलिकेत्यन्ये। गजलेण्डकक्षार इत्यन्ये पठन्ति। तच्च न पठनीयं, तन्त्रान्तरविरोधात्।

कषायकल्पेन सुभावितां तु
जलं त्वचा चूतहरीतकीनाम्।
तां ताम्रदीपे प्रणिधाय धीमान्
वर्तिं वटक्षीरसुभावितां तु ॥ २३ ॥
आदीप्य तज्जातमसीं गृहीत्वा
तां चापि पथ्याऽम्भसि भावयित्वा।
संप्रच्छितं तद्बहुशः किलासं
तैलेन सिक्तं कटुना प्रयाति ॥ २४ ॥

कषाय-निर्माण-विधि के अनुसार आम और हरीतकी के वृक्ष की छाल का क्वाथ बनावे। बुद्धिमान् वैद्य इस क्वाथ तथा वरगद के दूध से रूई की वत्ती को भली-भाँति भावित करे (भिगोवे) और उसे (कटुतैल में भिगो कर) ताम्बे के दीपक में रखकर जलावे। वत्ती के जलने से जो काजल एकत्रित हो उसमें हरीतकी-क्वाथ की भावना दे तथा कटु-तैल से किलास कुष्ठ का सिंचन कर उस पर अनेक वार लेप करे। इस प्रयोग से किलास कुष्ठ नष्ट होता है ॥ २३-२४ ॥

विमर्शः—चूतहरीतकीना त्वच छित्त्वा कषायकल्पेन काथ-कल्पनया यज्जलीयकाथस्तेन सुभाविता पिचुवर्ति कटुतैलेन सिक्त्वा तां ताम्रदीपे प्रणिधाय स्थापयित्वा, आदीप्य प्रज्वाल्य, तज्जातमसीं गृहीत्वा ततो वटक्षीरसुभाविता कृत्वा, ततस्तामेव पथ्याकाथेन भावयित्वा, कटुना तैलेन सिक्त्वा, किलाश बहुशः सम्प्रक्षितं सत् अर्थात् लेपितमपयाति। अयं योगोऽन्यत्राप्युक्त—'पथ्याग्रत्वक् कषायेण पिचुवर्तिः सुभाविता। कटुतैलयुते ताम्रपात्रे प्रज्वालयेत्ततः॥ मसीं तत्र वटक्षीरपथ्याक्वाथेन भावयेत्। प्रक्षितं कटुतैलाक्त तेन श्वित्रं प्रणश्यति।' गयदासस्तु 'वर्तिं पटवर्तिं पूर्वं वटक्षीरेण भावयेत् ततः कटुतैलेन' इति व्याख्यानयति। 'तैलेन सिक्त कटुना समस्त मालेपयेदेवमुपैति शान्तिम्' इति केचित् पठन्ति। (उद्धरणः)

आवल्गुजं बीजमग्र्यं नदीजं
काकाह्वानोदुम्बरी या च लाक्षा।
लौहं चूर्णं मागधी तार्क्ष्यशैलं
तुल्याः कार्याः कृष्णवर्णास्तिलाश्च ॥२५॥
वर्तिं कृत्वा तां गवां पित्तपिष्टां
लेपः कार्यः श्वित्रिणां श्वित्रहारी।
लेपात् पित्त शौखिनं श्वित्रहारि
ह्रीवेरं वा दग्धमेतेन युक्तम् ॥ २६ ॥

वाकुचीबीज, उत्तम स्वर्णमाक्षिक, कठगूलर, लाख, लोहचूर्ण, पिप्पली, रसोत और सबके बराबर काला तिल लेकर गौ के पित्त से पीसकर वत्ती बनावे तथा श्वित्र पर लेप करे। यह लेप श्वित्र रोग से पीडित रोगियों के श्वित्र रोग को नष्ट करने वाला है। अथवा सुगन्धवाला को जलाकर मोर के पित्त से पीसकर श्वित्र पर लेप करे। यह भी श्वित्र को नष्ट करने के लिए उत्तम योग है ॥ २५-२६ ॥

तुत्थालकटुकाव्योपसिहार्कह्यमारकाः।
कुष्ठावल्गुजभल्लातक्षीरिणीसर्षपाः स्नुही ॥ २७ ॥
तिल्वकारिष्टपीलूनां पत्राण्यारग्वधस्य च ॥
बीजं विडङ्गाश्वहन्त्रोर्हरिद्रे बृहतीद्वयम्।
आभ्यां श्वित्राणि योगाभ्यां लेपान्नश्यन्त्यशेषतः ॥२८॥

(१) तूतिया, हरिताल, कुटकी, सोंठ, मरिच, पिप्पली, सिंह (लाल सहिजन या अडूसा), मदार, कनेर की जड, कूठ, वाकुची, भिलावा, दुद्धी, सरसों और सेहुण्ड तथा (२) लोध, नीम, पीलू, अमलतास के पत्ते, विडङ्ग, कनेर के बीज, हल्दी, दारुहल्दी, बडी कटेरी और छोटी कटेरी इन दो योगों का लेप लगाने से श्वित्र सम्पूर्ण रूप से नष्ट होता है ॥

वायसीफल्गुतिक्तानां शतं दत्त्वा पृथक् पृथक् ॥२९॥
द्वे लोहरजसः प्रस्थे त्रिफलाऽऽढकं तथा।
द्विद्रोणेऽपां पचेद्यावद्भागौ द्वावसनादपि ॥ ३० ॥
शिष्टौ च विपचेद्भूय एतैः श्लक्ष्णप्रपेषितैः।
कल्कैरिन्द्रयवव्योषत्वग्दारुचतुरङ्गुलैः ॥ ३१ ॥
पारावतपदीदन्तीबाकुचीकेशराह्वयैः।
कण्टकार्या च तत्पक्वं घृतं कुष्ठिषु योजयेत् ॥ ३२ ॥
दोषधात्वाश्रितं पानादभ्यङ्गात्त्वग्गतं तथा।
अप्यसाध्यं नृणां कुष्ठं नाम्ना नीलं नियच्छति ॥३३॥

वायसी (काकतिक्ता या काकमाची), फल्गु (कठगूलर) और कुटकी पृथक् २ सौ २ प्रस्थ, लोहचूर्ण २ प्रस्थ, त्रिफला २ आढक, तथा विजयसार २ प्रस्थ, इन द्रव्यों को तीन द्रोण जल में दो भाग क्वाथ अवशेष रहने तक पकावे। पुनः अवशिष्ट क्वाथ में इन्द्रजौ, सोंठ, मरिच, पिप्पली, दालचीनी, देवदारु, अमलतास, काकजवा, दन्ती, वाकुची, नागकेशर और बडी कटेरी का महीन पिसा हुआ कल्क मिलाकर घृत पाक करके कुष्ठरोगियों के लिए प्रयोग करे। इस घृत के पीने से धातुओं में स्थित तथा अभ्यङ्ग से त्वचागत दोष नष्ट होते हैं। यही नील घृत मनुष्यों के असाध्य कुष्ठ को भी नष्ट करता है ॥ २९-३३ ॥

त्रिफलात्वक् त्रिकटुकं सुरसा मदयन्तिका।
वायस्यारग्वधश्चैषां तुलां कुर्यात् पृथक् पृथक् ॥ ३४ ॥
काकमाच्यर्कवरुणदन्तीकुटजचित्रकात्।
दार्वीनिदिग्धिकाभ्यां तु पृथग्दशपलं तथा ॥ ३५ ॥
त्रिद्रोणेऽपां पचेद्यावत् षट्प्रस्थं परिशेषितम्।
शक्रद्रसदधिक्षीरमूत्राणां पृथगाढकम् ॥ ३६ ॥
तद्वद्घृतस्य तत्साध्य भूनिम्बव्योषचित्रकैः।
करञ्जफलनीलिकाश्यामावल्गुजपीलुभिः ॥ ३७ ॥
नीलिनीनिम्बकुसुमैः सिद्धं कुष्ठापहं घृतम्।
म्रक्षणादङ्गसावण्य श्वित्रिणां जनयेन्नृणाम् ॥
भगन्दरं कृमीनर्शो महानीलं नियच्छति ॥ ३८ ॥

हरड, बहेडा तथा आंवले का छिलका, सोंठ, मरिच, पिप्पली, तुलसी, मेंहदी, मकोय और अमलतास प्रत्येक एक २ तुला, मकोय, मदार, वरुण, दन्ती, कुटज, चित्रक, दारुहल्दी और बडी कटेरी पृथक् २ दश २ पल, इन द्रव्यों को तीन द्रोण

जल में ६ प्रस्थ क्वाथ अवशेष रहने तक पकावे। इस अवशिष्ट क्वाथ में गोवर का रस, दही, दूध, गोमूत्र और गोघृत पृथक्-पृथक् एक २ आढक मिलाकर, चिरायता, सोंठ, मरिच, पिप्पली, चित्रक, करञ्जबीज, नीलिका (नील), काला निशोथ, वाकुची, पीलू, नीलिनी (नील) और नीम के फूल के कल्क के साथ घृत पाक किया जावे। यह घृत कुष्ठनाशक होता है। इस घृत की मालिश करने से श्वित्रग्रस्त मनुष्यों की त्वचा में सवर्णता (अन्य स्वस्थ स्थान की त्वचा के तुल्य वर्ण का होना) आती है। यह महानील घृत भगन्दर, कृमि और अर्श रोग को नष्ट करता है॥ ३४-३८॥

मूत्रं गव्यं चित्रकव्योपयुक्तं
सर्पिःकुम्भे क्षौद्रयुक्तं स्थितं हि।
पक्षादूर्ध्वं श्वित्रिभिः पेयमेतत्
कुर्याच्चास्मिन् कुष्ठदिष्टं विधानम्॥ ३९॥

गोमूत्र में चित्रक, सोंठ, मरिच, पिप्पली और मधु मिला उसे घी के भाण्ड में बन्द रख कर पन्द्रह दिन के पश्चात् श्वित्र के रोगियों को पीना चाहिए। और कुष्ठ रोग के लिये बतलाये गये नियमों का पालन करना चाहिए॥ ३९॥

पूतीकार्कसुरूनरेन्द्रद्रुमाणां
मूत्रैः पिष्टाः पल्लवाः सौमनाश्च।
लेपः श्वित्रं हन्ति दद्रूव्रणांश्च
दुष्टान्यर्शांस्येष नाडीव्रणांश्च॥ ४०॥

करञ्ज, मदार, सेहुण्ड, देवदारु, अमलतास और चमेली के पत्तों को गोमूत्र के साथ पीस कर लेप करने से श्वित्र, दद्रु, व्रण, दूषित अर्श और नाडीव्रण नष्ट होते हैं॥ ४०॥

अस्मादूर्ध्वं निःसृते दुष्टरक्ते
जातप्राणं सर्पिषा स्नेहयित्वा।
तीक्ष्णैर्योगैश्छर्दयित्वा प्रगाढ
पश्चाद्दोष निर्हरेच्चाप्रमत्तः॥ ४१॥

इसके बाद दूषित रक्त निकल जाने पर, शक्तिलाभ होने के पश्चात्, घी से स्नेहन करके तीक्ष्ण योगों के द्वारा भलीभांति वमन करावे, फिर सावधानी से दोषों को दूर करे॥ ४१॥

दुर्वान्तो वा दुर्विरिक्तोऽपि वा स्यात्
कुष्ठी दोषैरुद्धतैर्व्याप्तदेहः।
निःसन्दिग्धं यात्यसाध्यत्वमाशु
तस्मात् कृत्स्नान्निर्हरेत्तस्य दोषान्॥ ४२॥

वमन अथवा विरेचन यथाक्रम न होने से प्रकुपित हुए दोष कुष्ठरोगी के शरीर में फैल जाते हैं और शीघ्र ही निस्सन्देह उसे असाध्य बना देते हैं, इसलिए रोगी के सम्पूर्ण दोषों को बाहर निकालना चाहिये॥ ४२॥

पश्चात् पक्षाच्छर्दनान्यभ्युपेयाद्
मासान्मासात् स्रसनं चापि देयम्।
स्राव्यं रक्तं वत्सरे हि द्विरल्प
नस्यं दद्याच्च त्रिरात्रात्रिरात्रात्॥ ४३॥

कुष्ठ में दोष-शोधन का क्रम-कुष्ठरोगी को पन्द्रह दिन के पश्चात् वमन और एक २ मास के बाद विरेचन देना चाहिये। वर्ष में दो बार रक्तमोक्षण करना चाहिए तथा तीन २ दिन पर नस्य देना चाहिये॥ ४३॥

पथ्या व्योष सक्षुजात सतैलं
लीढ्वा शीघ्रं मुच्यते कुष्ठरोगात्।
धात्रीपथ्याक्षोपकुल्याविडङ्गान्
क्षौद्राज्याभ्यामेकतो वाऽवलिह्यात्॥ ४४॥
पीत्वा मासं वा पलांशां हरिद्रां
मूत्रेणान्तं पापरोगस्य गच्छेत्।
एवं पेयश्चित्रकः श्लक्ष्णपिष्टः
पिप्पल्यो वा पूर्ववन्मूत्रयुक्ताः॥ ४५॥

कुष्ठ में कतिपय योग—हरीतकी, सोंठ, मरिच, पिप्पली, गुड और तेल मिलाकर चाटने से कुष्ठरोग से रोगी शीघ्र मुक्त हो जाता है, अथवा आँवला, हरड, बहेड़ा, पिप्पली और विडङ्ग को मधु तथा घृत किसी एक के साथ चाटने से कुष्ठरोग से मुक्त होता है। अथवा एक पल हल्दी गोमूत्र के साथ एक मास तक सेवन करने से रोगी कुष्ठरोग से मुक्त होता है। इसी प्रकार चित्रक अथवा पिप्पली को महीन पीसकर (हल्दी की भांति एक पल प्रमाण में) गोमूत्र के साथ सेवन करे॥ ४४-४५॥

विमर्शः—तेल और गुड़ का सेवन कुष्ठरोग में अहितकर है, किन्तु उपर्युक्त योग में तेल तथा गुड के सेवन का विधान बतलाया गया है। इसका कारण द्रव्यों का परस्पर संयोग है। हरीतकी और त्रिकटु के संयोग से गुड तथा तेल का सेवन कुष्ठनाशक बन जाता है। द्रव्यों में एक दूसरे के संयोग से गुणान्तर की उत्पत्ति होती है। दृष्टान्त स्वरूप हल्दी और चूना को ले लीजिए, हल्दी पीली है और चूना सफेद, किन्तु जब दोनों का सम्मिश्रण होता है तब रक्तवर्ण की सृष्टि हो जाती है। उल्हण ने इसका स्पष्टीकरण निम्नलिखित रूप में किया है—'तैलगुडयो' कुष्ठकारित्वेऽपि हरीतकीत्रिकटुसंयुक्तयोः कुष्ठहारित्वम्, संयोगशक्तेरचिन्त्यत्वात्'।

तद्वत्ताक्ष्यं मासमात्र च पेयं
तेनाजस्रं देहमालेपयेच्च।
आरिष्टी त्वक् सप्तपर्णी च तुल्या
लाक्षा मुस्तं पञ्चमूल्यौ हरिद्रे॥ ४६॥
मञ्जिष्ठाक्षौ वासको देवदारु
पथ्यावह्नी व्योषधात्री विडङ्गः।
सामान्यांशं योजयित्वा विडङ्गै-
श्चूर्णं कृत्वा तत्पलोन्मानमश्नन्॥ ४७॥
कुष्ठाज्जन्तुर्मुच्यते त्रैफलं वा
सर्पिर्द्रोणं व्योषयुक्तं च युञ्जन्।
गोमूत्राम्बुद्रोणसिद्धेऽक्षपीडे
सिद्धं सर्पिर्नाशयेच्चापि कुष्ठम्॥ ४८॥
आरग्वधे सप्तपर्णे पटोले
सवृक्षके नक्तमाले सनिम्बे।
जीर्णं पक्वं तद्धरिद्राद्वयेन
हन्यात् कुष्ठं मुष्ककं चापि सर्पिः॥ ४९॥

इसी प्रकार एक मास तक गोमूत्र के साथ रसोत पीना चाहिये और शरीर में उसका लेप लगाना चाहिये। नीम की छाल, सतवन, लाख, नागरमोथा, दशमूल, हल्दी, दारुहल्दी, मजीठ, बहेड़ा, अडूसा, देवदारु, हरड, चित्रक, सोंठ, मरिच, पिप्पली, आँवला और विडङ्ग, इन द्रव्यों के बराबर विडङ्ग मिलाकर चूर्ण बनावे। एक पल की मात्रा में (गोमूत्र के साथ एक मास तक) इस चूर्ण का सेवन करने से रोगी कुष्ठ से मुक्त होता है। अथवा एक द्रोण त्रिफलाघृत त्रिकटु-चूर्ण मिलाकर सेवन करने से रोगी कुष्ठ से मुक्त होता है। एक द्रोण गोमूत्र के द्वारा अक्षपीड (यवतिक्ता या कालमेघ) कल्क से सिद्ध घृत कुष्ठ को नष्ट करता है। अमलतास, सतवन, परवल की पत्ती, कुटज, करञ्ज, नीम, हल्दी, दारुहल्दी और मुष्कक (मोखा या पाढल) के कल्क से सिद्ध पुराण घृत कुष्ठ का नाश करता है ॥ ४६-४९ ॥

रोध्रारिष्टं पद्मकं रक्तसारः
सप्ताह्वाक्षौ वृक्षको बीजकश्च।
योज्याः स्नाने दह्यमानस्य जन्तोः
पेया वा स्यात् क्षौद्रयुक्ता त्रिभण्डी ॥ ५० ॥

दाहयुक्त कुष्ठी के लिये स्नान-प्रयोग—लोध, नीम, पद्माख, पतंग, सप्तपर्ण, कुटज और विजयसार के क्वाथ से (षडङ्गोदक कल्पना से सिद्ध) अत्यधिक दाह वाले कुष्ठरोगी को (पित्तकी अधिकता के कारण) स्नान करावे अथवा निशोथ का चूर्ण मधु मिलाकर चटावे ॥ ५० ॥

खादेत् कुष्ठी मांसशा(पा)ते पुराणान्
मुद्गान् सिद्धान्निम्बतोये सतैलान्।
निम्बक्वाथं जातसत्त्वः पिबेद्वा
क्वाथं वाऽर्कालर्कसप्तच्छदानाम् ॥ ५१ ॥

क्रिमि पड़े हुये कुष्ठियों की चिकित्सा—मांस के सड़कर गिरने पर (गलित कुष्ठ में) कुष्ठरोगी को नीम के क्वाथ से सिद्ध तैलयुक्त पुराने मूग का आहार करना चाहिये। अथवा कृमियुक्त कुष्ठ वाला रोगी नीम का क्वाथ या लाल तथा सफेद फूल के मदार एवं सप्तपर्ण का क्वाथ पान करे ॥

जग्धेष्वङ्गेष्वश्वमारस्य मूलं
लेपो युक्तः स्याद्विडङ्गैः समूत्रैः।
मूत्रैश्चैनं सेचयेद्भोजयेच्च
सर्वाहारान् संप्रयुक्तान् विडङ्गैः ॥ ५२ ॥

कृमियों से खाये हुए अङ्गों पर कनेर की जड तथा विडङ्ग को गोमूत्र में पीसकर लेप करे। गोमूत्र से रोगी का परिषेक करे तथा सभी प्रकार के आहार में विडङ्ग मिलाकर भोजन करावे ॥ ५२ ॥

कारञ्जं वा सार्षपं वा क्षतेषु
क्षेप्यं तैलं शिग्रुकोशाम्रयोर्वा।
पक्वं सर्वैर्वा कटूष्णैः सतिक्तैः
शेषं च स्याद्दुष्टव्रत् सविधानम् ॥ ५३ ॥

करञ्ज, सरसों, सहिजन या कोशाम्र (क्षुद्र आम का बीज) का तेल व्रणों पर लगावे। अथवा कटु, उष्ण (मरिचादि) और तिक्त (नीम आदि) द्रव्यों के क्वाथ में करञ्ज आदि सभी द्रव्यों के तेल का पाक करके व्रण पर लगावे, शेष चिकित्सा दूषित व्रण की भांति करे ॥ ५३ ॥

सप्तपर्णकरञ्जार्कमालतीकरवीरजम्।
स्नुहीशिरीषयोर्मूलं चित्रकास्फोतयोरपि ॥ ५४ ॥
विपलाङ्गलवज्राख्यकासीसालमनःशिलाः।
करञ्जबीजं त्रिकटु त्रिफलां रजनीद्वयम् ॥ ५५ ॥
सिद्धार्थकान् विडङ्गानि प्रपुन्नाडं च संहरेत्।
मूत्रपिष्टैः पचेदेतैस्तैलं कुष्ठविनाशनम्।
एतद्वज्रकमभ्यङ्गान्नाडीदुष्टव्रणापहम् ॥ ५६ ॥

वज्रक तैल—सप्तपर्ण, करञ्ज, मदार, चमेली, कनेर, सेहुण्ड, शिरीष, चित्रक और अपराजिता की जड, वत्सनाभ-विष, कलिहारी, वज्र (वज्रास्थी द्वितीयसेहुण्ड, अभ्र वा), कासीस, मैनसिल, करञ्जबीज, सोंठ, मरिच, पिप्पली, हरड, बहेड़ा, आँवला, हल्दी, दारुहल्दी, पीलीसरसो, विडङ्ग तथा चकवड के बीज, इन द्रव्यों को एकत्रित कर गोमूत्र से पीस कर कल्क बनावे एवं इनके द्वारा कुष्ठनाशक तैल का पाक करे। इस वज्रक तैल की मालिश करने से नाडीव्रण और दूषित व्रण नष्ट होते हैं ॥ ५४-५६ ॥

सिद्धार्थकः करञ्जौ द्वौ द्वे हरिद्रे रसाञ्जनम् ॥५७॥
कुटजश्च प्रपुन्नाडसप्तपर्णौ मृगादनी।
लाक्षा सर्जरसोऽर्कश्च सास्फोतारग्वधौ स्नुही ॥५८॥
शिरीषस्तुवराख्यस्तु कुटजारुष्करौ वचा।
कुष्ठं कृमिघ्नं मञ्जिष्ठा लाङ्गली चित्रकं तथा ॥५९॥
मालती कटुतुम्बी च गन्धाह्वा मूलकं तथा।
सैन्धवं करवीरश्च गृहधूमं विषं तथा ॥६०॥
कम्पिल्लकं ससिन्दूरं तेजोह्वातुत्थकाह्वये।
समभागानि सर्वाणि कल्कपेष्याणि कारयेत् ॥६१॥
गोमूत्रं द्विगुणं दद्यात्तिलतैलाच्चतुर्गुणम्।
कारञ्जं वा महावीर्यं सार्षपं वा महागुणम् ॥६२॥
अभ्यङ्गात् सर्वकुष्ठानि गण्डमालाभगन्दरान्।
नाडीदुष्टव्रणान् घोरान् नाशयेन्नात्र संशयः।
महावज्रकमित्येतन्नाम्ना तैलं महागुणम् ॥६३॥

महावज्रक तैल—पीली सरसो, करञ्ज, पूतिकरञ्ज, हल्दी, दारुहल्दी, रसोत, कुटज, चकवड़, सप्तपर्ण, इन्द्रायण, लाख, राल, मदार, अपराजिता, अमलतास, सेहुण्ड, शिरीष, सौराष्ट्रमृत्तिका, कुटज, भिलावा, वच, कूठ, विडङ्ग, मजीठ, कलिहारी, चित्रक, चमेली, कड़ुई तुम्बी, कपूरकचरी, मूली, सेन्धानमक, कनेर, गृहधूम, वत्सनाभविष, कबीला, सिन्दूर, तेजबल, तूतिया इन द्रव्यों को समान भाग में लेकर, पीस कर कल्क बनावे। कल्क से दुगुना गोमूत्र और चौगुना तिल-तैल या महाबलशाली करञ्ज तैल अथवा अत्यन्त गुणवान् सरसो का तेल लेकर तैल पाक करे। इस तैल की मालिश करने से अत्यन्त भयकर सब प्रकार के कुष्ठ, गण्डमाला, भगन्दर, नाडीव्रण और दूषित व्रण निस्सन्देह नष्ट होते हैं। महावज्रक नामक यह तैल महान् गुणशाली है ॥ ५७-६३ ॥

पित्तावापैर्मूत्रपिष्टैस्तैलं लाक्षादिकैः कृतम् ॥६४॥

सप्ताहं कटुकालब्वां निदधीत चिकित्सकः।
पीतवन्तं ततो मात्रां तेनाभ्यक्तं च मानवम् ॥६५॥
शाययेदातपे तस्य दोषा गच्छन्ति सर्वशः।

लाक्षादिक तैल—लाक्षादि गण (लाक्षा, सर्जरस, रसाञ्जन आदि) की औषधियों को गोमूत्र में पीस कर कल्क बनावे और गोपित्त का प्रक्षेप डालकर तैल पाक करे। चिकित्सक इस तैल को एक सप्ताह कद्दुई तुम्बी में रखे। रोगी को मात्रानुसार तैल पिला कर इसी तैल की मालिश करावे, रोगी को धूप में सुलावे। इस प्रकार रोगी के दोष चारों ओर से निकल जाते हैं ॥ ६४-६५ ॥

स्नुतदोषं समुत्थाप्य स्नातं खदिरवारिणा ॥६६॥
यवागूं पाययेदेनं साधितां खदिराम्बुना।

खदिरादि यवागू—दोषों के बाहर निकल जाने पर रोगी को उठा कर खैर के क्वाथ से स्नान करावे (स्नान किए हुए रोगी को) खैर के क्वाथ से सिद्ध यवागू पिलावे ॥ ६६ ॥

एवं सशोधने वर्गे कुष्ठघ्नेष्वौषधेषु च ॥६७॥
कुर्यात्तैलानि सर्पींषि प्रदेहोद्वर्पणानि च।
प्रातः प्रातश्च सेवेत योगान्वैरेचनान् शुभान्।
पञ्च षट् सप्त चाष्टौ वा यैरुत्थानं न गच्छति ॥६८॥

प्रदेह, उद्वर्पण तथा विरेचन में तैल घृत की उपयोगिता—इसी प्रकार सशोधन वर्ग और कुष्ठघ्न औषधियों के कल्क के साथ तैल और घृत का पाक करके लेप लगावे तथा मालिश करे। प्रतिदिन प्रातः काल कल्याणकारक रेचक योगों का सेवन करके पाँच, छः, सात या आठ रेचन करे, जिसमें दोष-प्रकोप पुनः न हो ॥ ६७-६८ ॥

कारभं वा पिबेन्मूत्रं जीर्णे तत्क्षीरभोजनम्।
जातसत्त्वानि कुष्ठानि मासैः षड्भिरपोहति ॥६९॥

ऊँटनी के मूत्र का योग—अथवा ऊँटनी के मूत्र का पान करे और उसका पाचन हो जाने पर केवल दुग्धाहार करे। इस क्रिया के द्वारा कृमियुक्त कुष्ठ छः मास में नष्ट हो जाता है ॥६९॥

दिदृक्षुरन्त कुष्ठस्य खदिरं कुष्ठपीडितः।
सर्वथैव प्रयुञ्जीत स्नानपानाशनादिषु ॥ ७० ॥

कुष्ठ में खदिर योग की प्रशंसा—कुष्ठ रोग का नाश देखने की इच्छा वाले कुष्ठ से पीडित व्यक्ति को, स्नान, पान और आहार में सर्वत्र खैर का प्रयोग करना चाहिए ॥ ७० ॥

यथा हन्ति प्रवृद्धत्वात् कुष्ठमातुरमोजसा।
तथा हन्त्युपयुक्तस्तु खदिरः कुष्ठमोजसा ॥ ७१ ॥

जिस प्रकार वृद्धि को प्राप्त हुआ कुष्ठ अपनी शक्ति से रोगी का अन्त कर देता है, उसी प्रकार प्रयोग में लाया गया खैर अपनी शक्ति (वीर्य, प्रभाव) से कुष्ठ रोग का नाश करता है ॥ ७१ ॥

नीचरोमनखश्मश्रुर्हिताश्यौषधतत्परः।
योऽपिन्मांससुरावर्जी कुष्ठी कुष्ठमपोहति ॥ ७२ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने कुष्ठचिकित्सितं नाम नवमोऽध्यायः ॥ ९ ॥

कुष्ठियों का पथ्यापथ्य—कटे हुए केश तथा नख वाला, विश्राम करने वाला, हितकर भोजन एवं औषधि के सेवन में लगा हुआ, स्त्री, मांस और सुरा को त्यागने वाला कुष्ठरोगी कुष्ठ से मुक्त हो जाता है ॥ ७२ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकायां भाषाटीकायां नवमोऽध्यायः ॥९॥

दशमोऽध्यायः

अथातो महाकुष्ठचिकित्सितं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

महाकुष्ठ चिकित्सा का उपक्रम—इसके अनन्तर महाकुष्ठ की चिकित्सा-विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥१-२॥

कुष्ठेषु मेहेषु कफामयेषु
सर्वाङ्गशोफेषु च दारुणेषु।
कृशत्वमिच्छत्सु च मेदुरेषु
योगानिमानभ्यमतिर्विदध्यात् ॥ ३ ॥

भयङ्कर कुष्ठ, मेह और कफरोग तथा सर्वाङ्गशोथ एवं कृश (दुर्बल) होने की इच्छा वाले मेदस्वी व्यक्तियों के लिए, कुशाग्रबुद्धि वैद्य इन (अधोलिखित) योगों का प्रयोग करे ॥३॥

क्षुण्णान् यवान्निष्पूतान् रात्रौ गोमूत्रपर्युषितान् महति किलिञ्जे शोषयेत्, एवं सप्तरात्रं भावयेच्छोषयेच्च, ततस्तान् कपालभृष्टान् शक्तून् कारयित्वा, प्रातः प्रातरेव कुष्ठिनं प्रमेहिणं वा शालसारादिकषायेण कण्टकिवृक्षकषायेण वा पाययेद्भल्लातकप्रपुन्नाडावल्गुजार्कचित्रकविडङ्गमुस्तचूर्णचतुर्भागयुक्तान्।

कुष्ठ में यवकल्प—कूटे हुए जौ की भूसी साफ करके, रात्रि में गोमूत्र में भिगो कर, (दिन में) बाँस के बड़े टोकरे में सुखावे। इस प्रकार सात दिन गोमूत्र में भिगोवे और सुखावे। फिर इन्हें (भड़भूजे के) ठीकरे में भुनवा कर सत्तू बनावे और प्रतिदिन प्रातः काल कुष्ठ तथा प्रमेह वाले व्यक्ति को शालसारादिगण या काटे वाले वृक्षों (खदिर, बेर, इरिमेद, सेहुण्ड आदि) के क्वाथ में मिलावा, चकवड के बीज, बाकुची, मदार, चित्रक, विडङ्ग और नागरमोथा का चूर्ण चतुर्थांश मिला कर पिलावे।

एवमेव शालसारादिकषायपरिपीतानामारग्वधादिकषायपरिपीतानां वा गवाश्वाशकृद्भूतानां वा यवानां शक्तून् कारयित्वा भल्लातकादीनां चूर्णान्यावाप्य खदिराशननिम्बराजवृक्षरोहीतकगुडूचीनामन्यतमस्य कषायेण शर्करामधुमधुरेण द्राक्षायुक्तेन दाडिमामलकवेतसाम्लेन सैन्धवलवणान्वितेन पाययेत्; एष सर्वमन्यकल्पः ॥ ४ ॥

इसी प्रकार शालसारादिगण या आरग्वधादिगण के क्वाथ से भावित अथवा गोबर में रख कर निकाले हुए जौ का सत्तू बनावे और भल्लातक आदि द्रव्यों का चूर्ण मिला कर, खैर, विजयसार, नीम, अमलतास, रोहेड़ा तथा गिलोय में से

किसी एक के क्वाथ को शर्करा और मधु के द्वारा मीठा बना कर तथा मुनक्का, अनार, अम्लवेत और सेधा नमक के द्वारा खट्टा एव नमकीन बनाकर पिलावे। यह सब प्रकार के मन्थ बनाने की विधि है ॥ ४ ॥

विमर्शः—मन्थपरिभाषा-सक्तवः सर्पिषाऽभ्यक्ताः शीतवारि परिप्लुताः। नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते ॥

यावकांश्च भक्ष्यान् धानोलुम्बककुल्माषापूपपूर्णकोशोत्कारिकाशष्कुलिकाकुणाबीप्रभृतीन् सेवेत; यवविधानेन गोधूमवेणुयवानुपयुञ्जीत ॥ ५ ॥

जौ के बने हुए भोज्य पदार्थ—सूखे भुने हुए जौ, आग में भुने हुए हरे जौ, अर्धस्विन्नजौ, मालपूआ, कचौडी, लप्सी, पूडी और पापड आदि का सेवन करे। जौ की विधि के अनुसार गेहूँ तथा बांस के बीजों को उपयोग में लावे ॥ ५ ॥

अरिष्टानतो वक्ष्यामः—पूतीकचव्यचित्रकसुरदारुसारिवादन्तीत्रिवृत्त्रिकटुकानां प्रत्येकं षट्पलिका भागा बदरकुडवस्त्रिफलाकुडव इत्येतेषां चूर्णानि; ततः पिप्पलीमधुघृतैरन्तःप्रलिप्ते घृतभाजने प्राक्कृतसंस्कारे सप्तोदककुडवानयोरजोऽर्धकुडवमर्धतुलां च गुडस्याभिहितानि चूर्णान्यावाप्य स्वनुगुप्तं कृत्वा यवपल्ले सप्तरात्रं वासयेत्, ततो यथाबलमुपयुञ्जीत, एषोऽरिष्टः कुष्ठमेहमेदःपाण्डुरोगश्वयथूनपहन्ति। एवं शालसारादौ न्यग्रोधादावारग्वधादौ चारिष्टान् कुर्वीत ॥ ६ ॥

कुष्ठ में अरिष्ट विधान—इसके आगे अरिष्टों का वर्णन किया जाता है—करञ्ज, चव्य, चित्रक, देवदारु, अनन्तमूल, दन्ती, निशोथ, सोंठ, मरिच, पिप्पली, प्रत्येक ६ पल, बेर एक कुडव और त्रिफला एक कुडव, इनका चूर्ण बनावे। फिर पिप्पली, मधु तथा घृत पुते हुए एवं धूप आदि से संस्कार किए गए घी के भाण्ड में, सात कुडव जल, आधा कुडव लोहचूर्ण, आधा तुला गुड तथा उपर्युक्त चूर्ण का प्रक्षेप डाल कर, सुरक्षित स्थान में, जौ की राशि में सात दिन रखे। पश्चात् शक्ति के अनुसार इसका सेवन करे। यह अरिष्ट कुष्ठ, मेह, मेद, पाण्डु और शोथ रोग को नष्ट करता है। इसी प्रकार शालसारादि, न्यग्रोधादि और आरग्वधादि गण के द्रव्यों के द्वारा अरिष्ट बनावे ॥ ६ ॥

आसवानतो वक्ष्यामः—पलाशभस्मपरिस्रुतस्योष्णोदकस्य शीतीभूतस्य त्रयो भागा द्वौ फाणितस्यैकध्यमरिष्टकल्पेन विदध्यात्, एवं तिलादीनां क्षारेषु; शालसारादौ न्यग्रोधादावारग्वधादौ मूत्रेषु चासवान् विदध्यात् ॥ ७ ॥

कुष्ठ में आसवविधान—आसवों का वर्णन इसके आगे किया जाता है। पलाश की भस्म (राख) उष्ण जल में घोल ले। शीतल होने पर इसका तीन भाग (तीन आढक), और दो भाग (दो आढक) फाणित (राव) अरिष्ट-निर्माण विधि के अनुसार (त्रिफला, वेर आदि के चूर्ण का प्रक्षेप डाल कर) एक साथ मिला कर रखे। इसी प्रकार तिल आदि के क्षार (अश्मरी-प्रकरण में पठित), शालसारादि गण, न्यग्रोधादि गण और आरग्वधादि गण के क्षारजल तथा गोमूत्र के द्वारा आसवों का निर्माण करे ॥ ७ ॥

अथ सुरा वक्ष्यामः—शिशपाखदिरयोः सारमादायोत्पाट्य चोत्तमारणीब्राह्मीकोशवतीस्तत्सर्वमेकतः कषायकल्पेन विपाच्योदकमाददीत मण्डोदकार्थं, किण्वपिष्टमभिषुणुयाच्च यथोक्तम्। एवं सुराः शालसारादौ न्यग्रोधादावारग्वधादौ च विदध्यात् ॥ ८ ॥

सुराविधान—इसके अनन्तर सुरा का वर्णन किया जाता है—शीशम और खैर की लकडी का सार भाग (बीच का हिस्सा) लेकर काट ले और उत्तमारणी, ब्राह्मी तथा देवदाली सबको एक साथ क्वाथनिर्माण-विधि के अनुसार पका कर, सुरा बनाने के लिए जल (क्वाथ) ग्रहण करे। इसमें सुराबीज पीस कर मिलावे तथा पूर्व में कही गई विधि (सू. विरेचनाधिकार) के अनुसार संधान करे। इसी प्रकार शालसारादिगण, न्यग्रोधादि गण और आरग्वधादि गण के द्रव्यों से सुरा निर्माण करे ॥ ८ ॥

अतोऽवलेहान् वक्ष्यामः—खदिरासननिम्बराजवृक्षशालसारक्वाथे तत्सारपिण्डाञ्छ्लक्ष्णपिष्टान् प्रक्षिप्य विपचेत्, ततो नातिद्रवं नातिसान्द्रमवतार्य तस्य पाणितलं पूर्णमप्रातराशो मधुमिश्रं लिह्यात्। एवं शालसारादौ न्यग्रोधादावारग्वधादौ च लेहान् कारयेत् ॥९॥

कुष्ठ में अवलेह-विधान—इसके आगे अवलेहों का वर्णन किया जाता है। खैर, विजयसार, नीम, अमलतास और शाल वृक्ष के सारभाग का क्वाथ बनावे। इस क्वाथ में इन्हीं द्रव्यों के सारभाग को महीन पीस कर मिलावे और पाक करे। फिर न अधिक पतला और न अधिक गाढ़ा अवलेह अग्नि से उतार कर, सायंकाल मधु मिला कर हथेली में भरकर चाटे। उसी प्रकार शालसारादि, न्यग्रोधादि और आरग्वधादि गण के द्रव्यों से अवलेह सिद्ध करे ॥ ९ ॥

अतश्चूर्णक्रियां वक्ष्यामः—शालसारादीना सारचूर्णप्रस्थमाहृत्यारग्वधादिकषायपरिपीतमनेकशः शालसारादिकषायेणैव पाययेत्; एव न्यग्रोधादीनां फलेषु पुष्पेष्वारग्वधादीनां चूर्णक्रियां कारयेत् ॥ १० ॥

कुष्ठ में चूर्णक्रिया—इसके आगे चूर्ण क्रिया का वर्णन किया जाता है। शालसारादि गण के द्रव्यों के सारभाग का चूर्ण एक प्रस्थ लेकर, आरग्वधादि गण के क्वाथ की अनेक भावना दे, शालसारादि गण के क्वाथ के साथ पिलावे। इसी प्रकार न्यग्रोधादिगण के फलों से तथा आरग्वधादि गण के फूलों से चूर्ण निर्माण करे ॥ १० ॥

अत ऊर्ध्वमयस्कृतीर्वक्ष्यामः—तीक्ष्णलोहपत्राणि तनूनि लवणवर्गप्रदिग्धानि गोमयाग्निप्रतप्तानि त्रिफलाशालसारादिकषायेण निर्वापयेत् षोडशवारान्, ततः खदिराङ्गारतप्तान्युपशान्ततापानि सूक्ष्मचूर्णानि कारयेद्घनतान्तवपरिस्रावितानि, ततो यथाबल मात्रा सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत, जीर्णे यथाव्याध्यनम्लमलवणमाहारं कुर्वीत, एवं तुलामुपयुज्य कुष्ठमेहमेद-

क्षयपाण्डुरोगोन्मादापस्मारानपहत्य वर्षशतं जीवति, तुलायां तुलायां वर्षशतमुत्कर्षः, एतेन सर्वलौहेष्वयस्कृतयो व्याख्याता' ॥ ११ ॥

कुष्ठ में अयस्कृति (लौहरसायन)—इसके आगे अयस्कृति (लौहरसायन) का वर्णन किया जाता है। तीक्ष्ण लोह के पतले पत्र को लेकर उस पर लवणवर्ग (पचलवण) के कल्क का लेप करे। फिर उपलों की अग्नि पर उन पत्रों को तपाकर, त्रिफला और शालसारादिगण के क्वाथ में सोलह बार बुझावे। फिर खैर के अङ्गारे पर (सोलह बार) तपावे और शीतल होने पर चूर्ण बनाकर कपड़े में छान ले। अग्निबल के अनुसार घी और मधु मिला कर अल्पमात्रा में सेवन करे। औषधि का पाचन होने पर रोगानुसार अम्ल तथा लवण वर्जित भोजन करे। इस प्रकार इस चूर्ण की एक तुला सेवन करके, कुष्ठ, मेह, मेद, शोथ, पाण्डु, उन्माद और अपस्मार रोग का नाश कर, रोगी सौ वर्ष जीवित रहता है। एक एक तुला में सौ-सौ वर्ष के गुण की वृद्धि होती है। इसके द्वारा सभी लोह (सुवर्ण, ताम्र आदि धातु) की अयस्कृति का वर्णन किया गया है ॥ ११ ॥

त्रिवृच्छ्यामाग्निमन्थसप्तलाकेवुकशङ्खिनीतिल्वकत्रिफलापलाशशिंशपानां स्वरसमादाय पालाश्यां द्रोण्यामभ्यासिच्य खदिराङ्गारतप्तमयःपिण्डं त्रिःसप्तकृत्वो निर्वाप्य तमादाय पुनरासिच्य स्थाल्यां गोमयाग्निना विपचेत्, ततश्चतुर्थभागावशिष्टमवतार्य परिस्राव्य भूयोऽग्नितप्तान्यत्र पत्राणि प्रक्षिपेत्, सिध्यति चास्मिन् पिप्पल्यादिचूर्णभागं द्वौ मधुनस्तावद्घृतस्येति विद्यात्, ततः प्रशान्तमायसे पात्रे स्वनुगुप्तं निदध्यात्, ततो यथायोगं शुक्तिं प्रकुञ्चं चोपयुञ्जीत जीर्णे यथाव्याहारमुपसेवेत। एषौषधायस्कृतिरसाध्यं कुष्ठं प्रमेहं वा साधयति. स्थूलमपकर्षति, शोफमुपहन्ति, सन्नमग्निमुद्धरति. विशेषेण चोपदिश्यते राजयक्ष्मिणां, वर्षशतायुष्ट्वानया पुरुषो भवति।

शालसारादिक्वाथमासिच्य पालाश्यां द्रोण्यामयोघनांस्तप्तान्निर्वाप्य कृतसंस्कारे कलशेऽभ्यासिच्य पिप्पल्यादिचूर्णभागं क्षौद्रं गुडमिति च दत्त्वा स्वनुगुप्तं निदध्यात्, एतां महौषधायस्कृतिं मासमर्धमासं वा स्थितां यथाबलमुपयुञ्जीत। एवं न्यग्रोधादावारेवतादिषु च विद्ध्यात् ॥ १२ ॥

निशोथ, विधारा, अरनी, सातला-सेहुण्ड, एरण्ड, अविनी (यवतिक्ता), लोध्र, हरड़, बहेड़ा, आँवला, पलाश, और शीशम का स्वरस. पलाशवृक्ष के बने द्रोणी (नौकाकृति पात्र टब) में रखकर. उसमें खैर के अङ्गार पर तपाये गये लोहपिण्ड को इक्कीस बार बुझावे तथा उस लौह बुझे स्वरस को थाली में रखकर उपले की अग्नि पर पकावे। जब चतुर्थांश स्वरस अवशिष्ट रह जाय, उतार कर छान ले और पुनः अग्नि पर तपाये गए लोहपत्रों को उसमें डाल दे। पाक होने के समय पिप्पल्यादि चूर्ण एक भाग, मधु दो भाग, तथा घी दो भाग मिलावे। पाक सिद्ध होने पर लोहे के पात्र में सुरक्षित स्थान में रखे। फिर विधान के अनुसार आधा पल, अथवा एक पल सेवन करे और औषधि का पाचन होने पर व्याधि के अनुकूल आहार का भोजन करे। यह अयस्कृति औषध, असाध्य कुष्ठ तथा प्रमेह को दूर करती है, मोटे को कृश बनाती है, शोथ का नाश करती है, मन्द अग्नि को तीव्र करती है तथा राजयक्ष्मा से पीडित रोगियों के लिए इसका विशेष विधान है। इसके सेवन से मनुष्य सौ वर्ष की आयु प्राप्त करता है। पलाश की द्रोणी में शालसारादिगण का क्वाथ रख कर उसमें लोहपिण्ड तपा कर बुझावे। इस क्वाथ को (लोहचूर्ण के साथ) धूप आदि से संस्कृत घड़े में रखकर पिप्पल्यादि चूर्ण एक भाग तथा मधु और गुड़ दो-दो भाग मिलाकर, सुरक्षित स्थान में रखे। इस महाऔषध अयस्कृति को एक मास या पन्द्रह दिन (संधान करके) रखने के पश्चात्, अग्निबल के अनुसार सेवन करे। इसी प्रकार न्यग्रोधादिगण और आरग्वधादिगण के द्रव्यों से अयस्कृति का निर्माण करे ॥ १२ ॥

अतः खदिरविधानमुपदेक्ष्यामः—प्रशस्तदेशजातमनुपहतं मध्यमवयसं खदिरं परितः खानयित्वा तस्य मध्यमं मूलं छित्त्वाऽयोमयं कुम्भं तस्मिन्नन्तरे निदध्याद्यथा रसग्रहणसमर्थो भवति, ततस्तं गोमयमृदाऽवलिप्तमवकीर्यैन्धनैर्गोमयमिश्रैरादीपयेद्यथाऽस्य दह्यमानस्य रसः स्रवत्यधस्तात्, तथदा जानीयात् पूर्णं भाजनमिति, अथैनमुद्धृत्य परिस्राव्य रसमन्यस्मिन् पात्रे निधायानुगुप्तं निदध्यात्, ततो यथायोगं मात्रामामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत, जीर्णे भल्लातकविधानवदाहारं परिहारञ्च, प्रस्थे चोपयुक्ते शतं वर्षाणामायुषोऽभिवृद्धिर्भवति।

खदिरसारतुलामुदकद्रोणे विपाच्य षोडशांशावशिष्टमवतार्यानुगुप्तं निदध्यात्, तमामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत। एष एव सर्ववृक्षसारेषु कल्पः। खदिरसारचूर्णतुलां खदिरसारक्वाथमात्रां वा प्रातः प्रातरुपसेवेत, खदिरसारक्वाथसिद्धमाविकं वा सर्पिः ॥ १३ ॥

कुष्ठ में खदिर विधान—इसके आगे खदिर विधान का वर्णन किया जाता है—प्रशस्त भूमि में उत्पन्न, कीड़ों से नष्ट न किये गये, तरुण खदिर वृक्ष को चारों ओर से खोद कर, उसकी जड़ के बीच में काटकर खोखला बनावे और उसके अन्दर लोहे का घड़ा इस प्रकार रखे जिसमें खैर का रस उस घड़े में टपके। फिर उसमें गोबर तथा मिट्टी का लेप करके उपले आदि से युक्त ईंधन के द्वारा अग्नि लगा दे, जिसमें जलने वाले उस खैर का रस (घड़े में) नीचे टपके। जब ज्ञात हो जाय कि घड़ा रस से भर गया तब घड़े को निकाल, रस छान कर, दूसरे पात्र में सुरक्षित स्थान में रखे। फिर विधान के अनुसार, आँवले का रस तथा मधु और घृत मिलाकर इस रस की मात्रा का सेवन

करे। औषधि का पाचन होने पर भल्लातक-विधान में कहे गए आहार-विहार का सेवन तथा त्याग करे। इस औषधि का एक प्रस्थ सेवन करने पर आयु में सौ वर्ष की वृद्धि होती है। एक तुला खैरसार को एक द्रोण जल में पकावे और सोलहवाँ हिस्सा क्वाथ शेष रहने पर अग्नि से उतार कर सुरक्षित स्थान में रखे। आँवले का रस तथा मधु और घी मिलाकर इसका सेवन करे। सभी वृक्ष सारों से औषधि निर्माण की यही विधि है। खैरसार का चूर्ण एक तुला अथवा खैरसार के क्वाथ की मात्रा प्रतिदिन प्रातःकाल सेवन करे, या खैरसार के क्वाथ से सिद्ध भेडी के घृत का सेवन करे ॥ १३ ॥

अमृतवल्लीस्वरसं काथं वा प्रातः प्रातरुपसेवेत, तत्सिद्धं वा सर्पिः, अपराह्णे ससर्पिष्कमोदनमामलकयूषेण भुञ्जीत; एवं मासमुपयुज्य सर्वकुष्ठैर्विमुच्यत इति ॥ १४ ॥

कुष्ठ में गुडूची-विधान—प्रतिदिन प्रातःकाल गुडूची का स्वरस या क्वाथ अथवा इनसे सिद्ध घृत का सेवन और अपराह्ण में घृतयुक्त भात, आँवले के यूष के साथ भोजन करे। इस प्रकार एक मास इसका सेवन करके (रोगी) सब प्रकार के कुष्ठों से मुक्त होता है ॥ १४ ॥

कृष्णतिलभल्लातकतैलामलकरससर्पिषां द्रोणं शालसारादिकषायस्य च, त्रिफलात्रिकटुकपरूषकफलमज्जविडङ्गफलसारचित्रार्कावल्गुजहरिद्राद्वयत्रिवृद्दन्तीन्द्रयवयष्टीमधुकातिविषारसाञ्जनप्रियङ्गूणां पालिका भागास्तानेकध्यं स्नेहपाकविधानेन पचेत्, तत् साधुसिद्धमवतार्य परिस्राव्यानुगुप्तं निदध्यात्, तत उपसंस्कृतशरीरः प्रातः प्रातरुत्थाय पाणिशुक्तिमात्रं क्षौद्रेण प्रतिसंसृज्योपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेन सर्पिष्मन्तं खदिरोदकसिद्धं मृद्वोदनमश्नीयात् खदिरोदकसेवी, इत्येवं द्रोणमुपयुज्य सर्वकुष्ठैर्विमुक्तः शुद्धतनुः स्मृतिमान् वर्षशतायुररोगो भवति ॥ १५ ॥

काले तिल का तेल, भिलावे का तेल, आँवले का रस, घी और शालसारादिगण का क्वाथ एक-एक द्रोण, हरड, बहेडा, आँवला, सोंठ, मरिच, पिप्पली, फालसे के फल की मज्जा, विडङ्गफलसार (विडङ्ग), चित्रक, मदार, बाकुची, हल्दी, दारुहल्दी, निशोथ, दन्ती, इन्द्रयव, मुलेठी, अतीस, रसोत और प्रियङ्गु एक-एक पल, इन द्रव्यों को एक साथ स्नेहपाक-विधि के अनुसार पकावे। भली भाँति स्नेह सिद्ध होने पर अग्नि से उतार कर, छान ले और सुरक्षित स्थान में रखे। फिर वमन-विरेचनादि क्रिया के द्वारा शुद्ध शरीर वाला रोगी, प्रतिदिन प्रातःकाल उठकर, एक पल औषधि मधु मिलाकर सेवन करे। औषधि का पाचन होने पर, खैर के क्वाथ में सिद्ध नरम भात का, घृतयुक्त, लवणरहित, मूंग और आँवले के यूष के साथ आहार करे तथा खैर का क्वाथ पीवे। इस प्रकार एक द्रोण औषधि सेवन करके, रोगी सभी कुष्ठों से मुक्त होकर, शुद्ध शरीर वाला, स्मृतिशील, सौ वर्ष की आयु वाला और निरोग होता है ॥ १५ ॥

भवति चात्र—

सुरामन्थासवारिष्टांल्लेहांश्चूर्णान्ययस्कृतीः।
सहस्रशोऽपि कुर्वीत बीजेनानेन बुद्धिमान् ॥१६॥

इति सुश्रुतसंहितायां चिकित्सास्थाने महाकुष्ठचिकित्सितं नाम दशमोऽध्यायः ॥ १० ॥

जैसा कि—बुद्धिमान् वैद्य को इन बीजों (बीज की भाँति योगों) के द्वारा हजारों सुरा, मन्थ, आसव, अरिष्ट, अवलेह, चूर्ण और अयस्कृति का निर्माण करना चाहिए ॥ १६ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकायां भाषाटीकायां दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

अथातः प्रमेहचिकित्सितं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

प्रमेह चिकित्सितोपक्रम—इसके अनन्तर प्रमेह की चिकित्साविधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

द्वौ प्रमेहौ भवतः—सहजोऽपथ्यनिमित्तश्च। तत्र सहजो मातृपितृबीजदोषकृतः, अहिताहारजोऽपथ्यनिमित्तः। तयोः पूर्वेणोपद्रुतः कृशो रूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति; उत्तरेण स्थूलो बह्वाशी स्निग्धः शय्यासनस्वप्नशीलः प्रायेणेति ॥ ३ ॥

प्रमेह के दो प्रकार—प्रमेह दो प्रकार का होता है—(१) सहज (जन्मजात) और (२) अपथ्य निमित्तज (अहितकर आहार विहार से उत्पन्न)। इनमें सहज प्रमेह माता-पिता के बीज-दोष तथा अपथ्यनिमित्तज अहितकर आहार विहार के सेवन करने के कारण उत्पन्न होता है। इन दोनों में से प्रथम अर्थात् सहज प्रमेह से पीडित व्यक्ति कृश (दुर्बल), रूक्ष (रूखी त्वचा वाला) अल्प आहार करने वाला, अधिक जल पीने वाला और भ्रमणशील होता है। दूसरे अहिताहार-विहारजन्य प्रमेह से पीडित व्यक्ति स्थूल (मोटा), अधिक आहार करने वाला, स्निग्ध (चिकनी त्वचा वाला), प्रायः आसन पर बैठे रहने तथा चारपाई पर सोते रहने के अभ्यास से युक्त होता है।

विमर्श—सहज प्रमेह का कारण माता-पिता के बीज दोष को माना गया है, किन्तु कुछ लोगों का कथन है कि स्त्रियों को प्रमेह नहीं होता। इसका परिहार डल्हण निम्न प्रकार से करते है—'अत्र केचिदाहु स्त्रीणां प्रमेहा न भवन्तीति, तथा तन्त्रान्तरे—रज प्रसेकान्नारीणां मासि मासि विशुध्यति। सर्वे शरीर दोषाश्च न प्रमेहन्त्यतः स्त्रिय.' इति। एतत् तु न युक्तम्, सर्वतन्त्राप्रसिद्धेः, प्रत्यक्षविरोधाच्च। कृशं कार्श्यादिलक्षणयुक्त सहजमित्यर्थः। स्थूल स्थौल्यादिधर्मयुक्तमहिताहारविहारजमित्यर्थ.। अत्र अप तर्पयतीति अपतर्पण लघनम्, अपतर्पणानि व्यायामशोधनानि तिक्तकटुकानि च। चरक ने भी स्थूल और कृश भेद से दो प्रकार के प्रमेहरोगियों की कल्पना- चिकित्सा सौकर्य के

लिए की है। 'स्थूल. प्रमेही बलवानिहैक. कृशस्तयैकः परिदुर्बलश्च। सबृहण तत्र कृशस्य कार्यं सशोधनं दोषबलाधिकस्य॥' (च० चि० अ० ६)

तत्र कृशमन्नपानप्रतिसंस्कृताभिः क्रियाभिश्चिकित्सेत, स्थूलमपतर्पणयुक्ताभिः॥ ४॥

प्रमेह की सामान्य चिकित्सा—इनमें कृश (सहज प्रमेह वाले) व्यक्ति की चिकित्सा औषधि-सिद्ध अन्न पान तथा वमन, विरेचनादि क्रियाओं के द्वारा और स्थूल (अहिताहारजन्य) व्यक्ति की चिकित्सा अपतर्पण आदि क्रियाओं (लंघन, व्यायाम, शोधन एवं तिक्त, कटु पदार्थों का सेवन) के द्वारा करनी चाहिये॥ ४॥

सर्व एव च परिहरेयुः सौवीरकतुषोदकशुक्तमैरेयसुरासवतोयपयस्तैलघृतेक्षुविकारदधिपिष्टान्नाम्लयवागूपानकानि ग्राम्यानूपौदकमांसानि चेति॥ ५॥

प्रमेह में वर्ज्य पदार्थ—(प्रमेह से पीडित) सभी व्यक्तियों को सौवीरक, तुषोदक, शुक्त, मैरेय, सुरा, आसव, जल, दूध तेल, घी, इक्षुविकार (गुड आदि), दही, पिसा हुआ अन्न, खट्टे शर्बत, ग्राम्य, आनूप और औदक जीवों के मांस का सेवन त्याग देना चाहिये॥ ५॥

ततः शालिषष्टिकयवगोधूमकोद्रवोद्दालकाननवान् भुञ्जीत चणकाढकीकुलत्थमुद्गविकल्पेन, तिक्तकषायाभ्यां च शाकगणाभ्यां निकुम्भेङ्गुदीसर्षपातसीतैलसिद्धाभ्यां, बद्धमूत्रैर्वा जाङ्गलैर्मांसैरपहृतमेदोभिरनम्लैर्घृतैश्चेति॥ ६॥

प्रमेह में पथ्य—(प्रमेह रोग में) पुराना शालि, साठी, जौ, कोदो और अरण्य-कोदो तथा चना, अरहर, कुलथी और मूंग विकल्प से (बदल २ कर), दन्ती, इङ्गुदी, सरसों एवं तीसी के तेल में सिद्ध तिक्तगण (चकवड, पटोल आदि) और कषायगण (वट शुंगादिक) के शाक के साथ, अथवा हरिण तथा जगली जीवों के घी और खटाई रहित, मेदशून्य मास के साथ खाना चाहिये॥ ६॥

विमर्शः—चरक ने भी प्रमेह रोग के पथ्य में दन्ती, इङ्गुदी, आदि के तेल का विधान बतलाया है—'दन्तीङ्गुदी तैलयुत प्रमेही तथातसीसर्षपतैलयुक्तम्। सषष्टिक स्यात्तृणधान्यमन्न यवप्रधानस्तु भवेत्प्रमेही।' (च. चि. अ. ६)

तत्रादित एव प्रमेहिणं स्निग्धमन्यतमेन तैलेन प्रियङ्ग्वादिसिद्धेन वा घृतेन वामयेत् प्रगाढ विरेचयेच्च, विरेचनादनन्तर सुरसादिकषायेणास्थापयेन्महौषधभद्रदारुमुस्तावापेन मधुसैन्धवयुक्तेन, दह्यमानं च न्यग्रोधादिकषायेण निस्तैलेन॥ ७॥

प्रमेह में शोधनविधि—प्रथम स्निग्ध किए गए प्रमेहरोगी को उपर्युक्त किसी तेल (कुम्भादि तैल) अथवा प्रियङ्गु आदि से सिद्ध घृत के द्वारा तीक्ष्ण वमन कराना चाहिए और विरेचन देना चाहिये। विरेचन के पश्चात् सुरसादिगण के कषाय में सोंठ, देवदारु, नागरमोथा, मधु और सेन्धा नमक मिलाकर आस्थापन वस्ति देनी चाहिए तथा दाहयुक्त (प्रमेह रोगी) को तैलरहित न्यग्रोधादिगण के कषाय से आस्थापन वस्ति देनी चाहिये॥ ७॥

ततः शुद्धदेहमामलकरसेन हरिद्रां मधुसंयुक्तां पाययेत्, त्रिफलाविशालादेवदारुमुस्तकषायं वा शालकम्पिल्लकमुष्ककल्कमक्षमात्रं वा, मधुमधुरमामलकरसेन हरिद्रायुतं, कुटजकपित्थरोहीतकबिभीतकसप्तपर्णपुष्पकल्कं वा, निम्बारग्वधसप्तपर्णमूर्वाकुटजसोमवृक्षपलाशानां वा त्वक्पत्रमूलफलपुष्पकषायाणि, एते पञ्च योगाः सर्वमेहानामपहन्तारो व्याख्याताः॥

सर्वप्रमेह में ५ योग—शुद्ध शरीर वाले व्यक्ति को (१) हल्दी में मधु मिलाकर आँवले के रस से पिलावे, (२) अथवा हरड, बहेडा, आँवला, इन्द्रायण, देवदारु और नागरमोथा का क्वाथ पिलावे, (३) अथवा शाल, कबीला और पाढल का कल्क एक कर्ष, हल्दी मिलाकर तथा मधु के द्वारा मीठा करके, आँवले के रस से पिलावे, (४) अथवा कुटज, कैथ, रोहितक, बहेडा और सप्तपर्ण के फूलों का कल्क (आँवले के रस से) पिलावे। (५) अथवा नीम, अमलतास, सप्तपर्ण, मूर्वा, कुटज, सोमवृक्ष और पलाश की छाल, पत्ता, जड़, फल तथा फूल का क्वाथ (मधु और आँवले के रस के साथ) पिलावे। सभी प्रकार के प्रमेहों का नाश करने वाले इन पाँच प्रयोगों का वर्णन किया गया है॥ ८॥

विशेषश्चात ऊर्ध्वं—तत्रोदकमेहिन पारिजातकषायं पाययेत्, इक्षुमेहिनं वैजयन्तीकषाय, सुरामेहिनं निम्बकषायं, सिकतामेहिनं चित्रककषायं, शनैर्मेहिनं खदिरकषायं, लवणमेहिनं पाठाऽगुरुहरिद्राकषायं, पिष्टमेहिनं हरिद्रादारुहरिद्राकषायं, सान्द्रमेहिनं सप्तपर्णकषायं; शुक्रमेहिनं दूर्वाशैवलप्लवहठकरञ्जकसेरुककषायं ककुभचन्दनकषाय वा, फेनमेहिनं त्रिफलारग्वधमृद्वीकाकषायं, मधुमधुरमिति?

पैत्तिकेषु नीलमेहिनं शालसारादिकषायमश्वत्थकषायं वा पाययेत्, हरिद्रामेहिनं राजवृक्षकषायम्, अम्लमेहिनं न्यग्रोधादिकषायं, क्षारमेहिन त्रिफलाकषायं, मञ्जिष्ठामेहिनं मञ्जिष्ठाचन्दनकषाय, शोणितमेहिनं गुडूचीतिन्दुकास्थिकाश्मर्यखर्जूरकषायं मधुमिश्रम्।

२० प्रमेहों में २० योग—इसके आगे विशेष योगों का वर्णन किया जाता है। (१) उदकमेह के रोगी को फरहद का क्वाथ, (२) इक्षुमेह वाले को वैजयन्ती (अरणी) का क्वाथ, (३) सुरामेह वाले को नीम का क्वाथ, (४) सिकतामेह वाले को चित्रक का क्वाथ, (५) शनैःमेही को खैर का क्वाथ, (६) लवणमेही को पाठा, अगर और हल्दी का क्वाथ, (७) पिष्टमेही को हल्दी और दारुहल्दी का क्वाथ, (८) सान्द्रमेही को सप्तपर्ण का क्वाथ, (९) शुक्रमेही को दूब, सेवार, प्लव (केवटीमोथा), हठ (जलकुम्भी), करञ्ज और कशेरू का क्वाथ अथवा अर्जुन और चन्दन का क्वाथ, (१०) फेनमेही को त्रिफला, अमलतास और मुनक्के का क्वाथ, मधु के द्वारा मीठा करके पिलावे

पिलावे। पित्तजन्य नीलमेह वाले को शालसारादिगण का क्वाथ अथवा पिप्पली की छाल का क्वाथ और हरिद्रामेह वाले को अमलतास का क्वाथ पिलावे। अम्लमेह वाले को न्यग्रोधादिगण का क्वाथ, क्षारमेही को त्रिफला का क्वाथ, मञ्जिष्ठामेही को मजीठ और चन्दन का क्वाथ, शोणितमेही को गिलोय, तिन्दुक (कुचला) की गुठली, गम्भारी तथा खजूर का क्वाथ मधु मिलाकर पिलावे।

अत ऊर्ध्वमाध्येष्वपि योगान् यापनार्थं वक्ष्यामः; तद्यथा—सर्पिर्मेहिनं कुष्ठकुटजपाठाहिङ्गुकटुरोहिणीकल्कं गुडूचीचित्रककषायेण पाययेत्, वसामेहिनमरिष्टमन्यकषायं शिंशपाकषायं वा, क्षौद्रमेहिनं खदिरक्रमुककषायं, हस्तिमेहिनं तिन्दुककपित्थशिरीषपलाशपाठामूर्वादुःस्पर्शाकषायं मधुमधुरं हस्त्यश्वशूकरखरोष्ट्रास्थिक्षारं चेति; दह्यमानमौदककन्दकाथसिद्धां यवागूं क्षीरेक्षुरसमधुरां पाययेत् ॥ ९ ॥

इसके आगे असाध्य प्रमेहों को भी, याप्य बनाने के लिये योगों का कथन किया जाता है। जैसे कि—सर्पिर्मेही को कूट, कुटज, पाठा, हींग और कुटकी का कल्क गिलोय तथा चित्रक के क्वाथ से पिलावे। वसामेही को अरणी अथवा शीशम का क्वाथ, क्षौद्रमेही को कदर (श्वेतखदिर) और सुपारी का क्वाथ, हस्तिमेही को तिन्दुक (तेन्दू), कैथ, शिरीष, पलाश, पाठा, मूर्वा और दुरालभा का क्वाथ मधु मिलाकर, तथा हाथी, घोड़ा, सूअर और ऊँट की अस्थि का क्षारोदक पिलावे। दाह वाले रोगी को उदककन्द (जल में उत्पन्न होने वाले कशेरु, सिंघाड़ा, कमल की जड़आदि) के क्वाथ से सिद्ध यवागू, दूध तथा गन्ने के रस से मीठा बनाकर पिलावे ॥ ९ ॥

विमर्शः—व्याधियाँ दो प्रकार की होती हैं। (१) साध्य और (२) असाध्य। साध्य व्याधि के पुनः दो भेद किये जा सकते हैं (१) सुख साध्य और (२) कृच्छ्रसाध्य तथा असाध्य व्याधि भी असाध्य और याप्य दो रूपों में विभक्त हो सकती है। उपर्युक्त योगों का निर्देश असाध्य प्रमेहों को याप्य बनाये रखने के लिये है।

याप्य व्याधि का लक्षण है—'अपनीयं तु तं विद्यात्क्रिया याप्यते हि यत्। क्रियायां तु निवृत्तायां सद्यो यश्च विनश्यति'। प्रमेह रोग में इक्षुविकार (गुड, शर्करा आदि) का सेवन वर्जित किया गया है किन्तु मधुर होते हुए भी मधु का प्रयोग विहित है। मधु योगवाही औषध है, इसके अतिरिक्त प्रमेह को नष्ट करने की इसमें स्वाभाविक शक्ति है। लेखन, विशोधन, मेदनाशक तथा कषायरस युक्त होने के कारण, मधु का प्रयोग प्रमेह रोग के लिए प्रचुर परिमाण में किया गया है। उपर्युक्त सभी क्वाथों में मधु का प्रक्षेप मिलाना चाहिये। 'मधु मधुरमिति वचनं सर्पिर्मेहादिकषायेष्वपि द्रष्टव्यम्' डल्हण.। प्रमेह रोग में जलीय धातु के नष्ट होने पर, पित्तकी वृद्धि के कारण रोगी दाह का अनुभव करता है। अतः इस रोग में यवागूपान का निषेध होते हुए भी दाह की शान्ति के लिये, जलीय कन्दों के क्वाथ से सिद्ध क्षीर इक्षुरस मिश्रित, यवागूपान का विधान, अपवाद स्वरूप केवल पित्तज प्रमेह में ही किया गया है।

ततः प्रियङ्ग्वनन्तायूथिकापद्मात्रायन्तिकालोहितिकाम्बष्ठाडाडिमत्वक्शालपर्णीपद्मतुङ्गकेशरधातकीवकुलशाल्मलीश्रीवेष्टकमोचरसेध्वरिष्टानयस्कृतीर्लेहानासवांश्च कुर्वीत; शृङ्गाटकगिलोड्यबिसमृणालकाशकसेरुकमधुकाम्रजम्ब्वसनतिनिशककुभकट्वङ्गरोध्रभल्लातकपलाशचर्मिवृक्षगिरिकर्णिकाशीतशिवनिचुलदाडिमाजकर्णहरिवृक्षराजादनगोपघोण्टाविकङ्कतेषु वा; यवान्नविकारांश्च सेवेत; यथोक्तकषायसिद्धां यवागूं चास्मै प्रयच्छेत्, कषायाणि वा पातुम् ॥ १० ॥

प्रमेहों में अरिष्ट, अयस्कृति, लेह, आसव, यवागू एवं कषाय योग—प्रियङ्गु, अनन्तमूल, जूही, भार्गी, त्रायन्तिका (मेंहदी), लोहितिका (मजीठ), पाठा, अनार का छिलका, शालपर्णी, कमल, तुङ्ग (नारियल), नागकेशर, धाय के फूल, मौलसिरी, सेमल, श्रीवेष्टक (सरलनिर्यास विरोजा) और मोचरस के द्वारा अरिष्ट, अयस्कृति (लोहरसायन), अवलेह तथा आसवों का निर्माण करे। अथवा सिंघाड़ा, गिलोड्य (कमलगट्टा), कमल की जड़, कमलनाल, काश, कशेरु, मुलेठी, आम, जामुन, विजयसार, तिनिश, अर्जुन, अरलू, लोध्र, भिलावा, पलाश, चर्मिवृक्ष, अपराजिता, शीतशिव, जलवेत, अनार, अजकर्ण (सर्जक-शालभेद), हरिवृक्ष, खिरनी, गोपघोण्टा (झडबेर) और विकङ्कत (यज्ञवृक्ष-कण्टकी), के द्वारा अरिष्ट, अयस्कृति, अवलेह तथा आसवों का निर्माण करे और जौ के बने हुए अन्न का सेवन करे। कहे गए द्रव्यों (प्रियङ्गु शृङ्गाटक आदि वर्ग) के कषाय से सिद्ध यवागू या इनका क्वाथ रोगी को पिलावे ॥ १० ॥

विमर्श.—तिनिश स्यन्दन.। चर्मिवृक्ष चर्मलोह इति प्रसिद्धो लकुचवृक्षमाकारो महावृक्ष। शीतशिव शतपुष्पाभेद.। हरिवृक्ष इन्द्रवृक्षः, धवाकार इत्येके, कुटज इत्यन्ये पठन्ति, हरि-द्रावृक्ष इत्यपरे पठन्ति। तत्र हरिद्रा प्रसिद्धा, वृक्षः कुटज। यथोक्तेत्यादि अनन्तरोक्तप्रियङ्ग्वादि-शृङ्गाटकादिवर्गैः कृतामिति।

महाधनमहिताहारमौषधद्वेषिणमीश्वरं वा पाठाभयाचित्रकप्रगाढमनल्पमाक्षिकमन्यतममासव पाययेत्, अङ्गारशूल्यवदर्शं वा माध्वीकमभीक्ष्णं, क्षौद्रकपित्थमरिचानुविद्धानि चास्मै पानभोजनान्युपहरेत्, ?

विशिष्ट व्यक्तियों के लिए प्रमेह में विशेष चिकित्सा—विपुल धनशाली, अहिताहार करने वाले, औषधिद्वेषी तथा राजा को, पाठा, हरड़ और चित्रक में से किसी एक के क्वाथ में प्रचुर परिमाण में मधु मिला कर पिलावे, अथवा भट्टी पर निकाले गए माध्वीक को बार बार पिलावे। मधु, कैथ और मरिच मिश्रित पेय तथा आहार रोगी को दे।

विमर्श.—पाठाभयाचित्रकानामनुक्तानां कषाय 'कर्षत्रयमनुक्त मपि देयमिति प्रसादार्थं। अन्ये तु अन्यनमासव पूर्वोक्तं प्रियङ्ग्वादासवम्। अङ्गारशूल्यावदर्शमिति भट्टिनोदर्शम्। माध्वीक मधुनो निमथ चिरसस्थितञ्च।

उष्ट्राश्वतरखरपुरीषचूर्णानि चास्मै दद्यादशनेषु; हिङ्गुसैन्धवयुक्तैर्यूषैः सार्षपैश्च रागैर्भोजयेत्; अविरुद्धानि चास्मै पानभोजनान्युपहरेद्रसगन्धवन्ति च, प्रवृद्धमेहास्तु व्यायामनियुद्धक्रीडागजतुरगरथपदातिचर्यापरिक्रमणान्यस्त्रोपास्त्रे वा सेवेरन् ॥ ११ ॥

रोगी को ऊँट, खच्चर और गधा के लीद का चूर्ण अन्न में मिला कर खाने को दे। हींग और सेन्धा नमक मिश्रित यूष और सरसों युक्त राग के साथ भोजन करावे। जो विरोधी न हों इस प्रकार के रस और गन्ध युक्त पेय, तथा भोजन का प्रयोग रोगी के लिए करे। बढ़े हुए प्रमेह वाले रोगी को व्यायाम, कुश्ती, खेल, हाथी और घोड़े की सवारी, रथचर्या, पदातिचर्या, भ्रमण, अस्त्र एवं उपास्त्र का अभ्यास करना चाहिए ॥ ११ ॥

विमर्शः—राग -सिताशुचक्रसिन्धूत्थं मधूक्षाम्लपरूषकैः। जम्बूफलरसैर्युक्तो रागो राजिकया कृत । व्यायामोऽङ्गाना विविध प्रकार आयाम, तथा चोक्तम्-'तुलाभ्रमगुणाकर्षधनुराकर्षणादिभि.। आयामो विविधोऽङ्गानां व्यायाम इति कीर्त्तित'। नियुद्ध बाहुयुद्धम्। रथचर्या पदातिचर्याश्च जमदग्निराह-'सर्वदिग्भागमार्गेषु हस्त्यश्वरथपत्तिषु। शस्त्रास्त्रैर्यस्तु सयोग स चर्येति प्रकीर्त्यते'। डल्हण ।

अधनस्त्ववान्धवो वा पादत्राणातपत्रविरहितो भैक्ष्याशी ग्रामैकरात्रवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत्, महाधनो वा श्यामाकनीवारवृत्तिरामलककपित्थतिन्दुकाश्मन्तकफलाहारो मृगैः सह वसेत्, तन्मूत्रशकृद्भक्षः सततमनुव्रजेद्गाः, ब्राह्मणो वा शिलोञ्छवृत्तिर्भूत्वा ब्रह्मरथमुद्धरेत्, कूपेत् सततमितरः खनेद्वा कूप, कृश तु सततं रक्षेत् ॥ १२ ॥

साधनरहित व्यक्तियों के लिये प्रमेह में विशेष चिकित्सा—धनहीन या बन्धु बान्धव रहित प्रमेह रोगी, बिना जूता पहने तथा छाता लगाये, भिक्षावृत्ति धारण करते हुए, एक ग्राम में एक दिन ठहर कर, मुनि के समान इन्द्रियों को वश में करके, सौ योजन या इससे अधिक यात्रा करे, अतुल सम्पत्ति शाली, श्यामाक (सावां) और नीवार (तीनी का चावल) खाकर, आँवला, कैथ, तिन्दुक (तेंदू) तथा अश्मन्तक (पाषाणभेद) का फलाहार करते हुए मृगों के साथ रहे एव गौ के गोवर और मूत्र का सेवन करते हुये निरन्तर उसके पीछे भ्रमण करे। यदि रोगी ब्राह्मण हो तो शिलोञ्छवृत्ति धारण करके ब्रह्मरथ का उद्धार करे या वेदाध्ययन करे। शूद्र निरन्तर कूपि करे या कूप खोदे। कृश रोगी की रक्षा सदा करनी चाहिए ॥ १२ ॥

विमर्शः—भूमिपतितस्योत्सृष्टस्य कणश शस्यग्रहणं शिलः, कणशो धान्यग्रहणमित्यर्थः। भूमिष्ठमात्रस्य शस्यस्य ग्रहणमुञ्छः। ब्रह्मरथं ब्राह्मणाधिष्ठित शकटमुद्धरेत्, अथवा ब्रह्म एव रथो ब्रह्मरथस्तमुद्धरेत्, धारयेद् वेदमित्यर्थः। पापरोगप्राय. प्रमेहो वेदाध्ययनान्नाशमुपैति। इतर. शूद्र.। (डल्हण.)

भवति चात्र—

अधनो वैद्यसन्देशादेवं कुर्वन्नतन्द्रितः।
संवत्सरादन्तराद्वा प्रमेहात् प्रतिमुच्यते ॥ १३ ॥
इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने प्रमेहचिकित्सितं नामैकादशोऽध्यायः ॥ ११ ॥

जैसे कि—निर्धन व्यक्ति, वैद्य के आदेशानुसार आलस्य रहित हो, इस प्रकार का आचरण करते हुए एक वर्ष में या उसके अन्दर ही प्रमेह रोग से मुक्त हो जाता है ॥ १३ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकायां भाषाटीकायां एकादशोऽध्यायः ॥

द्वादशोऽध्यायः

अथातः प्रमेहपिडकाचिकित्सितं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

प्रमेहपिडकाचिकित्सोपक्रम-इसके अनन्तर प्रमेह पिडका की चिकित्साविधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥

शराविकाद्या नव पिडकाः प्रागुक्ता; ताः प्राणवतोऽल्पास्त्वङ्मांसप्राप्ता मृद्व्योऽल्परुज. क्षिप्रपाकभेदिन्यश्च साध्याः ॥ ३ ॥

साध्य प्रमेहपिडकाओं के लक्षण—शराविका आदि नव पिडकाओं का वर्णन पहले किया जा चुका है, इनमें बलवान् व्यक्ति की अल्प, त्वचा एव मांस में स्थित, मृदु, अल्प वेदना वाली और शीघ्र पकने तथा फूटने वाली पिडकायें साध्य होती हैं ॥ ३ ॥

ताभिरुपद्रुतं प्रमेहिणमुपचरेत्। तत्र पूर्वरूपेष्वपतर्पणं वनस्पतिकषायं वस्तमूत्र चोपादिशेत्; एवमकुर्वतस्तस्य मधुराहारस्य मूत्रं स्वेदः श्लेष्मा च मधुरीभवति प्रमेहश्चाभिव्यक्तो भवति, तत्रोभयतः संशोधनमासेवेत; एवमकुर्वतस्तस्य दोषाः प्रवृद्धा मांसशोणिते प्रदूष्य शोफं जनयन्त्युपद्रवान् वा कांश्चित्, तत्रोक्तः प्रतीकारः सिरामोक्षश्च, एवमकुर्वतस्तस्य शोफो वृद्धोऽतिमात्रं रुजो विदाहमापद्यते, तत्र शस्त्रप्रणिधानमुक्तं व्रणक्रियोपसेवा च, एवमकुर्वतस्तस्य पूयोऽभ्यन्तरमवदार्योत्सङ्गं महान्तमवकाशं कृत्वा प्रवृद्धो भवत्यसाध्यः; तस्मादादित एव प्रमेहिणमुपक्रमेत् ॥४॥

प्रमेह पिडकाओं में अवस्थानुसार क्रियाविशेष का निर्देश-इनसे (शराविका आदि से) पीडित प्रमेह रोगी की चिकित्सा करनी चाहिये। इन पिडकाओं के पूर्वरूप में अपतर्पण (लघन), वनस्पतियों (वटादि) का काथ और बकरे का मूत्र सेवन कराना चाहिये। इस नियम का पालन न करते हुए मधुर पदार्थों का सेवन करने वाले उस रोगी का मूत्र, स्वेद, और श्लेष्मा मीठा हो जाता है तथा प्रमेह रोग की अभिव्यक्ति होती है। इस दशा में वमन विरेचन दोनों प्रकार के सशोधनों का सेवन कराना चाहिये। इस प्रकार न करने वाले रोगी के बढ़े हुए पदो, मांस तथा रक्त को दूषित कर शोथ या अन्य उपद्रवों को उत्पन्न कर देते हैं। इस दशा में पूर्वोक्त (अपतर्पण से विरेचन

तक एकादश उपक्रम) चिकित्सा विधि का प्रयोग और शिरावेध करना चाहिए। इस चिकित्सा क्रम का उल्लंघन करने वाले रोगी का शोथ वृद्धि को प्राप्त होता है, उसमें अत्यधिक पीड़ा होती है और विदाह (पाक) उत्पन्न हो जाता है। इस दशा में शस्त्रक्रिया एवं व्रण चिकित्सा विधि (व्रण के ६० उपक्रम) का प्रयोग करना चाहिये। इन क्रियाओं को उपयोग में न लाने वाले रोगी का बढा हुआ पूय (शोथ के अन्दर एकत्रित) अन्दर की वस्तुओं (मांस, लसीका आदि) को फाड़कर (गलाकर) बहुत बडा खोखला (Cavity) बना देता है और असाध्य हो जाता है। इसलिए प्रारम्भ से ही (पूर्वरूप की अवस्था से ही) प्रमेह के रोगी की चिकित्सा करनी चाहिये ॥

विमर्शः—उत्सङ्ग इव उत्सङ्ग, व्रणाशये हि चिरकालपूयावस्थानेनावदारितमन्त्रप्रदेशान्तरं निम्नमुत्सङ्गतुल्यत्वात् उत्सङ्ग इत्युच्यते। उत् ऊर्ध्वं पूयस्य सङ्ग उत्सङ्ग इत्यन्ये (डल्हणः) चरक ने भी प्रमेह पिडकाओं की चिकित्सा के लिए शल्यशास्त्र को ही उपयोगी माना है—प्रमेहिणा याः पिडका मयोक्ता रोगाधिकारे पृथगेव सप्त। ताः शल्यहृद्भिः कुशलैश्चिकित्स्याः शस्त्रेण सशोधनरोपणैश्च ॥' (च० चि० अ० ६)

भल्लातकबिल्वाम्लपिप्पलीमूलोदकीर्यावर्षाभूपुनर्नवाचित्रकशटीम्नुहीवरुणकपुष्करदन्तीपथ्या दशपलोन्मिता यवकोलकुलत्थांश्च प्रास्थिकान् सलिलद्रोणे निष्काथ्य चतुर्भागावशिष्टेऽवतार्य वचात्रिवृत्कम्पिल्लकभार्गीनिचुलशुण्ठीगजपिप्पलीविडङ्गरोध्रशिरीषाणा भागैरर्धपलिकैर्घृतप्रस्थं विपाचयेन्मेहव्रयथुकुष्ठगुल्मोदरार्शःप्लीहविद्रधिपिडकानां नाशनं नाम्ना धान्वन्तरम् ॥ ५ ॥

धान्वन्तर घृत—भिलावा, बेल सुगन्धवाला, पिप्पलीमूल, करञ्जिया, रक्तपुनर्नवा, श्वेतपुनर्नवा, चित्रक, कचूर, सेहुण्ड, वरुण, पोहकरमूल, दन्ती और हरड़ प्रत्येक द्रव्य दश पल, जौ, बेर और कुलथी एक एक प्रस्थ, इन द्रव्यों का एक द्रोण जल में चतुर्थांश अवशेष रहने तक क्वाथ किया जावे। क्वाथ को अग्नि से उतार कर इसमें वच, निशोथ, कबीला, भार्गी, जलबेत, सोंठ, गजपिप्पल, विडङ्ग, लोध और शिरीष आधा-आधा पल का कल्क डालकर एक प्रस्थ घृत पकावे। मेह, शोथ, गुल्म, उदर, अर्श, प्लीहा, विद्रधि और पिडकाओं को नष्ट करने वाला यह धान्वन्तर घृत है ॥ ५ ॥

विमर्श—डल्हण के मत से यह योग प्रक्षिप्त है—'अनार्षोऽयं योगः, जेज्जटाचार्येण नोक्तत्वात्, तस्मान्न पठनीयः।'

दुर्विरेच्या हि मधुमेहिनो भवन्ति मेदोऽभिव्याप्तशरीरत्वात्, तस्मात्तीक्ष्णमेतेषां शोधनं कुर्यात्। पिडकापीडिताः सोपद्रवाः सर्व एव प्रमेहा मूत्रादिमाधुर्यं मधुगन्धसामान्यात् पारिभाषिकीं मधुमेहाख्यां लभन्ते ॥ ६ ॥

प्रमेहरोग में तीक्ष्णशोधन का उपदेश—शरीर में मेद की अधिकता के कारण मधुमेह से पीडित रोगी दुर्विरेच्य होते हैं अर्थात् उन्हें विरेचन बडी कठिनाई से होता है। इसलिए उन्हें तीक्ष्ण विरेचन देना चाहिए। पिडका जुष्ट और उपद्रव युक्त सभी प्रमेह, मूत्र आदि की मधुरता में मधु के तुल्य गन्ध धारण करने के कारण पारिभाषिक रूप से मधुमेह संज्ञा प्राप्त करते हैं ॥ ६ ॥

न चैतान् कथंचिदपि स्वेदयेत्, मेदोबहुत्वादेतेषां विशीर्यते देहः स्वेदेन ॥ ७ ॥

इनमें किसी प्रकार का स्वेदन नहीं देना चाहिए क्योंकि मेद की अधिकता के कारण स्वेदन से उनका शरीर गलता है ॥७॥

रसायनीनां च दौर्बल्यान्नोर्ध्वमुत्तिष्ठन्ति प्रमेहिणां दोषाः, ततो मधुमेहिनामधःकाये पिडकाः प्रादुर्भवन्ति ॥

शरीर के निम्न भाग में ही पिडका होने में कारण—रसायनियों (रस, पित्त, कफ और रक्त को बहाने वाली धमनियों) की दुर्बलता के कारण प्रमेह रोगियों के दोष ऊपर की ओर (ऊर्ध्वभाग में) नहीं उठते, इसलिए मधुमेह के रोगियों में शरीर के निम्नभाग में ही पिडकाओं की उत्पत्ति होती है ॥ ८ ॥

विमर्शः—रसायनीनामित्यत्रादिशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः, तेन रसपित्तकफशोणितवहाना धमनीनामित्यर्थः। दौर्बल्यादिति। सर्वशरीरगतस्य सर्वद्रववातोरपानव्यानाम्नामधोऽनुलोम्यमानत्वाद् रसादिवहानामपि धमनीनामध एव बलवत्त्व नतूर्ध्वमित्यर्थः, रसहारणीनामिति केचित् पठन्ति। (डल्हणः)

अपक्वानां तु पिडकानां शोफवत् प्रतीकारः, पक्वानां व्रणवदिति; तैलं तु व्रणरोपणमेवादौ कुर्वीत, आरग्वधादिकषायमुत्सादनार्थे, शालसारादिकषायं परिषेचने, पिप्पल्यादिकषायं पानभोजनेषु, पाठाचित्रकशार्ङ्गेष्टाक्षुद्रावृहतीसारिवासोमवल्कसप्तपर्णारग्वधकुटजमूलचूर्णानि मधुमिश्राणि प्राश्नीयात् ॥ ९ ॥

अपक्व तथा पक्व पिडकाओं की विशेष चिकित्सा—अपक्व पिडकाओं की चिकित्सा, शोथ की भाँति और पक्व की व्रण की भाँति करनी चाहिए। व्रणरोपण द्रव्यों से सिद्ध तैल का प्रयोग प्रारम्भ में ही करना चाहिए। आरग्वधादिगण का क्वाथ उत्सादन (निर्व्रण को ऊँचा करना) के लिए, शालसारादि गण का क्वाथ परिषेक के लिए, पिप्पल्यादिगण का क्वाथ पीने तथा भोजन में प्रयोग में लाना चाहिए और पाठा, चित्रक, काकजंघा, छोटी कटेरी, बड़ी कटेरी, अनन्तमूल, सोमवल्क (कायफल), सप्तपर्ण, अमलतास तथा कुटज की जड का चूर्ण मधु मिलाकर चाटना चाहिए ॥ ९ ॥

शालसारादिवर्गकषायं चतुर्भागावशिष्टमवतार्य परिस्राव्य पुनरुपनीय साधयेत्, सिध्यति चामलकरोध्रप्रियङ्गुदन्तीकृष्णायस्ताम्रचूर्णान्यावपेत्, एतदनुपदग्धं लेहीभूतमवतार्यानुगुप्तं निदध्यात्, ततो यथायोगमुपयुञ्जीत, एष लेहः सर्वमेहानां हन्ता ॥ १० ॥

प्रमेह में शालसारादि लेह—शालसारादिगण के द्रव्यों का चतुर्थांश अवशिष्ट क्वाथ अग्नि से उतार, छानकर, पुनः अग्नि पर पकावे, इस क्वाथ में पाक के समय आँवला, लोध, प्रियङ्गु, दन्ती, काले लोह का चूर्ण (भस्म) और ताम्रचूर्ण मिलावे, इसे जलने से बचाते हुए लेह (चाटने योग्य) के समान

होने पर अग्नि से उतार कर सुरक्षित स्थान में रखे। फिर विधान के अनुसार इसका सेवन करे। यह अवलेह सभी मेहों का नाशक है ॥ १० ॥

त्रिफलाचित्रकत्रिकटुकविडङ्गमुस्तानां नव भागास्तावन्त एव कृष्णायश्चूर्णस्य; तत्सर्वमैकध्यं कृत्वा यथायोगं मात्रा सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत, एतन्नवायसम्; एतेन जाठर्यं न भवति, सन्नोऽग्निराप्यायते, दुर्नामशोफपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति ॥ ११ ॥

प्रमेह में नवायस लौह—हरड, बहेडा, आँवला, चित्रक, सोंठ, मरिच, पिप्पल, विडङ्ग और नागरमोथा इन द्रव्यों का मिलित नव भाग और इनके समान कृष्णलोह चूर्ण (भस्म) को एक साथ मिलाकर, इसकी उपयुक्त मात्रा मधु तथा घृत के साथ सेवन करे। यह नवायस है। इसके सेवन से स्थूलता (जाठर्य्य स्थौल्यम्) नहीं होती, मन्द अग्नि भी प्रदीप्त होती है तथा दुःख देने वाले शोथ, पाण्डु, कुष्ठरोग, अन्न का परिपाक न होना, कास, श्वास और प्रमेह आदि नहीं होते ॥ ११ ॥

शालसारादिनिर्यूहे चतुर्थांशावशेषिते।
परिस्रुते ततः शीते मधु माक्षिकमावपेत् ॥ १२ ॥
फाणितीभावमापन्न गुडं शोधितमेव च।
श्लक्ष्णपिष्टानि चूर्णानि पिप्पल्यादिगणस्य च ॥ १३ ॥
ऐकध्यमावपेत् कुम्भे संस्कृते घृतभाविते।
पिप्पलीचूर्णमधुभिः प्रलिप्तेऽन्तःशुचौ दृढे ॥ १४ ॥
श्लक्ष्णानि तीक्ष्णलोहस्य तत्र पत्राणि बुद्धिमान्।
खदिराङ्गारतप्तानि बहुशः सन्निपातयेत् ॥ १५ ॥
सुपिधानं तु तं कृत्वा यवपल्ले निधापयेत्।
मासांस्त्रींश्चतुरो वाऽपि यावद्दालोहसक्षयात् ॥ १६ ॥
ततो जातरसं तं तु प्रातः प्रातर्यथाबलम्।
निषेवेत यथायोगमाहारं चास्य कल्पयेत् ॥ १७ ॥
कार्श्यकृद्बलिनामेष सन्नस्याग्नेः प्रसाधकः।
शोफघ्नः गुल्महृत् कुष्ठमेहपाण्ड्वामयापहः ॥ १८ ॥
प्लीहोदरहरः शीघ्रं विषमज्वरनाशनः।
अभिष्यन्दापहरणो लोहारिष्टो महागुणः ॥ १९ ॥

प्रमेह में लोहारिष्ट—शालसारादिगण के द्रव्यों का चतुर्थांश क्वाथ अवशिष्ट रहने पर अग्नि से उतार कर छान ले और शीतल होने पर इसमें मधु तथा उसी क्वाथ में गलाकर बनाया गया गुड का शुद्ध राब एवं पिप्पल्यादिगण के द्रव्यों का महीन पिसा हुआ चूर्ण मिलाकर धूप आदि से संस्कृत घृत से भावित इस पिप्पलचूर्ण और मधु एवं पुते हुए, पवित्र, दृढ घडे में रखे। बुद्धिमान् वैद्य तीक्ष्ण लोह के अनेक चिकने पत्रों को खैर के अंगार पर तपाकर इसमें डाले। फिर भलीभाँति घडे का मुख बन्द कर उसे तीन चार मास या जब तक लोह गल न जाय, जौ की राशि में रखे। इसके सिद्ध होने पर, प्रतिदिन प्रात काल अग्नि-बल और विधान के अनुसार अनुकूल आहार करते हुए इसका सेवन करे। यह बलवान (मोटे) व्यक्ति को कृश तथा मन्द अग्नि को दीप्त करता है, शोथनाशक है, गुल्म, कुष्ठ, मेह और पाण्डुरोग को मिटाता है, प्लीहोदर तथा विषमज्वर को शीघ्र नाश करता है एवं अभिष्यन्द (मूत्राभिष्यन्द) को दूर करता है। यह लोहारिष्ट महागुणशाली है ॥ १२-१९ ॥

प्रमेहिणो यदा मूत्रमपिच्छिलमनाविलम्।
विशदं तिक्तकटुकं तदाऽऽरोग्यं प्रचक्षते ॥ २० ॥

इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने प्रमेहपिडकाचिकित्सितं नाम द्वादशोऽध्यायः ॥ १२ ॥

प्रमेह निवृत्ति के लक्षण—जिस समय प्रमेहग्रस्त रोगी का मूत्र पिच्छिलतारहित, स्वच्छ, रूक्ष, तिक्त और कटु हो जाय उसे निरोग समझना चाहिए ॥ २० ॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषाटीकायां द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

अथातो मधुमेहचिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मधुमेह चिकित्सा का उपक्रम—इसके अनन्तर मधुमेह की चिकित्सा विधि का वर्णन किया जारहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

मधुमेहित्वमापन्नं भिषग्भिः परिवर्जितम्।
योगेनानेन मतिमान् प्रमेहिणमुपाचरेत् ॥ ३ ॥

चिकित्सकों से परित्यक्त, मधुमेह प्रमेह के रोगी की चिकित्सा को प्राप्त बुद्धिमान वैद्य को इस योग के द्वारा करनी चाहिए ॥ ३ ॥

मासे शुक्रे शुचौ चैव शैलाः सूर्यांशुतापिताः।
जतुप्रकाशं स्वरसं शिलाभ्यः प्रस्रवन्ति हि ॥ ४ ॥

शिलाजीत की उत्पत्ति—शुक्र (ज्येष्ठ) और शुचि (आषाढ) मास में सूर्य की किरणों द्वारा तपे हुए पर्वत, शिलाखण्डों से, लाख के तुल्य स्वरस, टपकाते हैं ॥ ४ ॥

शिलाजत्विति विख्यातं सर्वव्याधिविनाशनम्।
त्रप्वादीनां तु लोहानां षण्णामन्यतमान्वयम् ॥ ५ ॥

इसे शिलाजतु कहते हैं, यह सभी व्याधियों को नष्ट करता है। इसका सबन्ध रागा आदि ६ धातुओं (१ रांगा, २ सीसा, ३ ताम्र, ४ रौप्य, ५ सुवर्ण और ६ कृष्णलौह) में किसी एक धातु से रहता है ॥ ५ ॥

ज्ञेयं स्वगन्धतश्चापि षड्योनिप्रथितं क्षितौ।
लोहाद्भवति तद्यस्माच्छिलाजतु जतुप्रभम् ॥ ६ ॥

शिलाजीत के भेद तथा धातुविशेष के अनुसार रस वीर्य में विशेषता—भूतल पर इसके उत्पादक ६ स्थान प्रसिद्ध हैं, जिनका ज्ञान धातुओं के अपने अपने गन्ध से होता है। लोह धातु से लाख के तुल्य उत्पन्न होने के कारण इसे शिलाजतु कहते हैं।

तस्य लोहस्य तद्वीर्यं रसं चापि बिभर्ति तत्।
त्रपुसीसायसादीनि प्रधानान्युत्तरोत्तरम् ॥ ७ ॥
यथा तथा प्रयोगेऽपि श्रेष्ठे श्रेष्ठगुणाः स्मृताः।

शिलाजतु की उत्तरोत्तर श्रेष्ठता—लोह अर्थात् धातुओं में सम्बन्धित होने के कारण शिलाजतु इन धातुओं के वीर्य रस (वर्णन का प्रभाव) को भी धारण करता है। जिस प्रकार रांगा, सीसा और लोह आदि धातु उत्तरोत्तर श्रेष्ठ होते हैं उसी प्रकार इनसे उत्पन्न शिलाजतु भी गुण में उत्तरोत्तर श्रेष्ठ होता है ॥ ७ ॥

तत्सर्वं तिक्तकटुकं कषायानुरसं सरम् ॥ ८ ॥
कटुपाक्युष्णवीर्यं च शोषणं छेदनं तथा।

शिलाजीत के सामान्य गुण—सभी प्रकार के शिलाजतु तिक्त, कटु, कषाय सर (रेचक) विपाक में कटु, उष्ण, वीर्य, शोषक तथा छेदन करने वाले होते हैं ॥ ८ ॥

तेषु यत् कृष्णमलघु स्निग्धं निःशर्करं च यत् ॥ ९ ॥
गोमूत्रगन्धि यच्चापि तत् प्रधानं प्रचक्षते।

प्रधान शिलाजीत के लक्षण—इनमें जो शिलाजतु काला, भारी, स्निग्ध, शर्करा (रेत) रहित और गोमूत्र की गन्ध वाला होता है वह श्रेष्ठ समझा जाता है ॥ ९ ॥

तद्भावितं सारगणैर्हृतदोषो दिनोदये ॥ १० ॥
पिबेत् सारोदकेनैव श्लक्ष्णपिष्टं यथाबलम्।
जाङ्गलेन रसेनान्नं तस्मिञ्जीर्णे तु भोजयेत् ॥ ११ ॥

शिलाजीत के प्रयोग का विधान—वमन विरेचन के द्वारा शुद्ध शरीर वाला रोगी, शालसारादिगण के क्वाथ की भावना देकर महीन पिसे हुए शिलाजतु को, शालसारादि गण के क्वाथ के साथ ही अग्नि-बल के अनुसार प्रातःकाल सेवन करे और औषधि पाचन होने पर जांगलजीवों के मांस रस के साथ अन्न का आहार करे ॥ १०-११ ॥

विमर्शः—छेदन द्रव्य का लक्षण—श्लिष्टान् कफादिकान् दोषानु-मूलयति यद्बलात्। छेदनं तदथाक्षारा मरिचानि शिलाजतु ॥ शिलाजतु एक रसायन औषधि है। चरक ने चार धातुओं को ही शिलाजतु का स्थान माना है'—नात्युष्णशीत धातुभ्यश्च तुभ्यस्तस्य सम्भव:। हेम्नश्च रजतात्ताम्राद्वर कृष्णायसादपि। रसायन तद्विधिभिस्तद् वृष्य तच्च रोगनुत्। शिलाजतु का गुण वर्णन करते हुए चरक लिखते हैं—'न सोऽस्ति रोगो भुवि साध्यरूपः शिलाह्वय यन्न जयेत्प्रसह्य। तत्कालयोगैर्विधिभिः प्रयुक्त स्वस्थस्य चोर्जां विपुला ददाति ॥' (च० चि० अ० १) शिलाजतु देखने में तारकोल के समान काला और गाढ़ा द्रव होता है जो सूखने पर चमकीला तथा भंगुर हो जाता है। यह जल में घुलनशील है किन्तु एलकोहोल, क्लोरोफार्म या ईथर आदि में नहीं घुलता। आधुनिक विश्लेषण के अनुसार निम्नलिखित वस्तुएँ शुद्ध शिलाजतु में पायी जाती हैं। जल ९५%, ऐन्द्रिय द्रव्य ३६.२०% पार्थिव द्रव्य ३४.९५% (Nitrogenous maltero) १.३% चूना ७.८०% और अभ्रक १.३५% सम्भवतः भौतिक तत्त्वों के इस अनुपात के कारण ही शिलाजतु में गुणों का संचय हुआ है जिसकी प्रशंसा आयुर्वेद के सभी ग्रन्थों ने मुक्तकण्ठ से की है। शिलाजतु वृक्क तथा वस्ति रोगों को दूर करने वाला उत्तम द्रव्य है। इसके प्रयोग से वृक्क की रक्तवाहिनियाँ फैल जाती है जिससे उनमें रक्त अधिक पहुँचता है और सम्भवतः मूत्र की मात्रा बढ़ जाती है। इसका प्रयोग मूत्र के द्रवभाग को ही बढाता है। यदि मूत्र में (Phosphates या Albumin) आता हो तो इसके प्रयोग से वह घट जाता है। शिलाजतु रक्तद्वारा यकृत् में पहुँच कर सम्भवतः उसे उत्तेजित करता है क्योंकि इसके सेवन से पित्त अधिक निकलता देखा गया है। पित्ताशय शोथ या अश्मरी में इसके प्रयोग से लाभ पहुँचता है। यदि पित्तसञ्चय या अवरोध के कारण पाण्डु, कामला हो गया हो तो इसका सेवन लाभ पहुँचाता है। यकृत् की शर्करा निर्माण प्रक्रिया पर भी इसका प्रभाव देखा गया है क्योंकि इसके प्रयोग से मूत्र तथा रक्त में (Sugar) की मात्रा कम हो जाती है। शिलाजतु रक्तभार (Blood Pressure) को ही कम करता है शिलाजतु के प्रयोग से त्वचा की रक्तवाहिनियों के फैलने पर स्वेद की मात्रा बढ़ जाती है जिससे त्वचा का शोथहर जाता है। इसके सेवन से बढ़ा हुआ मेद घटता है। इस क्रिया में (Metabolism) की उत्तेजना सम्भवतः सहायक होती है। शिलाजतु शरीर में बल, वीर्य उत्पन्न कर जरा को दूर करता है अतः इसे रसायन कहते हैं। 'शिवागुटिका' शिलाजतु से निर्मित आयुर्वेद जगत् की प्रसिद्ध औषधि है जिसके प्रयोग से मधुमेह (Blood Pressure) आदि रोगों में महान् लाभ होता है। केवल शुद्ध शिलाजतु का सेवन भी मूत्र में आने वाले (Sugar) की मात्रा को कम करने के लिए उपयोगी है। मधुमेह को नष्ट करने के लिए शालसारादिगण के क्वाथ के साथ इसका सेवन विधान आगे बतलाया गया है।

उपयुज्य तुलामेव गिरिजादमृतोपमात्।
वपुर्वर्णबलापेतो मधुमेहविवर्जितः ॥ १२ ॥
जीवेद्वर्षशतं पूर्णमजरोऽमरसन्निभः।
शत शत तुलायां तु सहस्रं दशतौलिके ॥ १३ ॥
भल्लातकविधानेन परिहारविधिः स्मृतः।
मेह कुष्ठमपस्मारमुन्माद श्लीपद गरम् ॥ १४ ॥
शोष शोफार्शसी गुल्म पाण्डुतां विषमज्वरम्।
अपोहत्यचिरात्कालाच्छिलाजतु निषेवितम् ॥१५॥
न सोऽस्ति रोगो य चापि निहन्यान्न शिलाजतु।
शर्करा चिरसंभूतां भिनत्ति च तथाऽश्मरीम् ॥१६॥
भावनालोडने चास्य कर्तव्ये भेषजैर्हितैः।

इस प्रकार अमृत तुल्य गुण वाले शिलाजतु की एक तुला (सौ पल) सेवन करने पर रोगी मधुमेह से मुक्त हो कर, कान्तिमान और बलवान बनता है तथा अजर, अमर (देवताओं की तरह) की भाँति सौ वर्ष की पूर्ण आयु तक जीवित रहता है। एक एक तुला शिलाजतु का सेवन करने पर आयु के सौ सौ वर्ष की वृद्धि तथा दश तुला सेवन करने पर एक सहस्र वर्ष की आयु प्राप्त होती है। भल्लातक के विधान में कही गई परिहार विधि का पालन, शिलाजतु सेवन काल में करना चाहिए। शिलाजतु के सेवन से अल्प काल में ही मेह, कुष्ठ, अपस्मार, उन्माद, श्लीपद, गर (विष) दोष, शोफ, शोथ, अर्श, गुल्म, पाण्डु और विषमज्वर नष्ट हो जाते हैं। ऐसी व्याधि कोई नहीं है जिसे शिलाजतु नष्ट न करता हो। यह दीर्घ काल से उत्पन्न शर्करा तथा अश्मरी का भेदन करता है। इसमें हितकर औषधियों की भावना देनी चाहिए तथा उनके साथ ही इसे घोलना चाहिए ॥ १२-१६ ॥

एवं च माक्षिक धातु तापीजममृतोपमम् ॥ १७ ॥

मधुरं काञ्चनाभासमम्लं वा रजतप्रभम् ।
पिबन् हन्ति जराकुष्ठमेहपाण्ड्वामयक्षयान् ॥ १८ ॥

मधुमेह से स्वर्णमाक्षिक का विधान—इसी प्रकार तापी नदी से उत्पन्न अमृततुल्य, मधुर, स्वर्ण के सदृश मालूम पड़ने वाले अथवा रजत की कान्ति वाले अम्ल माक्षिक-धातु (स्वर्णमाक्षिक, रौप्यमाक्षिक) पीने से बुढ़ापा, कुष्ठ, मेह, पाण्डु और क्षय आदि रोग नष्ट होते हैं ॥ १२-१८ ॥

विमर्शः—स्वर्ण माक्षिक तथा रौप्य माक्षिक भेद से माक्षिक दो प्रकार का होता है। इसकी उत्पत्ति तापी नदी के किनारे मानी गई है, किन्तु आजकल माक्षिक बिहार, नेपाल, पञ्जाब और बुन्देल खण्ड की रियासतों में पर्याप्त पाया जाता है, विदेशों से भी इसका आयात अधिक मात्रा में होता है। स्वर्ण माक्षिक लोह का उपधातु है। कुछ ग्रन्थ स्वर्ण के अभाव में इसका प्रयोग बतलाते हैं। सम्भवतः वे स्वर्णमाक्षिक में सोने का कुछ अंश मानते हैं। परन्तु आधुनिक विश्लेषण के अनुसार इसमें लोह, गन्धक तथा अल्पांश ताम्र का भाग पाया जाता है। अतः इसे लोह का Compound माना गया है और इसे Iron sulphide कहा जाता है। माक्षिक रसायन औषधि है। रसरत्नसमुच्चय कारने इसका गुणानुवाद इन शब्दों में किया है—'माक्षिकधातु सकलामयघ्न' प्राणो रसेन्द्रस्य पर हि वृष्य । दुर्मल्लोहहृदयमेलनश्च गुणोत्तरः सर्वरसायनाग्रयः। लोह धातु का Comnound होने के कारण इसका प्रयोग पोषण के लिए लोह तथा स्वर्ण के स्थान पर पाया जाता है। प्रमेह, क्षय, जीर्णज्वर और मन्दाग्निजन्य पाण्डु रोगों में यह अग्नि को दीप्त करता हुआ रक्त के लाल कणों को शीघ्र पोषित करता है। लोह Comdound रक्त-वाहिनियों को सकुचित करते हैं, यदि कहीं से रक्तस्राव होता हो तो इनके प्रयोग से वह बन्द हो जाता है। सम्भवतः इसी दृष्टिकोण से रक्तपित्त में लोह तथा लोह Compound का प्रयोग प्रचलित है। शरीर में रक्तवृद्धि करने तथा बल्य होने के कारण क्षय, कास, शोथ आदि रोगों में विशेषतः माक्षिक का प्रयोग किया जाता है।

तद्भावितः कपोतांश्च कुलत्थाश्च विवर्जयेत् ।
पञ्चकर्मगुणातीतं श्रद्धावन्तं जिजीविषुम् ॥ १९ ॥

शिलाजतु तथा माक्षिक धातु का सेवन करने वाले रोगी को कबूतर और कुलथी का सेवन त्याग देना चाहिए। पञ्चम धातु अस्थि गत कुष्ठ में संशोधन, संशमन आदि क्रियाओं से लाभ न होने पर, श्रद्धावान् और जीने की इच्छा रखने वाले (कुष्ठ रोगी की चिकित्सा अधोलिखित योग के द्वारा होनी चाहिए) ॥ १९ ॥

विमर्श—पञ्चकर्मगुणातीतमित्यत्र वमनादीना पञ्चकर्म गुणानामप्राप्तफलमित्येके, तत् तु न सम्यक्, यत पञ्चशब्देन पञ्चमधात्वस्थिगत कुष्ठमुक्तम्, तत्र कर्माणि संशोधनशमनान्यङ्गगुग्गुलु शिलाजतुप्रभृतीनि, तेषा गुणा फलानि, तान्यतानम्। अन्ये तु पूर्वरूपक्रियया सह रसादि-धातूना चतुर्णा क्रियासमूहः पञ्चकर्माणीति मन्यन्ते। (डल्हण)

योगेनानेन मतिमान् साधयेदपि कुष्ठिनम् ।
वृक्षारतुवरका ये स्युः पश्चिमार्णवभूमिषु ॥ २० ॥
पीतीतरज्ञविक्षेपमारुतोद्धूतपल्लवाः ।
तेषां फलानि गृह्णीयात सुपक्वान्यम्बुदागमे ॥ २१ ॥
मज्जां तेभ्योऽपि संहृत्य शोषयित्वा विचूर्ण्य च ।
तिलवत् पीडयेद् द्रोण्यां स्रावयेद्वा कुसुम्भवत् ॥२२॥
तत्तैलं संहृतं भूयः पचेदातोयसंक्षयात् ।
अवतार्य करीषे च पक्षमात्रं निधापयेत् ॥ २३ ॥

मधुमेह में तुवरक का विधान—इस योग के द्वारा कुष्ठ रोगी की भी चिकित्सा बुद्धिमान् वैद्य को करनी चाहिए। पश्चिम समुद्र के तट पर स्थित, लहरों के थपेडों से उठी हुई वायु के द्वारा कम्पित पत्तों वाले तुवरक वृक्ष के पके हुए फलों को, वर्षा-ऋतु के आगमन पर एकत्रित करे और इन फलों की मींगी निकाल, सुखा कर चूर्ण बनावे तथा तिल के समान द्रोणी (कोल्हू) में पेर कर या कुसुम्भ बीज की भाँति दबा कर तेल निकाले। इस तैल को फिर अग्नि पर पका कर तेल के जलीयांश को जलावे और अग्नि से उतार कर पन्द्रह दिन उपलों की ढेर में रखे ॥ २०-२३ ॥

स्निग्धः स्विन्नो हृतमलः पक्षादूर्ध्वं प्रयत्नवान् ।
चतुर्थभक्तान्तरितः शुक्लादौ दिवसे शुभे ॥ २४ ॥
मन्त्रपूतस्य तैलस्य पिबेन्मात्रां यथाबलम् ।
तत्र मन्त्र प्रवक्ष्यामि येनेदमभिमन्त्र्यते ॥ २५ ॥

बलवान् रोगी स्नेहन तथा स्वेदन से दोषों को दूर कर, पन्द्रह दिन के पश्चात्, शुक्ल पक्ष के शुभ दिन में, चतुर्थ भक्तान्तरित हो कर (तीसरे दिन प्रातः काल) संसर्जन क्रम से पेया, विलेपी आदि के सेवन द्वारा बल प्राप्त करके मन्त्र से पवित्र किए गए तैल की मात्रा (एक कर्ष प्रमाण), पान करे। जिस मन्त्र के द्वारा यह अभिमन्त्रित किया जाता है उसे कहता हूँ ॥ २४-२५ ॥

विमर्शः—चतुर्थभक्तान्तरित इति पक्षादूर्ध्वं प्रथमेऽह्नि साय प्रातः प्रकृतिभोजनद्वयम्। द्वितीयेऽह्नि प्रातर्मुक्त्वा साय भोजन न कार्यम्, फलाम्लमुष्णोदक वा पाययेत् साय भोजनस्थाने, ततस्तृतीयेऽह्नि लघुकोष्ठाय प्रात स्नेह दद्यात्, एव चतुर्थभक्तान्तरित भवतीत्यर्थ। (डल्हण.) तुवरक का परिचय—'पत्रैस्तु केशराकारैः कलायसदृशैः फलैः। वृक्षस्तुवरको नाम पश्चिमार्णवतीरज. ॥ गलित कुष्ठ (Leprocy) में तुवरक तैल का प्रयोग आज कल किया जाता है ॥ २४-२५ ॥

'मज्जसार महावीर्यं सर्वान् धातून् विशोधय ।
शङ्खचक्रगदापाणिस्त्वामाज्ञापयतेऽच्युत ॥ २६ ॥

हे महाप्रभावशाली मज्जसार! सभी धातुओं को शुद्ध करो, शंख, चक्र और गदा को हाथ में धारण करने वाले कृष्ण तुम्हें आज्ञा देते हैं ॥ २६ ॥

तेनास्योर्ध्वमधश्चापि दोषा यान्त्यसकृत्ततः ।
अस्नेहलवणां सायं यवागूं शीतलां पिबेत् ॥ २७ ॥
पञ्चाहं प्रपिबेत्तैलमनेन विधिना नरः ।
पथ्यं परिहरेच्चापि मुद्गयूपौदनाशनः ॥ २८ ॥

इस तेल के प्रयोग से, वमन तथा विरेचन के द्वारा रोगी के दोष एक साथ बाहर निकलते हैं। फिर रोगी को अल्पस्नेह एवं लवणयुक्त शीतल यवागू सायंकाल में पिलावे। इस विधि के द्वारा रोगी पाँच दिन तैल पान करे और एक पक्ष तक

क्रोध आदि का त्याग कर मृग के यूष के साथ चावल (भात) का भोजन करे ॥ २७-२८ ॥

पञ्चभिर्दिवसैरेव सर्वकुष्ठैर्विमुच्यते ।
तदेव खदिरक्काथे त्रिगुणे साधु साधितम् ॥ २९ ॥
निहितं पूर्ववत् पश्चात् पिबेन्मासमतन्द्रितः ।
तेनाभ्यक्तशरीरश्च कुर्वीताहारमीरितम् ॥ ३० ॥
भिन्नस्वरं रक्तनेत्रं विशीर्णं कृमिभक्षितम् ।
अनेनाशु प्रयोगेण साधयेन् कुष्ठिनं नरम् ॥ ३१ ॥
सर्पिर्मधुयुतं पीतं तदेव खदिराम्बुना ।
पक्षिमांसरसाहारं करोति द्विशतायुषम् ॥ ३२ ॥
तदेव नस्ये पञ्चाशद्दिवसानुपयोजितम् ।
वपुष्मन्तं श्रुतिधरं करोति त्रिशतायुषम् ॥ ३३ ॥
शोधयन्ति नरं पीता मज्जानस्तस्य मात्रया ।
महावीर्यस्तुवरकः कुष्ठमेहापहः परः ॥ ३४ ॥

इस प्रकार पाँच दिन में ही रोगी सब प्रकार के कुष्ठों से मुक्त हो जाता है। इसी तेल को खैर के तिगुने क्वाथ में भली भाँति सिद्ध करके, पूर्ववत् उपलों की राशि में पका कर (पन्द्रह दिन के पश्चात्) एक मास तक आलस्य-रहित हो सेवन करे यह सब प्रकार के कुष्ठों को नष्ट करता है। इस तेल की मालिश करके पूर्वोक्त आहार (मृग का यूष और भात) करे। जिस कुष्ठ रोगी को स्वरभेद हो, नेत्र रक्तवर्ण हों, मांस गल गया हो तथा कीड़े पड़ गए हों, उसे इनके प्रयोग के द्वारा शीघ्र स्वस्थ करे। इस तेल को घृत तथा मधु मिला कर खैर के क्वाथ के साथ पीने और पक्षियों के मांसरस का आहार करने से दो सौ वर्ष की आयु होती है। इस तेल का पचास दिन तक नस्य लेने से यह मनुष्य को उत्तम शरीर वाला, सुनी हुई बात को स्मरण रखने वाला तथा तीन सौ वर्ष की आयु वाला बनाता है। मात्रापूर्वक तुवरक की मज्जा (तेल) का पान करने से यह मनुष्य का शोधन करता है। महा प्रभावशाली तुवरक कुष्ठ एवं प्रमेह को नष्ट करने में उत्कृष्टतम है ॥ २९-३४ ॥

सान्तर्धूमस्तस्य मज्जा तु दग्धः
क्षिप्रस्तैले सैन्धवं चाञ्जनं च ।
पैल्लयं हन्यादर्मनक्तान्ध्यकाचान्
नीलीरोगं तैमिरं चाञ्जनेन ॥ ३५ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने मधुमेह-चिकित्सितं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

तुवरक की मज्जा, सेन्धा नमक और अञ्जन (स्रोतोञ्जन) को अन्तर्धूम विधि से जला कर, तुवरक तैल में मिलावे। इस अञ्जन के प्रयोग से अर्म (पाठान्तर पिल्लरोग) रात्र्यन्ध, काच, नीली रोग और तिमिर नष्ट होते हैं ॥ ३५ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकायां भाषाटीकायां त्रयोदशोऽध्यायः ॥

चतुर्दशोऽध्यायः

अथातः उदराणां चिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

उदर चिकित्सोपक्रम—इसके अनन्तर उदर रोगों की चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

अष्टावुदराणि पूर्वमुद्दिष्टानि । तेष्वसाध्यं बद्धगुदं परिस्रावि च; अवशिष्टानि कृच्छ्रसाध्यानि; सर्वाण्येव प्रत्याख्यायोपक्रमेत । तेष्वाद्यश्चतुर्वर्गो भेषजसाध्यः, उत्तरः शस्त्रसाध्यः, कालप्रकर्षात् सर्वाण्येव शस्त्रसाध्यानि वर्जयितव्यानि वा ॥ ३ ॥

उदर रोगों की साध्यासाध्यता—आठ प्रकार के उदर रोगों का वर्णन पहले (निदान स्थान में) किया जा चुका है। उनमें बद्धगुदोदर तथा परिस्रावी असाध्य एवं शेष कष्ट साध्य होते हैं। सभी उदर रोगों को असाध्य समझते हुए उनकी चिकित्सा करनी चाहिए। इनमें प्रारम्भ के चार उदर रोग (वातज, पित्तज, कफज और दूषीविष निमित्तज) औषधि साध्य, शेष (प्लीहोदर, बद्धगुदोदर, चतोदर एवं उदकोदर) शस्त्रसाध्य होते हैं। अधिक समय व्यतीत होने पर सभी उदर रोग शस्त्र साध्य अथवा असाध्य होते हैं ॥ ३ ॥

उदरी तु गुर्वभिष्यन्दिरूक्षविदाहिस्निग्धपिशितपरिषेकावगाहान् परिहरेत्; शालिषष्टिकयवगोधूमनीवारान् नित्यमश्नीयात् ॥ ४ ॥

उदर रोग में पथ्यापथ्य—उदर रोगी को गुरु, अभिष्यन्दी, रूक्ष, विदाही, स्निग्धपिशित (मेदयुक्त मांस) पदार्थों का भोजन तथा स्नान और नदी में तैरना आदि त्याग देना चाहिए। शालि, साठी, जौ, गेहूँ और नीवार (धान्य विशेष) का भोजन प्रतिदिन करना चाहिए ॥ ४ ॥

तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा स्नेहयित्वा, तिल्वकार्विपक्वेनानुलोम्य, चित्राफलतैलप्रगाढेन विदारिगन्धादिकषायेणास्थापयेदनुवासयेच्च, शाल्वणेन चोपनाहयेदुदरं, भोजयेच्चैनं विदारिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन च, स्वेदयेच्चाभीक्ष्णम् ॥ ५ ॥

वातोदर-चिकित्सा—वातोदर के रोगी को विदारिगन्धादि गण से सिद्ध घृत के द्वारा स्नेहन और लोध्र से सिद्ध घृत के द्वारा विरेचन देकर, पर्याप्त प्रमाण में एरण्ड तैल मिश्रित विदारिगन्धादि गण के क्वाथ से आस्थापन तथा अनुवासन वस्ति का प्रयोग करे और उदर पर शाल्वण की पुलटिस बांधे। इस रोगी को विदारिगन्धादि गण से सिद्ध दूध और जांगल-जीवों के मांसरस के साथ भोजन करावे और बार-बार स्वेदन करे ॥ ५ ॥

पित्तोदरिणं तु मधुरगणविपक्वेन सर्पिषा स्नेहयित्वा, श्यामात्रिफलात्रिवृद्विपक्वेनानुलोम्य, शार्करामधुघृतप्रगाढेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च,

पायसेनोपनाह्येदुदरं, भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा ॥ ६ ॥

पित्तोदर चिकित्सा—पित्तोदर के रोगी को मधुर गण (काकोल्यादि गण) से सिद्ध घृत के द्वारा स्नेहन और विधारा, हरड, बहेडा, आंवला और निशोथ से सिद्ध घृत के द्वारा विरेचन देकर, पर्याप्त परिमाण में शर्करा, मधु और घृत मिश्रित न्यग्रोधादि गण के क्वाथ से आस्थापन तथा अनुवासन वस्ति का प्रयोग करे, उदर पर खीर की पुलटिस बाँधे एवं विदारिगन्धादि गण से सिद्ध दूध के साथ भोजन करावे ॥६॥

श्लेष्मोदरिण तु पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्नेह्य, स्नुहीक्षीरविपक्वेनानुलोम्य, त्रिकटुकमूत्रक्षारतैलप्रगाढेन मुष्ककादिकषायेणास्थापयेदनुवासयेच्च, शणातसीधातकीकिण्वसर्षपमूलकबीजकल्कैश्चोपनाह्येदुदरं, भोजयेच्चैनं त्रिकटुकप्रगाढेन कुलत्थयूषेण पायसेन वा, स्वेदयेच्चाभीक्ष्णम् ॥ ७ ॥

श्लेष्मोदर-चिकित्सा—श्लेष्मोदर के रोगी को पिप्पल्यादि कषाय से सिद्ध घृत के द्वारा स्नेहन और सेहुण्ड के दूध से सिद्ध घृत के द्वारा विरेचन देकर, प्रचुर परिमाण में सोंठ, मरिच, पिप्पल, गोमूत्र, यवक्षार और तेल मिश्रित मुष्ककादि गण के क्वाथ से आस्थापन तथा अनुवासन वस्ति का प्रयोग करे, उदर पर सन, तीसी, धाय के फूल, सुराबीज, सरसों और मूली के बीज के कल्क की पुलटिस बांधे एव कुलथी के क्वाथ में पर्याप्त त्रिकटु-चूर्ण मिलाकर अथवा खीर के साथ भोजन करावे और बार-बार स्वेदन करे ॥ ७ ॥

दूष्योदरिण तु प्रत्याख्याय सप्तलाशङ्खिनीस्वरससिद्धेन सर्पिषा विरेचयेन्मासमर्धमासं वा, महावृक्षक्षीरसुरागोमूत्रसिद्धेन वा; शुद्धकोष्ठं तु मद्येनाश्वमारकगुञ्जाकाकादनीमूलकल्कं पाययेत्; इक्षुकाण्डानि वा कृष्णसर्पेण दशयित्वा भक्षयेद् बल्मीफलानि वा, मूलजं कन्दजं वा विषमासेवयेत्, तेनागदो भवत्यन्यं वा भावमापद्यते ॥ ८ ॥

दूष्योदर-चिकित्सा—दूषीविषजन्य उदर रोगी को असाध्य समझ कर, सातला सेहुण्ड और शखिनी (कालमेघ भेद) के स्वरस से सिद्ध घृत के द्वारा एक मास या पन्द्रह दिन विरेचन करावे, अथवा सेहुण्ड के दूध, सुरा और गोमूत्र के द्वारा सिद्ध घृत से विरेचन करावे। कोष्ठ शुद्ध होने पर, मद्य के साथ कनेर, गुञ्जा और काकादनी (वायसतिन्दुक) की जड़ का कल्क पिलावे। अथवा काले सर्प से गन्ने के टुकडे या ककड़ी आदि फलों को कटवा कर खावे। अथवा मूलज और कन्दज विषों का सेवन करे। इस क्रिया से रोगी या तो निरोग हो जाता है अथवा अन्य भाव (मृत्यु) को प्राप्त करता है ॥ ८ ॥

विमर्श—दूषीविष—निमित्तज उदर रोग की चिकित्सा में सर्पविष अथवा मूलज और कन्दज विषों का प्रयोग 'विषस्य विषमौषधम्' उक्ति को चरितार्थ करता है। वर्त्तमान होमियोपैथिक चिकित्सा विज्ञान इसी सिद्धान्त पर आधारित है। चरक ने भी क्रियातीत त्रिदोषज उदर रोग में भौतिक तथा सर्पविष के प्रयोग की विधि का प्रतिपादन किया है—'पान भोजनसयुक्त विषमस्मै प्रदापयेत्। यस्मिन् वा कुपितः सर्पो विसृजेद्धि फले विषम् ॥' (च. चि. अ. १८)

भवति चात्र—

कुपितानिलमूलत्वात् संचितत्वान्मलस्य च।
सर्वोदरेषु शंसन्ति बहुशस्त्वनुलोमनम् ॥ ९ ॥

उदररोग में दोषानुलोमन की प्रशंसा—जैसे कि-प्रकुपित वायु और मल का संचय उदर रोग की उत्पत्ति के मूल कारण है। अतः सभी उदर रोगों में अनेक बार विरेचन कराना उत्तम माना गया है ॥ ९ ॥

अत ऊर्ध्वं सामान्ययोगान् वक्ष्यामः। तद्यथा—एरण्डतैलमहरहर्मासं द्वौ वा केवलं मूत्रयुक्तं क्षीरयुक्तं वा सेवेतोदकवर्जी, माहिषं वा मूत्रं क्षीरेण निराहारः सप्तरात्रम्, उष्ट्रीक्षीराहारो वाऽन्नवारिवर्जी, पक्षं, पिप्पलीं वा मासं पूर्वोक्तेन विधानेनासेवेत, सैन्धवाजमोदायुक्तं वा निकुम्भतैलम्, आर्द्रशृङ्गवेररसपात्रशतसिद्धं वा वातशूलेऽवचार्य, शृङ्गवेररसविपक्वं क्षीरमासेवेत, चव्यशृङ्गवेरकल्कं वा पयसा सरलदेवदारुचित्रकमेव वा, (सु) सुरङ्गीशालपर्णीश्यामापुनर्नवाकल्कं वा, ज्योतिष्कफलतैलं वा क्षीरेण स्वजिकाहिङ्गुमिश्रं पिबेत्।

उदर रोगों में कतिपय सामान्य योग-इसके आगे साधारण योगों का वर्णन किया जाता है। जैसे कि—एरण्डतैल प्रतिदिन एक या दो मास केवल गोमूत्र या दूध के साथ जल त्यागकर, सेवन करे, अथवा निराहार रहकर भैंस का मूत्र दूध के साथ सात दिन सेवन करे। अथवा अन्न और जल त्यागकर पन्द्रह दिन ऊँटनी का दूध पीवे या पूर्वोक्त विधान के अनुसार पिप्पली (वर्द्धमान पिप्पली, वातशोणित अध्याय में पठित) का सेवन एक मास करे। अथवा सेन्धा नमक और अजवायन के साथ दन्ती के तेल का सेवन करे। अथवा वातजशूल में सौ आढक आर्द्रक और सोंठ के स्वरस से सिद्ध दन्ती तैल (तन्त्रान्तर में तिल तैल) का सेवन करे। आर्द्रक स्वरस से सिद्ध दूध का सेवन करे। अथवा चव्य और आर्द्रक का कल्क या चीड़, देवदारु और चित्रक का कल्क दूध के साथ सेवन करे। अथवा मुरङ्गी (सहिजन), शालपर्णी, विधारा और पुनर्नवा का कल्क दूध के साथ सेवन करे। अथवा मालकांगनी के तेल में सज्जीखार और हींग मिलाकर दूध के साथ पीवे।

गुडद्वितीया वा हरीतकीं भक्षयेत्, स्नुहीक्षीरभावितानां वा पिप्पलीनां सहस्रं कालेन, पथ्याकृष्णाचूर्णं वा स्नुहीक्षीरभावितमुत्कारिकां पक्वां दापयेत्।

अथवा गुड़ के साथ हरीतकी खावे। अथवा सेहुण्ड के दूध में भिगोई गई एक सहस्र पिप्पली, जितने समय में खा सके खावे, अथवा हरड़ और पिप्पली के चूर्ण में सेहुण्ड के दूध की भावना दे, उत्कारिका (लप्सी) पका कर खावे।

हरीतकाचूर्णं प्रस्थमाढकेन घृतस्यावाप्याङ्गारेष्वभिविलाप्य खजेनाभिमथ्यानुगुप्तं कृत्वाऽर्धमास यव-

पल्ले वासयेत्, ततश्चोद्धृत्य परिस्राव्य हरीतकीकाथाम्लदधीन्यावाप्य विपचेत्, तद्यथायोगं मासमर्धमासं वा पाययेत्।

एक प्रस्थ हरड का चूर्ण एक आढक घी में मिला, अग्नि पर पिघलावे और कोंचे से मथकर जौ की राशि में पन्द्रह दिन सुरक्षित रखे, फिर उसे निकाल कर छान लेवे और हरीतकी क्वाथ तथा खट्टा दही मिलाकर पकावे। इसे विधान के अनुसार एक मास या पन्द्रह दिन पिलावे।

गव्ये पयसि महावृक्षक्षीरमावाप्य विपचेत्, विपक्वं चावतार्य शीतीभूतं मन्थानेनाभिमथ्य नवनीतमादाय भूयो महावृक्षक्षीरेणैव विपचेत्, तद्यथायोगं मासं मासार्धं वा पाययेत्।

गाय के दूधमें सेहुण्ड का दूध मिलाकर पकावे, पकने पर अग्नि से उतार कर, शीतल होने पर मथनी से मथकर मक्खन निकाले और उसे सेहुण्ड के दूध के साथ ही पुनः पकावे। इसे विधान के अनुसार एक मास या पन्द्रह दिन पिलावे।

चव्यचित्रकदन्त्यतिविषाकुष्ठसारिवात्रिफलाजमोदाहरिद्राशङ्खिनीत्रिवृत्त्रिकटुकानामर्धकार्षिका भागा राजवृक्षफलमज्जामष्टौ कर्षाः, महावृक्षक्षीरपले द्वे, गवां क्षीरमूत्रयोरष्टावष्टौ पलानि, एतत् सर्वं घृतप्रस्थे समावाप्य विपचेत्, तद्यथायोगं मासमर्धमासं वा पाययेत्।

चव्य, चित्रक, दन्ती, अतीस, कूठ, सारिवा, त्रिफला, अजवायन, हल्दी, शंखिनी (यवतिक्ता), निशोथ और त्रिकुट, प्रत्येक आधा २ कर्ष, अमलतास के फल की गुद्दी आठ कर्ष, सेहुण्ड का दूध दो पल, गाय का दूध और गोमूत्र आठ-आठ पल, इन सब द्रव्यों को एक प्रस्थ घृत में मिला कर पकावे। इसे विधानानुसार एक मास या पन्द्रह दिन पिलावे।

एतानि तिल्वकघृतचतुर्थानि सर्पींष्युदरगुल्मविद्रध्यष्ठीलानाहकुष्ठोन्मादापस्मारेषूपयोज्यानि विरेचनार्थं; मूत्रासवारिष्टसुराश्चाभीक्ष्णं महावृक्षक्षीरसंभृताः सेवेत; विरेचनद्रव्यकषायं वा शृङ्गवेरदेवदारुप्रगाढम्॥ १०॥

इन तीनों तथा चौथे तिल्वक घृत (वातव्याधि में पठित) का प्रयोग उदर, गुल्म, विद्रधि, अष्ठीला, आनाह, कुष्ठ, उन्माद और अपस्मार में विरेचन के लिए करना चाहिए। गोमूत्र, आसव, अरिष्ट और सुरा का सेवन सेहुण्ड का दूध मिलाकर बार बार करना चाहिए अथवा विरेचन द्रव्यों के क्वाथ में सोंठ और देवदारु का चूर्ण प्रचुर परिमाण में मिला कर सेवन करना चाहिए॥ १०॥

वमनविरेचनशिरोविरेचनद्रव्याणां पालिका भागाः पिप्पल्यादिवचादिहरिद्रादिपरिपठितानां च द्रव्याणां श्लक्ष्णपिष्टानां यथोक्तानां च लवणानां, तत्सर्वं मूत्रगणे प्रक्षिप्य महावृक्षक्षीरप्रस्थं च मृदग्निना अवघट्टयन् विपचेदप्रदग्धकल्कं, तत्साधुसिद्धमवतार्य शीतीभूतमञ्चमात्रा गुटिका वर्तयेत, तासामेकां द्वे तिस्रो वा गुटिका बलापेक्षया मासांस्त्रींश्चतुरो वा सेवेत, एषाऽऽनाहवर्तिक्रिया विशेषेण महाव्याधिषूपयुज्यते (विशेषेण) कोष्ठजांश्च कृमीनपहन्ति कासश्वासकृमिकुष्ठप्रतिश्यायारोचकाविपाकोदावर्तांश्च नाशयति॥ ११॥

उदर रोग में मूत्र वर्त्ति—वमन द्रव्य (मदनफल आदि), विरेचन द्रव्य (निशोथ आदि-संशोधन-शमनीय अध्याय में पठित), पिप्पल्यादि, वचादि और हरिद्रादि गण (द्रव्यसंग्रहणीय अध्याय में पठित) के द्रव्य तथा पाँचो नमक प्रत्येक एक-एक पल ले, महीन पीसकर चूर्ण बनावे। फिर समस्त चूर्ण को गोमूत्र आदि (आठों मूत्र) मूत्रों में एक प्रस्थ सेहुण्ड के दूध के साथ, कलछी से चलाते हुए, जिसमें कल्क जलने न पावे, धीमी आँच पर पकावे। जब पाक भली-भाँति सिद्ध हो जाय, अग्नि से उतार कर शीतल होने पर एक-एक कर्ष प्रमाण की गोलियाँ बनावे। इनमें से एक, दो, या तीन बत्ती, शक्ति के अनुसार, तीन या चार मास तक सेवन करे। यह आनाहवर्त्ति विशेष कर महाव्याधियों में प्रयुक्त होती है और कोष्ठगत कृमियों को मारती है तथा कास, श्वास, कृमि, कुष्ठ, प्रतिश्याय, अरोचक, अन्न का परिपाक न होना एवं उदावर्त को नष्ट करती है॥ ११॥

मदनफलमज्जकुटजजीमूतकेक्ष्वाकुधामार्गवत्रिवृत्त्रिकटुकसर्षपलवणानि महावृक्षक्षीरमूत्रयोरन्यतरेण पिष्ट्वाऽङ्गुष्ठमात्रां वर्तिं कृत्वोदरिण आनाहे तैललवणाभ्यक्तगुदस्यैकां द्वे तिस्रो वा पायौ निदध्यात्, एषाऽऽनाहवर्तिक्रिया वातमूत्रपुरीषोदावर्ताध्मानानाहेषु विधेया॥ १२॥

उदर रोग में आनाहवर्त्ति-क्रिया—मैनफल की गिरी, कुटज, जीमूत (देवदाली), इक्ष्वाकु (कडुतुम्बी), धामार्गव (महाकोशातकी), निशोथ, सोंठ, मरिच, पिप्पली, सरसों और पाँचो नमक को सेहुण्ड के दूध या गोमूत्र किसी एक के साथ पीसकर, अँगूठे के बराबर वर्ति बनावे तथा उदर रोग में आनाह होने पर, रोगी की गुदा में तैल-नमक लगाकर, एक या दो वर्ति प्रवेश करे। इस आनाहवर्तिक्रिया का प्रयोग वातज, मूत्रज और पुरीषज उदावर्त, आध्मान तथा आनाह में करना चाहिए॥ १२॥

विमर्शः—उदावर्त, आध्मान तथा आनाह इन तीनों व्याधियों में वायु की प्रधानता रहती है, किन्तु लक्षणभेद से इनकी गणना पृथक्-पृथक् की गई है। सुश्रुत ने उदावर्त की उत्पत्ति के अनेक कारण बतलाये हैं तथा इसकी निरुक्ति भिन्न शब्दों में की है—'वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः। व्याहन्यमानैरुदितैरुदावर्तो निरुच्यते॥' (सु. उ. अ. ५१) आध्मान का लक्षण—'साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्। आध्मानमिति जानीयादूर्ध्वो वातनिरोधजम्॥' (सु. नि. अ १) आनाह रोग, आमरस या मल के आमाशय या पक्वाशय में सञ्चित होने के कारण उत्पन्न होता है—'आम शुष्कं निचितं क्रमेण भूयो विबद्धं विगुणानिलेन। प्रवर्तमानं न यथास्वमेव विकारमानाहमुदारन्ति॥' (सु. उ. अ. ५६)

प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुक्तवतो

वामबाहौ कूर्पराभ्यन्तरतः सिरां विध्येत्, विमर्दयेच्च पाणिना प्लीहानं रुधिरस्यन्दनार्थं; ततः संशुद्धदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत्, हिङ्गुसौवर्चिके वा क्षीरेण, स्नुनेन पलाशक्षारेण वा यवक्षारं, किंशुकक्षारोदकेन वा बहुशः स्नुनेन यवक्षारं, पारिजातकेक्षुरकापामार्गक्षारं वा, तैलसंसृष्टं शोभाञ्जनकयूषं पिप्पलीसैन्धवचित्रकयुक्तं, पूतिकरञ्जक्षारं वाऽम्लसूतं विड्लवणपिप्पलीप्रगाढम् ॥ १३ ॥

प्लीहोदर चिकित्सा—प्लीहोदर के रोगी का स्नेहन, स्वेदन, करके दही के साथ भोजन करावे और बायें हाथ में कूर्पर प्रदेश के अन्दर की शिरा का वेधन करे तथा रक्त निकालने के लिए प्लीहा को हथेली से मले। फिर (वमन विरेचन के द्वारा) शुद्ध शरीर वाले रोगी को, समुद्र से निकली हुई शुक्ति का क्षार दूध के साथ पिलावे। अथवा हींग और सज्जीखार दूध के साथ पिलावे, या छाने हुए पलाशक्षार के साथ यवक्षार पिलावे। अथवा अनेक बार छाने गए पलाशपुष्पक्षारोदक के साथ यवक्षार पिलावे। अथवा पारिजातक, ताडमगाना और अपामार्ग क्षार का सेवन करावे। अथवा तैल मिश्रित सहिजन का काथ पिप्पली, सेन्धा नमक और चित्रक मिलाकर पीवे। अथवा काञ्जी में घोलकर छाने गए पूतिकरञ्ज के क्षार में विडनमक तथा पिप्पली प्रचुर मात्रा में मिलाकर सेवन करे ॥ १३ ॥

पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरयवक्षारसैन्धवानां पालिका भागाः, घृतप्रस्थ तत्तुल्यं च क्षीरं तदैकध्यं विपाचयेत्, एतत् षट्पलकं नाम सर्पिः प्लीहाग्निमङ्गगुल्मोदरोदावर्तश्वयथुपाण्डुरोगकासश्वासप्रतिश्यायोर्ध्ववातविषमज्वरानपहन्ति। मन्दाग्निर्वा हिङ्ग्वादिक चूर्णमुपयुञ्जीत ॥ १४ ॥

उदर रोग में षट्पल घृत—पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सोंठ, यवक्षार और सेन्धानमक एक एक पल, घृत तथा दूध एक एक प्रस्थ, इन्हें एक साथ मिलाकर पकावे। यह षट्पलक नामक घृत, प्लीहा, अग्निमाद्य, गुल्म, उदर, उदावर्त, शोथ, पाण्डु, कास-श्वास, प्रतिश्याय, ऊर्ध्ववात और विषमज्वर को नष्ट करता है। अथवा मन्दाग्नि वाला रोगी हिङ्ग्वादि चूर्ण का उपयोग करे ॥ १४ ॥

यकृदाल्येऽप्येष एव क्रियाविभागः। विशेषतस्तु दक्षिणबाहौ सिराव्यधः ॥ १५ ॥

यकृदाल्युदर में शिरावेध—यकृदाल्युदर में भी इसी क्रिया विधि का व्यवहार करना चाहिए। इसमें (प्लीहोदरमें) अन्तर यही है कि शिरावेध दाहिने हाथ में करना चाहिए ॥ १५ ॥

मणिबन्ध सकूर्पराम्य वामाङ्गुष्ठसमीरिताम्।
दहेत सिरां शरेणाशु प्लीह्नो वैद्यः प्रशान्तये ॥ १६ ॥

प्लीहोदर में सिरादाह—वैद्य प्लीहा की शान्ति के लिए मणिबन्ध (कलाई) को कुछ झुकाकर, बायें अँगूठे की ओर जाती हुई शिरा को (तप्त) बाण से शीघ्र जलावे ॥ १६ ॥

बद्धगुदं परिस्राविणं च स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं बालं वाऽपोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा बाह्यं व्रणमुदरस्य सीव्येत। परिस्राविण्यप्येवमेव शल्यमुद्धृत्यान्त्रस्रावान् संशोध्य, तच्छिद्रमान्त्रं समाधाय कालपिपीलिकाभिर्दंशयेत, दष्टे च तासां कायानपहरेन्न शिरांसि, ततः पूर्ववत् सीव्येत, संधानं च यथोक्तं कारयेत्, यष्टीमधुकमिश्रया च कृष्णमृदाऽवलिप्य बन्धेनोपचरेत, ततो निवातमागारं प्रवेश्याचारिकमुपदिशेत्, वासयेच्चैनं तैलद्रोण्यां सर्पिर्द्रोण्यां वा पयोघृक्तमिति ॥ १७ ॥

बद्धगुदोदर और परिस्रावी उदररोग की चिकित्सा—बद्धगुद और परिस्रावी उदर में, स्नेहन, स्वेदन एवं अभ्यङ्ग से युक्त रोगी की नाभि के नीचे, वाम भाग में रोमराजी से चार अंगुल स्थान छोड़कर उदर में चीरा लगावे और चार अंगुल आँत बाहर निकाल, भली भाँति परीक्षा करके, बद्धगुदोदर के आँतों के अवरोधक पत्थर, बाल या मल को दूर करे। फिर आँतों में मधु एवं घृत पोतकर, आँतों को यथास्थान स्थापित करके उदर के बाहरी व्रण को सी दे। परिस्रावी उदर में भी इसी प्रकार शल्य को निकाल कर, आँत के स्राव को साफ करके, छिद्रवाली आँत को बराबर मिलाकर उस स्थान में काली चीटियों से कटावे। जब चीटियाँ आँत को पकड़ लें उनका धड़ शिर से अलग कर दे और पहले की भाँति उदर व्रण को सी दे। व्रण का सन्धान पूर्वकथित विधि के अनुसार करे। मुलेठी मिली हुई काली मिट्टी का लेप करके पट्टी बाँध दे। फिर वायुरहित गृह में रोगी को ले जा कर परिचारकों को उनका कर्तव्य समझा दे। इस रोगी को तेल या घी की द्रोणी (टब) में बिठावे और केवल दूध का आहार करावे ॥ १७ ॥

दकोदरिणस्तु वातहरतैलाभ्यक्तस्योष्णोदकस्विन्नस्य स्थितस्याग्नैः सुपरिगृहीतस्याकक्षात् परिवेष्टितस्याधोनाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येत्, तत्र त्रप्वादीनामन्यतमस्य नाडीं द्विद्वारां पक्षनाडीं वा संयोज्य दोषोदकमवसिञ्चेत्, ततो नाडीमपहृत्य तैललवणेनाभ्यज्य व्रणं बन्धेनोपचरेत, न चैकस्मिन्नेव दिवसे सर्वं दोषोदकमपहरेत्, सहसा ह्यपहृते तृष्णाच्छर्दाङ्गमर्दातीसारश्वासकासपार्श्वदाहा उत्पद्येरन्नापूर्यते वा भृशतरमुदरमसञ्जातप्राणस्य, तस्मात्तृतीयचतुर्थपञ्चमषष्ठाष्टमदशमद्वादशषोडशरात्राणामन्यतममन्तरीकृत्य दोषोदकमल्पाल्पमवसिञ्चेत् निःसृते च दोषे गाढतरमाविकर्कोशेयचर्मणामन्यतमेन परिवेष्टयेदुदरं, तथा नाध्मापयति वायुः; षण्मासांश्च पयसा भोजयेज्जाङ्गलरसेन वा, ततस्त्रीन्मासानर्धोदकेन पयसा फलाम्लेन जाङ्गलरसेन वा, अवशिष्टं मासत्रयमन्नं लघु हितं वा सेवेत; एवं संवत्सरेणागदो भवति ॥ १८ ॥

जलोदर चिकित्सा—जलोदर के रोगी को, वातहर तैल की मालिश तथा उष्णजल से स्वेदन करके, बिठावे। समझदार व्यक्ति उसे भली-भाँति कक्षा प्रदेश से पकडकर रखें, वस्त्र लिपटे हुए उस रोगी की नाभि के नीचे, बाईं ओर चार अंगुल रोमराजी से हटकर, व्रीहिमुख शस्त्र (Trocar) से अँगूठे के उदर के बराबर गहरा वेधन करे। इसमें रांगा आदि किसी धातु की अथवा पख (पक्षियों के पंख) की दोनों ओर मुख वाली नली लगाकर दोषयुक्त जल को बाहर निकाले। इसके बाद नली को निकाल कर, तैल तथा नमक का लेप करके, व्रण पर पट्टी बाँध दे। एक ही दिन में समस्त दोषयुक्त जल को न निकाले, क्योंकि सहसा सम्पूर्ण जल निकलने पर तृष्णा, ज्वर, अङ्गमर्द, अतिसार, श्वास और पाददाह उत्पन्न हो जाते हैं अथवा दुर्बल रोगी के उदर में अत्यधिक जल भर जाता है। इसलिए तीन, चार, पाँच, छः, आठ, दश, बारह और सोलह दिन में से किसी एक का अन्तर देकर, दोषयुक्त जल को थोड़ा-थोडा निकालना चाहिए। दोषोदक के निकल जाने पर भेड़ के चमडे, रेशमी वस्त्र या किसी अन्य चमडे से उदर को बाँध देना चाहिए। इस प्रकार वायु के द्वारा आध्मान (Tympanites) नहीं होता। छै मास तक दूध या जांगल जीवों के मांसरस के साथ भोजन करावे। इसके पश्चात् तीन महीने तक आधा जल मिले हुए दूध, फलों के खट्टे रस या जंगली जीवों के मासरस के साथ भोजन दे तथा शेष तीन महीने तक हितकर, हल्का अन्न सेवन करावे। इस प्रकार एक वर्ष में रोगी रोगरहित हो जाता है ॥ १८ ॥

भवति चात्र—

आस्थापने चैव विरेचने च पाने तथाऽऽहारविधिक्रियासु।
सर्वोदरिभ्यः कुशलैः प्रयोज्यं क्षीरं श्रृतं जाङ्गलजो रसो वा ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने उदरचिकित्सितं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

उदर रोगों में दूध और जांगल जीवों के मांसरस का प्रयोग-जैसा कि'—कुशल वैद्य को, उदर रोग के सभी रोगियों के लिए आस्थापन, विरेचन आदि क्रियाओं तथा पीने और आहारविधि में, औषधिसिद्ध दूध अथवा जांगल जीवों का मांसरस प्रयोग करना चाहिए ॥ १९ ॥

विमर्श.—आजकल जलोदर की चिकित्सा में जल निकालने के लिए जिस विधि का प्रयोग किया जाता है उसे Tapping कहते हैं। इस विधि में Trocar and Cannula शस्त्र से Peritoneal cavity में वेधन किया जाता है। इस क्रिया का प्रयोग कभी-कभी अनेक बार करना पडता है। शस्त्र-क्रिया विधि का सक्षिप्त वर्णन इस प्रकार है—'The bladder having been emptied, and the anaesthetic injected at the area selected, usually the midline just above the pubes, the skin is incised and the trocar thrust boldly through the abdominal wall, a proceeding which may produce some shock when no more fluid escapes even no squeezing from the flanks, the trocar is with drawn and the incision closed, and sealed with a collodion dressing A tight wide binder must be applied

'The Science and practice of surgery'

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाटीकायां चतुर्दशोऽध्यायः ॥१४॥

पञ्चदशोऽध्यायः

अथातो मूढगर्भचिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मूढगर्भचिकित्सा का उपक्रम—इसके अनन्तर मूढगर्भ की चिकित्सा विधि का वर्णन किया जाता है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥१ २॥

नातोऽन्यत् कष्टतममस्ति यथा मूढगर्भशल्योद्धरणम्; अत्र हि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म कर्तव्यं स्पर्शेन, उत्कर्षणापकर्षणस्थानापवर्तनोत्कर्तनभेदनच्छेदनपीडनर्जूकरणदारणानि चैकहस्तेन गर्भं गर्भिणीं चाहिंसता, तस्मादधिपतिमापृच्छ्य परं च यत्नमास्थायोपक्रमेत ॥ ३ ॥

मूढगर्भ शल्य को निकालने के समान दूसरा कठिन (शल्य) कर्म नहीं है। इसमें योनि, यकृत्, प्लीहा, आन्त्र-गुहा तथा गर्भाशय के मध्य में, स्पर्श के द्वारा, कार्य करना पडता है। उत्कर्षण (अधोगत गर्भ को ऊपर उठाना), अपकर्षण (ऊर्ध्वगत गर्भ को नीचे करना), स्थानापवर्तन (उत्तान गर्भ का मुख नीचे की ओर करना), उद्वर्त्तन (नीचे की ओर मुख वाले गर्भ को उत्तान करना), उत्कर्तन (ऊपर उठे हुए किसी अंग को काटना), भेदन, छेदन (मृतगर्भ के अंगों को काट कर टुकड़े करना), पीडन (दबाना), ऋजूकरण (टेढ़े गर्भ को सीधा करना) और दारण (फाडना) आदि कार्य, गर्भ और गर्भिणी की रक्षा करते हुए, एक हाथ से करने पड़ते हैं। इसलिए राजा की अनुमति लेकर, बडी सावधानीके साथ कार्य करना चाहिए॥

तत्र समासेनाष्टविधा मूढगर्भगतिरुद्दिष्टा; स्वभावगता अपि त्रयः सङ्गा भवन्ति-शिरसो वैगुण्यादंसयोर्जघनस्य वा ॥ ४ ॥

मूढगर्भ के प्रकार—मूढगर्भ की गति संक्षेप में आठ प्रकार की होती है। प्राकृतिक रूप से भी तीन प्रकार की रुकावटें (गर्भ में) होती है, (१) शिर की वक्रता के कारण, (२) अंसप्रदेश (शिर और बाहु) की वक्रता के कारण तथा (३) जघन प्रदेश (कटि का अग्रभाग) की वक्रता के कारण ॥

जीवति तु गर्भे सूतिकागर्भनिर्हरणे प्रयतेत। निर्हर्तुमशक्ये च्यावनान् मन्त्रानुपश्रृणुयात्; तान् वक्ष्यामः ॥ ५ ॥

मूढगर्भ में मन्त्र प्रयोग—जीवित गर्भ की स्थिति में सूतिका के गर्भ को निकालने का प्रयत्न करना चाहिए। यदि

गर्भ के निकलने में कठिनाई हो तो 'च्यावन (गर्भ गिरानेवाले) मन्त्रों' को सुनाना चाहिए। उन मन्त्रों का कथन किया जाता है ॥ ५ ॥

'इहामृतं च सोमश्च चित्रभानुश्च भामिनी।
उच्चैश्रवाश्च तुरगो मन्दिरे निवसन्तु ते ॥ ६ ॥

हे सुन्दरि! तुम्हारे इस मन्दिर (गृह) में अमृत, सोम (चन्द्रमा), चित्रभानु (सूर्य) और उच्चैःश्रवा नामक (इन्द्र का अश्व) घोडे का निवास हो ॥ ६ ॥

इद ममृतमपां समुद्भृतं वै तव लघु गर्भमिम प्रमुञ्चतु स्त्रि।
तदनलपवनार्कवासवास्ते सह लवणाम्बुधरैर्दिशन्तु शांतिम्

हे स्त्रि! यह अमृत समुद्र से निकाला गया है, तुम्हारे गर्भ को यह शीघ्र मुक्त करे। अग्नि, वायु, सूर्य, इन्द्र तथा समुद्र तुम्हें शान्ति प्रदान करें ॥ ७ ॥

मुक्ताः पशोर्विपाशाश्च मुक्ताः सूर्येण रश्मयः।
मुक्तः सर्वभयाद्गर्भ एह्येहि विरमावितः ॥ ८ ॥

पशु के बन्धन खुल गए, सूर्य ने अपनी किरणें फैला दीं। हे गर्भ! तुम सब विघ्न-बाधाओं से मुक्त हुए, आओ, आओ और सुरक्षित रहो ॥ ८ ॥

औषधानि च विदध्याद्यथोक्तानि। मृते चोत्तानाया आमुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वननगवृत्तिकाशाल्मलीमृत्स्नाघृताभ्यां म्रक्षयित्वा हस्तं योनौ प्रवेश्य गर्भमुपहरेत् तत्र सक्थिभ्यामागतमनुलोममेवाऽऽच्छेत्, एकसक्थ्ना प्रतिपन्नस्येतरसक्थि प्रसार्योपहरेत्, स्फिग्देशं प्रपीड्योर्ध्वमुत्क्षिप्य सक्थिनी प्रसार्योपहरेत्, तिर्यगागतस्य परिघस्येव तिरश्चीनस्य पश्चादर्धमूर्ध्वमुत्क्षिप्य पूर्वार्धमपत्यपथं प्रत्यार्जवमानीयापहरेत्; पार्श्वोपवृत्तशिरसमसं प्रपीड्योर्ध्वमुत्क्षिप्य शिरोऽपत्यपथमानीयापहरेत्, बाहुद्वयप्रतिपन्नस्योर्ध्वमुत्पीड्यासौ शिरोऽनुलोममानीयापहरेत्, द्वावन्त्यावसाध्यौ मूढगर्भौ, एवमशक्ये शस्त्रमवचारयेत् ॥ ९ ॥

मूढगर्भ में गर्भ निकालने की क्रिया—पूर्वकथित (शारीर स्थान में अपरापातन के लिए पठित) औषधियों का भी प्रयोग करे। गर्भस्थ शिशु की मृत्यु होने पर, गर्भिणी को चित्त लिटावे और दोनों जघा सिकोड कर, कटि के नीचे कपडे की गद्दी लगा, कटिभाग को कुछ ऊँचा करे। फिर धन्वन (धनु वृक्षो बदरीसदृशपत्रः), नगवृत्तिका (शल्लकी) और सेमल का लुआब तथा घी हाथ में लेप कर, योनि में प्रवेश करे और गर्भ को निकाले। इनमें जंघाओं (पैरों) के द्वारा निकले हुए गर्भ को अनुलोमरूप में ही खींचे। एक जघा के बाहर आने पर दूसरी जंघा को भी फैलाकर गर्भ को निकाले। नितम्ब को दबा कर ऊँचा उठावे और जघाओं को फैलाकर, गर्भ को निकाले। तिरछे आये हुए तथा अर्गला (किवाड को बन्द रखने के लिए लगाने वाला ढडा) की भाति बेंढे गर्भ के पिछले आधे भाग (नितम्ब, पैर) को ऊपर उठा कर, अगले आधे भाग (शिरो भाग) को योनिमार्ग में सीधा करके, गर्भ को निकाले। पार्श्व की ओर शिर मुडे हुए गर्भ में, कन्धे को दबा कर ऊपर उठावे और शिर को योनिमार्ग में लाकर गर्भ को निकाले। दोनों हाथों के द्वारा बाहर आये हुए गर्भ में गर्भ को ऊपर उठावे और ऊर्ध्वभाग को अनुलोम दिशा में लाकर गर्भ को निकाले। अन्त के दो मूढगर्भ असाध्य होते है। जिस मूढगर्भ में इन क्रियाओं से फल न निकले, उसमें शस्त्र प्रयोग करना चाहिए ॥ ९ ॥

विमर्शः—पाश्चात्य चिकित्सा विज्ञान के अनुसार, उपर्युक्त मूढगर्भों का नामकरण, निम्नलिखित रूप में किया जा सकता है। (१) सक्थिभ्यामागतम् (Full breech presentation) (२) एकसक्थ्ना प्रपन्नस्य (Footling or knee presentation) (३) स्फिग्देशेनागतस्य (Franc breech presentation) (४) तिर्यगागतस्य (Transvers presentation) (५) पार्श्वोपवृत्तशिरसम् (Transvers presentation with prolapse of hands) (६) बाहुद्वयप्रतिपन्नस्य (Complex presentation) Complex or Compound presentation तथा Foot and knee presentation असाध्य माने गए हैं। मूढगर्भ की इन अवस्थाओं में शस्त्रावचारण की आवश्यकता होती है।

सचेतन च शस्त्रेण न कथञ्चन दारयेत्।
दार्यमाणो हि जननीमात्मानं चैव घातयेत् ॥ १० ॥
अविपद्य विकारे तु श्रेयो गर्भस्य पातनम्।
न गर्भिण्या विपर्यासस्तस्मात्प्राप्तं न हापयेत् ॥ ११ ॥

मूढगर्भ को निकालने के लिए शस्त्र-प्रयोग—जीवितगर्भ को कभी शस्त्र से नहीं काटना चाहिए, क्योंकि काटने पर माता और शिशु दोनों की मृत्यु हो जाती है। असहनीय व्याधि की दशा में गर्भपात कराना कल्याणकारी होता है। गर्भिणी की मृत्यु न हो इसलिए उपस्थित वस्तु को नहीं छोडना चाहिए अर्थात् उस समय गर्भिणी की रक्षा करनी चाहिए ॥ १०-११ ॥

ततः स्त्रियमाश्वास्य मण्डलाग्रेणाङ्गुलीशस्त्रेण वा शिरो विदार्य, शिरःकपालान्याहृत्य, शङ्कुना गृहीत्वोरसि कक्षायां वाऽपहरेत्; अभिन्नशिरसमक्षिकूटे गण्डे वा, अंससक्तस्यांसदेशे बाहू छित्त्वा, दतिमिवाततं वातपूर्णोदरं वा विदार्य निरस्यान्त्राणि शिथिलीभूतमाहरेत्, जघनसक्तस्य वा जघनकपालानीति ॥ १२ ॥

स्त्री को आश्वस्त करके मण्डलाग्र (Round head knife) या अंगुलिशस्त्र (Finger knife) से गर्भके शिर को फाडे और शिर तथा कपालास्थियों को बाहर खींचकर शंकुयन्त्र (Blunt hook and crotchet) के द्वारा छाती या कक्षा पकडकर गर्भ को बाहर निकाले। शिर के न टूटने पर अक्षिकूट या कपोल प्रदेश पकड़कर, कधा फँसने पर, अंसप्रदेश से बाहु को काट कर, मशक के समान फूले या वायु से भरे हुए उदर वाले गर्भ के उदर मे चीरा लगा, आँतों को निकाल, गर्भके शिथिल होने पर उसे बाहर निकाले। नितम्ब प्रदेश के फँसने पर जघन कपालों को काटकर गर्भ को निकाले ॥ १२ ॥

किंबहुना—
यद्यदङ्गं हि गर्भस्य तस्य सज्जति तद्भिषक्।
सम्यग्विनिर्हरेच्छित्त्वा रक्षेन्नारीं च यत्नतः॥ १३॥

अधिक क्या कहा जाय—उस गर्भ का जो जो अङ्ग रुकता हो उसे काटकर भलीभाँति वैद्य बाहर निकाले और यत्नपूर्वक नारी की रक्षा करे॥ १३॥

गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः।
तत्रानल्पमतिर्वैद्यो वर्तेत विधिपूर्वकम्॥ १४॥

वायु के प्रकोप से गर्भ की गति (स्थिति) नाना प्रकार की हो जाती है, ऐसी दशा में बुद्धिमान वैद्य को विधिपूर्वक कार्य करना चाहिए॥ १४॥

नोपेक्षेत मृतं गर्भं मुहूर्तमपि पण्डितः।
स ह्याशु जननीं हन्ति निरुच्छ्वासं पशु यथा॥ १५॥

बुद्धिमान् वैद्य, एक क्षण भी मृतक गर्भ की उपेक्षा न करे, क्योंकि वह माता को उसी प्रकार शीघ्र मार डालता है जिस प्रकार श्वास रुकने से पशु की मृत्यु हो जाती है॥ १५॥

मण्डलाग्रेण कर्तव्यं छेद्यमन्तर्विजानता।
वृद्धिपत्रं हि तीक्ष्णाग्रं नारीं हिंस्यात् कदाचन॥ १६॥

शस्त्रकर्म के ज्ञाता वैद्य को, मण्डलाग्र शस्त्र (Circular knife) के द्वारा अन्दर छेदन कर्म करना चाहिए, क्योंकि वृद्धिपत्र (Scalpel) का अग्रभाग तीक्ष्ण होता है, उससे छेदन करने में स्त्री की प्राणहानि संभावित है॥ १६॥

अथापतन्तीमपरां पातयेत् पूर्ववद्भिषक्।
हस्तेनापहरेद्वाऽपि पार्श्वाभ्यां परिपीड्य वा॥ १७॥

यदि अपरापातन न होता हो तो वैद्य, पूर्वोक्त विधि (शारीर स्थान में पठित) के द्वारा अपरापातन करावे अथवा हाथ से पार्श्वभाग को दबाकर निकाले॥ १७॥

धुनुयाच्च मुहुर्नारीं पीडयेद्वांऽसपिण्डिकाम्।
तैलाक्तयोनेरेवं तां पातयेन्मतिमान् भिषक्॥ १८॥

बुद्धिमान् वैद्य, तैलसिक्त योनि वाली उस स्त्री को धीरे-धीरे (हाथ-पैर पकडवाकर) हिलाकर या कंधे को दबाकर अपरापातन करावे॥ १८॥

एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा।
ततोऽभ्यक्तशरीराया योनौ स्नेहं निधापयेत्॥ १९॥

शस्त्रकर्म के पश्चात्कर्म—इस प्रकार जिस नारी का शल्य (मृढगर्भ) निकला हो उसे उष्ण जल से स्नान करावे और शरीर में तेल की मालिश करके योनि में तेल (पिचु) रखे॥१९॥

एवं मृद्वी भवेद्योनिस्तच्छूलं चोपशाम्यति।
कृष्णातन्मूलशुण्ठ्येलाहिङ्गुभार्गीः सदीप्यकाः॥ २०॥
वचामतिविषां रास्नां चव्यं संचूर्ण्य पाययेत्।
स्नेहेन दोषस्यन्दार्थं वेदनोपशमाय च॥ २१॥
क्वाथं चैषां तथा कल्कं चूर्णं वा स्नेहवर्जितम्।
शाकत्वग्धिङ्ग्वतिविषापाठाकटुकरोहिणीः॥ २२॥
तथा तेजोवतीं चापि पाययेत् पूर्ववद्भिषक्।
त्रिरात्रं पञ्चसप्ताहं ततः स्नेहं पुनः पिबेत्॥ २३॥
पाययेतासवं नक्तमरिष्टं वा सुसंस्कृतम्।
शिरीषककुभाभ्यां च तोयमाचमने हितम्॥ २४॥
उपद्रवाश्च येऽन्ये स्युस्तान् यथास्वमुपाचरेत्।
सर्वतः परिशुद्धा च स्निग्धपथ्याल्पभोजना॥ २५॥
स्वेदाभ्यङ्गपरा नित्यं भवेत् क्रोधविवर्जिता।
पयो वातहरैः सिद्धं दशाहं भोजने हितम्॥ २६॥

इस प्रकार योनि कोमल होती है तथा योनिशूल भी शान्त हो जाता है। पिप्पली, पिप्पलीमूल, सोंठ, इलायची, हींग, भार्गी, अजवायन, वच, अतीस, रास्ना और चव्य का चूर्ण, दोषों को बाहर निकालने तथा वेदना की शान्ति के लिए, घृत के साथ पिलावे अथवा इन औषधियों का स्नेह-रहित क्वाथ, कल्क या चूर्ण खिलावे। वरुण की छाल, हींग, अतीस, पाठा, कुटकी तथा तेजवल का चूर्ण बनाकर भी वैद्य, पूर्वोक्त विधि के अनुसार (घी के साथ) पिलावे। इसके पश्चात्, तीन, पाँच या सात दिन पुनः स्नेहपान करावे और रात्रि में विधिपूर्वक बना हुआ आसव या अरिष्ट पिलावे। शिरीष और अर्जुन का क्वाथ आचमन (कुल्ला या पान) के लिए हितकर होता है। अन्य उपद्रवों (वातरोग ज्वर आदि) के लिए तदनुकूल चिकित्सा विधि का प्रयोग करना चाहिए। सम्पूर्ण रूप से शुद्ध हुई नारी नित्य स्निग्ध, हितकर और अल्प भोजन करे, स्वेदन और अभ्यङ्ग करावे तथा क्रोध न करे। दश दिन तक भोजन में वातहर द्रव्यों से सिद्ध (शतपुष्पा आदि) दूध का सेवन करे॥ २०–२६॥

रसं दशाहं शेषे तु यथायोगमुपाचरेत्।
व्युपद्रवां विशुद्धां च ज्ञात्वा च वरवर्णिनीम्॥ २७॥
ऊर्ध्वं चतुर्भ्यो मासेभ्यो विसृजेत् परिहारतः।
योनिसन्तर्पणेऽभ्यङ्गे पाने बस्तिषु भोजने॥ २८॥
बलातैलमिदं चास्यै दद्यादनिलवारणम्।

शेष दिनों में अनुकूल आहार का सेवन कराना चाहिए तथा उपद्रव रहित, विशुद्ध, और सुन्दर वर्ण होने पर, चार मास के बाद आहार-विहार के बन्धन से मुक्त कर देना चाहिए। इस नारी (प्रसूता) के योनि संतर्पण, अभ्यङ्ग, पान, वस्ति तथा भोजन में वातनाशक अधोलिखित बलातैल का प्रयोग करना चाहिए॥ २७–२८½॥

बलामूलकषायस्य दशमूलीश्रृतस्य च॥ २९॥
यवकोलकुलत्थानां क्वाथस्य पयसस्तथा।
अष्टावष्टौ शुभा भागास्तैलादेकस्तदेकतः॥ ३०॥
पचेदावाप्य मधुरं गणं सैन्धवसंयुतम्।
तथाऽगुरुं सर्जरसं सरलं देवदारु च॥ ३१॥
मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुसारिवाम्।
मांसीं शैलेयकं पत्रं तगरं सारिवां वचाम्॥ ३२॥
शतावरीमश्वगन्धां शतपुष्पां पुनर्नवाम्।
तत् साधुसिद्धं सौवर्णे राजते मृन्मयेऽपि वा॥३३॥

प्रक्षिप्य कलशे सम्यक् स्वनुगुप्त निधापयेत् ।
बलातैलमिदं ख्यातं सर्ववातविकारनुत ॥ ३४ ॥
यथाबलमतो मात्रां सूतिकायै प्रदापयेत् ।
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान् ॥ ३५ ॥
वातक्षीणे मर्महते मथितेऽभिहते तथा ।
भग्ने श्रमाभिपन्ने च सर्वथैवोपयुज्यते ॥ ३६ ॥
एतदाक्षेपकादीन् वै वातव्याधीनपोहति ।
हिक्कां कासमधीमन्थं गुल्मं श्वासं च दुस्तरम् ॥३७॥
षण्मासानुपयुञ्जैतदन्त्रवृद्धिमपोहति ।
प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः ॥ ३८ ॥
राज्ञामेतद्धि कर्तव्यं राजमात्राश्च ये नराः ।
सुखिनः सुकुमाराश्च धनिनश्चापि ये नराः ॥ ३९ ॥

सूतिका रोग में बलातैल—खरेटी की जड़ का क्वाथ, दशमूल का क्वाथ, जौ, बेर और कुलथी का क्वाथ तथा दूध आठ-आठ भाग और तेल एक भाग, इनमें मधुर गण के द्रव्य (काकोल्यादिगण), सेन्धानमक, अगर, राल, धूपवृक्ष, देवदारु, मजीठ, चन्दन, कूठ, इलायची, नगर, जटामासी, छड़ीला, तेजपात, तगर, सारिवा, वच, शतावर और पुनर्नवा का कल्क डालकर एक साथ पकावे। तैल के भलीभाँति सिद्ध होने पर, सोना, चाँदी या मिट्टी के पात्र में अच्छी तरह भरकर सुरक्षित स्थान में रखे। यह बलातैल के नाम से प्रसिद्ध है तथा सभी वातव्याधियों को नष्ट करता है। प्रसूता को उसकी शक्ति के अनुसार इस तैल की मात्रा का सेवन कराना चाहिए। गर्भ धारण की इच्छावाली स्त्री, नष्टशुक्र-वाले पुरुष, वायु से क्षीण, मर्मस्थान में चोट लगे हुए, कुचले हुए, चोट लगे हुए, हड्डी टूटे हुए और थकावट से पीड़ित व्यक्तियों के लिए सभी विधियों से (अभ्यङ्ग, पान, बस्ति और भोजन आदि में) इस तैल का प्रयोग करना चाहिए। यह तैल आक्षेपक आदि वातव्याधियों को नष्ट करता है। भयङ्कर हिक्का, कास, अधिमन्थ, गुल्म, श्वास और अन्त्रवृद्धि आदि रोग ६ मास तक इस तैल का सेवन करने से नष्ट हो जाते हैं। इस तैल के सेवन से पुरुष के रस रक्तादि धातुओं की वृद्धि होती है तथा उसका यौवन स्थिर रहता है। राजाओं, राजाओं की कोटि के मनुष्यों, सुखी, सुकुमार और सम्पत्तिशाली पुरुषों के लिए इस तैल का निर्माण करना चाहिए ॥ ३५-३९ ॥

बलाकषायपीतेभ्यस्तिलेभ्यो वाऽप्यनेकशः ।
तैलमुत्पाद्य तत्काथशतपाक कृतं शुभम् ॥ ४० ॥
निवाते निभृतागारे प्रयुञ्जीत यथाबलम् ।
जीर्णेऽस्मिन् पयसा स्निग्धमश्नीयात् षष्टिकौदनम् ॥
अनेन विधिना द्रोणमुपयुञ्जान्नमीरितम् ।
भुञ्जीत द्विगुणं काल बलवर्णान्वितस्ततः ॥ ४२ ॥
सर्वपापैर्विनिर्मुक्तः शतायुः पुरुषो भवेत् ।
शतं शतं तथोत्कर्षो द्रोणे द्रोणे प्रकीर्तितः ॥ ४३ ॥

शतपाक बलातैल—अनेक बार बला क्वाथ की भावना दिए हुए तिलों से तैल निकाल कर, उसे बलाक्वाथ के साथ ही सौ बार पकावे। वायुरहित, एकान्त घर में, शक्ति के अनुसार इसका सेवन करे। इस औषधि का पाचन होने पर दूध के साथ, घृतयुक्त साठी के चावलों का भोजन करे। इस विधि से बलातैल की एक द्रोण मात्रा सेवन करने पर मनुष्य, उपर्युक्त अन्नों का दुगुना आहार करता है, बल, वर्ण सम्पन्न बनता है तथा सभी पापों से मुक्त होकर सौ वर्ष की आयु प्राप्त करता है। एक एक द्रोण तैल के सेवन करने पर आयु में सौ-सौ वर्ष की वृद्धि होती है॥

बलाकल्पेनातिबलागुडूच्यादित्यपर्णिषु ।
सैरेयके वीरतरौ शतावर्यां त्रिकण्टके ॥ ४४ ॥
तैलानि मधुके कुर्यात् प्रसारिण्यां च बुद्धिमान् ।
नीलोत्पलं वरीमूलं गव्ये क्षीरे विपाचयेत् ॥४५॥
शतपाकं ततस्तेन तिलतैलं पचेद्भिषक् ।
बलातैलस्य कल्कांस्तु सुपिष्टांस्तत्र दापयेत् ॥ ४६ ॥
सर्वेषामेव जानीयादुपयोगं चिकित्सकः ।
बलातैलवदेतेषां गुणाश्चैव विशेषतः ॥ ४७ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने मूढगर्भ-चिकित्सितं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

बला तैल के विधानानुसार गुडूची आदि तैल बनाने का भी निर्देश—बुद्धिमान् वैद्य, बलाकल्क के अनुसार अतिबला, गुडूची, सूर्यावर्त्त, कटसरैया, वीरतरु, शतावर, गोखरू, मुलेठी और प्रसारणी के द्वारा तैल सिद्ध करे। वैद्य, नीलकमल और शतावर की जड़ गौ के दूध में पकावे और इस सिद्ध दूध में बलातैल के कल्क द्रव्यों का भलीभाँति पिसा हुआ कल्क मिलाकर सौ बार तिल तैल का पाक करे। चिकित्सक को इन सभी तेलों के उपयोग और विशेष कर गुणों को, बलातैल के तुल्य समझना चाहिए ॥ ४४-४७ ॥

इत्यायुर्वेदतत्त्वसंदीपिका भाषाटीकायां पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

अथातो विद्रधीनां चिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

इसके अनन्तर विद्रधियों की चिकित्सा-विधि का वर्णन किया जारहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

उक्ता विद्रधयः षड् ये तेष्वसाध्यस्तु सर्वजः ।
शेषेष्वामेषु कर्तव्या त्वरितं शोफवत् क्रिया ॥ ३ ॥

आम विद्रधियों में व्रणशोथ की भाँति चिकित्सानिर्देश—जिन ६ प्रकार की विद्रधियों का वर्णन (निदान स्थान में) किया जा चुका है, उनमें सन्निपातज विद्रधि असाध्य होती है। शेष विद्रधियों में अपक्वावस्था में ही शोथ चिकित्सा की भांति (अपतर्पण से विरेचन तक) शीघ्र क्रिया करनी चाहिए ॥

वातघ्नमूलकल्कैस्तु घृततैलवसायुतैः ।
सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ॥ ४ ॥

सानूपौदकमांसस्तु काकोल्यादिः सतर्पणः।
स्नेहाम्लसिद्धो लवणः प्रयोज्यश्चोपनाहने ॥ ५ ॥
वेशवारैः सकृशरैः पयोभिः पायसैस्तथा।
स्वेदयेत् सतत चापि निर्हरेच्चापि शोणितम् ॥ ६ ॥

वातविद्रधि चिकित्सा—वातज विद्रधि में, वातघ्न (भद्रदार्वादिगण) द्रव्यों की जड के कल्क में घी, तेल और वसा (चर्बी) मिलाकर, सहने योग्य उष्ण तथा गाढा लेप लगाना चाहिए। उपनाह (पुलटिश) के लिए आनूप (महिष आदि) और औदक (मछली आदि) जीवों का मांस, काकोल्यादिगण के द्रव्य, धान का लावा, सेन्धा नमक मिलाकर, स्नेह (घृत, तैल, वसा, मज्जा) तथा काञ्जी के साथ सिद्ध करके, प्रयोग में लाना चाहिए। वेशवार (संस्कृत-मांसविशेष), कृशरा (तिलतण्डुलमापकृता यवागू), दूध तथा पायस (क्षीरसिद्धस्तण्डुलः पायसः) से निरन्तर स्वेदन और रक्तमोक्षण भी करना चाहिए ॥४-६॥

स चेदेवमुपक्रान्तः पाकायाभिमुखो यदि।
त पाचयित्वा शस्त्रेण भिन्द्याद्भिन्नं च शोधयेत् ॥७॥

इस प्रकार की चिकित्सा के अनन्तर भी, यदि उस विद्रधि में पाक के लक्षण उपस्थित हों, तो उसे पकाकर शस्त्र से चीरा लगाना चाहिए और चीरा लगे हुए व्रण का शोधन करना चाहिए ॥ ७ ॥

पञ्चमूलकषायेण प्रक्षाल्य लवणोत्तरैः।
तैलैर्भद्रादिमधुकसयुतैः प्रतिपूरयेत् ॥ ८ ॥

बृहत्पञ्चमूल के क्वाथ से व्रण को धोकर, भद्रदार्वादिगण के द्रव्य, मुलेठी तथा पर्याप्त लवण मिश्रित तैल से व्रण को भर देना चाहिए ॥ ८ ॥

वैरेचनिकयुक्तेन त्रैवृतेन विशोध्य च।
पृथक्पर्ण्यादिसिद्धेन त्रैवृतेन च रोपयेत् ॥ ९ ॥

विरेचक द्रव्यों के चूर्ण से युक्त (संशोधन-शमनीय अध्यायोक्त) त्रैवृत (घृत, तेल, वसा) से व्रण का शोधन कर, पृथक्पर्ण्यादिगण से सिद्ध त्रैवृत (स्नेह) के द्वारा व्रण का रोपण करना चाहिए ॥ ९ ॥

पैत्तिकं शर्करालाजामधुकैः सारिवायुतैः।
प्रदिह्यात् क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः ॥ १० ॥

पैत्तिकविद्रधि चिकित्सा-पित्तज विद्रधि में, शर्करा, धान का लावा, मुलेठी और सारिवा अथवा क्षीरकाकोली, खस, और चन्दन को दूध में पीस कर लेप लगाना चाहिए ॥ १० ॥

पाक्यैः शीतकषायैर्वा क्षीरैरिक्षुरसैस्तथा।
जीवनीयघृतैर्वाऽपि सेचयेच्छर्करायुतैः ॥ ११ ॥
त्रिवृद्धरीतकीनां च चूर्णं लिह्यान्मधुद्रवम्।
जलौकोभिर्हरेच्चासृक् पक्वं चापाट्य बुद्धिमान् ॥१२॥

उपर्युक्त औषधियों के उष्ण या शीत कषाय, दूध और गन्ने के रस से अथवा शर्करायुक्त जीवनीय गण से सिद्ध घृत के द्वारा भी परिषेक करना चाहिए। निशोथ और हरीतकी का चूर्ण मधु मिलाकर चटाना चाहिए तथा पक्व विद्रधि को चीरकर जलौका द्वारा बुद्धिमान् वैद्य को रक्त निकालना चाहिए ॥ ११-१२ ॥

क्षीरवृक्षकषायेण प्रक्षाल्यौदकजेन वा।
तिलैः सयष्टीमधुकैः सक्षीरैः सर्पिषा युतैः ॥ १३ ॥
उपदिह्य प्रतनुना वाससा वेष्टयेद् व्रणम्।

क्षीरवृक्ष (वट, गूलर आदि) अथवा औदक (कमल, कुमुद आदि) द्रव्यों के कषाय से व्रण को धोकर, मुलेठी, दुग्ध और घृत मिश्रित तिल कल्क का लेप करके, पतले कपड़े से व्रण को बांध देना चाहिए ॥ १३½ ॥

प्रपौण्डरीकमञ्जिष्ठामधुकोशीरपद्मकैः ॥ १४ ॥
सहरिद्रैः कृतं सर्पिः सक्षीरं व्रणरोपणम्।
क्षीरशुक्लापृथक्पर्णीसमङ्गारोध्रचन्दनैः ॥ १५ ॥
न्यग्रोधादिप्रवालेषु तेषां त्वक्त्वथवा कृतम्।

प्रपौण्डरीक (पुण्डेरी सुगन्ध द्रव्य), मजीठ, मुलेठी, खस, पद्माख और हल्दी के कल्क के साथ दूध से सिद्ध घृत व्रण-रोपक होता है। क्षीरविदारी, पृष्टिपर्णी, मजीठ, लोध्र, चन्दन और वट आदि के पत्ते अथवा उनके छाल से सिद्ध घृत व्रण का रोपण करता है ॥ १४-१५½ ॥

नक्तमालस्य पत्राणि तरुणानि फलानि च ॥ १६ ॥
सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा।
द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी ॥ १७ ॥
प्रियङ्गु कुशमूलं च निचुलस्य त्वगेव च।
मञ्जिष्ठाचन्दनोशीरमुत्पलं सारिवे त्रिवृत् ॥ १८ ॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्।
दुष्टव्रणप्रशमनं नाडीव्रणविशोधनम् ॥ १९ ॥
सद्यश्छिन्नव्रणानां च करञ्जाद्यमिदं शुभम्।
दुष्टव्रणाश्च ये केचिद्ये चोत्सृष्टक्रिया व्रणाः ॥ २०॥
नाड्यो गम्भीरिका याश्च सद्यश्छिन्नास्तथैव च।
अग्निक्षारकृताश्चैव ये व्रणा दारुणा अपि ॥ २१ ॥
करञ्जाद्येन हविषा प्रशाम्यन्ति न संशयः।

करञ्जादिघृत—करञ्ज के नवीन पत्ते तथा कच्चे फल, चमेली के पत्ते, परवल के पत्ते, नीम के पत्ते, हल्दी, दारुहल्दी, मोम, मुलेठी, कुटकी, प्रियगु, कुशा की जड, जलवेत की छाल, मजीठ, चन्दन, खस, कमल, सारिवा, और निशोथ एक एक कर्ष लेकर, इनके कल्क के साथ एक प्रस्थ घृत पकावे। कल्याणकारी यह करञ्जाद्यघृत दुष्ट व्रणों को शान्त तथा नाडी और सद्य छिन्न व्रणों को शुद्ध करता है। अन्य दुष्ट व्रण, असाध्यव्रण, नाडीव्रण, गम्भीरव्रण, सद्यः छिन्न व्रण, अग्नि तथा क्षारदग्ध व्रण और अन्य भयकर व्रण भी इस करञ्जाद्यघृत के प्रयोग से निस्सन्देह शान्त होते हैं ॥

इष्टकासिकतालोष्टगोशकृत्तुषपांशुभिः ॥ २२ ॥
मूत्रैरुष्णैश्च सततं स्वेदयेच्छ्लेष्मविद्रधिम्।
कषायपानैर्वमनैरालेपैरुपनाहनैः ॥ २३ ॥
हरेद्दोषानभीक्ष्णं चाप्यलाब्वाऽसृक् तथैव च।

आरग्वधकषायेण पक्वं चापाट्य धावयेत् ॥२४॥
हरिद्रात्रिवृताशक्तुतिलैर्मधुसमायुतैः।
पूरयित्वा व्रणं सम्यग्बध्नीयात् कीर्तितं यथा ॥२५॥
ततः कुलत्थिकादन्तीत्रिवृच्छ्यामार्कतिल्वकैः।
कुर्यात्तैलं सगोमूत्रं हितं तत्र ससैन्धवम् ॥२६॥

श्लैष्मिकविद्रधिचिकित्सा—कफज विद्रधि को उष्ण ईंट, बालू, पत्थर, गोबर, भूसा, धूलि और गोमूत्र से निरन्तर सेकना चाहिये। क्वाथ, वमन, आलेप और उपनाह से दोषों को तथा अलाबू से रक्त को बार बार निकालना चाहिये। पकी हुई विद्रधि को चीरकर अमलतास के क्वाथ से धोना चाहिए, तथा मधुमिश्रित हल्दी, निशोथ, सत्तू और तिल के कल्क से व्रण को भली भाँति भरकर, पूर्वोक्तविधि (वनेन वामसा श्लैष्मिक गाढनत्) के अनुसार पट्टी बाँधनी चाहिए। कुलथी, दन्ती, निशोथ, कालानिशोथ, मदार, तिल्वक, सेन्धानमक और गोमूत्र के द्वारा (कफज विद्रधि के लिए) हितकर तैल सिद्ध करना चाहिए ॥ २२-२६ ॥

पित्तविद्रधिवत् सर्वाः क्रिया निरवशेषतः।
विद्रध्यो कुशलः कुर्याद्रक्तागन्तुनिमित्तयो ॥ २७ ॥

रक्तज-आगन्तुजविद्रधिचिकित्सा—कुशल वैद्य, रक्तज और आगन्तुक विद्रधियों में, पित्तज विद्रधि की भाँति, सम्पूर्ण चिकित्साविधि का प्रयोग करे ॥ २७ ॥

वरुणादिगणक्वाथमपक्वेऽभ्यन्तरोत्थिते।
ऊषकादिप्रतीवापं पिबेन् सुखकरं नरः ॥ २८ ॥

अपक्व अन्तर्विद्रधि चिकित्सा—अपक्व अन्तर्विद्रधि में, ऊषकादिगण के प्रक्षेप से युक्त, सुख देने वाले, वरुणादिगण का क्वाथ रोगी को पिलाना चाहिए ॥ २८ ॥

अनयोर्वर्गयोः सिद्धं सर्पिर्वैरेचनेन च।
अचिराद्विद्रधिं हन्ति प्रातः प्रातर्निषेवितम् ॥ २९ ॥

इन दोनों (वरुणादि और ऊषकादिगण) वर्गों और विरेचक द्रव्यों से सिद्ध घृत, प्रतिदिन प्रातःकाल पीने से विद्रधि शीघ्र नष्ट होती है ॥ २९ ॥

एभिरेव गणैश्चापि ससिद्धं स्नेहसंयुतम्।
कार्यमास्थापनं क्षिप्रं तथैवाप्यनुवासनम् ॥ ३० ॥

इन वरुणादि, ऊषकादि और विरेचक गण के क्वाथ में तैल मिलाकर आस्थापन तथा अनुवासन वस्ति का प्रयोग भी शीघ्र करना चाहिए ॥ ३० ॥

पानालेपनभोज्येषु मधुशिग्रुद्रुमोऽपि वा।
दत्तावापो यथादोषमपक्वं हन्ति विद्रधिम् ॥ ३१ ॥

अथवा दोषानुसार पान, आलेप और भोजन में मीठे सहिजन के वृक्ष की छाल का चूर्ण मिलाकर सेवन करने से अपक्व विद्रधि नष्ट होती है ॥ ३१ ॥

तोयधान्याम्लमूत्रैस्तु पेयो वाऽपि सुरादिभिः।
यथादोषगणक्वाथैः पिबेद्वाऽपि शिलाजतु ॥ ३२ ॥
प्रधानं गुग्गुलु चापि शुण्ठीं च सुरदारु च।
स्नेहोपनाहौ कुर्याच्च सदा चाप्यनुलोमनम् ॥ ३३ ॥

अथवा जल, काञ्जी, गोमूत्र और सुरा आदि के साथ मीठे सहिजन के छाल का चूर्ण या वातादि दोषहर गण के क्वाथ के साथ शिलाजतु का सेवन करना चाहिए। सोंठ तथा देवदार मिश्रित श्रेष्ठ महिषाक्ष गुग्गुलु का भी सेवन कराना चाहिए और स्नेहन, उपनाह एवं अनुलोमन का भी सदा प्रयोग करना चाहिए ॥ ३२-३३ ॥

यथोद्दिष्टां शिरां विध्येत् कफजे विद्रधौ भिषक्।
रक्तपित्तानिलोत्थेषु केचिद्बाहौ वदन्ति तु ॥३४॥

श्लैष्मिकविद्रधि में, शिरावेध—कफज विद्रधि में, पूर्वोक्त विधि (वामपार्श्वे कक्षान्तन्योरन्यन्तरे) के अनुसार वैद्य को शिरावेध करना चाहिए। कुछ आचार्य रक्तज और पित्तज विद्रधि में, बाहु में (कूर्पर प्रदेश में) शिरावेध की अनुमति देते हैं ॥

पक्वं वा बहिरुन्नद्ध भित्त्वा व्रणवदाचरेत्।
स्नुनेपूर्व्यमधो वाऽपि मैरेयाम्लसुरासवैः ॥ ३५ ॥
पेयो वरुणकादिस्तु मधुशिग्रुद्रुमोऽपि वा।
शिग्रुमूलजले सिद्धं समिद्धार्थकमोदनम् ॥ ३६ ॥
यवकोलकुलत्थानां यूषैर्भुञ्जीत मानवः।
प्रातः प्रातश्च सेवेत मात्रया तैल्वकं घृतम् ॥ ३७ ॥
त्रिवृताद्गिणक्वाथसिद्धं वाऽप्युपशान्तये।

पक्वविद्रधिचिकित्सा—पकी हुई या बाहर की ओर उभरी हुई विद्रधि को चीर कर, व्रण के समान उपचार करना चाहिए। ऊपर या नीचे के मार्ग से फूटकर बहने वाली विद्रधि में मैरेय, काञ्जी, सुरा और आसव के साथ वरुणादि गण के द्रव्य या मीठे सहिजन के छाल का चूर्ण पीना चाहिए। सहिजन की जड़ के क्वाथ से सिद्ध सरसो युक्त भात (चावल), जौ, बेर और कुलथी के यूष के साथ रोगी को खिलाना चाहिये। अथवा प्रतिदिन प्रातःकाल विद्रधि की शान्ति के लिए अल्प मात्रा में तिल्वक घृत (वातव्याधि में पठित) या त्रिवृतादिगण के क्वाथ से सिद्ध घृत का सेवन करना चाहिए ॥

नोपगच्छेद्यथापाकं प्रयतेत तथा भिषक् ॥ ३८ ॥

विद्रधि को पाक से बचाने का निर्देश—वैद्य को ऐसा यत्न करना चाहिए कि विद्रधि में पाक न हो ॥ ३८ ॥

पर्यागते विद्रधौ तु सिद्धिर्नैकान्तिकी स्मृता।
प्रत्याख्याय तु कुर्वीत मज्जजाते तु विद्रधौ ॥ ३९ ॥
स्नेहस्वेदोपपन्नानां कुर्याद्रक्तावसेचनम्।
विद्रध्युक्तां क्रियां कुर्यात् पक्वेवाऽस्थि तु भेदयेत् ॥४०॥

मज्जागतविद्रधिचिकित्सा—विद्रधि में पाक होने पर सफलता अनिश्चित रहती है अतः मज्जागत विद्रधि की चिकित्सा असाध्य समझ कर करनी चाहिए। स्नेहन तथा स्वेदन से युक्त रोगी का रक्तमोक्षण करना चाहिए। (मज्जागत विद्रधि में) पाक होने पर विद्रधि-चिकित्सा के लिए कही गई क्रियाविधि का प्रयोग या अस्थि का भेदन करना चाहिए ॥ ३९-४० ॥

निःशल्यमथ विज्ञाय कर्तव्यं व्रणशोधनम्।
धावेत्तिक्तकषायेण तिक्तं सर्पिस्तथा हितम् ॥ ४१ ॥

विद्रधि व्रण के, शल्य (पूय आदि) रहित होने पर, व्रण का शोधन करना चाहिए, तिक्त द्रव्यों के क्वाथ से व्रण को

धोना चाहिए और तिक्त द्रव्यों के क्वाथ से सिद्ध घृत का पान करना चाहिए ॥ ४१ ॥

यदि मज्जपरिस्रावो न निवर्तेत देहिनः।
कुर्यात् संशोधनीयानि कषायादीनि बुद्धिमान् ॥४२॥

यदि रोगी की विद्रधि से मज्जा का बहना बन्द न हो तो संशोधनीय क्वाथों का प्रयोग बुद्धिमान् वैद्य को करना चाहिए॥

प्रियङ्गुधातकीरोध्रकट्फलं तिनिसैन्धवम्।
एतैस्तैलं विपक्तव्यं विद्रधिव्रणरोपणम् ॥ ४३ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने विद्रधि-चिकित्सितं नाम षोडशोऽध्यायः ॥ १६ ॥

प्रियङ्गु, धाय के फूल, लोध्र, कायफल, तिनिश (स्यन्दन) और सेन्धा नमक के साथ विद्रधि व्रण को भरने वाला तेल पकाना चाहिए ॥ ४३ ॥

इत्यायुर्वेदतत्त्वसन्दीपिकाभाषाटीकायां षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

अथातो विसर्पनाडीस्तनरोगचिकित्सितं व्याख्यास्यामः ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

विसर्प नाडी-स्तनरोग की चिकित्सा का उपक्रम—इसके अनन्तर विसर्प, नाडी और स्तन रोग की चिकित्सा विधि का वर्णन किया जा रहा है जैसा कि भगवान धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

साध्या विसर्पास्त्रय आदितो ये
न सन्निपातक्षतजौ हि साध्यौ।
साध्येषु तत्पथ्यगणैर्विदध्याद्-
घृतानि सेकांश्च तथोपदेहान् ॥ ३ ॥

विसर्प की साध्यासाध्यता एवं सामान्य चिकित्सा—प्रारम्भ के तीन विसर्प (वातज, पित्तज और कफज) साध्य तथा सन्निपातज और क्षतज विसर्प असाध्य होते हैं। साध्य विसर्पों में वातादि दोषहर गण के द्रव्यों से सिद्ध घृत, सेक और लेप का प्रयोग करना चाहिए ॥ ३ ॥

मुस्ताशताह्वासुरदारुकुष्ठवाराहिकुस्तुम्बुरुकृष्णगन्धाः।
वातात्मके चोष्णगणाः प्रयोज्याः सेकेषु लेपेषु तथा घृतेषु
यत् पञ्चमूलं खलु कण्टकाख्यमल्पंमहच्चाप्यथ वल्लिजं च।
तच्चोपयोज्यं भिषजा प्रदेहे सेके घृते चापि तथैव तैले ॥

वातज विसर्प चिकित्सा—वातज विसर्प में सौंफ, देवदारु, कूठ, वाराहीकन्द, धनियां, सहिजन, (शमीत्यपरे) और उष्णगण (भद्रदार्वादि, पिप्पल्यादि) के द्रव्यों को सेक, लेप एवं क्वाथ में तथा कण्टक पञ्चमूल, लघुपञ्चमूल, बृहत्पञ्चमूल और वल्लीपञ्चमूल को प्रदेह, सेक, घृत और तैल पाक के लिए वैद्य को प्रयुक्त करना चाहिए ॥

कसेरुशृङ्गाटकपद्मगुन्द्राः सशैवलाः सोत्पलकर्दमाश्च।
वस्त्रान्तराः पित्तकृते विसर्पे लेपा विधेयाः सघृताः सुशीताः
ह्रीवेरलामज्जकचन्दनानि स्रोतोजमुक्तामणिगैरिकाश्च ॥
क्षीरेण पिष्टाः सघृताः सुशीता लेपाः प्रयोज्यास्तनवः सुखाय

पित्तज विसर्प चिकित्सा—पित्तज पिसर्प में, व्रण पर वस्त्र रख कर, कसेरु, सिंघाड़ा, कमल, भद्रमुस्ता, सेवार तथा कमल युक्त कीचड़ का घृत मिश्रित शीतल लेप लगाना चाहिए। विसर्प में सुख पहुचाने के लिए सुगन्धवाला, लामज्जकतृण, चन्दन, सौवीराञ्जन, मुक्ता, मणि और गेरू को दूध में पीस कर, घृत मिलावे तथा शीतल पतला लेप करे ॥ ६-७ ॥

प्रपौण्डरीकं मधुकं पयस्या मञ्जिष्ठिका पद्मकचन्दने च
सुगन्धिका चेति सुखाय लेपः पैत्ते विसर्पे भिषजा प्रयोज्यः
न्यग्रोधवर्गैः परिषेचनं च घृतं च कुर्यात् स्वरसेन तस्य।
शीतैः पयोभिश्च मधूदकैश्च सशर्करैरिक्षुरसैश्च सेकान् ॥

पुण्डेरी, मुलेठी, क्षीरविदारी, मजीठ, पद्माख, चन्दन और उत्पल सारिवा के लेप का प्रयोग, पित्तज विद्रधि में सुख पहुचाने (दाहशान्ति) के लिए वैद्य को करना चाहिए। वटादि वर्ग के क्वाथ से परिषेक तथा इनके स्वरस से सिद्ध घृत, शीतल दूध, मधु-मिश्रित जल, शर्बत और गन्ने के रस के द्वारा सेक (Cold compress) करना चाहिए ॥

घृतस्य गौरीमधुकारविन्दरोध्राम्बुराजादनगैरिकेषु।
तथार्षभे पद्मकसारिवासु काकोलिमेदाकुमुदोत्पलेषु ॥
सचन्दनायां मधुशर्करायां द्राक्षास्थिरापृश्निशताह्वयासु ॥
कल्कीकृतासूदकमत्र दत्त्वा न्यग्रोधवर्गस्य तथा स्थिरादेः
गणस्य बिल्वादिकपञ्चमूल्याश्चतुर्गुणं क्षीरमथापि तद्वत्।
प्रस्थं विपक्वं परिषेचनेन पैत्तीर्निहन्यात्तु विसर्पनाडीः ॥

विस्फोटदुष्टव्रणशीर्षरोगान्
पाकं तथाऽऽस्यस्य निहन्ति पानात्।
ग्रहार्दिते शोषिणि चापि बाले घृतं हि गौर्यादिकमेतदिष्टम्

पित्तजविसर्प में गौर्यादि घृत—हल्दी, मुलेठी, लालकमल, लोध्र, सुगन्धवाला, खिरनी, गेरू, ऋषभक, पद्माख, सारिवा, काकोली, मेदा, श्वेतकमल, नीलकमल, चन्दन, मधु की शर्करा, मुनक्का, शालपर्णी, पृष्टिपर्णी और सौंफ के कल्क के साथ, वटादिवर्ग, विदारिगन्धादि गण तथा बृहत्पञ्चमूल के चतुर्गुण क्वाथ एवं चतुर्गुण दूध के साथ एक प्रस्थ घृत का पाक किया जावे। इस घृत के परिषेक से विसर्प और नाडी व्रण तथा पीने से विस्फोट, दुष्ट व्रण, शीर्ष रोग (ऊर्ध्वजत्रुगत रोग) और मुखपाक नष्ट होता है। यह गौर्यादि घृत-ग्रह ग्रसित और शोष से पीडित बालक के लिए भी हितकर है ॥ १०-१३ ॥

अजाऽश्वगन्धा सरला सकाला
सैकैपिका चाप्यथवाऽजशृङ्गी।
गोमूत्रपिष्टो विहितः प्रदेहो हन्याद्विसर्पं कफजं सुशीघ्रम् ॥
कालानुसार्यागुरुचोचगुञ्जारास्नावचाशीतशिवेन्द्रपर्ण्यः।
पालिन्दिमुञ्जातमहीकदम्बा हिता विसर्पेषु कफात्मकेषु ॥

के बीज और पुष्प का चूर्ण, लाक्षादिगण के क्वाथ से स्वच्छ किए गए नाडीव्रणों पर छिड़कना चाहिए ॥ ३६ ॥

तथा च गोमांसमसीं हिताय
कोष्ठाश्रितस्यादरतो दिशन्ति ।
वर्तीकृतं माक्षिकसंप्रयुक्तं
नाडीव्रणमुक्तं लवणोत्तमं वा ॥ ३७ ॥
दुष्टव्रणे यद्विहितं च तैलं
तत्सर्वनाडीषु भिषग्विदध्यात् ॥ ३८ ॥
चूर्णीकृतैरथ विमिश्रितमेभिरेव
तैलं प्रयुक्तमचिरेण गतिं निहन्ति ॥३९॥

इसी प्रकार कोष्ठगत नाडीव्रणों को नष्ट करने के लिए, गोमांस को जलाकर बनाई गई राख (क्षार) को अत्यन्त हितकर कहा गया है। अथवा सेन्धा नमक में मधु मिला कर बनाई गई वर्ति नाडीव्रण के लिए हितकर है दुष्ट व्रणों की चिकित्सा के लिए जिस तैल (द्रवन्ती, चिरबिल्व आदि द्रव्यों से सिद्ध) का वर्णन किया गया है, उसका प्रयोग सभी नाडीव्रणों में वैद्य को करना चाहिए। उपर्युक्त द्रव्यों का चूर्ण तेल में मिला कर प्रयोग करने से नाडीव्रण शीघ्र नष्ट होता है ॥ ३७-३९ ॥

एष्वेव मूत्रसहितेषु विधाय तैलं
तत् साधितं गतिमपोहति सप्तरात्रात् ।
पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवहेषु ॥
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवरायुधसाह्वयेषु ॥ ४० ॥

नावाक्शिरा शयीत, न भिन्नपात्रे भुञ्जीत, न विना पात्रेण, नाञ्जलिपुटेनापः पिवेत्, काले हितमितस्निग्धमधुरप्रायमाहार वैद्यप्रत्यवेक्षितमश्नीयात्, ग्रामगणगणिकापणिकशत्रुसत्रशठपतितभोजनानि परिहरेत्, शेषाण्यपि चानिष्टरूपरसगन्धस्पर्शशब्दमानसानि, अन्यान्येवंगुणान्यपि सभ्रमदत्तानि, (तान्यपि) मक्षिकावालोपहतानि, नाप्रक्षालितपाणिपादो भुञ्जीत, न मूत्रोच्चारपीडित, न सन्ध्ययोर्नानुपाश्रितो नातीतकालं हीनमतिमात्रं (नोद्धृतस्नेहं) चेति ॥ ९८ ॥

मुख के बल नहीं सोना चाहिये। फूटे हुए पात्र तथा बिना पात्र के भोजन नहीं करना चाहिये। अञ्जलि से पानी नहीं पीना चाहिये। समय पर वैद्य द्वारा परीक्षित, हितकर, अल्प, स्निग्ध और मधुर रस प्रधान आहार खाना चाहिये। ग्रामभोज तथा गण (रथकार, चारण आदि), गणिका (वेश्या), पणिक (दूकानदार), शत्रु, सत्र (यज्ञ), शठ (दुर्जन) और पतित (धर्मभ्रष्ट) के अन्न का परित्याग करना चाहिये। इनके अतिरिक्त अन्य शेष अप्रिय रूप, रस, गन्ध, स्पर्श तथा शब्द से युक्त मनुष्यों का भोजन भी नहीं करना चाहिये। प्रिय रूप, रस, गन्ध आदि से युक्त व्यक्तियों के द्वारा घबडाहट में दिया गया भोजन भी परित्याग देना चाहिये। मक्खी और बाल गिरे हुए पदार्थों को भी त्याग देना चाहिये। हाथ, पैर धोये बिना भोजन नहीं करना चाहिये। मूत्र मल के वेग को धारण किये हुए, सन्ध्या समय, आसन पर बिना बैठे, भोजन का समय बिताकर, तथा बहुत अल्प और बहुत अधिक (घृतरहित) भोजन नहीं करना चाहिये ॥ ९८ ॥

न भुञ्जीतोद्धृतस्नेहं नष्टं पर्युषितं पयः।
न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ॥ ९९ ॥
नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना।
अन्यथा जनयेत् कुष्ठविसर्पादीन् गदान् बहून् ॥
नात्मानमुदके पश्येन्न नग्न प्रविशेज्जलम् ॥ १०० ॥

घी निकाला हुआ, फटा हुआ तथा बासी दूध नहीं पीना चाहिये। घी, शक्कर, मूँग का यूष, मधु, उष्ण द्रव्य या आँवला मिलाये बिना रात्रि में दही नहीं खाना चाहिये। अन्यथा कुष्ठ, विसर्प आदि अनेक रोगों की उत्पत्ति होती है। जल में अपनी छाया नहीं देखनी चाहिये तथा नग्न होकर जल में प्रवेश नहीं करना चाहिये ॥ ९९-१०० ॥

द्यूतमद्यातिसेवाप्रतिभूत्वसमाह्वानगोष्ठीवादित्राणि न सेवेत, स्रजं छत्रोपानहौ कनकमतीतवासांसि न चान्यैर्धृतानि धारयेत्, ब्राह्मणमग्निं गां च नोच्छिष्टः स्पृशेत् ॥ १०१

जुआ, अधिक मद्यपान, प्रतिभू (जमानतदारी), समाह्वान (गप्प लडाना), गोष्ठी (सभा) और वादित्र (ढोल, मृदङ्ग आदि बजाना) नहीं करना चाहिये। माला, छाता, जूता, स्वर्ण और पुराने वस्त्र, दूसरे व्यक्ति के धारण किये हुए नहीं पहनना चाहिये। ब्राह्मण, अग्नि और गौ को जूठे हाथ से नहीं छूना चाहिये ॥ १०१ ॥

भवन्ति चात्र—

यस्मिन् यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनाम्।
तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ १०२ ॥

ऋतुभेद से पीने योग्य रसों का निर्देश—जैसे कि-मनुष्यों के जो जो दोष जिस जिस ऋतु में प्रकुपित होते हैं, उनमें तदनुकूल रसों का सेवन बुद्धिमान् वैद्य को कराना चाहिए ॥

वर्षासु न पिवेत्तोयं पिवेच्छरदि मात्रया।
वर्षासु चतुरो मासान् मात्रावदुदकं पिवेत् ॥ १०३ ॥

वर्षा और शरद् ऋतु में थोडा जल (न पिवेत् ईषत् पिवेदित्यर्थः) पीना चाहिए। वर्षा के चार मास (आषाढ,

श्रावण, भाद्र, आश्विन) में मात्रापूर्वक (मात्राशब्दोऽल्पवचनः) अर्थात् अल्प जल पीना चाहिए ॥ १०३ ॥

उष्णं हैमे वसन्ते च कामं ग्रीष्मे तु शीतलम् ।
हेमन्ते च वसन्ते च सीध्वरिष्टौ पिबेन्नरः ॥ १०४ ॥

हेमन्त और वसन्त ऋतुओं में उष्ण तथा ग्रीष्म ऋतु में पर्याप्त शीतल जल पीना चाहिए। हेमन्त और वसन्त ऋतुओं में मनुष्यों को सीधु तथा अरिष्ट पान करना चाहिये ॥

शृतशीतं पयो ग्रीष्मे प्रावृट्काले रसं पिबेत् ।
यूषं वर्षति, तस्यान्ते प्रपिबेच्छीतलं जलम् ॥१०५॥

ग्रीष्म ऋतु में उष्ण जल शीतल करके तथा प्रावृट्काल में मांसरस पीना चाहिये। वर्षा ऋतु में यूष तथा उसके अन्त में शीतल जल पीना चाहिए ॥ १०५ ॥

स्वस्थ एवमतोऽन्यस्तु दोषाहारगतानुगः ।
स्नेहं सैन्धवचूर्णेन पिप्पलीभिश्च संयुतम् ॥ १०६ ॥
पिबेदग्निविवृद्ध्यर्थं न च वेगान् विधारयेत् ।
अग्निदीप्तिकरं नृणां रोगाणां शमनं प्रति ॥ १०७ ॥
प्रावृट् शरद्वसन्तेषु सम्यक् स्नेहादिमाचरेत् ॥

स्वस्थ मनुष्य को उपर्युक्त विधि से तथा अस्वस्थ को दोष और आहार के अनुसार जलपान करना चाहिये। अग्नि की वृद्धि करने के लिए सेन्धानमक तथा पिप्पल का चूर्ण मिलाकर स्नेहपान करना चाहिये और मल-मूत्रादि के वेगों का धारण नहीं करना चाहिये। मनुष्यों की अग्नि वृद्धि तथा रोगों का शमन करने के लिए प्रावृट्, शरद् और वसन्त ऋतुओं में भली भाँति स्नेहपान कराना चाहिए ॥

कफे प्रच्छर्दनं पित्ते विरेको बस्तिरीरणे ॥ १०८ ॥
शस्यते त्रिष्वपि सदा व्यायामो दोषनाशनः ।
भुक्तं विरुद्धमप्यन्नं व्यायामान्न प्रदुष्यति ॥ १०९ ॥

त्रिदोष के शमन में व्यायाम का महत्त्व—कफ में वमन, पित्त में विरेचन और वायु में वस्ति तथा तीनों दोषों के शमन के लिए दोषनाशक व्यायाम का सेवन, सदा हितकर होता है। व्यायाम करने से खाया हुआ विरुद्ध अन्न भी दूषित नहीं होता अर्थात् उसका भी पाचन हो जाता है ॥ १०८–१०९ ॥

उत्सर्गमैथुनाहारशोधने स्यात्तु तन्मनाः ।
नेच्छेद्दोषचयात् प्राज्ञः पीडां वा कायमानसीम् ॥

मल-मूत्र के त्याग, मैथुन, भोजन और शोधन (वमन-विरेचन) काल में, उसी में दत्त-चित्त रहना चाहिए। बुद्धिमान् मनुष्य को दोष-संचय के भय मात्र से ही, शरीर और मन को पीडित नहीं करना चाहिए ॥ ११० ॥

अतिस्त्रीसंप्रयोगाच्च रक्षेदात्मानमात्मवान् ।
शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयाः ॥ १११ ॥
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ।

अधिक मैथुन के दोष—संयमी मनुष्य को अधिक स्त्री-प्रसङ्ग से बचना चाहिये। शूल, कास, ज्वर, श्वास, दुर्बलता, पाण्डुरोग, क्षय और आक्षेपक आदि व्याधियाँ, अधिक मैथुन से उत्पन्न होती हैं ॥ १११ ॥

आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ॥ ११२ ॥
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ।

स्त्री-प्रसङ्ग में संयमी पुरुष, आयुष्मान्, देर में बुड्ढे होने वाले, शरीर शोभा, वर्ण और बल से युक्त तथा कठिन और स्थिर मांसपेशियों वाले होते हैं ॥ ११२ ॥

त्रिभिस्त्रिभिरहोभिर्वा समीयात् प्रमदां नरः ॥ ११३ ॥
सर्वेष्वृतुषु, घर्मेषु पक्षात् पक्षाद्व्रजेद् बुधः ।

सभी ऋतुओं में तीन-तीन दिन के अन्तर पर तथा ग्रीष्म ऋतु में पन्द्रह दिन के अन्तर से बुद्धिमान् को स्त्री-संभोग करना चाहिये ॥ ११३ ॥

रजस्वलामकामां च मलिनामप्रियां तथा ॥ ११४ ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीडिताम् ।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम् ॥११५॥
सगोत्रां गुरुपत्नीं च तथा प्रव्रजितामपि ।
सन्ध्यापर्वस्वगम्यां च नोपेयात् प्रमदां नरः ॥११६॥

रजस्वला, मैथुन से अनिच्छा वाली, मलिन, अप्रिय, ऊँचे वर्ण की, वयोवृद्ध, रोग से पीड़ित, अङ्गहीन, गर्भवती, द्वेष रखने वाली, योनि रोग से युक्त, समान गोत्र वाली, गुरुपत्नी, संन्यासिनी, तथा अगम्या (मैथुन के अयोग्य पुत्री, सास आदि) स्त्रियों के साथ एवं संध्याकाल और पर्व के दिन मनुष्य को सम्भोग नहीं करना चाहिये ॥११४–११६॥

गोसर्गे चार्धरात्रे च तथा मध्यन्दिनेषु च ।
लज्जासमावहे देशे विवृतेऽशुद्ध एव च ॥ ११७ ॥
क्षुधितो व्याधितश्चैव क्षुब्धचित्तश्च मानवः ।
वातविण्मूत्रवेगी च पिपासुरतिदुर्बलः ॥ ११८ ॥
तिर्यग्योनावयोनौ च प्राप्तशुक्रविधारणम् ।
दुष्टयोनौ विसर्गं तु बलवानपि वर्जयेत् ॥ ११९ ॥

प्रातःकाल, अर्द्धरात्रि और मध्याह्न में तथा लज्जा अनुभव होने वाले खुले हुए और अशुद्ध स्थान में, एव भूखे, रोगी, दुखी, वायु, मल और मूत्र के वेग से युक्त प्यासे और अत्यन्त दुर्बल मनुष्य को, स्त्री-प्रसग नहीं करना चाहिये। तिर्यग्योनि (पशुयोनि) एवं अयोनि (मुख आदि) में मैथुन तथा शुक्रवेग का धारण (रोकना) नहीं करना चाहिये। बलवान् व्यक्ति को भी, दूषित योनि में शुक्र त्याग नहीं करना चाहिये ॥ ११७–११९ ॥

रेतसश्चातिमात्रं तु मूर्धावरणमेव च ।
स्थितावुत्तानशयने विशेषेणैव गर्हितम् ॥ १२० ॥
क्रीडायामपि मेवावी हितार्थी परिवर्जयेत् ।

शुक्र का अत्यधिक त्याग और शिश्नमुण्ड का आवरण करना (रगडना या खोली चढ़ाना) तथा खडे होकर एवं चित्त लेटकर शुक्र त्याग करना विशेष निन्दनीय है। बुद्धिमान् और अपना हित चाहने वाले व्यक्ति को खेल में भी शुक्र-त्याग नहीं करना चाहिये ॥ १२० ॥

रजस्वलां प्राप्नवतो नरस्यानियतात्मनः ॥ १२१ ॥
दृष्ट्वायुस्तेजसां हानिरधर्मश्च ततो भवेत् ।

असयमी पुरुष को रजस्वला स्त्री के साथ संभोग करने

पर, उसकी दृष्टि, आयु और तेज की हानि तथा अधर्म की प्राप्ति होती है ॥ १२१ ॥

लिङ्गिनीं गुरुपत्नीं च सगोत्रामथ पर्वसु ॥ १२२ ॥
वृद्धां च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः ।

संन्यासिनी, गुरुपत्नी, समान गोत्र वाली और वृद्धा स्त्री के साथ तथा पर्व और संन्ध्याकाल में सम्भोग करने से जीवन का क्षय होता है ॥ १२२ ॥

गर्भिण्या गर्भपीडा स्याद् व्याधितायां बलक्षयः ॥
हीनाङ्गीं मलिनां द्वेष्यां कामं बन्ध्यामसंवृते ।
देहेऽशुद्धे च शुक्रस्य मनसश्च क्षयो भवेत् ॥ १२४ ॥
क्षुधितः क्षुब्धचित्तश्च मध्याह्ने तृषितोऽबलः ।
स्थितैश्च हानिं शुक्रस्य वायोः कोपं च विन्दति ॥

गर्भवती के साथ सम्भोग करने पर गर्भ को पीड़ा और रोगिणी के साथ बल का नाश होता है। हीन अङ्गों वाली, मलिन, द्वेष रखने वाली, कामवासनारहित, ('कामबन्ध्याम्' इति हाराणचन्द्रः) खुले प्रदेश में तथा अशुद्ध शरीर वाली स्त्री के साथ सम्भोग करने से, शुक्र का क्षय एवं मन में ग्लानि होती है। भूखे और दुखी, मध्याह्न काल में, प्यासे, निर्बल अवस्था में तथा बैठकर सम्भोग करने से, शुक्र नाश एवं वायु का प्रकोप होता है ॥ १२३–१२५ ॥

अतिप्रसङ्गाद्भवति शोषः शुक्रक्षयावहः ।
व्याधितस्य रुजा प्लीहि मृत्युर्मूर्च्छा च जायते ॥

अधिक स्त्री-प्रसङ्ग करने से शुक्रक्षयजन्य शोष की उत्पत्ति होती है। रोगी व्यक्ति के सम्भोग करने पर पीडा, प्लीहा वृद्धि मूर्च्छा एवं मृत्यु होती है ॥ १२६ ॥

प्रत्यूषस्यर्धरात्रे च वातपित्ते प्रकुप्यतः ।
तिर्यग्योनावयोनौ च दुष्टयोनौ तथैव च ॥ १२७ ॥
उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ।

प्रातःकाल और आधी रात में स्त्री-सम्भोग करने पर वायु तथा पित्त का प्रकोप होता है। तिर्यग्योनि (पशुओं की योनि), अयोनि (मुख मैथुन आदि) तथा दूषितयोनि में शुक्र त्याग करने से उपदंश रोग, वात प्रकोप और शुक्र का क्षय होता है ॥ १२७ ॥

उच्चारिते मूत्रिते च रेतसश्च विधारणे ॥ १२८ ॥
उत्ताने च भवेच्छीघ्रं शुक्राश्मर्यास्तु सम्भवः ।
सर्वं परिहरेत्तस्मादेतल्लोकद्वयेऽहितम् ॥ १२९ ॥
शुक्रं चोपस्थितं मोहान्न सन्धार्यं कथञ्चन ।

मल मूत्र के उपस्थित वेग के समय तथा चित्त लेटकर, शुक्र के वेग को रोकने से, शुक्राश्मरी की उत्पत्ति शीघ्र होती है। इसलिये इहलोक तथा परलोक दोनों के लिए अहितकर, इन सभी कार्यों का परित्याग करना चाहिए तथा मोह (अज्ञान) के वशीभूत होकर, उपस्थित शुक्र-वेग को कभी नहीं रोकना चाहिए ॥ १२८–१२९ ॥

वयोरूपगुणोपेतां तुल्यशीलां कुलान्विताम् ॥ १३० ॥
अभिकामोऽभिकामां तु हृष्टो हृष्टामलङ्कृताम् ।
सेवेत प्रमदां युक्त्या वाजीकरणवृंहितः ॥ १३१ ॥

वाजीकरण विधि के द्वारा शक्तिसम्पन्न, रति का इच्छुक और प्रसन्न मनुष्य को, आयु, रूप और गुण से युक्त, समान स्वभाव वाली, गुणशीला, कामवासना सहित, प्रसन्न और अलङ्कारवती रमणी का सेवन, युक्तिपूर्वक करना चाहिये ॥

भक्ष्याः सशर्कराः क्षीरं ससितं रस एव च ।
स्नानं सव्यजनं स्वप्नो व्यवायान्ते हितानि तु ॥१३२॥

मैथुन के अन्त में, शर्करा मिश्रित भोजन, मिश्री मिला दूध और मांसरस तथा स्नान, पंखे से वायु सेवन एवं निद्रा लेना हितकर होता है ॥ १३२ ॥

मुखमात्रं समासेन सद्वृत्तस्यैतदीरितम् ।
आरोग्यमायुरर्थो वा नासद्भिः प्राप्यते नृभिः ॥१३३॥

इति सुश्रुतसंहितायां चिकित्सास्थानेऽनागताबाध-चिकित्सितं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

सद्वृत्त का उपसंहार—सद्वृत्त की इन प्रधान बातों का संक्षेप में कथन किया गया है। आचाररहित मनुष्य आयु, आरोग्य या धन नहीं प्राप्त कर सकते ॥ १३३ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाटीकायां चतुर्विंशोऽध्यायः ॥२४॥

पञ्चविंशतितमोऽध्यायः

अथातो मिश्रकचिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

मिश्रक चिकित्सा का उपक्रम—इसके अनन्तर मिश्रक चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १–२ ॥

पाल्यामयास्तु विस्राव्या इत्युक्तं प्राङ्निबोध तान् ।
परिपोटस्तथोत्पात उन्मन्थो दुःखवर्धनः ॥ ३ ॥
पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः ।

कर्णपाली के रोगों की संख्या तथा नाम—कर्णपाली के रोग विस्रावण के योग्य होते हैं, यह पहले कहा जा चुका है, उनका वर्णन सुनो। कर्णपाली-रोग पाँच प्रकार के होते हैं—(१) परिपोट (२) उत्पात (३) उन्मन्थ (४) दुःख वर्धन और (५) परिलेही ॥ ३ ॥

सौकुमार्यादिरोत्सृष्टे सहसाऽभिप्रवर्धिते ॥ ४ ॥
कर्णशोफो भवेत् पाल्यां सरुजः परिपोटवान् ।
कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः ॥५॥

परिपोट के लक्षण—सुकुमारता के कारण बहुत दिनों से छोडे हुए, कान की लोर (कर्णपाली) के छिद्रों को सहसा बढ़ाने से, कर्णपाली में पीडा तथा परिपोटयुक्त (कुछ फटा हुआ) शोथ हो जाता है, उसे परिपोट कहते हैं। वायु के द्वारा उत्पन्न यह परिपोट काला, लाल और स्तब्ध (जकडा हुआ) होता है ॥ ४–६ ॥

गुर्वाभरणसंयोगात्ताडनाद्धर्षणादपि ।
शोफः पाल्यां भवेच्छ्यावो दाहपाकरुगन्वितः ॥६॥

लोपाकानूपमज्जानं वसां तैलं नवं घृतम् ।
पचेद्दशगुणं क्षीरमावाप्य मधुरं गणम् ॥ २५ ॥
अपामार्गाश्वगन्धे च तथा लाक्षारस शुभम् ।
तत्सिद्धं परिपूतं च स्वनुगुप्तं निधापयेत् ॥ २६ ॥
तेनाभ्यञ्जयात् सदा पालीं सुस्विन्नामतिमर्दिताम् ।
एतेन पाल्यो वर्धन्ते निरुजो निरुपद्रवाः ॥
मृद्व्यः पुष्टाः समाः स्निग्धा जायन्ते भूषणक्षमाः ॥२७॥

कर्णपालीवर्धन तैल—श्रृगाल (या लोमडी) और आनूप जीवों की मज्जा, वसा, तैल एव नवीन घृत को दशगुने दूध के द्वारा काकोल्यादि गण के द्रव्य, अपामार्ग, अश्वगन्ध और लाक्षारस प्रक्षेप के साथ पकाना चाहिये तथा पाक सिद्ध होने पर, छान कर सुरक्षित स्थान में रखना चाहिए। भली भाँति स्वेदित और मर्दित कर्णपाली में सदा इससे अभ्यंग करना चाहिए। इसके प्रयोग से वेदना और उपद्रव के बिना पालियाँ बढ़ती है तथा कोमल, पुष्ट, सम, स्निग्ध एवं आभूषण धारण करने योग्य होती है ॥ २५–२७ ॥

नीलीदल भृङ्गरजोऽर्जुनत्वक्
पिण्डीतकं कृष्णमयोरजश्च ।
बीजोद्भव साहचरं च पुष्प
पथ्याक्षधात्रीसहितं विचूर्ण्य ॥ २८ ॥
एकीकृतं सर्वमिद प्रमाय
पङ्क्तेन तुल्यं नलिनीभवेन ।
संयोज्य पक्ष कलशे निधाय
लौहे घटे सद्मनि सापिधाने ॥ २९ ॥
अनेन तैलं विपचेद्विमिश्र
रसेन भृङ्गत्रिफलाभवेन ।
आसन्नपाके च परीक्षणार्थं
पत्रं बलाकाभवमाक्षिपेच्च ॥ ३० ॥
भवेद्यदा तद्भ्रमराङ्गनील
तदा विपक्वं विनिधाय पात्रे ।
कृष्णायसे मासमवस्थितं त-
दभ्यङ्गयोगात् पलितानि हन्यात्॥ ३१ ॥

पलित रोग में नीलीतैल—नीलीदल (नील का पत्ता), भंगरैया, अर्जुन की छाल, मैनफल, कृष्ण लोहचूर्ण, विजयसार और सहचर के फूल तथा हरड, बहेडा आवले का एक साथ चूर्ण बनाकर, तौल लिया जावे और इसके समान कमल की जड का कींचड़ मिलाकर, लोहे के ढक्कन युक्त घडे में, पन्द्रह दिन घर के अन्दर रखा जावे। पन्द्रह दिन के पश्चात् उसमें तैल मिलाकर, भृगराज और त्रिफला स्वरस के द्वारा, पाक किया जावे। पाक सिद्धि की परीक्षा के लिए बगुला का पंख तैल में छोडना चाहिए, जब वह पख भौंरे के समान नील वर्ण का (काला) हो जाय, तब तैल को पका हुआ समझ कर, काले लोह के पात्र में एक मास तक रखना चाहिए। इस तैल के मर्दन से पलित रोग नष्ट होता है ॥ २८–३१ ॥

सैरीयजम्ब्वर्जुनकाश्मरीजं
पुष्पं तिलान्मार्कवचूतबीजे ।
पुनर्नवे कर्दमकण्टकार्यौ
कासीसपिण्डीतकबीजसारम् ॥ ३२ ॥
फलत्रयं लोहरजोऽञ्जनं च
यष्ट्याह्वयं नीरजसारिवे च ।
पिष्ट्वाऽथ सर्वं सह मोदयन्त्या
सारम्भसा वीजकसंभवेन ॥ ३३ ॥
सारम्भसा सप्तभिरेव पश्चात
प्रस्थैः समालोड्य दशाहगुप्तम् ।
लौहे सुपात्रे विनिधाय तैल-
मक्षोद्भवं तच्च पचेत् प्रयत्नात् ॥ ३४ ॥
पक्वं च लौहेऽभिनवे निधाय
नस्यं विदध्यात् परिशुद्धकायः ।
अभ्यङ्गयोगैश्च नियुज्यमानं
भुञ्जीत मापान् कृशरामथो वा ॥ ३५ ॥
मासोपरिष्टाद्वनकुञ्चिताग्राः
केशा भवन्ति भ्रमराञ्जनाभाः ।
केशास्तथाऽन्ये खलतौ भवेयु-
र्जरा न चैनं सहसाऽभ्युपैति ॥ ३६ ॥
बलं परं सभवतीन्द्रियाणां
भवेच्च वक्त्रं वलिभिर्विमुक्तम् ।
नाकामिनेऽनर्थिनि नाकृताय
नैवारये तैलमिदं प्रदेयम् ॥ ३७ ॥

केश को काला करने के लिए सैरीयकादि तैल—सैरीय (कटसरैया), जामुन, अर्जुन और गम्भारी के फूल, तिल, भंगरैया, आम की गुठली, श्वेत पुनर्नवा, रक्त पुनर्नवा, कमल के जड की कीचड़, बडी कटेरी, छोटी कटेरी, कासीस, मैनफल, विजयसार, त्रिफला, लोहचूर्ण, रसाञ्जन, मुलेठी, नीलकमल, सारिवा और मल्लिका को विजयसार के क्वाथ से पीसकर, सात प्रस्थ विजयसार के क्वाथ में घोलना चाहिए और लोहपात्र में रखकर, दस दिन सुरक्षित स्थान में रखना चाहिए। फिर इसमें बहेडे का तेल मिलाकर यत्न पूर्वक पाक करके सिद्ध तैल को नवीन लोह पात्र में रखना चाहिये। वमन-विरेचनादि से शुद्ध शरीर वाले रोगी को, इस तैल का नस्य और मर्दन करना चाहिए तथा इस अवधि में उडद या खिचडी खानी चाहिए। एक माम तक इसका सेवन करने से केश घने, घुंघराले तथा भौंरे और अञ्जन के समान काले हो जाते हैं। इसका सेवन करने वाले व्यक्तिको पलित (बालों का असमय सफेद होना) और खलित (खल्वाट) रोग नहीं होते तथा वृद्धावस्था शीघ्र आक्रमण नहीं करती। इन्द्रियाँ शक्ति-सम्पन्न बनती हैं एवं मुख की झुर्रियाँ मिट जाती हैं। अनिच्छुक, आवश्यकता रहित, कृतघ्न तथा शत्रु को यह तैल नहीं देना चाहिए ॥ ३२–३७ ॥

लाक्षा रोध्रं द्वे हरिद्रे शिलाले
कुष्ठं नागं गैरिका वर्णकाश्च ।

मञ्जिष्ठोशीरा स्यात् सुराष्ट्रोद्भवा च
पत्तङ्गं वै रोचना चाञ्जनं च ॥ ३८ ॥
हेमाङ्गत्वक् पाण्डुपत्रं वटस्य
कालीयं स्यात् पद्मकं पद्ममध्यम् ।
रक्तं श्वेतं चन्दनं पारदं च
काकोल्यादिः क्षीरपिष्टश्च वर्गः ॥ ३९ ॥
मेदो मज्जा सिक्थकं गोघृतं च
दुग्धं क्वाथः क्षीरिणां च द्रुमाणाम् ।
एतत् सर्वं पक्वमेकैकशस्तु
वक्त्राभ्यङ्गे सर्पिरुक्तं प्रधानम् ॥ ४० ॥
हन्याद् व्यङ्गं नीलिकां चातिवृद्धां
वक्त्रे जाताः स्फोटिकाश्चापि काश्चित् ।
पद्माकारं निर्वलीकं च वक्त्रं
कुर्यादेतत् पीनगण्डं मनोज्ञम् ॥ ४१ ॥
राज्ञामेतद्योषितां चापि नित्यं
कुर्याद्वैद्यस्तत्समानां नृणां च ।
कुष्ठघ्नं वै सर्पिरेतत् प्रधानं
येषां पादे सन्ति वैपादिकाश्च ॥ ४२ ॥

मुख पर मर्दन करने के लिये घृत—लाख, लोध्र, हल्दी, दारुहल्दी, मैनशिल, हरिताल, कूठ, नागकेशर, गेरु, वर्णक (कचीला), मजीठ, वच, सौराष्ट्री मिट्टी, पतंग, गोरोचन, स्रोताञ्जन, अमलतास की छाल, वरगद के पके पत्ते, पीत चन्दन, पद्माख, कमलगट्टा, लालचन्दन, श्वेतचन्दन, पारद, दूध में पिसे हुए काकोल्यादिगण के द्रव्य, मेद, मज्जा, मोम, और गोघृत को गोदुग्ध तथा क्षीरीवृक्षों क्वाथ के द्वारा पकाना चाहिए। मुख में मालिश करने के लिए यह घृत उत्तम होता है। इसके सेवन से व्यंग, बहुत बढ़ी हुई नीलिका, तथा मुख में निकले हुए किसी प्रकार के फफोले नष्ट होते हैं। मुख कमल के समान, झुर्री रहित भरा हुआ तथा सुन्दर हो जाता है। राजा, स्त्री तथा इनके समान अन्य पुरुषों के लिये इस घृत का प्रयोग वैद्य को नित्य कराना चाहिए। यह घृत कुष्ठनाशक एवं विपादिका से पीडित व्यक्तियों के लिए हितकर होता है ॥ ३८-४२ ॥

हरीतकीचूर्णमरिष्टपत्रं
चूतत्वचं दाडिमपुष्पवृन्तम् ।
पत्रं च दद्यान्मदयन्तिकाया
लेपोऽङ्गरागो नरदेवयोग्यः ॥ ४३ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने मिश्रकचिकित्सितं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

राजाओं के योग्य अङ्गराग—हरीतकी चूर्ण, नीम के पत्ते, आम की छाल, अनार की कली और मेहदी के पत्ते के द्वारा बनाया गया अंगराग राजाओं के योग्य होता है ॥ ४३ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाटीकायां पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशतितमोऽध्यायः

अथातः क्षीणबलीयं वाजीकरणचिकित्सितं व्याख्यास्यामः
यथोवाच भगवान् धन्वन्तरिः ॥ १ ॥

क्षीणबलवालों के लिये वाजीकरण-चिकित्सा का उपक्रम—इसके अनन्तर हीनशक्ति व्यक्तियों के लिए वाजीकरण चिकित्सा-विधि का वर्णन किया जा रहा है, जैसाकि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

कल्यस्योदग्रवयसो वाजीकरणसेविनः ।
सर्वेष्वृतुष्वहरहर्व्यवायो न निवारितः ॥ ३ ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीबानामल्परेतसाम् ॥ ४ ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नृणां च बहुभार्याणां योगा वाजीकरा हिताः ॥ ५ ॥

वाजीकरण के योग्य मनुष्य—रोगरहित, तरुण और वाजीकरण द्रव्यों का सेवन करने वाले व्यक्तियों के लिए सभी ऋतुओं में प्रतिदिन मैथुन करना निषिद्ध नहीं है। वृद्ध, रमण की इच्छा वाले, स्त्रियों का प्रिय बनने की कामना वाले, अधिक स्त्री संभोग से क्षीण, नपुसक, अल्पशुक्रयुक्त, विलासी, धनवान, रूप-यौवनसम्पन्न तथा अनेक पत्नियों वाले मनुष्यों के लिए, वाजीकरण योग हितकर होते हैं ॥ ३-५ ॥

विमर्श.—कल्यस्य रोगरहितस्य। उदग्रवयसस्तरुणस्य। रिरंसुरन्तुमिच्छुः। वाजीकरण-'वाज शुक्र तदस्यास्तीति वाजी, अवाजी वाजी क्रियतेऽनेनेति वाजीकरणम्'। वाज शुक्र का पर्यायवाचक शब्द है। जिस व्यक्ति के शरीर में शुक्र विद्यमान रहता है वह वाजी अर्थात् वीर्यवान् कहलाता है। यदि इस प्रकार का व्यक्ति चिन्ता, भय आदि कारणों से शुक्ररहित हो जाय तो उसे अवाजी संज्ञा प्राप्त होगी। पुनः जिस क्रिया विशेष के द्वारा वह व्यक्ति वाजी अर्थात् वीर्यवान् बनाया जाता है। उसे वाजीकरण कहते हैं। अथवा—'वाजी अश्वस्तद्वत् नारीषु मैथुनस्य सामर्थ्यं वीर्यवृद्धिश्च येन क्रियाविशेषेण जायते तद्वाजीकरणम्'। जैसा कि चरक ने लिखा है—'येन नारीषु सामर्थ्यं वाजिवच्च भवते नरः। येन वाऽप्यधिकं वीर्यं वाजीकरणमेव तत्'॥ हारीतसंहिता में वाज शब्द से मैथुन का ग्रहण किया गया है—'वाजो नाम प्रकाशत्वात्तच्च मैथुनसञ्ज्ञितम्। वाजीकरणसञ्ज्ञाभिः पुंस्त्वमेव प्रचक्षते'॥ वाजीकरण पदार्थों का सेवन मनुष्य को धर्म, अर्थ, प्रीति तथा यश प्रदान करता है। महर्षि चरक ने वाजीकरण की प्रशंसा इन शब्दों में की है। 'वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान्। तदायत्तौ हि धर्मार्थौ प्रीतिश्च यश एव च॥ पुत्रस्यायतनं ह्येतद् गुणाश्चैते सुताश्रया।

सेवमानो यदौचित्याद्वाजीवात्यर्थवेगवान् ।
नारीस्तर्पयते तेन वाजीकरणमुच्यते ॥ ६ ॥
भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्रानुगामिन्यस्त्वचः स्पर्शसुखास्तथा ॥ ७ ॥
यामिनी सेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिराः स्रजः ।

गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ॥
मनसश्चाप्रतीघातो वाजीकुर्वन्ति मानवम् ॥ ८ ॥

वाजीकरण की निरुक्ति—जिस वस्तु का विधिपूर्वक सेवन कर मनुष्य घोड़े के समान अत्यन्त वेगवान बन कर स्त्रियों को सन्तुष्ट करता है, उसे वाजीकरण कहते हैं। नाना प्रकार के भोजन, भांति भांति के पेय पदार्थ, कर्णप्रिय वाणी, स्पर्श-सुखदायक त्वचायें, चन्द्रमा से सुशोभित रात्रि, नवयौवना रमणी, कान तथा मन को आकर्षित करने वाले गीत, पान, मदिरा, पुष्पमाला, मनोहर गन्ध, सुन्दर स्वरूप, उपवन और मानसिक प्रसन्नता, मानव को वाजी (वीर्यवान्) बनाती है ॥ ६-९ ॥

तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
द्वेष्यस्त्रीसंप्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम् ॥ ९ ॥

मानसिक क्लीवता के लक्षण—रमण की इच्छा वाले व्यक्ति के मन में (भय, अविश्वास, स्त्री-दोषदर्शन आदि) अप्रिय भावों के कारण, आघात लगने तथा शत्रुता रखने वाली स्त्री के संप्रयोग (अभिचार) से जो नपुंसकता होती है, उसे मानसिक क्लीवता कहते हैं ॥ ९ ॥

कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयो दृष्टः क्लैब्यं तदपरं स्मृतम् ॥ १० ॥

कटु, अम्ल, उष्ण और लवण रस का अधिक सेवन करने से सौम्यधातु (शुक्र) के क्षय के कारण जो नपुंसकता होती है, वह दूसरी क्लीवता है ॥ १० ॥

अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति तच्छुक्रक्षयहेतुकम् ॥ ११ ॥

अत्यधिक मैथुन-रत जो व्यक्ति वाजीकरण पदार्थों का सेवन नहीं करता, उसे शुक्रक्षय के कारण ध्वजभङ्ग की प्राप्ति होती है ॥ ११ ॥

महता मेढ्रोगेण मर्मच्छेदेन वा पुनः ।
क्लैब्यमेतच्चतुर्थं स्यान्नृणां पुंस्त्वोपघातजम् ॥ १२ ॥

भयानक मेढ्र रोग (शिश्न रोग) या शुक्रवाही नाड़ी के कट जाने से मनुष्यों को पुंस्त्वनाशक चौथी क्लीवता होती है ॥

जन्मप्रभृति यः क्लीवः क्लैब्यं तत् सहजं स्मृतम् ॥ १३ ॥

बलिनः ध्रुवमनसो निरोधाद् ब्रह्मचर्यतः ।
षष्ठं क्लैब्यं मतं तत्तु खरशुक्रनिमित्तजम् ॥ १४ ॥

जन्मकाल से जो नपुंसकता होती है वह सहज (जन्म जात) क्लीवता कहलाती है। चञ्चलचित्त बलवान मनुष्य ब्रह्मचर्य से जब शुक्र-वेग को रोकता है तो छठी नपुंसकता होती है, यह अवस्था शुक्र के खर (कठिन) हो जाने से होती है ॥ १३ ॥

असाध्यं सहजं क्लैब्यं मर्मच्छेदाच्च यद्भवेत् ।
साध्यानामितरेषां तु कार्यो हेतुविपर्ययः ॥ १५ ॥

सहज और मर्मच्छेदजन्य क्लीवता असाध्य होती है। अन्य साध्य क्लीव रोगों में हेतु विपरीत (व्याधि-उत्पादक कारण के विरुद्ध) चिकित्सा करनी चाहिए ॥ १४-१५ ॥

निर्विर्याजीकरो यस्तु तं प्रवक्ष्याम्यतः परम् ।
तिलमाषविदारीणां शालीनां चूर्णमेव वा ॥ १६ ॥
पौण्ड्रेक्षुरसैराद्रं मर्दितं सैन्धवान्वितम् ।
वराहमेदसा युक्तां घृतेनोत्कारिकां पचेत् ॥
तां भक्षयित्वा पुरुषो गच्छेत्तु प्रमदाशतम् ॥ १७ ॥

वाजीकरण उत्कारिका (लप्सी)—इसके आगे वाजीकरण विधि का वर्णन किया जाता है। तिल, उड़द, विदारीकन्द या शालि धान्य के चूर्ण को पौण्ड्र और गन्ने के रस से गीला कर गूंदना चाहिए तथा सेंधा नमक और सूअर की मेद मिलाकर घी के द्वारा उत्कारिका (लप्सी) पकानी चाहिए। इसको खाकर पुरुष सौ स्त्रियों के साथ संभोग कर सकता है ॥ १६-१७ ॥

वस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ॥ १८ ॥
शिशुमारवसापक्वाः शष्कुल्यस्तैस्तिलैः कृताः ।
यः खादेत् स पुमान् गच्छेत् स्त्रीणां शतमपूर्ववत् ॥ १९ ॥

वाजीकरण शष्कुली (पूरी)—बकरे के अण्डकोष के साथ सिद्ध किए गए (पकाये गए) दूध से अनेक बार भावना दिए गए तिल तथा मगर की चर्बी में पकी हुई इन तिलों की शष्कुली (पूरी) को खाने वाला पुरुष, सौ स्त्रियों के साथ अपूर्व रूप से संभोग कर सकता है ॥ १८-१९ ॥

पिप्पलीलवणोपेते वस्ताण्डे क्षीरसर्पिषि ।
साधिते भक्षयेद्यस्तु स गच्छेत् प्रमदाशतम् ॥ २० ॥

वाजीकरण वस्ताण्ड (बकरे का अण्डकोष) योग—पिप्पल और सेन्धा नमक युक्त बकरे का अण्डकोष, दूध से निकले हुए घी (मक्खन) के द्वारा पका कर, जो व्यक्ति खाता है, वह सौ स्त्रियों के साथ रमण कर सकता है ॥ २० ॥

पिप्पलीमाषशालीनां यवगोधूमयोस्तथा ।
चूर्णभागैः समैस्तैस्तु घृते पूपलिकां पचेत् ॥ २१ ॥
तां भक्षयित्वा पीत्वा तु शर्करामधुरं पयः ।
नरश्चटकवच्छेद्दशवारान्निरन्तरम् ॥ २२ ॥

वाजीकरण पूपलिका (पूरी)—पिप्पल, उड़द, शालिधान्य, जौ और गेहूं का समान भाग में चूर्ण बना कर (पीसकर) घी के द्वारा पूरी बनाई जावे। इनको खाकर तथा शर्करायुक्त दूध पीकर मनुष्य चटक पक्षी की भांति निरन्तर दश वार रमण कर सकता है ॥ २१-२२ ॥

विदार्याः सुकृतं चूर्णं स्वरसेनैव भावितम् ।
सर्पिर्मधुयुतं लीढ्वा दश स्त्रीरधिगच्छति ॥ २३ ॥

वाजीकरण विदारीकन्द योग—विदारीकन्द के भली भांति बने हुए चूर्ण में विदारीकन्द-स्वरस की भावना देकर घी और मधु के साथ चाटने से मनुष्य दश स्त्रियों के साथ संभोग कर सकता है ॥ २३ ॥

एवमामलकं चूर्णं स्वरसेनैव भावितम् ।
शर्करामधुसर्पिर्भिर्युक्तं लीढ्वा पय पिबेत् ॥
एतेनाशीतिवर्षोऽपि युवेव परिहृष्यति ॥ २४ ॥

वाजीकरण आमलक योग—इसी प्रकार आवले के स्वरस में भावित आँवले का चूर्ण, चीनी, मधु और घी के साथ चाट कर दूध पीना चाहिए। इसके सेवन से अस्सी वर्ष का वृद्ध व्यक्ति भी युवक की भांति कामातुर होता है ॥ २४ ॥

पिप्पलीलवणोपेते वस्ताण्डे घृतसाधिते ।
शिशुमारस्य वा खादेत्ते तु वाजीकरे भृशम् ॥
कुलीरकूर्मनक्राणामण्डान्येवं तु भक्षयेत् ॥ २५ ॥

वाजीकरण अण्ड योग—पिप्पल और सेंधा नमक के साथ, घी में पकाये गए बकरे का अण्डकोष या शिशुमार के अण्डे का सेवन करना चाहिए। ये दोनों अत्यधिक वाजीकरण हैं। कुलीर (केकड़ा) कूर्म (कछुआ) और नक्र (घड़ियाल) के अण्डे का सेवन भी इसी प्रकार करना चाहिए ॥ २५ ॥

महिषर्षभवस्तानां पिबेच्छुक्राणि वा नरः ॥ २६ ॥

वाजीकरण महिषादि शुक्र योग—अथवा महिष (भैंसा), ऋषभ (बैल) और वस्त (बकरा) का शुक्र मनुष्य को पीना चाहिए ॥ २६ ॥

अश्वत्थफलमूलत्वक्कुड्मसिद्धं पयो नरः ।
पीत्वा सशर्कराक्षौद्रं कुलिङ्ग इव हृष्यति ॥ २७ ॥

वाजीकरण अश्वत्थ योग—पीपल के फल, मूल, छाल और कोमल पत्ते के द्वारा सिद्ध किए गए चीनी और मधु मिश्रित दूध को पी कर मनुष्य कलिङ्ग पक्षी की भांति कामवासना युक्त होता है ॥ २७ ॥

विदारिमूलकल्कं तु घृतेन पयसा नरः ।
उदुम्बरसमं पीत्वा वृद्धोऽपि तरुणायते ॥ २८ ॥

वाजीकरण विदारीमूल योग—विदारीकन्द का कल्क गूलर के फल की मात्रा में उष्ण दूध के साथ पीकर वृद्ध व्यक्ति भी युवा हो जाता है ॥ २८ ॥

माषाणां पलमेकं तु संयुक्तं क्षौद्रसर्पिषा ।
अवलिह्य पयः पीत्वा तेन वाजी भवेन्नरः ॥ २९ ॥

वाजीकरण माष योग—मधु-घृत युक्त एक पल उड़द खा कर और दूध पीकर मनुष्य वीर्यवान् बनता है ॥ २९ ॥

क्षीरपक्वांस्तु गोधूमानात्मगुप्ताफलैः सह ।
शीतान् घृतयुतान् खादेत्ततः पश्चात् पयः पिबेत् ३०

वाजीकरण गोधूमादि योग—कौंच के बीज के साथ गेहूं को दूध में पकाकर, शीतल होने पर घृत मिला कर खाना चाहिए और उपर से दूध पीना चाहिए ॥ ३० ॥

नक्रमूषिकमण्डूकचटकाण्डकृतं घृतम् ॥ ३१ ॥
पादाभ्यङ्गेन कुरुते बलं भूमिं तु न स्पृशेत् ।
यावत् स्पृशति नो भूमिं तावद्रन्ध्रेन्निरन्तरम् ॥ ३२ ॥

वाजीकरण पादाभ्यङ्ग योग—घड़ियाल, चूहा, मेंढक और चटक पक्षी के अण्डे के द्वारा पकाए गये घी की मालिश पैरों में करने से बल उत्पन्न होता है। इसका अभ्यङ्ग कर भूमि पर पैर नहीं रखना चाहिए। जब तक मनुष्य पैरों से भूमि का स्पर्श नहीं करता तब तक निरन्तर स्त्री संभोग कर सकता है ॥ ३१-३२ ॥

स्वयंगुप्ताफलचूर्णं सशर्करम् ।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ॥ ३३ ॥

वाजीकरण स्वयंगुप्तादि योग—कौंच के बीज और तालमखाना के चूर्ण में शर्करा मिला कर धारोष्ण दूध के साथ सेवन करने से मनुष्य का शुक्रक्षय नहीं होता है ॥ ३३ ॥

उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते ।
शतावर्युच्चटाचूर्णं पेयमेवं बलार्थिना ।
स्वयंगुप्ताफलैर्युक्तं मापसूपं पिबेन्नरः ॥ ३४ ॥

वाजीकरण कतिपय योग—इसी प्रकार उच्चटा (श्वेतदुर्वारिका या श्वेतगुञ्जा) का चूर्ण धारोष्ण दूध के साथ सेवन करना उत्तम होता है। बल चाहने वाले व्यक्ति को शतावर और उच्चटा की जड़ इसी प्रकार (उपर्युक्त विधि) पीनी चाहिए। कौंच के फलों से युक्त उड़द का सूप (यूष) मनुष्य को पीना चाहिए ॥ ३४ ॥

गुप्ताफलं गोक्षुरकाच्च बीजं
तथोच्चटां गोपयसा विपाच्य ।
खजाहृतं शर्करया च युक्तं
पीत्वा नरो हृष्यति सर्वरात्रम् ॥ ३५ ॥

कौंच के बीज, गोखरू और उच्चटा के बीज को दूध के साथ कौंच से घोट कर पकाया जावे। इसमें शर्करा मिलाकर दूध के साथ सेवन करने से मनुष्य सम्पूर्ण रात्रि कामातुर रहता है ॥ ३५ ॥

माषान् विदारीमपि सोच्चटां च
क्षीरे गवां क्षौद्रघृतोपपन्नाम् ।
पीत्वा नरः शर्करया सुयुक्तां
कुलिङ्गवद्धृष्यति सर्वरात्रम् ॥ ३६ ॥

उड़द, विदारीकन्द और उच्चटाबीज को गो के दूध में पका कर, मधु, घृत और शर्करा के साथ सेवन करने पर मनुष्य कुलिङ्ग पक्षी की भांति रात्रि-पर्यन्त कामवासनायुक्त बना रहता है ॥ ३६ ॥

गृष्टीनां वृद्धवत्सानां मापपर्णभृतां गवाम् ।
यत् क्षीरं तत् प्रशंसन्ति बलकामेषु जन्तुषु ॥ ३७ ॥

वाजीकरण क्षीर योग—प्रथम बार ब्यायी हुई, बड़े बछड़े वाली और उड़द के पत्ते खाने वाली गौ का दूध, बल चाहने वाले व्यक्तियों के लिए श्रेष्ठ होता है ॥ ३७ ॥

क्षीरमांसगणाः सर्वे काकोल्यादिश्च पूजितः ।
वाजीकरणहेतोर्हि तस्मात्तत्तु प्रयोजयेत् ॥ ३८ ॥

सभी प्रकार के दूध, सभी प्रकार के मांस और काकोल्यादिगण, वाजीकरण होने के कारण श्रेष्ठ होते हैं, अतः इनका सेवन करना चाहिए ॥ ३८ ॥

एते वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।
सेव्या विशुद्धोपचितदेहैः कालाद्यपेक्षया ॥ ३९ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने क्षीणबलीयवाजीकरणचिकित्सितं नाम षड्विंशोऽध्यायः ॥ २६ ॥

वाजीकरण योगों के फल—ये वाजीकरण योग, मानसिक प्रसन्नता, सन्तान और बल प्रदान करने वाले हैं, इनका सेवन वमन-विरेचनादि से शुद्ध शरीर वाले व्यक्ति को काल आदि की अपेक्षा से अर्थात् ऋतु का विचार करके करना चाहिए ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायां षड्विंशोऽध्यायः ॥

सप्तविंशतितमोऽध्यायः

अथातः सर्वोपघातशमनीयं रसायनं व्याख्यास्यामः॥१॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

सर्वोपघात शमनीय रसायन का उपक्रम—इसके अनन्तर सभी बाधाओं को शमन करने वाली रसायन विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम्।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ॥ ३ ॥
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः।
न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः ॥ ४ ॥

रसायन के योग्य अवस्था तथा मनुष्य—युवा अथवा मध्यावस्था में, स्निग्ध और शुद्ध शरीर वाले मनुष्य को रसायन का सेवन बुद्धिमान् वैद्य सदा करावे। जिस मनुष्य के शरीर की शुद्धि (वमन, विरेचनादि क्रियाओं के द्वारा) न की गई हो उसके लिए रसायन सेवन करना उचित नहीं है। जिस प्रकार मलिन वस्त्र पर रंग सुशोभित नहीं होता उसी प्रकार अशुद्ध शरीर वाले व्यक्ति के ऊपर रसायन सेवन का प्रभाव नहीं पड़ता ॥ ३-४ ॥

विमर्शः—औषधियाँ दो प्रकार की होती हैं—'स्वस्थस्योर्जस्कर किञ्चित्किञ्चिदार्त्तस्य रोगनुत्'। (चरक) अर्थात् कुछ औषधियाँ स्वस्थ मनुष्यों के बल और ओज को बढ़ाती हैं तथा दूसरी रोगी व्यक्तियों के रोग को दूर करती हैं। इनमें प्रथम, स्वस्थ मनुष्यों के बल और ओज को बढ़ाने वाले द्रव्य रसायन कहलाते हैं, जैसा कि चरक ने लिखा है—'स्वस्थस्योर्जस्करं यत्तु तद्वयः स्थापनम्'। रसायन द्रव्यों का सेवन मनुष्य को बुढ़ापा और व्याधि से बचाता है। वह दो प्रकार का होता है। (१) कुटी प्रावेशिक और (२) वातातपिक। रसायन के पुनः तीन भेद किए जा सकते हैं। (१) काम्य—बल, बुद्धि आदि को बढ़ाने की कामना से सेवन किए जाने वाले द्रव्य काम्य रसायन की श्रेणी में आते हैं (२) नैमित्तिक—किसी व्याधि विशेष को नष्ट करने के निमित्त शिलाजतु, भल्लातक आदि का सेवन नैमित्तिक रसायन कहलाता है। (३) आजस्रिक-दूध, घृत का निरन्तर सेवन आजस्रिक रसायन है। रसायन द्रव्य रस-रक्तादि सातों धातुओं को पुष्ट कर मनुष्य-शरीर में ओज की वृद्धि करते हैं। रसायन सेवन के पूर्व वमन-विरेचन आदि के द्वारा मनुष्य को शरीर की शुद्धि कर लेनी चाहिए अन्यथा रसायन सेवन का पूरा फल प्राप्त नहीं होता।

शरीरस्योपघाता ये दोषजा मानसास्तथा।
उपदिष्टाः प्रदेशेषु तेषां वक्ष्यामि वारणम् ॥ ५ ॥

वातादि शारीरिक तथा रज और तम मानसिक दोषों के द्वारा उत्पन्न होने वाले शारीरिक विकारों को, जिनका उल्लेख यथास्थान किया गया है, दूर करने का उपाय बतलाया जाता है ॥ ५ ॥

शीतोदकं पयः क्षौद्रं सर्पिरित्येकशो द्विशः।
त्रिश समस्तमथवा प्राक् पीतं स्थापयेद्वयः ॥ ६ ॥

शीतल जल, दुग्ध, मधु और घृत का योग—शीतल जल, दूध, मधु और घृत पृथक् पृथक्, दो दो, तीन-तीन अथवा चारों, एक साथ सर्व प्रथम प्रातःकाल पीने से आयु स्थापित होती है ॥ ६ ॥

तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुकमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत शीततोयं चानुपिबेदेवमहरहर्मासं, तदेव मधुयुक्तं भल्लातककाथेन वा, मधुद्राक्काथयुक्तं वा, मध्वामलकरसाभ्यां वा, गुडूचीकाथेन वा, एवमेते पञ्च प्रयोगा भवन्ति; जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात्; एते खल्वशांसि क्षपयन्ति, कृमीनुपन्नन्ति, ग्रहणधारणशक्तिं जनयन्ति, मासे मासे च प्रयोगे वर्षशतं वर्षशतमायुषोऽभिवृद्धिर्भवति ॥ ७ ॥

रसायन-विडंग तण्डुल योग—विडंग के चावलों (विडंग की भूसी हटाकर चावलों के समान बनाए गए) के चूर्ण में मुलेठी का चूर्ण तथा मधु मिलाकर; शक्ति के अनुसार, शीतल जल के द्वारा सेवन करना चाहिए और इसके पीछे शीतल पीना चाहिए। इस प्रकार प्रतिदिन एक मास तक करना चाहिए। अथवा उपर्युक्त विडंग-तण्डुलों को भिलावे के क्वाथ के साथ या मधुयुक्त मुनक्के के क्वाथ के साथ या मधुमिश्रित आँवले के रस में या गुडूची क्वाथ से पीना चाहिए। इस प्रकार ये पाँच प्रयोग होते हैं। औषधि का पाचन होने पर लवणरहित, अल्प स्नेहयुक्त मूंग और आंवले के यूष के साथ घृत मिला हुआ भात खाना चाहिए। इन योगों का सेवन करने से अर्शों का नाश होता है, कृमि मरते हैं तथा समझने और स्मरण रखने की शक्ति उत्पन्न होती है। इनका एक एक मास प्रयोग करने से, आयु में सौ-सौ वर्ष की वृद्धि होती है॥

विडङ्गतण्डुलानां द्रोण पिष्टपचने पिष्टवदुपस्वेद्य विगतकषाय स्विन्नमवतार्य हृपदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्रावृषि भस्मराशावन्तर्गृहे चतुरो मासान्निदध्यात्, वर्षाविगमे चोद्धृत्योपसस्कृतशरीरसहस्रसंपाताभिहुत कृत्वा प्रातः प्रातर्यथाबलमुपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेन घृतवन्तमोदनमश्नीयात्, पांशुशय्यायां शयीत, तस्य मासादूर्ध्वं सर्वाङ्गेभ्यः कृमयो निष्क्रामन्ति, तानणुतैलेनाभ्यक्तस्य वंशविदलेनापहरेत्, द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत्, चतुर्थे दन्तनखरोमाण्यवशीर्यन्ते, पञ्चमे प्रशस्तगुणलक्षणानि जायन्ते, अमानुषं चादित्यप्रकाशं वपुरधिगच्छति, दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति, रजस्तमसी चापोह्य सत्त्वमधितिष्ठति, श्रुतनिगाद्यपूर्वोत्पादी गजवलोऽश्वजवः पुनर्युवाऽष्टौ वर्षशतान्यायुरवाप्नोति, तस्याणुतैलमभ्यङ्गार्थे, अजकर्णकषायमुत्सादनार्थे, सोशीर कूपोदकं स्नानार्थे, चदनमुपलेपनार्थे, भल्लातकविधानवदाहारः परिहारश्च ॥८॥

द्वितीय विडंग तण्डुल योग—एक द्रोण विडंग-तण्डुलों (तुषरहित विडंग) को तृणनिर्मित (टोकरी) कड़ाही में रखकर,

पिट्टे बनाने के लिए उबाले जाने वाले पदार्थों की भांति स्वेदन करना चाहिए। फिर क्वाथ रहित (जलीयांशरहित) उबले हुये उन तण्डुलों को अग्नि से उतारकर, पत्थर की सिल पर पीसना चाहिए और लोहे के मजबूत घड़े में पर्याप्त प्रमाण में मधु एवं जल के साथ बन्द करना चाहिये। उस पात्र को वर्षाऋतु में अन्दर के घर में, राख की ढेर में, चार मास रखना चाहिए। वर्षा के बीतने पर घड़े को निकालकर, वमन-विरेचनादि से शरीर शुद्ध करके तथा एक सहस्र सम्पात मन्त्रों की आहुति देकर, प्रतिदिन प्रातःकाल शक्ति के अनुसार इस औषधि का सेवन करना चाहिये। औषधि का पाचन होने पर लवणरहित, अल्प स्नेहयुक्त मूंग तथा आँवले के यूष के साथ ही मिला हुआ भात खाना चाहिए। धूलि की शय्या पर सोना चाहिए। एक मास के बाद इस औषधि का सेवन करने वाले व्यक्ति के सम्पूर्ण अंगों से कृमि निकलते हैं। इन कृमियों को अणु तैल की मालिश किए हुए उस व्यक्ति के शरीर से बाँस की कोंपल के द्वारा निकालना चाहिए। इस प्रकार दूसरे मास में चींटियों को तथा तीसरे में जू को इसी विधि से निकालना चाहिए। चौथे मास में उस व्यक्ति के दाँत, नख और रोम झड़ जाते हैं तथा पाँचवें में उत्तम गुण एवं लक्षण उत्पन्न होते है। उस व्यक्ति का शरीर अपूर्व श्रीयुक्त तथा सूर्य के समान तेजस्वी हो जाता है। उसे दूर के शब्दों को सुनने तथा दृश्यों को देखने की शक्ति प्राप्त हो जाती है। रज और तम को हटाकर सत्त्वगुण स्थापित होता है। सुनी हुई वाणी को धारण करने तथा अपूर्व श्लोक-रचना करने की शक्ति प्राप्त होती है। हाथी के समान बल और घोड़े की तरह वेग होता है एवं वह व्यक्ति पुनः युवक बनकर आठ सौ वर्ष की आयु प्राप्त करता है। उस व्यक्ति के अभ्यंग के लिये अणु तैल, उत्सादन (उबटन) के लिये अजकर्ण (शालवृक्ष) का क्वाथ (कल्क), स्नान के लिए खसयुक्त कूपजल और लेप लगाने के लिए चन्दन का प्रयोग करना चाहिये तथा भल्लातक-सेवन-विधान में बतलाये गए आहार एवं परिहार नियम का पालन कराना चाहिये॥

विमर्शः—पिट्ट पचने तृणादिकृतास्तारे कटाहे। आजकल बांस की बनी टोकरियां भी उपलब्ध होती हैं, तथा उनके द्वारा इस प्रकार के कार्य सम्पादित किए जाते है। पहले लोहे की कड़ाही में जल भर दिया जाता है और उसके ऊपर इन टोकरियों में जिन द्रव्यों का स्वेदन करना होता है उन्हें भर कर रखते हैं। इनमें रखे हुए पदार्थों का स्वेदन वाष्प के द्वारा होता है। सहस्रसम्पातामिहुतम्—सहस्रसम्पाताध्यायो ऋग्वेदे पठ्यते, तैर्मन्त्रैः, सहस्र हुत्वा उपयुञ्जीत। वंशविदलेन—वंशकलञ्चिकया। अमानुषम्—अपूर्वश्रीयुक्तम् वपुः करोतीत्यर्थः। अपूर्वोत्पादीति-अपूर्वश्लोकादिकं करोतीत्यर्थं। कषायोऽत्र कल्कः। सस्नेहकल्केनोद्वर्षणमुत्सादनम्। आशिष इति गुणाः।

काश्मर्याणां निष्कुलीकृतानामेष एव कल्पः पांशुशय्याभोजनवर्जम्, अत्र हि पयसा श्रृतेन भोक्तव्यं, समानमन्यत् पूर्वेणाशिषश्च। शोणितपित्तनिमित्तेषु विकारेष्वेतेषामुपयोगः॥ ९॥

गम्भारी का योग—धूलि की शय्या एवं तथा कथित आहार के निषेध पूर्वक गुठली रहित गम्भारी के फलों के लिये भी यही विधि है तथा इसके सेवन काल में उष्ण दूध के साथ भोजन करना चाहिए। अन्य विधियां एक समान है तथा औषध-सेवन का फल भी पूर्व औषध के तुल्य है। इनका प्रयोग रक्त और पित्तजन्य व्याधियों में करना चाहिए॥ ९॥

यथोक्तमागारं प्रविश्य बलामूलार्धपलं वा पयसाऽऽलोड्य पिबेत्, जीर्णे पयःसर्पिरोदन इत्याहारः, एवं द्वादशरात्रमुपयुज्य द्वादशवर्षाणि वयस्तिष्ठति; एवं दिवसशतमुपयुज्य वर्षशतं वयस्तिष्ठति। एवमेवातिबलानागबलाविदारीशतावरीणामुपयोगः। विशेषतस्त्वतिबलामुदकेन, नागबलाचूर्णं मधुना, विदारीचूर्णं क्षीरेण, शतावरीमप्येवं पूर्वेणान्यत्समानमाशिषश्च समाः। एतास्त्वौषधयो बलकामानां शोषिणां रक्तपित्तोपसृष्टानां शोणितं छर्दयतां विरिच्यमानानां चोपदिश्यन्ते॥ १०॥

बलामूल (खरेटी) रसायनयोग—पूर्वोक्त प्रकार के गृह में प्रवेश कर खरेटी की जड़ आधापल या एक पल दूध में घोलकर पीना चाहिये तथा औषधि का पाचन होने पर दूध, घी और भात खाना चाहिए। इस प्रकार बारह दिन प्रयोग करने से बारह वर्ष और सौ दिन प्रयोग करने से सौ वर्ष की आयु स्थिर रहती है। इसी प्रकार अतिबला, नागबला, विदारीकन्द और शतावर का प्रयोग करना चाहिये। इनके सेवन में विशेषता इतनी है कि अतिबला जल के साथ, नागबला चूर्ण मधु के साथ और विदारीकंद तथा शतावर चूर्ण का सेवन दूध के साथ करना चाहिये। औषध सेवन का फल तथा अन्य बातें पूर्ववत् हैं। इन औषधियों का प्रयोग बल के इच्छुक, शोषरोगी, रक्तपित्त से ग्रसित, रक्तवमन करने वाले तथा विरेचन के योग्य व्यक्तियों के लिये करना चाहिये॥ १०॥

वाराहीमूलतुलाचूर्णं कृत्वा ततो मात्रां मधुयुक्तां पयसाऽऽलोड्य पिबेत्, जीर्णे पयःसर्पिरोदन इत्याहारः, प्रतिषेधोऽत्र पूर्ववत्, प्रयोगमिममुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चाक्षयताम्, एतेनैव चूर्णेन पयोऽवचूर्ण्य श्रृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायं प्रातरेककालं वा, जीर्णे पयःसर्पिरोदन इत्याहारः, एवं मासमुपयुज्य वर्षशतायुर्भवति॥ ११॥

वराहीकन्द रसायन योग—वाराहीकन्द की जड़ का एक तुला चूर्ण बनाकर उसकी एक मात्रा (एक पल) मधु के साथ दूध में घोलकर पीना चाहिए। औषध का पाचन होने पर दूध, घी और भात खाना चाहिये। इसके प्रयोग में, पूर्वोक्त वर्जित पदार्थों का त्याग करना चाहिये। इस योग को सेवन करने वाला व्यक्ति, सौ वर्ष की आयु तथा स्त्री संभोग में अक्षयता (शुक्रक्षय का न होना) प्राप्त करता है। उपर्युक्त चूर्ण के साथ दूध का पाक करके शीतल होने पर मथकर घी निकालना चाहिए। इसमें मधु मिलाकर प्रातः और सायंकाल अथवा एक समय सेवन करना चाहिए।

औषध का पाचन होने पर दूध, घी और भात खाना चाहिए। इस प्रकार एक मास सेवन करने से सौ वर्ष की आयु होती है ॥ ११ ॥

चक्षुःकामः प्राणकामो वा बीजकसाराग्निमन्थमूलं निष्काथ्य माषप्रस्थं साधयेत्, तस्मिन् सिध्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागं, ततः स्विन्नमवतार्य सहस्रसंपाताभिहुतं कृत्वा शीतीभूतं मधुसर्पिर्भ्यां संसृज्योपयुञ्जीत यथाबलं, यथासात्म्यं च लवणं परिहरन् भक्षयेत्। जीर्णे मुद्गामलकरूपेणालवणेन घृतवन्तमोदनमश्नीयात् पयसा वा मासत्रयम्, एवमाभ्यां प्रयोगाभ्यां चक्षुः सौपर्णं भवत्यनल्पबलः स्त्रीषु चाक्षयो वर्षशतायुर्भवतीति ॥

विजयसार आदि रसायन योग—नेत्रों में ज्योति तथा बल की कामना वाले व्यक्ति को विजयसार और अरणी की जड़ का क्वाथ करके उसके साथ एक प्रस्थ उड़द का पाक करना चाहिये। उड़द का पाक होते समय चित्रक की जड़ का कल्क एक कर्ष और आँवले का रस चतुर्थांश (उड़द की अपेक्षा) मिलाना चाहिये। जब उड़द उबल जाय उसे अग्नि से उतार एक सहस्र संपात मन्त्रों के द्वारा आहुति देकर मधु और घृत के साथ शक्ति के अनुसार सेवन करना चाहिए। जहां तक लवण छोड़ना सात्म्य रहे, उसका त्याग करते हुए भोजन करना चाहिये। औषध का पाचन होने पर घीमिश्रित भात, लवणरहित मूंग और आँवले के यूष अथवा दूध के साथ तीन मास खाना चाहिये। इस प्रकार इन दोनों प्रयोगों के सेवन से नेत्र की ज्योति गरुड़ की भांति होती है, बल बढ़ता है, स्त्री संभोग में शुक्रक्षय नहीं होता तथा सौ वर्ष की आयु प्राप्त होती है ॥ १२ ॥

भवति चात्र—

पयसा सह सिद्धानि नरः शणफलानि यः।
भक्षयेत् पयसा सार्धं वयस्तस्य न शीर्यते ॥ १३ ॥

इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने सर्वोपघातशमनीयं रसायनचिकित्सितं नाम सप्तविंशोऽध्यायः॥

सन के फल का रसायन योग—जैसे कि—दूध में पके हुए सन के फलों को जो मनुष्य दूध के साथ सेवन करता है, उसकी आयु नहीं गिरती, अर्थात् एक समान स्थिर रहती है उसमें परिवर्तन नहीं होता ॥ १३ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायां सप्तविंशतितमोऽध्यायः ॥ २७ ॥

अष्टाविंशतितमोऽध्यायः

अथातो मेधायुष्कामीयं रसायनचिकित्सितं व्याख्यास्यामः। यथोवाच भगवान् धन्वन्तरिः ॥१-२॥

मेधायुष्कामीय रसायन चिकित्सा का उपक्रम—इसके अनन्तर बुद्धि और आयु प्रदान करने वाले रसायन चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

मेधायुष्कामः श्वेतावल्गुजफलान्यातपपरिशुष्कान्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सहालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात्, सप्तरात्रादुद्धृत्य हृतदोषस्य यथाबलं पिण्डं प्रयच्छेदनुदिते सूर्ये, उष्णोदकं चानुपिबेत्; भल्लातकविधानवच्चागारप्रवेशः, जीर्णौषधश्चापराह्णे हिमाभिरद्भिः परिपिक्तगात्रः शालीनां षष्टिकानां च पयसा शर्करामधुरेणौदनमश्नीयात्; एवं षण्मासानुपयुज्य विगतपाप्मा बलवर्णोपेतः श्रुतनिगादी स्मृतिमानरोगो वर्षशतायुर्भवति। कुष्ठिनं पाण्डुरोगिणमुदरिणं वा कृष्णाया गोमूत्रेणालोड्यार्धपलिकं पिण्डं विगतलौहित्ये सवितरि पाययेत्, परार्ह्णे चालवणेनामलकयूषेण सर्पिष्मन्तमोदनमश्नीयात्; एवं मासमुपयुज्य स्मृतिमानरोगो वर्षशतायुर्भवति। एष एवोपयोगश्चित्रकमूलानां रजन्याश्च चित्रकमूले विशेषो द्विपलिक पिण्ड परं प्रमाण, शेषं पूर्ववत् ॥ २ ॥

श्वेत वाकुची के बीजों का रसायन योग—बुद्धि और आयु की कामना वाला व्यक्ति धूप में सुखाये गए श्वेत वाकुची के बीजों का महीन चूर्ण बना कर, उसमें गुड़ मिलावे और घी के घड़े में सात दिन धान की ढेर में रखे। सात दिन के बाद घड़े को निकाल कर, वमन-विरेचन के द्वारा शुद्ध शरीर वाला व्यक्ति शक्ति के अनुसार सूर्योदय से पूर्व औषध पिण्ड (एक पल) सेवन कर, ऊपर से उष्ण जल का पान करे। भल्लातक-सेवन विधान की भांति गृह में प्रवेश करे। औषध का पाचन होने पर अपराह्ण में शीतल जल से स्नान करके शाली और साठी के चावलों का शर्करा-मिश्रित दूध के साथ भोजन करे। इस प्रकार ६ मास औषध सेवन करके रोगी पाप रहित होकर बल और वर्ण से युक्त सुनी हुई वाणी को धारण करने की शक्ति वाला, स्मृतिशाली, निरोग और सौ वर्ष की आयु वाला होता है। कुष्ठी, पाण्डुरोगी या उदर रोगी को काली वाकुची के बीजों का चूर्ण गोमूत्र में घोलकर आधे पल की मात्रा में उषाकाल में पिलाया जावे। अपराह्ण में लवणरहित आँवले के यूष के साथ घी मिला हुआ भात रोगी भोजन करे। इस प्रकार एक मास औषध सेवन करके रोगी स्मृतिशाली निरोग और सौ वर्ष की आयु वाला होता है। यही उपयोग-विधान चित्रक की जड़ और हल्दी का है। चित्रकमूल के सेवन में विशेषता इतनी है कि इसकी उत्तम मात्रा २ पल होनी चाहिये अन्य बातें पूर्ववत् है ॥ ३ ॥

हृतदोष एव प्रतिसंसृष्टभक्तो यथाक्रममागार प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलं पयसाऽऽलोड्य पिबेत् पयोऽनुपानं वा, तस्यां जीर्णायां यवान्नं पयसोपयुञ्जीत, तिलैर्वा सह भक्षयेत्त्रीन् मासान् पयोऽनुपानं, जीर्णे पयः

सर्पिरोदन इत्याहारः; एवमुपयुञ्जानो ब्रह्मवर्चसी श्रुतनिगादी भवति वर्षशतमायुरवाप्नोति। त्रिरात्रोपोषितञ्च त्रिरात्रमेनां भक्षयेत्, त्रिरात्रादूर्ध्वं पयः सर्पिरिति चोपयुञ्जीत। विल्वमात्रं पिण्डं वा पयसाऽऽलोड्य पिबेत्, एवं द्वादशरात्रमुपयुज्य मेधावी वर्षशतायुर्भवति ॥ ४ ॥

मण्डूकपर्णी-स्वरस रसायन योग—वमन-विरेचनादि के द्वारा दोषों को दूर किया हुआ व्यक्ति, ससर्जन क्रम से पेया, विलेपी आदि का सेवन करके, भल्लातक-सेवन-विधान के अनुसार, गृह में प्रवेश करे और एक सहस्र सपात मंत्रों के द्वारा आहुति देकर, शक्ति के अनुसार, मण्डूकपर्णी-स्वरस दूध में घोलकर अथवा दूध के अनुपान से, पान करे। औषधि के जीर्ण होने पर, दूध के साथ जौ का भात भोजन करे। अथवा तिलों के साथ, दूध के अनुपान से तीन, मास मण्डूकपर्णी का सेवन और औषध जीर्ण होने पर दूध, घी तथा भात भोजन करे। इस प्रकार औषध सेवन करके तेजस्वी, और सुनी हुई वाणी को धारण करने में शक्तिमान् होता है तथा (रोगी) सौ वर्ष की आयु प्राप्त करता है। तीन दिन उपवास करके, तीन दिन मण्डूकपर्णी का सेवन करे। तीन दिन के पश्चात् दूध और घी का सेवन करे। अथवा एक पल औषध-पिण्ड दूध में घोल कर पीवे। इस प्रकार बारह दिन औषध सेवन करने वाला व्यक्ति, बुद्धिमान् और सौ वर्ष की आयु वाला होता है ॥ ४ ॥

हृतदोष एवागारं प्रविश्य प्रतिसंसृष्टभक्तो ब्राह्मीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलमुपयुञ्जीत, जीर्णौषधश्चापराह्णे यवागूमलवणां पिबेत्, क्षीरसात्म्यो वा पयसा भुञ्जीत, एवं सप्तरात्रमुपयुज्य ब्रह्मवर्चसी मेधावी भवति, द्वितीयं सप्तरात्रमुपयुज्य ग्रन्थमीप्सितमुत्पादयति नष्टं चास्य प्रादुर्भवति, तृतीयं सप्तरात्रमुपयुज्य द्विरुच्चारितं शतमप्यवधारयति, एवमेकविंशतिरात्रमुपयुञ्जानस्य मूर्तिमती चैनं वाग्देव्यनुप्रविशति, सर्वाश्चैनं श्रुतय उपतिष्ठन्ति, श्रुतधरः पञ्चवर्षशतायुर्भवति ॥ ५ ॥

ब्राह्मीस्वरस रसायन योग—वमन विरेचनादि के द्वारा दोषों को दूर कर तथा संसर्जन क्रम से पेया, विलेपी आदि का सेवन करके (रोगी) गृह में प्रवेश करे और एक सहस्र संपात मन्त्रों से आहुति देकर, शक्ति के अनुसार ब्राह्मी-स्वरस का सेवन करे। औषध जीर्ण होने पर, अपराह्न काल में, लवण-रहित यवागू पीवे, जिसे दूध सात्म्य हो वह दूध के साथ यवागू सेवन करे। इस प्रकार सात दिन औषध सेवन करने से तेजस्वी और मेधावी होता है। दूसरी वार सात दिन औषध सेवन करने से अभिलषित ग्रन्थ की रचना करता है और विस्मृत रचना स्मरण हो जाती है। तीसरी वार सात दिन औषध सेवन करने से दो वार कही गई सौ वाणी भी स्मरण रखता है। इस प्रकार इक्कीस दिन (औषध) सेवन करने से दुःख-दारिद्र्य नष्ट होता है, मूर्तिमान सरस्वती देवी शरीर में प्रवेश करती हैं, सभी श्रुतियाँ स्मरण हो जाती हैं और सुनी हुई वाणी को धारण करने की शक्ति लाभ कर, पांच सौ वर्ष की आयु प्राप्त करता है ॥ ५ ॥

ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं विडङ्गतण्डुलानां कुडवं द्वे द्वे पले वचामृतयोर्द्वादश हरीतक्यामलकबिभीतकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा स्वनुगुप्तं निदध्यात्, ततः पूर्वविधानेन मात्रां यथाबलमुपयुञ्जीत, जीर्णे पयः सर्पिरोदन इत्याहारः, पूर्ववच्चात्र परीहारः, एतेनोर्ध्वमधस्तिर्यक् कृमयो निष्क्रामन्ति, अलक्ष्मीरपक्रामति, पुष्करवर्णः स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवति, एतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतग्रहेष्वन्येषु च महाव्याधिषु संशोधनमादिशन्ति ॥ ६ ॥

ब्राह्मीघृत रसायन—ब्राह्मी स्वरस दो प्रस्थ और घृत एक प्रस्थ में विडङ्ग-तण्डुल (विडङ्ग के तुषरहित चावल) एक कुडव, वच और गिलोय दो दो पल तथा त्रिफला बारह पल, महीन पीस कर, सिद्ध करके, सुरक्षित स्थान में रखना चाहिए। इसके पश्चात् पूर्वोक्त विधि से बलके अनुसार इसकी मात्रा (एक पल) सेवन करनी चाहिए। औषध का पाचन होने पर दूध, घी और भात खाना चाहिए तथा पूर्वोक्त वर्जित पदार्थों का सेवन त्याग देना चाहिए। इसके सेवन से ऊपर-नीचे तथा मध्य शरीर से कृमि निकलते हैं। दारिद्र्य नष्ट होता है। वर्ण कमल की भांति होता है और आयु स्थिर रहती है। श्रवण की हुई वाणी को धारण करने की शक्ति लाभ कर, मनुष्य तीन सौ वर्ष की आयु प्राप्त करता है। कुष्ठ, विषम ज्वर, अपस्मार, उन्माद, विष, भूतबाधा, ग्रह तथा अन्य महाव्याधियों में इसी संशोधन का उपदेश किया जाता है ॥

हृतदोष एवागारं प्रविश्य हैमवत्या वचायाः पिण्डमामलकमात्रमभिहुतं पयसाऽऽलोड्य पिबेत्, जीर्णे पयः सर्पिरोदन इत्याहारः, एवं द्वादशरात्रमुपयुञ्जीत, ततोऽस्य श्रोत्रं विवर्धते, द्विरभ्यासात् स्मृतिमान् भवति, त्रिरभ्यासाच्छ्रुतमादत्ते, चतुर्द्वादशरात्रमुपयुज्य सर्वं तरति किल्बिषं, तार्क्ष्यदर्शनमुत्पद्यते, शतायुश्च भवति। द्वे द्वे पले इतरस्या वचाया निष्काथ्य पिबेत् पयसा, समानं भोजनं समाः पूर्वेणाशिषश्च ॥ ७ ॥

वचा रसायन योग—जिस व्यक्ति ने वमन-विरेचनादि के द्वारा शरीर की शुद्धि कर ली हो, उसे गृह में प्रविष्ट होकर होम करके, आँवले के बराबर श्वेत वचा का पिण्ड दूध में घोल कर पीना चाहिए। औषध जीर्ण होने पर दूध, घी और भात खाना चाहिए। इस प्रकार बारह दिन प्रयोग करना चाहिए। इस क्रिया से औषध सेवन करने वाले व्यक्ति की श्रवणशक्ति बढती है। दूसरी वार बारह दिन औषध सेवन करने से स्मृतिशील बनता है। तीसरी वार बारह दिन सेवन करने से श्रवण की हुई वाणी को धारण करता है। चौथी वार बारह दिन औषध सेवन करके, सम्पूर्ण पापों से मुक्त हो जाता है। गरुड के समान दृष्टि हो जाती है तथा सौ वर्ष की

आयु प्राप्त करता है। दो-दो पल लाल रंग की वच का क्वाथ कर, दूध के साथ सेवन करे। आहारविधि तथा गुण पूर्वोक्त औषधि के समान हैं ॥ ७ ॥

विमर्श.—हेमवत्या वचायाः श्वेतवचाया इत्यर्थः। अभिहुतमित्यत्र कृत्वेत्यध्याहारात् होमं कृत्वेत्यर्थः। इतरस्या वचाया इति अरण्याया इत्यर्थः।

वचाशतपाकं वा सर्पिर्द्रोणमुपयुज्य पञ्चवर्षशतायुर्भवति, गलगण्डापचीश्लीपदस्वरभेदांश्चापहन्तीति ॥८॥

रसायन शतपाक वचा घृत—वच के क्वाथ एवं कल्क के साथ सौ बार पकाये गए घृत की एक द्रोण मात्रा सेवन करने से मनुष्य की आयु पाँच सौ वर्ष की होती है और गलगण्ड, अपची, श्लीपद तथा स्वरभेदादि रोग नष्ट होते हैं ॥ ८ ॥

अत ऊर्ध्वं प्रवक्ष्यामि आयुष्कामरसायनम्।
मन्त्रौषधसमायुक्तं संवत्सरफलप्रदम् ॥ ९ ॥

इसके आगे मन्त्र तथा औषधियों से युक्त, एक वर्ष में फल प्रदान करने वाले, आयुवर्द्धक रसायन का कथन किया जाता है ॥ ९ ॥

विल्वस्य चूर्णं पुष्ये तु हुतं वारान् सहस्रशः।
श्रीसूक्तेन नरः कल्ये ससुवर्णं दिने दिने ॥ १० ॥
सर्पिर्मधुयुतं लिह्याद्दलक्ष्मीनाशनं परम्।
त्वचं विहाय विल्वस्य मूलकाथं दिने दिने ॥ ११ ॥
प्राश्नीयात् पयसा सार्धं स्नात्वा हुत्वा समाहितः।
दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत् ॥ १२ ॥

आयुवर्द्धक रसायन—पुष्य नक्षत्र में मनुष्य को (अथर्ववेदोक्त) श्रीसूक्त के द्वारा एक सहस्र आहुति देकर प्रतिदिन प्रातः काल सुवर्ण के साथ बेल का चूर्ण, मधु और घृत मिला कर चाटना चाहिए। इसके सेवन से दारिद्र्य दूर होता है। बेल के जड की छाल हटाकर पकाया गया क्वाथ, बुद्धिमान् व्यक्ति को प्रतिदिन, स्नान और होम करने के पश्चात् दूध के साथ, सेवन करना चाहिए। इस औषध को सेवन करने वाले व्यक्ति की आयु, दश सहस्र वर्ष की होती है तथा वह युक्तरथ (रसायन समर्थ) होता है ॥ १०-१२ ॥

हुत्वा बिसानां काथं तु मधुलाजैश्च संयुतम्।
अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतम् ॥ १३ ॥

बिसकाथ रसायन योग—बिस (मृणाल) का क्वाथ मधु और धान के लावे के साथ होम करके पीना चाहिए। यह अव्यर्थ रसायन है और सौ सहस्र (एक लाख) वर्ष की आयु प्रदान करता है एवं रसायन समर्थ बनाता है ॥ १३ ॥

सुवर्णं पद्मबीजानि मधु लाजाः प्रियङ्गवः।
गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत् ॥ १४ ॥

दारिद्र्यनाशक रसायन योग—स्वर्ण भस्म, कमलगट्टा, मधु, धान का लावा और प्रियङ्गु को गौ के दूध के साथ सेवन करने से दरिद्रता का निवारण होता है ॥ १४ ॥

नीलोत्पलदलक्काथो गव्येन पयसा श्रृतः।
ससुवर्णस्तिलैः सार्धमलक्ष्मीनाशनः स्मृतः ॥ १५ ॥

नील कमल का क्वाथ गोदुग्ध के साथ पकाकर सुवर्ण भस्म और तिल के साथ सेवन करने से दारिद्र्य दूर होता है॥

गव्यं पयः सुवर्णं च मधूच्छिष्टं च माक्षिकम्।
पीतं शतसहस्राभिर्हुतं युक्तरथं स्मृतम् ॥ १६ ॥

एक लक्ष आहुतियाँ देकर गोदुग्ध, सुवर्णभस्म, मोम और मधु को एक साथ सेवन करने से मनुष्य रसायन-समर्थ बनता है ॥ १६ ॥

वचाघृतसुवर्णं च विल्वचूर्णमिति त्रयम्।
मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्धनम् ॥ १७ ॥

मेधावर्धक वचादि योग—वचा, घृत, सुवर्ण भस्म और बेल के चूर्ण को घृत के साथ सेवन करने से बुद्धि और आयु बढती है, आरोग्य लाभ होता है तथा शरीर की पुष्टि एवं सौभाग्य की वृद्धि होती है ॥ १७ ॥

वासामूलतुलाकाथे तैलमात्राप्य साधितम्।
हुत्वा सहस्रमश्नीयान्मेध्यमायुष्यमुच्यते ॥ १८ ॥

एक तुला अडूसा की जड़ के क्वाथ में सिद्ध तैल को एक सहस्र आहुतियाँ देकर सेवन करने से बुद्धि तथा आयु की वृद्धि होती है।

यावकांस्तावकान् खादेदभिभूय यवांस्तथा।
पिप्पलीमधुसंयुक्तान् शिक्षा चरणवद्भवेत् ॥ १९ ॥

जौ को कूट कर, उनसे बनाये गए भोज्य पदार्थ का सेवन मधु और पिप्पली के साथ करना चाहिए। इससे शास्त्राभ्यास स्वतः उसी प्रकार होता है जैसे बाल्यावस्था के बाद चलने की शिक्षा दिए बिना भी, बालक स्वयं चलने लगते हैं॥ १९॥

विमर्श —यवानाम् एते यावकाः तावकान् यवान् तावकान् अभिभूय कुट्टयित्वा तत्कृतान् भक्ष्यान् मधुपिप्पलीसयुक्तान् खादेत्। शिक्षाचरणवद् भवेदिति शिक्षा उपदेशापेक्षाशास्त्राभ्यास सुखेनैव भवति। यथा किल बाल्यानन्तर पादगमन शिक्षा विनैव भवति तथैवैतेन योगेनाभ्यवहरेन मेधावृद्धेः शास्त्राभ्यास. सुखेनैव भवति। (डल्हण)

मध्वामलकचूर्णानि सुवर्णमिति च त्रयम्।
प्राश्यारिष्टगृहीतोऽपि मुच्यते प्राणसंशयात् ॥ २० ॥

अरिष्टशामक मध्वादियोग—अरिष्ट दशा में पड़ा हुआ रोगी भी मधु, आंवले का चूर्ण और सुवर्ण भस्म इन तीनों को चाट कर प्राणनाश के संशय से मुक्त होता है ॥ २० ॥

शतावरीघृतं सम्यगुपयुक्तं दिने दिने।
सक्षौद्रं ससुवर्णं च नरेन्द्रं स्थापयेद्वशे ॥ २१ ॥

वशीकरण शतावरी घृत योग—प्रति-दिन मधु और सुवर्ण भस्म के साथ शतावरी घृत का भली भांति सेवन राजा को वश में रखता है ॥ २१ ॥

गोचन्दना मोहनिका मधुकं माक्षिकं मधु।
सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता ॥ २२ ॥

सौभाग्यकारक गोचन्दनादि योग—सौभाग्य की कामना वाले व्यक्ति को गोचन्दना (प्रियङ्गु), मोहनिका (पुत्रजीवक), मुलेठी, भौंरे का मधु और सुवर्ण भस्म एक साथ मिला कर पीना चाहिए ॥ २२ ॥

पद्मनीलोत्पलक्काथे यष्टीमधुकसंयुते।
सर्पिरासादितं गव्यं ससुवर्णं सदा पिबेत् ॥ २३ ॥

पयश्चानुपिबेत् सिद्धं तेषामेव समुद्भवे ।
अलक्ष्मीघ्नं सदाऽऽयुष्यं राज्याय सुभगाय च ॥ २४ ॥

सौभाग्यकारक पद्मादि योग—मुलेठी युक्त लाल और नील कमल के क्वाथ के द्वारा गोघृत का पाक कर सुवर्णभस्म के साथ सदा सेवन करना चाहिए और इसके पश्चात् उपर्युक्त द्रव्यों के क्वाथ में सिद्ध किया गया दूध पीना चाहिए। यह योग दरिद्रनाशक, आयुर्वर्धक तथा राज्य और ऐश्वर्य को देने वाला है ॥ २३-२४ ॥

यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने ।
शन्दिता तत्र सर्वत्र गायत्री त्रिपदा भवेत् ॥ २५ ॥

इन योगों के निर्माण काल में जहाँ मन्त्र का कथन नहीं किया गया है, उन सभी स्थलों पर तीन पदों वाली गायत्री का उच्चारण करना चाहिए ॥ २५ ॥

पाप्मानं नाशयन्त्येता दद्युश्चौषधयः श्रियम् ।
कुर्युर्नागबलं चापि मनुष्यममरोपमम् ॥ २६ ॥

ये औषधियाँ, दुःख और दारिद्र्य का नाश कर लक्ष्मी प्रदान करती हैं, हाथी का बल देती हैं तथा मनुष्य को देवताओं के समान बनाती हैं ॥ २६ ॥

सततोव्ययनं वादः परतन्त्रावलोकनम् ।
तद्विद्याचार्यसेवा च बुद्धिमेधाकरो गु(ग)णः ॥ २७ ॥

बुद्धि-मेधावर्धक गण—निरन्तर अध्ययन, वाद (स्वपक्ष-साधनं परपक्षबाधन वादः), दूसरे तन्त्रों (न्याय, वैशेषिक, व्याकरण आदि) का अवलोकन तथा इन विद्याओं का पठन-पाठन एवं आचार्य की सेवा, बुद्धि और स्मृति बढ़ाते हैं॥

आयुष्यं भोजनं जीर्णे वेगानां चाविधारणम् ।
ब्रह्मचर्यमहिंसा च साहसानां च वर्जनम् ॥ २८ ॥

आयुर्वर्धक गण—पूर्व आहार के पचने पर भोजन करना, मल-मूत्रादि के वेगों का न रोकना, ब्रह्मचर्य (इन्द्रियसंयम), अहिंसा और दुस्साहस का परित्याग, आयु की वृद्धि करते हैं॥

इति सुश्रुतसंहितायां चिकित्सास्थाने मेधायुष्कामीयं रसायनं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायामष्टाविंशतितमोऽध्यायः ॥

एकोनत्रिंशत्तमोऽध्यायः

अथातः स्वभावव्याधिप्रतिषेधनीयं रसायनं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

स्वभावव्याधिप्रतिषेधनीय रसायन का उपक्रम—इसके अनन्तर स्वाभाविक रूप से उत्पन्न होने वाली व्याधियों की चिकित्सा के लिए रसायन का वर्णन किया जा रहा है, जैसाकि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥१-२॥

विमर्शः—स्वभावप्रवृत्तानां क्षुत्पिपासाजरामृत्युनिद्राप्रवृत्तीनां यथावधीनां प्रतिषेधनं स्वभावव्याधिप्रतिषेधनम्, तदधिकृत्य कृत रसायनं स्वभावव्याधिप्रतिषेधनीयम् । (डल्हण)

ब्रह्मादयोऽसृजन् पूर्वममृतं सोमसञ्ज्ञितम् ।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥ ३ ॥

पूर्व काल में ब्रह्मा आदि ने बुढापा और मृत्यु को नष्ट करने के लिए सोम नामक अमृत का सृजन किया था, उसके सेवन का विधान बतलाया जा रहा है ॥ ३ ॥

एक एव खलु भगवान् सोमः स्थानानामाकृति-वीर्यविशेषैश्चतुर्विंशतिधा भिद्यते ॥ ४ ॥

२४ प्रकार के सोम—भगवान् सोम एक ही प्रकार के हैं किन्तु स्थान, नाम, आकृति और वीर्य भेद से उनके चौबीस भेद हो जाते हैं ॥४॥

तद्यथा—
अंशुमान् मुञ्जवांश्चैव चन्द्रमा रजतप्रभः ।
दूर्वासोमः कनीयांश्च श्वेताक्षः कनकप्रभः ॥ ५ ॥
प्रतानवांस्तालवृन्तः करवीरोऽंशवानपि ।
स्वयंप्रभो महासोमो यश्चापि गरुडाहृतः ॥ ६ ॥
गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाकरस्तथा ।
अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥ ७ ॥
गायत्र्या त्रिपदा युक्तो यश्चोडुपतिरुच्यते ।
एते सोमाः समाख्याता वेदोक्तैर्नामभिः शुभैः ॥ ८ ॥

जैसे कि:—(१) अंशुमान् (२) मुञ्जवान् (३) चन्द्रमा (४) रजतप्रभ (५) दूर्वासोम (६) कनीयान् (७) श्वेताक्ष (८) कनकप्रभ (९) प्रतानवान् (१०) तालवृन्त (११) करवीर (१२) अंशवान् (१३) स्वयंप्रभ (१४) महासोम (१५) गरुडाहृत (१६) गायत्र (१७) त्रैष्टुभ (१८) पाङ्क्त (१९) जागत (२०) शाकर (शाङ्कर) (२१) अग्निष्टोम (२२) रैवत (२३) त्रिपदा गायत्री और (२४) उडुपति, इन वेदोक्त शुभ नामों से सोमों का कथन किया जाता है ॥ ५-८ ॥

सर्वेषामेव चैतेषामेको विधिरुपासने ।
सर्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते ॥ ९ ॥

इन सभी सोमों के सेवन की विधि एक ही है तथा सभी समान फल देने वाले हैं। इनका सेवन विधान बतलाया जाता है ॥ ९ ॥

अतोऽन्यतमं सोममुपयुयुक्षुः सर्वोपकरणपरिचारकोपेतः प्रशस्ते देशे त्रिवृतमागारं कारयित्वा हृतदोषः प्रतिसंसृष्टभक्तः प्रशस्तेषु तिथिकरणमुहूर्तनक्षत्रेषु अंशुमन्तमादायाध्वरकल्पेनाहृतमभिषुतमभिहुतं चान्तरागारे कृतमङ्गलस्वस्तिवाचनः सोमकन्दं सुवर्णसूच्या विदार्य पयो गृह्णीयात् सौवर्णे (राजते वा) पात्रेऽञ्जलिमात्रं, ततः सकृदेवोपयुञ्जीत नास्वादयन्, तत उपस्पृश्य शेषमप्स्ववसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत् ॥१०॥

सोम-सेवन की विधि—इनमें से किसी एक सोम का सेवन करने की कामना वाला मनुष्य, सभी साधनों तथा

सेवकोंके साथ, उत्तम भूमि पर, तीनगर्भ वाला गृह बनवाकर, वमन, विरेचनादि के द्वारा शरीर की शुद्धि तथा ससर्जन क्रम से पेया, विलेपी आदि का सेवन करके अग्निष्टोमयज्ञ-विधान से लाये गए तथा ऋत्विजों के द्वारा पीडित और अग्निक्षिप्त, अंशुमान् (सोमकन्द) को उत्तम तिथि, करण, मुहूर्त एवं नक्षत्र में लेकर गृह के भीतरी भाग में स्वस्ति-वाचन मगल पाठ करके सोमकन्द को सोने की सुई से फाड कर सोने के पात्र में एक कुडव प्रमाण दूध (रस) ग्रहण करे। इसके बाद विना स्वाद लिए एक बार में सोम रस पी ले। फिर आचमन करके रस निकाले गए अंशुमान् कन्द को जल में डाल कर यम और नियम के द्वारा मन को एकाग्र तथा मौन धारण करके मित्रों के साथ विहार करे ॥ १० ॥

विमर्शः—अध्वरकल्पेनाहृतम्—अग्निष्टोमविधानेनानीतम्। अभिषुतम्—ऋत्विग्भि. पीडितम्। अभिहुत—वह्नौ प्रक्षिप्तम्। अञ्जलिमात्रं—कुडवप्रमाणम्। उपस्पृश्य—आचमन कृत्वा। शेष—गृहीतक्षीरमंशुमत' कन्दम्। मन.सङ्कल्पादिनिरोधो नियम, पुनरिन्द्रियदेहयो निरोधो यम.। आत्मान चेत'। वाग्यत.मौनं कृत्वा।

रसायनं पीतवांस्तु निवाते तन्मनाः शुचिः।
आसीत तिष्ठेत् क्रामेच्च न कथञ्चन संविशेत् ॥ ११ ॥

रसायन मनुष्य, वायुरहित स्थान में पान करनेवाला सोम का ध्यान करते हुए, पवित्रतापूर्वक बैठे, खडा रहे और चले किन्तु निद्रा न ले ॥ ११ ॥

सायं वा भुक्त्वानुपश्रुतशान्तिः कुशशय्यायां कृष्णाजिनोत्तरायां सुहृद्भिरुपास्यमान. शयीत, तृषितो वा शीतोदकमात्रां पिबेत् (अशनायितो वा क्षीरं); ततः प्रातरुत्थायोपश्रुतशान्तिः कृतमङ्गलो गां स्पृष्ट्वा तथैवासीत, तस्य जीर्णे सोमे छर्दिरुत्पद्यते, तत' शोणिताक्त कृमिव्याभिश्रं छर्दितवते सायं शृतशीतं क्षीरं वितरेत्; ततस्तृतीयेऽहनि कृमिव्याभिश्रमतिसार्यते, स तेनानिष्टप्रतिग्रहभुक्तप्रभृतिभिर्विशेषैर्विनिर्मुक्तः शुद्धतनुर्भवति, ततः सायं स्नाताय पूर्ववदेव क्षीरं वितरेत्, क्षौमवस्त्रास्तृतायां चैनं शय्यायां शाययेत्, ततश्चतुर्थेऽहनि तस्य श्वयथुरुत्पद्यते, तत' सर्वाङ्गेभ्यः कृमयो निष्क्रामन्ति, तदहश्च शय्यायां पांशुभिरवकीर्यमाणः शयीत, तत. सायं पूर्ववदेव क्षीर वितरेत्, एवं पञ्चमषष्ठयोर्दिवसयोर्वर्तेत, केवलमुभयकालमस्मै क्षीर वितरेत; ततः सप्तमेऽहनि निर्मांसस्त्वगस्थिभूतः केवलं सोमपरिग्रहादेवोच्छ्वसिति, तदहश्च क्षीरेण सुखोष्णेन परिषिच्य तिलमधुकचन्दनानुलिप्तदेह पयः पाययेत, ततोऽष्टमेऽहनि प्रातरेव क्षीरपरिषिक्तं चन्दनप्रदिग्धगात्र पयः पाययित्वा पांशुशय्यां समुत्सृज्य क्षौमवस्त्रास्तृतायां शय्यायां शाययेत्, ततोऽस्य मांसमाप्याय्यते, त्वक् चावदलति, दन्तनखरोमाणि चास्य पतन्ति, तस्य नवमेऽहन्यात्मप्रभृत्यणुतैलाभ्यङ्गः सोमवल्ककषायपरिषेक'; ततो दशमेऽहन्येतदेव वितरेत्, ततोऽस्य त्वक् स्थिरतामुपैति; एवमेकादशद्वादशयोर्वर्तेत, ततस्त्रयोदशात् प्रभृति सोमवल्ककषायपरिषेकः, एवमाषोडशाद्वर्तेत; ततः सप्तदशाष्टादशयोर्दिवसयोर्दशना जायन्ते शिखरिणः स्निग्धवज्रवैदूर्यस्फटिकप्रकाशाः समाः स्थिराः सहिष्णवः, तदा प्रभृति चानवैः शालितण्डुलैः क्षीरयवागूमुपसेवेत यावत् पञ्चविंशतिरिति; ततोऽस्मै दद्याच्छाल्योदनं मृदूभयकालं पयसा, ततोऽस्य नखा जायन्ते विद्रुमेन्द्रगोपकतरुणादित्यप्रकाशाः; स्थिराः स्निग्धा लक्षणसंपन्नाः केशाश्च सूक्ष्मा जायन्ते, त्वक् च नीलोत्पलानसीपुष्पवैदूर्यप्रकाशा; ऊर्ध्वं च मासात् केशान् वापयेत्, वापयित्वा चोशीरचन्दनकृष्णतिलकल्कैः शिरः प्रदिह्यात् पयसा वा स्नापयेत्; ततोऽस्यानन्तरं सप्तरात्रात् केशा जायन्ते भ्रमराञ्जननिभाः कुञ्चिताः स्थिराः स्निग्धाः ततस्त्रिरात्रात् प्रथमावसथपरिसरान्निष्क्रम्य मुहूर्तं स्थित्वा पुनरेवान्तः प्रविशेत्, ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य, यवपिष्टमुद्वर्तनार्थे, सुखोष्ण च पय परिषेकार्थे, अजकर्णकषायमुत्सादनार्थे, सोशीरं कूपोदकं स्नानार्थे, चन्दनमनुलेपार्थे, आमलकरसविमिश्राश्चास्य यूषसूपविकल्पाः, क्षीरमधुकसिद्धं च कृष्णतिलमवचारणार्थे, एवं दशरात्र; ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्तेत; ततस्तृतीये परिसरे स्थिरीकुर्वन्नात्मानमन्यद्दशरात्रमासीत, किञ्चिदातपपवनान् वा सेवेत, पुनश्चान्तः प्रविशेत्, न चात्मानमादर्शेऽप्सु वा निरीक्षेत रूपशालित्वात्; ततोऽन्यद्दशरात्रं क्रोधादीन् परिहरेत्, एवं सर्वेषामुपयोगविकल्पः। विशेषतस्तु वल्लीप्रस्तक्षुपकादयः सोमा ब्राह्मणक्षत्रियवैश्यैर्भक्षयितव्याः। तेषां तु प्रमाणमर्धचतुष्कमुष्टयः ॥ १२ ॥

अथवा सन्ध्या समय भोजन तथा मंगल पाठ श्रवण कर, कृष्णमृग की मृगछाला बिछी हुई कुशा की शय्या पर मित्रों के मध्य में सोवे। प्यास लगने पर अल्प-मात्रा में शीतल जल का पान करे। फिर प्रात:काल उठकर, मगलपाठ श्रवण कर तथा स्वस्ति वाचन करके गौ का स्पर्श करे एवं पूर्ववत् विहरे। सोम का पाचन होने पर वमन होता है। रक्तमिश्रित, कृमियुक्त वमन करने वाले मनुष्य को सन्ध्या समय उष्ण दूध शीतल करके पिलावे। तीसरे दिन कृमियुक्त रेचन होता है। इससे वह मनुष्य अनिष्ट तथा प्रतिग्रह भोजन आदि से मुक्त होकर शुद्ध शरीर वाला होता है। सन्ध्यासमय स्नान किए हुए उस मनुष्य को पूर्ववत् दूध पिलावे और रेशमी चादर बिछी हुई शय्या पर सुलावे। चौथे दिन उस व्यक्ति के शरीर में शोथ उत्पन्न होता है एवं सम्पूर्ण अङ्गों से कृमि निकलते हैं। उस दिन शय्या पर धूल बिछा कर सोवे और सन्ध्या समय पूर्ववत् दूध पीवे। इसी प्रकार पाँचवें और छठे दिन करे, उसे दोनों समय केवल दूध पिलावे। सातवें दिन त्वचा और मांससे रहित अस्थि वाला होकर वह केवल सोमपान के

कारण श्वास लेता है। उस दिन सुखोष्ण दूध से स्नान करा, तिल, मुलेठी और चन्दन का सम्पूर्ण शरीर में लेप लगावे और दूध पिलावे। आठवें दिन प्रातःकाल में ही दूध से स्नान किए हुए तथा शरीर में चन्दन का लेप लगाये हुए मनुष्य को दूध पिलाकर, धूलि की शय्या से उठाकर, रेशमी चादर बिछी हुई शय्या पर सुलावे। इसके पश्चात् उस मनुष्य का मांस पुष्ट होने लगता है, त्वचा फटने लगती है, दाँत, नख और रोम गिर जाते हैं। नवें दिन उसके शरीर पर अणु तैल की मालिश तथा सोम की छाल के क्वाथ से स्नान करावे। दशवें दिन यही कार्य करे। इससे उसकी त्वचा स्थिर हो जाती है। इसी प्रकार ग्यारहवें और बारहवें दिन करे। तेरहवें दिन सोम की छाल के क्वाथ से स्नान करावे और इस प्रकार सोलहवें दिन तक करे। सत्रहवें दिन नोकीले, चिकने, हीरा, वैडूर्य और स्फटिक की भाँति चमकीले, सम, स्थिर तथा सहनशील दाँत निकलते हैं। उस दिन से पुराने शालि चावल के द्वारा दूध में बनाई गई यवागू का सेवन पचीसवें दिन तक करे। फिर दोनों समय उसे शालि चावल का गला हुआ भात दूध के साथ खिलावे। उस व्यक्ति के मूंगा, वीरबहूटी और बाल सूर्य के समान लाल नख तथा स्थिर, चिकने, उत्तम लक्षणों से युक्त एवं सूक्ष्म केश उत्पन्न होते हैं। त्वचा, नील कमल, तीसी के फूल और वैडूर्य की भाँति सुंदर होती है। एक मास के बाद केशों को कटवावे और केश कटवाकर खस, चन्दन तथा काले तिल के कल्क का लेप शिर पर लगावे अथवा दूध से स्नान करावे। सात दिन के बाद उस व्यक्ति के भौंरे और अञ्जन के समान काले और घुँघराले, स्थिर तथा चिकने केश निकलते हैं। तीन दिन के पश्चात्, प्रथम वासस्थान की चहार दिवारी से निकलकर, एक क्षण रुककर पुनः अन्दर प्रवेश करे। उस मनुष्य के अभ्यङ्ग के लिये बला तैल, उबटन के लिये जौ की पिट्ठी, स्नान के लिए सुखोष्ण दूध, घर्षण के लिए अजकर्ण कषाय (कल्क), स्नान के लिये खसयुक्त कूप जल, लेप के लिये चन्दन, और आँवले के रस से युक्त यूष तथा सूप आदि का प्रयोग करे और दूध एवं मुलेठी के साथ सिद्ध काले तिल का लेप शरीर में लगावे। इस प्रकार दस दिन करे। फिर दूसरे दस दिन दूसरे गर्भ में (घर के दूसरे भाग में) रहे। फिर तीसरे गर्भ में अपने को स्थिर रखते हुए, दस दिन वास करे और कुछ धूप तथा वायु का सेवन कर पुनः घर में प्रवेश करे। रूपवान हो जाने के कारण अपनी छाया शीशा या जल में न देखे। अन्य दश दिनों तक क्रोध आदि का परित्याग करे। इसी प्रकार सभी सोमों के सेवन का क्रम है। विशेष रूप से लता, प्रतान (शाखा वाले) और क्षुप (छोटे पौधे) आदि स्वरूप वाले सोमों का सेवन ब्राह्मण, क्षत्रिय तथा वैश्य को करना चाहिये। इनकी मात्रा साढ़े चार पल है॥ १२॥

अंशुमन्तं सौवर्णे पात्रेऽभिपुणुयात्, चन्द्रमसं राजते; तावुपयुज्याष्टगुणमैश्वर्यमवाप्येशानं देवमनुप्रविशति, शेषांस्तु ताम्रमये मृन्मये वा रोहिते वा चर्मणि विततेशूद्रवर्जं त्रिभिर्वर्णैः सोमा उपयोक्तव्याः। ततश्चतुर्थे मासे पौर्णमास्यां शुचौ देशे ब्राह्मणानर्चयित्वा कृतमङ्गलो निष्क्रम्य यथोक्तं व्रजेदिति॥ १३॥

अनेकविध सोमों के रस-ग्रहण के लिए पात्रों का निर्देश—अंशुमान सोम को सोने के पात्र में निचोड़ना चाहिये और चन्द्रमस को चाँदी के पात्र में। इन दोनों का सेवन कर मनुष्य, अणिमा, लघिमा आदि अष्टविध ऐश्वर्य को प्राप्त कर देव महेश्वर को प्राप्त करता है। शेष अन्य सोमों को ताम्बा या मिट्टी अथवा रोहितमृग के चर्म से निर्मित बड़े पात्र में निचोड़ना चाहिये। शूद्रों को छोड़कर अन्य तीन वर्ण के व्यक्तियों को, सोम का सेवन करना चाहिये। चौथे मास में पूर्णमासी को पवित्र स्थान में ब्राह्मणों की पूजा तथा स्वस्तिवाचन, मंगलपाठ करके गृह से निकल कर पूर्वोक्त विधि के अनुसार चले॥ १३॥

ओषधीनां पतिं सोममुपयुज्य विचक्षणः।
दशवर्षसहस्राणि नवां धारयते तनुम्॥ १४॥

सोमसेवन का फल—औषधियों के स्वामी सोम का प्रयोग कर बुद्धिमान् मनुष्य दस सहस्र वर्ष तक नवीन शरीर धारण करता है॥ १४॥

नाग्निर्न तोयं न विषं न शस्त्रं नास्त्रमेव च।
तस्यालमायुः क्षपणे समर्थानि भवन्ति हि॥ १५॥

अग्नि, जल, विष, शस्त्र और अस्त्र कोई भी सोम-सेवन करने वाले मनुष्य की आयु नष्ट करने में समर्थ नहीं होते॥

भद्राणां षष्टिवर्षाणां प्रसुतानामनेकधा।
कुञ्जराणां सहस्रस्य बलं समधिगच्छति॥ १६॥

साठ वर्ष की आयु वाले भद्रजाति के तथा अनेक बार जिनके मस्तकों से मद चू चुका है, ऐसे सहस्र हाथियों का बल सोम सेवन करने वाला मनुष्य प्राप्त करता है॥ १६॥

क्षीरोदं शक्रसदनमुत्तरांश्च कुरूनपि।
यत्रेच्छति स गन्तुं वा तत्राप्रतिहता गतिः॥ १७॥

क्षीरसागर, इन्द्रपुरी तथा उत्तर कुरु प्रदेश, जहाँ भी वह व्यक्ति जाना चाहे उसकी गति अकुण्ठित रहती है॥ १७॥

कन्दर्प इव रूपेण कान्त्या चन्द्र इवापरः।
प्रह्लादयति भूतानां मनांसि स महाद्युतिः॥ १८॥

रूप में कामदेव के समान तथा कान्ति में दूसरे चन्द्रमा की भाँति वह महान् तेजस्वी मनुष्य जीवों के मन को प्रसन्न करता है॥ १८॥

साङ्गोपाङ्गांश्च निखिलान् वेदान् विन्दति तत्त्वतः।
चरत्यमोघसङ्कल्पो देववच्चाखिलं जगत्॥ १९॥

वह मनुष्य समस्त वेदों तथा उनके अङ्ग एवं उपाङ्गों के तत्त्व को जानता है, उसके सकल्प अव्यर्थ होते हैं और वह देवताओं की भाँति समस्त संसार में विचरता है॥ १९॥

सर्वेषामेव सोमानां पत्राणि दश पञ्च च।
तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च॥२०॥
एकैकं जायते पत्रं सोमस्याहरहस्तदा।
शुक्लस्य पौर्णमास्यां तु भवेत् पञ्चदशच्छदः॥ २१॥
शीर्यते पत्रमेकैकं दिवसे दिवसे पुनः।
कृष्णपक्षक्षये चापि लता भवति केवला॥ २२॥

सोमों के सामान्य लक्षण—सभी सोमों में पन्द्रह पत्ते होते हैं और वे शुक्लपक्ष में निकलते तथा कृष्णपक्ष में झड जाते हैं। शुक्लपक्ष में प्रतिदिन सोम का एक एक पत्ता उत्पन्न होता है तथा पूर्णमासी के दिन वे पूरे पन्द्रह हो जाते हैं। पुनः कृष्णपक्ष में प्रतिदिन एक एक पत्ता झडने लगता है और पक्ष की समाप्ति पर (अमावस्या को) केवल लता शेष रह जाती है॥

अंशुमानाज्यगन्धस्तु कन्दवान् रजतप्रभः।
कदल्याकारकन्दस्तु मुञ्जवांल्लशुनच्छदः॥ २३॥

विविध सोमों के विशिष्ट लक्षण—अंशुमान सोम घृत की गन्ध वाला तथा रजतप्रभ कन्दयुक्त होता है। मुञ्जवान् सोम में केले के समान कन्द और लशुन की भाँति पत्ते होते हैं॥

चन्द्रमाः कनकाभासो जले चरति सर्वदा।
गरुडाहृतनामा च श्वेताक्षश्चापि पाण्डुरौ॥ २४॥
सर्पनिर्मोकसदृशौ नौ वृक्षाग्रावलम्बिनौ।
तथाऽन्ये मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते॥२५॥
सर्व एव तु विज्ञेयाः सोमाः पञ्चदशच्छदाः।
क्षीरकन्दलतावन्तः पत्रैर्नानाविधैः स्मृताः॥२६॥

चन्द्रमा और कनकप्रभ सोम सदा जल में रहते हैं। गरुडाहृत और श्वेताक्ष सर्प की केंचुल के समान तथा पाण्डुर (धूमर) वर्ण के होते हैं एवं वृक्ष के अग्रभाग में लटके रहते हैं। शेष अन्य सोम मण्डलाकार चित्रों से चित्रित की भांति प्रतीत होते हैं। सभी सोम पन्द्रह पत्ते वाले होते हैं, उनके कन्द में दूध तथा लतायें होती हैं एवं पत्ते नाना प्रकार के होते हैं॥

हिमवत्यर्बुदे सह्ये महेन्द्रे मलये तथा।
श्रीपर्वते देवगिरौ गिरौ देवसहे तथा॥ २७॥
पारियात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा।
उत्तरेण वितस्तायाः प्रवृद्धा ये महीधराः॥ २८॥
पञ्च तेषामधो मध्ये सिन्धुनामा महानदः।
हृष्टवन् प्लवते तत्र चन्द्रमा सोमसत्तमः॥ २९॥

सोमों की उत्पत्ति के स्थानों का निर्देश—हिमालय, अर्बुद, सह्य, महेन्द्र, मलय, श्रीपर्वत, देवगिरि, पारियात्र, विन्ध्य, देवसुन्द तथा ह्रद (बड़े तालाब) में सोम पाये जाते हैं। वितस्ता नदी के उत्तर में, बहुत बडे जो पाँच पर्वत हैं, उनके नीचे, मध्य में, सिन्धु नामक महानद है, उसमें, सोमों में श्रेष्ठ चन्द्रमा, हृष्ट (जलकुम्भी) की भाँति तैरता रहता है॥

तस्योद्देशेषु चाप्यस्ति मुञ्जवानंशुमानपि।
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्॥३०॥
गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाकरस्तथा।
अत्र सन्त्यपरे चापि सोमाः सोमसमप्रभाः॥३१॥

मुञ्जवान् और अंशुमान् भी चन्द्रमा नामक सोम के समीप रहते हैं। काश्मीर में क्षुद्रक मानस नामक दिव्य सरोवर है, वहाँ गायत्र, त्रैष्टुभ, पाङ्क्त, जागत तथा शाकर एवं अन्य दूसरे चन्द्रमा के समान सुंदर सोम भी हैं॥३०-३१॥

यैश्चात्र मन्दभाग्यैस्ते भिषजश्चापमानिताः।
न तान् पश्यन्त्यधर्मिष्ठाः कृतघ्नाश्चापि मानवाः
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा॥३२॥
इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने स्वभाव-व्याधिप्रतिषेधनीयं रसायनचिकित्सितं नामैकोनत्रिंशोऽध्यायः॥ २९॥

भाग्यहीन, वैद्य का अपमान करने वाले, अधार्मिक और कृतघ्न तथा औषधियों एवं ब्राह्मणों से द्वेष रखने वाले मनुष्य उन्हें देख नहीं पाते॥ ३२॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायामेकोनत्रिंशत्तमोऽध्यायः॥

त्रिंशत्तमोऽध्यायः

अथातो निवृत्तसन्तापीयं रसायनं व्याख्यास्यामः॥१॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

निवृत्तसंतापीय रसायनाध्याय का उपक्रम—इसके अनन्तर, सन्ताप को दूर करने वाले, रसायन चिकित्सा का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा॥ १-२॥

यथा निवृत्तसन्तापा मोदन्ते दिवि देवताः।
तथौषधीरिमाः प्राप्य मोदन्ते भुवि मानवाः॥ ३॥

जिस प्रकार सन्ताप (दुःख) से मुक्त देवता लोग स्वर्ग में प्रसन्न होते हैं, उसी प्रकार इन औषधियों को प्राप्त कर मनुष्य पृथ्वी पर हर्षित होते हैं॥ ३॥

अथ खलु सप्त पुरुषा रसायनं नोपयुञ्जीरन्; तद्यथा—अनात्मवानलसो दरिद्रः प्रमादी व्यसनी पापकृद् भेषजापमानी चेति। सप्तभिरेव कारणैर्न संपद्यते; तद्यथा—अज्ञानादनारम्भादस्थिरचित्तत्वादारिद्र्यादनायत्तत्वादधर्मादौषधालाभाच्चेति॥ ४॥

रसायन सेवन के अयोग्य पुरुष—सात प्रकार के मनुष्यों को रसायन का सेवन नहीं करना चाहिए, जैसे-अजितेन्द्रिय, आलसी, दरिद्र, प्रमादी, व्यसनी, पापकर्म में लिप्त और औषधियों का अपमान करने वाले। सात कारणों से ही, रसायन सेवन का फल प्राप्त नहीं होता—१ अज्ञान २ औषध का आरम्भ न करना ३ मन की चञ्चलता ४ दरिद्रता ५ पराधीनता, ६ अधर्म तथा ७ औषध का न मिलना॥ ४॥

अथौषधीर्व्याख्यास्यामः—तत्राजगरी, श्वेतकापोती, कृष्णकापोती, गोनसी, वाराही, कन्या, छत्रा, अतिच्छत्रा, करेणुः, अजा, चक्रका, आदित्यपर्णी, ब्रह्मसुवर्चला, श्रावणी, महाश्रावणी, गोलोमी, अजलोमी, महावेगवती, चेत्यष्टादश सोमसमवीर्या महौषधयो व्याख्याताः। तासां सोमवत् क्रियाशीःस्तुतयः शास्त्रेऽभिहिताः। तासामागारेऽभिहुतानां या क्षीरवत्यस्तासां क्षीरकुडवं सकृदेवोपयुञ्जीत, यास्त्वक्षीरा मूलवत्यस्तासां प्रदेशिनीप्रमाणानि त्रीणि

काण्डानि प्रमाणमुपयोगे, श्वेतकापोती, समूलपत्रा भक्षयितव्या, गोनस्यजगरीकृष्णकापोतीनां सनखमुष्टि खण्डशः कल्पयित्वा क्षीरेण विपाच्य परिस्राव्याभिधारितमभिहुतं च सकृदेवोपयुञ्जीत, चक्रकायाः पयः सकृदेव, ब्रह्मसुवर्चला सप्तरात्रमुपयोक्तव्या भक्ष्यकल्पेन, शेषाणां पञ्च पञ्च पलानि क्षीराढकक्वथितानि प्रस्थेऽवशिष्टेऽवतार्य परिस्राव्य सकृदेवोपयुञ्जीत। सोमवदाहारविहारौ व्याख्यातौ, केवलं नवनीतमभ्यङ्गार्थे, शेषं सोमवदानिर्गमादिति ॥ ५ ॥

सोमसदृश अन्य रसायन ओषधियाँ—इसके आगे औषधियों का वर्णन किया जाता है—अजगरी, श्वेत कापोती, कृष्णकापोती, गोनसी, वाराही, कन्या, छत्रा, अतिच्छत्रा, करेणु, अजा, चक्रका, आदित्यपर्णी, ब्रह्मसुवर्चला, श्रावणी, महाश्रावणी, गोलोमी, अजलोमी और महावेगवती, इन अठारह औषधियों को, सोम के समान शक्तिशाली कहा गया है। इनका सेवन-विधान तथा गुण और प्रशंसा भी, सोम की भांति शास्त्र में वर्णित है। होम किए हुए गृह में (प्रवेश करके) इनमें से जो दूध वाले हों, उनका एक कुडव (४ पल) दूध, एक बार में पी ले। जो दूधरहित मूल वाली हों, उनकी तर्जनी अंगुलि के तुल्य, तीन टुकड़ों की मात्रा का उपयोग करे। श्वेत कापोती, मूल और पत्ते के साथ सेवन करनी चाहिए। गोनसी, अजगरी और कृष्ण कापोती को, नख सहित एक मुट्ठी प्रमाण, छोटे छोटे टुकडे करके, दूध में पकाकर तथा छान कर, थोडा घी मिला, होम करके, एक बार में सेवन करे। चक्रका का दूध एक बार में पीवे। ब्रह्मसुवर्चला का सेवन भक्ष्यकल्प (मालपुआ, पूडी, कचौडी आदि) विधान से सात दिन करे। शेष अन्य सोमों को पांच-पांच पल लेकर, एक आढ़क दूध में पकावे और एक प्रस्थ दूध अवशिष्ट रहने पर अग्नि से उतार, छान कर, एक बार में सेवन करे। आहार-विहार का विधान, सोम की तरह समझे और अभ्यङ्ग में केवल मक्खन का प्रयोग करे। शेष सभी विधान, गृह से बाहर निकलने तक, सोम के तुल्य है ॥ ५ ॥

भवन्ति चात्र—

युवानं सिंहविक्रान्तं कान्तं श्रुतनिगादिनम्।
कुर्युरेताः क्रमेणैव द्विसहस्रायुषं नरम् ॥ ६ ॥

रासायनिक ओषधियों के सेवन का फल—जैसे कि:—ये औषधियाँ, क्रमानुसार मनुष्य को युवा, सिंह के समान बलशाली, सुन्दर, स्मृति शील तथा दो सहस्र वर्ष की आयु वाला बनाती हैं ॥ ६ ॥

अङ्गदी कुण्डली मौली दिव्यस्रक्चन्दनाम्बरः।
चरत्यमोघसंकल्पो नभस्यम्बुददुर्गमे ॥ ७ ॥

बाजूबन्द, कुण्डल, मुकुट, दिव्यमाला, चन्दन और वस्त्र धारण करके तथा सफल मनोरथ होकर, मनुष्य, बादलों के लिए भी दुर्गम, आकाश में विचरता है ॥ ७ ॥

व्रजन्ति पक्षिणो येन जललम्बाश्च तोयदाः।
गतिः सौषधिसिद्धस्य सोमसिद्धे गतिः परा ॥ ८ ॥

पक्षियों तथा जल से भरे हुए बादलों की भांति औषधिसिद्ध मनुष्य की गति होती है। सोमसिद्ध पुरुष की गति तो कुछ दूसरी ही है अर्थात् वह इनसे उत्कृष्ट होती है ॥ ८ ॥

अथ वक्ष्यामि विज्ञानमौषधीनां पृथक् पृथक्।
मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चपर्णिनी ॥ ९ ॥
पञ्चारत्निप्रमाणा च विज्ञेयाऽजगरी बुधैः।
निष्पत्रा कनकाभासा मूले द्व्यङ्गुलसंमिता ॥ १० ॥
सर्पाकारा लोहितान्ता श्वेतकापोतिरुच्यते।
द्विपर्णिनी मूलभवामरुणां कृष्णमण्डलाम् ॥ ११ ॥
द्व्यरत्निमात्रां जानीयाद्गोनसीं गोनसाकृतिम्।
सक्षीरां रोमशां मृद्वीं रसेनेक्षुरसोपमाम् ॥ १२ ॥
एवंरूपरसां चापि कृष्णकापोतिमादिशेत्।
कृष्णसर्पस्वरूपेण वाराही कन्दसंभवा ॥ १३ ॥
एकपत्रा महावीर्या भिन्नाञ्जनसमप्रभा।
छत्रातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसंभवे ॥ १४ ॥
जरामृत्युनिवारिण्यौ श्वेतकापोतिसंस्थिते।
कान्तैर्द्वादशभिः पत्रैर्मयूराङ्गरुहोपमैः ॥ १५ ॥
कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी।
करेणुः सुबहुक्षीरा कन्देन गजरूपिणी ॥ १६ ॥
हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी।
अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी ॥ १७ ॥
अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा।
श्वेतां विचित्रकुसुमां काकादन्या समां क्षुपाम् ॥ १८ ॥
चक्रकामोषधीं विद्याज्जरामृत्युनिवारिणीम्।
मूलिनी पञ्चभिः पत्रैः सुरक्तांशुककोमलैः ॥ १९ ॥
आदित्यपर्णिनी ज्ञेया सदाऽऽदित्यानुवर्तिनी।
कनकाभा जलान्तेषु सर्वतः परिसर्पति ॥ २० ॥
सक्षीरा पद्मिनीप्रख्या देवी ब्रह्मसुवर्चला।
अरत्निमात्रक्षुपका पत्रैर्द्व्यर्धाङ्गुलसंमितैः ॥ २१ ॥
पुष्पैर्नीलोत्पलाकारैः फलैश्चाञ्जनसन्निभैः।
श्रावणी महती ज्ञेया कनकाभा पयस्विनी ॥ २२ ॥
श्रावणी पाण्डुराभासा महाश्रावणिलक्षणा।
गोलोमी चाजलोमी च रोमशे कन्दसंभवे ॥ २३ ॥
हंसपादीव विच्छिन्नैः पत्रैर्मूलसमुद्भवैः।
अथवा शङ्खपुष्प्या च समाना सर्वरूपतः ॥ २४ ॥

रासायनिक विविध औषधियों के लक्षण—इसके आगे, औषधियों की पहचान, पृथक् पृथक् बतलाई जाती है। अजगरी, गोलाकार, धूसर वर्ण के चित्रों से चित्रित, सर्प के समान, पाँच पत्तों वाली तथा पाँच अरत्नि (बालिश्त) प्रमाण की होती है। श्वेत कापोती, पत्ररहित, स्वर्ण के समान आभावाली, मूल में दो अंगुल लम्बी, सर्पाकार तथा लाल किनारे वाली होती है। गोनसी, दो पत्ते वाली, लाल जड़ तथा काले मण्डलों से युक्त, दो अरत्नि लम्बी और गौ के खुर के समान आकृति वाली होती है।

कृष्ण कापोती, दूध युक्त, रोमवाली, कोमल, गन्ने के रस के समान रस वाली और उसी रूप-रस की होती है। वाराही स्वरूप में काले सर्प के समान, कन्द से उत्पन्न होने वाली, एक पत्ते वाली, महान् शक्ति सम्पन्न और टूटे हुए अञ्जन की भांति, चमक से युक्त होती है। छत्रा और अतिछत्रा, राक्षसों का नाश करने वाली, कन्द से उत्पन्न होने वाली, बुढापा और मृत्यु को दूर करने वाली तथा श्वेत कापोती के समान आकृति वाली होती है। कन्या नामक महौषधि, मोरपख के समान सुन्दर बारह पत्तों से युक्त, कन्द से उत्पन्न होने वाली तथा सुनहले रग के दूध वाली होती है। करेणु अधिक दूध वाली, हाथी के समान कन्दवाली तथा हस्तिकर्णपलाश के समान पत्तों वाली एव दो पत्तों से युक्त होती है। अजा नामक महौषधि, बकरी के स्तन की भाति कन्द वाली, दूध से युक्त, क्षुप (छोटे पौधे) के आकार वाली तथा शंख, कुन्द (पुष्प) और चन्द्रमा के समान उज्ज्वल होती है। चक्रका औषधि, श्वेत, विविध वर्ण के पुष्पों से युक्त, काकादनी (गुक्षा) के पौधे के समान और जरा एवं मृत्यु को दूर करने वाली होती है। आदित्यपर्णी, मूलवाली, सूर्य की लाल किरणों के समान सुन्दर, कोमल, पाँच पत्तों से युक्त तथा सदा सूर्य का अनुगमन करने वाली होती है। देवी ब्रह्मसुवर्चला, सोने के समान वर्ण वाली, जल के किनारे फैलने वाली, दूध युक्त और कमलिनी के समान होती है। श्रावणी का पौधा एक बालिश्त लम्बा, पत्ते दो अगुल लम्बे, फूल नीलोफर की आकृति के और फल अक्षत के समान होते हैं। महाश्रावणी, सोने के समान चमकीली, दूध से युक्त, धूसर वर्ण वाली और महाश्रावणी के लक्षणों से युक्त होती है। गोलोमी और अजलोमी, रोमवाली, कन्द से उत्पन्न होने वाली, हंसपदी के समान कटे हुए तथा जडों से निकलने वाले पत्तों वाली अथवा सम्पूर्ण रूप से शंखपुष्पी के समान होती है ॥ ९-२४ ॥

वेगेन महताऽऽविष्टा सर्पनिर्मोकसन्निभा।
एषा वेगवती नाम जायते ह्यम्बुदक्षये ॥ २५ ॥

वेगवती, वेग से बढ़ने वाली, साँप की केचुल के समान आकृति वाली और वर्षा ऋतु के अन्त मे (शरद् ऋतु में) उत्पन्न होती है ॥ २५ ॥

सप्तादौ सर्परूपिण्यो ह्यौषध्यो याः प्रकीर्तिताः।
तासामुद्धरणं कार्यं मन्त्रेणानेन सर्वदा ॥ २६ ॥

रासायनिक ओषधियों के उखाडने का मन्त्र—प्रारम्भ में, साप की आकृतिवाली जिन सात औषधियों का वर्णन किया गया है, उन्हें इस अधोलिखित मन्त्र के साथ, सदा उखाडना चाहिए ॥ २६ ॥

महेन्द्ररामकृष्णानां ब्राह्मणानां गवामपि।
तपसा तेजसा वाऽपि प्रशाम्यध्वं शिवाय वै ॥ २७ ॥

महेन्द्र, राम, कृष्ण, ब्राह्मण और गौ के तप और तेज से, कल्याण करने के लिए, शान्त रहो ॥ २७ ॥

मन्त्रेणानेन मतिमान् सर्वा एवाभिमन्त्रयेत्।
अश्रद्दधानैरलसैः कृतघ्नैः पापकर्मभिः ॥ २८ ॥
नैवासादयितुं शक्याः सोमाः सोमसमास्तथा।

इस मन्त्र के द्वारा बुद्धिमान् वैद्य, सभी औषधियों को अभिमन्त्रित करे। श्रद्धारहित, आलसी, कृतघ्न और पापकर्म में रत मनुष्य, चन्द्रमा के तुल्य सोमों को, प्राप्त नहीं कर सकते ॥ २८ ॥

पीतावशेषममृतं देवैर्ब्रह्मपुरोगमैः ॥ २९ ॥
निहितं सोमवीर्यासु सोमे चाप्योषधीपतौ।

पूर्वोक्त ओषधियों के अमृत समान गुणकारी होने में हेतु-ब्रह्मा के पश्चाद्गामी देवताओं ने, पीने से बचे हुए अमृत को, सोम के समान वीर्य वाली औषधियों में तथा औषधियों के स्वामी चन्द्रमा में रख दिया ॥ २९ ॥

देवसुन्दे ह्रदवरे तथा सिन्धौ महानदे ॥ ३० ॥
दृश्यते च जलान्तेषु मेध्या ब्रह्मसुवर्चला।
आदित्यपर्णिनी ज्ञेया तथैव हिमसंक्षये ॥ ३१ ॥
दृश्यतेऽजगरी नित्यं गोनसी चाम्बुदागमे।
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम् ॥ ३२ ॥
करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा।
गोलोमी चाजलोमी च महती श्रावणी तथा ॥ ३३ ॥
वसन्ते कृष्णसर्पाख्या गोनसी च प्रदृश्यते।
कौशिकीं सरितं तीर्त्वा सञ्जयन्त्यास्तु पूर्वतः ॥ ३४ ॥
क्षितिप्रदेशो वल्मीकैराचितो योजनत्रयम्।
विज्ञेया तत्र कापोती श्वेता वल्मीकमूर्धसु ॥ ३५ ॥
मलये नलसेतौ च वेगवत्योषधी ध्रुवा।
कार्तिक्यां पौर्णमास्यां च भक्षयेत्तामुपोषितः ॥ ३६ ॥
सोमवच्चात्र वर्तेत फलं तावच्च कीर्तितम्।
सर्वा विचेयास्त्वोषध्यः सोमाश्चाप्यर्बुदे गिरौ ॥ ३७ ॥
स शृङ्गैर्देवचरितैरम्बुदानीकभेदिभिः।
व्याप्तस्तीर्थैश्च विख्यातैः सिद्धर्षिसुरसेवितैः ॥ ३८ ॥
गुहाभिर्भीमरूपाभिः सिंहोन्नादितकुक्षिभिः ॥
गजालोडिततोयाभिरापगाभिः समन्ततः।
विविधैर्धातुभिश्चित्रैः सर्वत्रैवोपशोभितः ॥ ३९ ॥
नदीषु शैलेषु सरःसु चापि
पुण्येष्वरण्येषु तथाऽऽश्रमेषु।
सर्वत्र सर्वाः परिमार्गितव्याः
सर्वत्र भूमिर्हि वसूनि धत्ते ॥ ४० ॥

इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने निवृत्ततंत्रीयं रसायन नाम त्रिंशोऽध्यायः ॥ ३० ॥

पूर्वोक्त ओषधियों के उत्पत्ति-प्रदेश—जलाशयों में श्रेष्ठ देवसुन्द तथा सिन्धु महानदी में एवं जल के किनारे, मेध्या ब्रह्मसुवर्चला दीखती है। इसी प्रकार आदित्यपर्णी वसन्त ऋतु में दिखलाई पडती है। अजगरी सदा तथा गोनसी वर्षा ऋतु में दृष्टिगत होती है। काश्मीर में क्षुद्रक मानस नामक एक दिव्य जलाशय है, वहाँ करेणु, कन्या, छत्रा, अतिछत्रा, गोलोमी, अजलोमी, श्रावणी और महाश्रावणी उत्पन्न होती

हैं। वाराही और गोनसी वसन्त ऋतु में दिखलाई पड़ती है। कौशिकी नदी को पार करके, सप्तपत्नी के पूर्व में, वल्मीक से भरा हुआ तीन योजन का भूभाग है, वहाँ श्वेतकापोती मलय पर्वत तथा नल सेतु पर निश्चय प्राप्त होती है। इसे कार्तिक मास की पूर्णिमा को उपवास करके सेवन करना चाहिए। इसमें सोम सेवन की भांति आहार और आचार तथा गुण बतलाया गया है। सभी औषधियाँ तथा सोम अर्बुदगिरि से एकत्रित करनी चाहिए। उस पर्वत की चोटियों पर देवता विचरते हैं, शिखर मेघघटा का भेदन करते हैं, (ऊँचाई के कारण) वह प्रसिद्ध तीर्थ स्थानों से भरा हुआ है तथा वहाँ सिद्ध ऋषि और देवताओं का वास है। वह भयङ्कर गुहाओं तथा सिंहगर्जना से प्रतिध्वनित गोहों से व्याप्त तथा हाथियों के द्वारा आलोडित नदियों के जल से चतुर्दिक् घिरा हुआ है और नाना प्रकार के धातु एवं चित्र विचित्र वस्तुओं से सभी स्थानों में सुशोभित है। नदी, पर्वत, जलाशय, पवित्रवन, आश्रम एवं सभी स्थानों में इन सम्पूर्ण औषधियों को ढूँढना चाहिए क्योंकि भूमि सभी स्थलों पर सम्पत्ति धारण करती है॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाटीकायां त्रिंशत्तमोऽध्यायः॥

एकत्रिंशत्तमोऽध्यायः

अथातः स्नेहोपयौगिकचिकित्सितं व्याख्यास्यामः॥
यथोवाच भगवान् धन्वन्तरिः॥ २॥

स्नेहोपयौगिक चिकित्सा का उपक्रम—इसके अनन्तर स्नेहप्रयोग चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा॥

स्नेहसारोऽयं पुरुषः, प्राणाश्च स्नेहभूयिष्ठाः स्नेहसाध्याश्च भवन्ति। स्नेहो हि पानानुवासनमस्तिष्कशिरोवस्त्युत्तरवस्तिनस्यकर्णपूरणगात्राभ्यङ्गभोजनेषूपयोज्यः॥ ३॥

स्नेह की प्रशंसा—मनुष्य शरीर में स्नेह ही सार वस्तु है, उसका जीवन (बल) स्नेह पर आधारित रहता है तथा उसकी रक्षा भी स्नेह के द्वारा ही होती है। स्नेह का प्रयोग पान, अनुवासन, मस्तिष्क (शिरोविरेचन), शिरोवस्ति, उत्तरवस्ति, नस्य, कर्णपूरण (कान में तेल डालना), गात्राभ्यङ्ग (शरीर की मालिश) और भोजन में करना चाहिये॥

तत्र द्विर्योनिश्चतुर्विकल्पोऽभिहितः स्नेहः स्नेहगुणाश्च। तत्र जङ्गमेभ्यो गव्यं घृतं प्रधानं, स्थावरेभ्यस्तिलतैलं प्रधानमिति॥ ४॥

स्नेह के भेद एवं उनमें गोघृत तथा तिल तेल की प्रधानता—स्नेह के दो उत्पत्तिस्थान (स्थावर और जगम) तथा चार भेद (घृत, तैल, वसा, मज्जा) होते हैं। जगम स्नेहों (घृत, वसा, मज्जा) में गोघृत प्रधान होता है और स्थावरों में तिल तैल॥ ४॥

अत ऊर्ध्वं यथाप्रयोजनं यथाप्रधानं च स्थावरस्नेहानुपदेक्ष्यामः—तत्र तिल्वकैरण्डकोशाम्रदन्तीद्रवन्तीसप्तलाशङ्खिनीपलाशविषाणिकागवाक्षीकम्पिल्लकशम्पाकनीलिनीस्नेहा विरेचयन्ति, जीमूतककुटजकृतवेधनेक्ष्वाकुधामार्गवमदनस्नेहा वामयन्ति, विडङ्गखरमञ्जरीमधुशिग्रुसूर्यवल्लीपीलुसिद्धार्थकज्योतिष्मतीस्नेहाः शिरो विरेचयन्ति, करञ्जपूतीककृतमालमातुलुङ्गेङ्गुदीकिराततिक्तकस्नेहा दुष्टव्रणेषूपयुज्यन्ते, तुवरककपित्थकम्पिल्लकभल्लातकपटोलस्नेहा महाव्याधिषु, त्रपुसेर्वारुककर्कारुकतुम्बीकूष्माण्डस्नेहा मूत्रसङ्गेषु, कपोतवङ्कावल्गुजहरीतकीस्नेहाः शर्कराश्मरीषु, कुसुम्भसर्षपातसीपिचुमर्दातिमुक्तकभाण्डीकटुतुम्बीकटभीस्नेहाः प्रमेहेषु, तालनारिकेलपनसमोचप्रियालबिल्वमधूकश्लेष्मातकान्नातकफलस्नेहाः पित्तसंसृष्टे वायौ, विभीतकभल्लातकपिण्डीतकस्नेहाः कृष्णीकरणे, श्रवणकङ्कटुण्टुकस्नेहाः पाण्डुकरणे, सरलपीतदारुशिंशपागुरुसारस्नेहा दद्रुकुष्ठकिटिभेषु, सर्व एव स्नेहा वातमुपन्नन्ति, तैलगुणाश्च समासेन व्याख्याताः॥ ५॥

विविध स्थावर स्नेहों के गुण तथा उपयोग—इसके आगे प्रयोजन और प्रधानता की दृष्टि से, श्रेष्ठ स्थावर स्नेहों का वर्णन किया जाता है—इनमें तिल्वक (लोध्र), एरण्ड, कोशाम्र, दन्ती, द्रवन्ती, सप्तला (सेहुण्ड भेद), शङ्खिनी (यवतिक्ता), पलाश, विषाणिका (मेढासिंगी), गवाक्षी (इन्द्रायण), कम्पिल्लक (कबीला), शम्पाक (अमलतास) और नीलिनी (नील) से उत्पन्न स्नेह विरेचन करते हैं। जीमूतक (देवदाली), कुटज, कृतवेधन (कडुई तरोई), इक्ष्वाकु (कडुई तुम्बी), धामार्गव (नेनुआ) और मैनफल से उत्पन्न स्नेह वमन कराते हैं। विडङ्ग, खरमञ्जरी (अपामार्ग), मधुशिग्रु (मीठा सहिजन), सूर्यवल्ली (हुलहुल), पीलु, सिद्धार्थक (सरसों) और ज्योतिष्मती (मालकांगनी) से उत्पन्न स्नेह, शिरोविरेचन के लिए उपयुक्त होते हैं। करञ्ज, पूतिकरञ्ज, कृतमाल (अमलतास), मातुलुङ्ग (बिजौरा), इङ्गुदी और चिरायता का स्नेह, दुष्टव्रणों में प्रयुक्त होता है। तुवरक, कैथ, कबीला, भिलावा और परवल के स्नेह का प्रयोग, महाव्याधियों में किया जाता है। त्रपुस (खीरा), एर्वारुक (ककड़ी), कर्कारुक (कूष्माण्डी), तुम्बी (कडुतुम्बी) और कूष्माण्ड के स्नेह का प्रयोग, मूत्रावरोध में किया जाता है। कपोतवङ्का (ब्राह्मी), अवल्गुज (वाकुची) और हरीतकी का स्नेह, शर्करा और अश्मरी में प्रयुक्त होता है। कुसुम्भ (बर्रे का तेल), सरसों, तीसी, नीम, अतिमुक्तक (माधवीलता) भाण्डी (मजीठ), कडुतुम्बी और कटभी (मालकांगनी) का स्नेह, प्रमेहों में प्रयोग में लाया जाता है। ताल (ताड़), नारियल, कटहल, मोच (केला), प्रियाल (चिरौंजी), बेल, महुआ, श्लेष्मातक (लिसोड़ा) और आम्रातक (आमड़ा) फलों के स्नेह, पित्तयुक्त वात में प्रयोग किये जाते हैं। बहेड़ा, भिलावा, और पिण्डितक (मैनफल) का स्नेह कृष्णकर्म (त्वचा का वर्ण काला करना) में प्रयुक्त होता है। श्रवण (तापसवृक्ष, इंगुदी), कंगुक (प्रियगु) और टुण्टुक (अरलू) का स्नेह पाण्डुकर्म में प्रयुक्त होता है। चीड़,

देवदार, शीशम और अगर के सार भाग का स्नेह वह्नु, कुष्ठ एवं क्रिमि रोग में व्यवहृत होता है। सभी स्नेह वातनाशक होते हैं। तेल के गुणों का संक्षेप में वर्णन किया गया है ॥५॥

अत ऊर्ध्वं कषायस्नेहपाककममुपदेक्ष्यामः। तत्र केचिदाहुः—त्वक्पत्रफलमूलादीनां भागस्तच्चतुर्गुणं जल चतुर्भागावशेषं निष्काथ्यापहरेदित्येष कषायपाककल्पः; स्नेहप्रसृतेषु षट्सु चतुर्गुणं द्रवमावाप्य चतुरश्राक्षसमान् भेषजपिण्डानित्येष स्नेहपाककल्पः। एतत्तु न सम्यक्; कस्मात्? आगमासिद्धत्वात् ॥६॥

क्वाथ तथा स्नेह के पाक-क्रम में एकदेशीय मत—इसके आगे कषाय (क्वाथ) और स्नेहपाक विधि का कथन किया जाता है। कुछ आचार्यों का मत है कि वनस्पतियों की छाल, पत्ता, फूल और मूल एक भाग तथा उससे चौगुना जल डाल कर क्वाथ करना चाहिये और चतुर्थांश जल अवशेष रहने पर उतार लेना चाहिये, यह कषायपाक विधि है। स्नेहपाक के लिए ६ अञ्जली स्नेह में चौगुना द्रव-पदार्थ (जल या किसी द्रव्य का स्वरस-क्वाथ) मिलाना चाहिये और चार अक्ष (बहेड़े का फल) की मात्रा में कल्क द्रव्य डालना चाहिये यह स्नेह पाक विधि है। किन्तु उनका कथन ठीक नहीं, क्योंकि शास्त्र से इस वचन की पुष्टि नहीं होती ॥ ६ ॥

विमर्शः—प्रसृतेऽत्र संयुक्तपञ्चाङ्गुलिरूपद्वितीयपाणिरेव, न तु पुनः पलद्वयम्। चतुरश्राक्षसमान् भेषजकल्कपिण्डान् विभीतकफलमानान् पिष्टभेषजकल्कान्।

पलकुडवादीनामतो मानं तु व्याख्यास्यामः—तत्र द्वादश धान्यमाषा मध्यमाः सुवर्णमाषकः; ते षोडश सुवर्णम्; अथवा मध्यमनिष्पावा एकोनविंशतिर्धरणं, तान्यर्धतृतीयानि कर्षः; ततश्चोर्ध्वं चतुर्गुणमभिवर्धयन्तः पलकुडवप्रस्थाढकद्रोणा इत्यभिनिष्पद्यन्ते, तुला पुनः पलशतं, ताः पुनर्विंशतिर्भारः; शुष्काणामिदं मानम्, आर्द्रद्रवाणां च द्विगुणमिति ॥ ७ ॥

पल-कुडवादि-मान परिभाषा—इसलिये पल, कुडव आदि की मान परिभाषा का वर्णन किया जाता है—मध्यम श्रेणी की बारह उड़दों का एक सुवर्णमाष होता है और सोलह सुवर्ण माष का एक सुवर्ण (कर्ष)। अथवा मध्यम श्रेणी की उन्नीस निष्पावों (सेम के बीज) का एक धरण होता है और अढ़ाई धरण का एक कर्ष। इसके आगे चौगुना के क्रम से बढ़ते हुए (जैसे चार कर्ष का एक पल और चार पल का एक कुडव) पल, कुडव, प्रस्थ, आढक और द्रोण बनते हैं। सौ पल की एक तुला होती है और बीस तुला का एक भार। यह मान-परिभाषा सूखे हुए द्रव्यों के लिये है, गीली औषधियों और द्रव पदार्थ इसी मान में दुगना लेना चाहिये ॥ ७ ॥

विमर्शः—मध्यमा मध्यमप्रमाणा, तेन नातिस्थूला नातिसूक्ष्मा ग्राह्याः। सुवर्णः कर्ष इत्यर्थः। अर्धं तृतीय येषां तान्यर्धतृतीयानि सार्धद्वयसंख्यक। ततः कर्षाच्चतुर्गुणवर्धमानात् पलम्, एवं पलात् कुडवः, कुडवात् प्रस्थः, प्रस्थादाढकम्, आढकाद् द्रोणः।

तत्रान्यतमपरिमाणसंमितां यथायोगं त्वक्पत्रफलमूलादीनामातपपरिशोषितानां छेद्यानि खण्डशश्छेदयित्वा भेद्यान्यणुशो भेदयित्वाऽवकुट्याष्टगुणेन षोडशगुणेन वाऽम्भसाऽभिषिच्य स्थाल्यां चतुर्भागावशिष्टं काथयित्वाऽपहरेदित्येष कषायपाककल्पः। स्नेहाच्चतुर्गुणो द्रवः, स्नेहचतुर्थांशो भेषजकल्कः, तदैकध्यं संसृज्य विपचेदित्येष स्नेहपाककल्पः। अथवा तत्रोदकद्रोणे त्वक्पत्रफलमूलादीनां तुलामावाप्य चतुर्भागावशिष्टं निष्काथ्यापहरेदित्येष कषायपाककल्पः; स्नेहकुडवे भेषजपलं पिष्टं कल्कं चतुर्गुणं द्रवमावाप्य विपचेदित्येष स्नेहपाककल्पः ॥ ८ ॥

स्नेहपाक कल्प—इनमें से किसी एक मान के अनुसार, योग में प्रयुक्त किये जाने वाले द्रव्यों की त्वचा (छाल), पत्र, फल और मूल आदि को धूप में सुखाकर, उनमें से काटने योग्य द्रव्यों के छोटे छोटे टुकड़े काट लेना चाहिए तथा तोड़ने योग्य द्रव्यों को छोटे-छोटे टुकड़ों में तोड लेना चाहिये और सबको कूटकर आठगुने या सोलहगुने जल में मिगोकर क्वाथ करना चाहिये। चतुर्थांश क्वाथ अवशिष्ट रहने पर उसे अग्नि पर से उतार लेना चाहिये; यह कषायपाक विधि है। स्नेहपाक में स्नेह से चौगुना द्रव पदार्थ, और स्नेह का चतुर्थांश औषधियों का पिसा हुआ कल्क एक साथ मिलाकर पाक करना चाहिये, यह स्नेहपाक विधि है। अथवा एक द्रोण जल में छाल, पत्ता, फल और जड आदि की एक तुला डालकर क्वाथ करना चाहिये और चतुर्थांश जल अवशेष रहने पर उतार लेना चाहिए, यह कषायपाक विधि है। एक कुडव स्नेह में, एक पल औषधि का पिसा हुआ कल्क तथा चौगुना द्रव पदार्थ डालकर पाक करना चाहिये, यह स्नेहपाक विधि है ॥ ८ ॥

भवतश्चात्र—

स्नेहभेषजतोयानां प्रमाणं यत्र नेरितम्।
तत्रायं विधिरास्येयो निर्दिष्टे तद्वदेव तु ॥ ९ ॥
अनुक्ते द्रवकार्ये तु सर्वत्र सलिलं मतम्।
कल्ककाथावनिर्देशे गणात्तस्मात् प्रयोजयेत् ॥ १० ॥

जैसे कि—जिस स्थान पर स्नेह, औषध और जल का परिमाण न लिखा गया हो वहाँ इस विधि का व्यवहार करना चाहिए और जहाँ विधि का निर्देश हो वहाँ उसी के अनुसार कार्य करना चाहिए। जहाँ द्रव पदार्थ का नाम निर्देश न किया गया हो वहाँ जल लेना चाहिये और कल्क तथा क्वाथ्य द्रव्य का निर्देश न होने पर, जिस वर्ग की औषधियों के द्वारा स्नेहपाक करना हो, उसी वर्ग के द्रव्यों का प्रयोग करना चाहिये ॥ ९-१० ॥

अत ऊर्ध्वं स्नेहपाककममुपदेक्ष्यामः। स तु त्रिविधः; तद्यथा—मृदुः, मध्यमः, खर इति। तत्र स्नेहौषधिविवेकमात्रं यत्र भेषज स मृदुरिति, मधूच्छिष्टमिव विशदमविलेपि यत्र भेषजं स मध्यमः, कृष्णमवसन्नमीषद्विशदं चिक्कणं च यत्र भेषज स खर ऊर्ध्वं दग्धस्नेहो भवति, तं पुनः साधु साधयेत्। तत्र

पानाभ्यवहारयोर्मृदुः, नस्याभ्यङ्गयोर्मध्यमः, बस्तिकर्णपूरणयोस्तु खर इति ॥ ११ ॥

त्रिविध स्नेहपाक के लक्षण—इसके आगे स्नेहपाक विधि का वर्णन किया जाता है। स्नेहपाक तीन प्रकार का होता है; जैसे—मृदु, मध्यम और खर। जिस स्नेह पाक में स्नेह और औषध (कल्क द्रव्य) पृथक् पृथक् दृष्टिगत हों उसे मृदुपाक कहते हैं; जब कल्क द्रव्य मोम के समान विशद् (पिच्छिलता रहित) और अविलेपी (अंगुलियों में न चिपकने वाला) हो तो वह मध्यम पाक कहलाता है और जब कल्क द्रव्य काला, अवसन्न (भूनने से कुछ टूटा हुआ), ईषद् विशद (कुछ पिच्छिलतारहित) तथा चिकना हो जाय तो उसे खर पाक कहते हैं। इससे अधिक पाक करने पर स्नेह जल जाता है, उसे फिर से भलीभांति पकाना चाहिये। पान और भोजन में मृदु, नस्य और अभ्यङ्ग में मध्यम तथा वस्ति और कर्णपूरण में खर पाक स्नेह का प्रयोग करना चाहिए ॥ ११ ॥

भवतश्चात्र—

शब्दस्योपरमे प्राप्ते फेनस्योपशमे तथा।
गन्धवर्णरसादीनां संपत्तौ सिद्धिमादिशेत् ॥ १२ ॥
घृतस्यैवं विपक्वस्य जानीयात् कुशलो भिषक्।
फेनोऽतिमात्रं तैलस्य शेषं घृतवदादिशेत् ॥१३॥

स्नेहसिद्धि के लक्षण—जैसे कि— जब घृतपाक के समय उठने वाला शब्द बन्द हो जाय, फेन शान्त रहे तथा गन्ध, वर्ण और रस आदि की उत्पत्ति हो, तो इस प्रकार पके हुए घृत को, कुशल वैद्य, सिद्ध समझे। तैलपाक में, फेन की अधिकता होने तथा अन्य लक्षण घृत के समान उपस्थित होने पर, उसे सिद्ध समझना चाहिए ॥ १२-१३ ॥

अत ऊर्ध्वं स्नेहपानक्रममुपदेक्ष्यामः—अथ खलु लघुकोष्ठायातुराय कृतमङ्गलस्वस्तिवाचनायोदयगिरिशिखरसंस्थिते प्रनष्टकनकनिकरपीतलोहिते सवितरि यथाबलं तैलस्य घृतस्य वा मात्रां पातुं प्रयच्छेत्। पीतमात्रे चोष्णोदकेनोपस्पृश्य सोपानत्को यथासुखं विहरेत् ॥ १४ ॥

स्नेहपान विधि—इसके आगे स्नेहपान विधि का वर्णन किया जाता है—स्वस्तिवाचन और मगलपाठ किए हुए लघु कोष्ठ वाले आतुर को, (लघुकोष्ठत्वं जीर्णाहारप्रदर्शनार्थम्) उदयाचल पर्वत के शिखर पर, तपे हुए सुवर्णसमूह के समान पीले और लाल वर्ण के सूर्य के आगमन पर (प्रातःकाल) व्याधि, दोष और आतुर के हीन, मध्य और उत्तम बल की परीक्षा करके, तैल अथवा घृत की मात्रा पीने के लिए देना चाहिये। स्नेहपान करते ही उष्ण जल से आचमन कर तथा पैर में जूता धारण करके रोगी को घूमना चाहिये ॥ १४ ॥

रूक्षक्षतविषार्तानां वातपित्तविकारिणाम्।
हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते ॥ १५ ॥

घृतपान के योग्य मनुष्य—रूक्ष, क्षत एवं विष से पीड़ित, वात और पित्तजन्य व्याधियों से युक्त तथा हीन बुद्धि और स्मृति वाले आतुरों के लिए, घृतपान उत्तम होता है ॥ १५ ॥

कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः।
पिबेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनश्च ये ॥ १६ ॥

तैलपान के योग्य मनुष्य—जिन रोगियों के कोष्ठ में कृमि पड़ गए हों, वायु भरी हुई हो, मेद और कफ की वृद्धि हो गई हो, जिन्हें तैल सेवन सात्म्य हो तथा जो शरीर को दृढ़ बनाना चाहते हों, उन्हें तैलपान करना चाहिये ॥१६॥

व्यायामकर्शिताः शुष्करेतोरक्ता महारुजः।
महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः ॥ १७ ॥

वसापान के योग्य मनुष्य—अधिक व्यायाम से कृश, सूखे हुए शुक्र और रक्तवाले, अतिशय पीड़ा युक्त अत्यन्त तीव्र अग्नि वाले और वायु के सहारे ही जिनकी प्राणरक्षा हो रही हो ऐसे मनुष्यों के लिए वसा पान उत्तम होता है ॥१७॥

क्रूराशयाः क्लेशसहा वातार्ता दीप्तवह्नयः।
मज्जानमाप्नुयुः सर्वे सर्पिर्वा स्वौषधान्वितम् ॥ १८ ॥

मज्जापानके योग्य मनुष्य—कड़े कोष्ठवाले, कष्टसहिष्णु, वातजन्यव्याधि से पीड़ित और तीव्र अग्नि वाले सभी आतुरों को, जिसके लिए जो औषध अनुकूल हो, उसमें सिद्ध मज्जा अथवा घृतपान करना चाहिये ॥ १८ ॥

केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्।
देयं बहुकफे चापि व्योषक्षारसमायुतम् ॥ १९ ॥

दोष-विशेष के अनुसार घृत पान का निर्देश—पित्तजन्य व्याधि में, अन्य द्रव्यों से रहित केवल घृत, वातज में लवणयुक्त घृत तथा कफ की अधिकता होने पर सोंठ, मरिच, पिप्पली एवं यवक्षार मिश्रित घृत पिलाना चहिए ॥ १९ ॥

विमर्शः—केवलमसहायमन्यद्रव्यैरसयुक्तमित्यर्थः। तच्च संस्कृतमसंस्कृतं वा। यत्तु पित्तहरद्रव्यसाधितमेव केवलमित्याह।

दोषाणामल्पभूयस्त्वं संसर्गं समवेक्ष्य च।
युञ्ज्याच्त्रिषष्टिधाभिन्नैः समासव्यासतो रसैः ॥ २० ॥

दोषों के ससर्ग विशेष में ६३ रस योग—दोषों की अल्पता और अधिकता तथा उनके सम्मिश्रण की परीक्षा करके, पृथक् एवं सम्मिलित रूप से द्रव्यों के तिरसठ प्रकार के रसभेदों के साथ, घृत का सेवन करना चाहिये ॥ २० ॥

स्नेहसात्म्यः क्लेशसहः काले नात्युष्णशीतले।
अच्छमेव पिबेत् स्नेहमच्छपानं हि पूजितम् ॥२१॥

अच्छ स्नेहपान का निर्देश—जिन्हें स्नेह सात्म्य है तथा जो कष्ट-सहिष्णु हैं, उन्हें समशीतोष्ण काल में, अच्छ स्नेह-(केवल स्नेह) पीना चाहिये क्योंकि उनके लिये केवल स्नेह श्रेष्ठ होता है ॥ २१ ॥

शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि।
वातपित्ताधिको रात्रौ वातश्लेष्माधिको दिवा ॥२२॥

स्नेहपान में काल विचार—शीतऋतु में दिन में और उष्ण ऋतु में रात्रि में तथा वात और पित्त की अधिकता में रात्रि में एव वात तथा कफ की अधिकता में दिन में स्नेह-पान कराना चाहिए ॥ २२ ॥

वातपित्ताधिकस्योष्णे तृष्णामूर्च्छोन्मादकारकः ।
शीते वातकफार्तस्य गौरवारुचिशूलकृत् ॥२३॥

वात और पित्त की अधिकता में, उष्ण-ऋतु में किया गया स्नेहपान, तृष्णा, मूर्च्छा और उन्माद कारक होता है एवं वात और कफ की अधिकता में, शीतऋतु में किया गया स्नेहपान गुरुता, अरुचि तथा शूल उत्पन्न करता है ॥ २३ ॥

स्नेहपीतस्य चेत्तृष्णा पिवेदुष्णोदकं नरः ।
एवं चानुपशाम्यन्त्या स्नेहमुष्णाम्बुना वमेत् ॥२४॥
दिह्याच्छीतैः शिरः शीतं तोयं चाप्यवगाहयेत् ।

स्नेहपान में उपद्रव स्वरूप तृष्णा की चिकित्सा—स्नेह पान के पश्चात् प्यास लगने पर, आतुर को उष्ण जल पीना चाहिए, यदि इससे प्यास न बुझे तो उष्ण जल पीकर स्नेह का वमन करना चाहिए। आतुर के शिर पर शीतल द्रव्यों का लेप तथा शीतल जल से स्नान कराना चाहिए ॥ २४½ ॥

या मात्रा परिजीर्येत चतुर्भागगतेऽहनि ॥२५॥
सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता ।
या मात्रा परिजीर्येत तथाऽर्धदिवसे गते ॥२६॥
सा वृष्या बृंहणीया च मध्यदोषे च पूजिता ।
या मात्रा परिजीर्येत चतुर्भागावशेषिते ॥ २७ ॥
स्नेहनीया च सा मात्रा बहुदोषे च पूजिता ।
या मात्रा परिजीर्येत्तु तथा परिणतेऽहनि ॥ २८ ॥
ग्लानिमूर्च्छामदान् हित्वा सा मात्रा पूजिता भवेत् ।
अहोरात्रादसंदुष्टा या मात्रा परिजीर्यति ॥ २९ ॥
सा तु कुष्ठविषोन्मादग्रहापस्मारनाशिनी ।

स्नेह की मात्रा का निर्देश—दिन के चतुर्थांश भाग (एक प्रहर) के व्यतीत होने पर, स्नेह की जिस मात्रा का पाचन होता है, वह अग्नि को दीप्त करती है तथा अल्प दोष वाले आतुर के लिए श्रेष्ठ होती है। स्नेह की जो मात्रा आधा दिवस व्यतीत होने पर जीर्ण होती है, वह वृष्य और बृंहण होती है तथा मध्य दोष वाले आतुर के लिए उपयुक्त होती है। स्नेह की जो मात्रा दिन का चतुर्थांश भाग अवशेष रहने पर (तीन प्रहर में) जीर्ण होती है, वह स्नेहन के योग्य होती है तथा अधिक दोष वाले आतुर के लिए उसका प्रयोग श्रेष्ठ होता है। स्नेह की जो मात्रा दिवस की समाप्ति पर जीर्ण होती है तथा जिसके सेवन से ग्लानि, मूर्च्छा और मद उत्पन्न नहीं होते, वह श्रेष्ठ समझी जाती है। दोषों को दूषित किए बिना जो मात्रा दिन-रात में जीर्ण होती है वह कुष्ठ, विष, उन्माद, ग्रह और अपस्मार नाशक होती है ॥ २५-२९ ॥

यथाग्नि प्रथमां मात्रां पाययेत विचक्षणः ॥ ३० ॥
पीतो ह्यतिबहुः स्नेहो जनयेत् प्राणसंशयम् ।

प्रथम मात्रा की प्रशस्तता—बुद्धिमान् वैद्य, आतुर को उसकी अग्नि के अनुसार, स्नेह की पहली मात्रा पिलावे। क्योंकि अधिक स्नेह पान प्राण को संकट में डाल देता है ॥३१॥

मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति ॥ ३१ ॥
विद्यात्स चापि जीर्येत्तं वारिणोष्णेन वामयेत् ।
ततः स्नेहं पुनर्दद्याल्लघुकोष्ठाय देहिने ।
जीर्णाजीर्णविशङ्कायां स्नेहस्योष्णोदकं पिबेत् ॥ ३२ ॥

स्नेह पान से उत्पन्न अजीर्ण में उपचार—मिथ्या आहार-विहार अथवा अधिकता के कारण जिस आतुर का स्नेह जीर्ण न हो, तथा कष्ट से जिसका पाचन हो, उस स्नेह को उष्ण जल के द्वारा वमन करा देना चाहिए। लघुकोष्ठ वाले मनुष्य को पुनः स्नेह पिलाना चाहिए तथा स्नेह का पाचन हुआ या नहीं इस शंका के उपस्थित होने पर उष्ण जल पिलाना चाहिए ॥ ३२ ॥

तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा ।
स्युः पच्यमाने तृड्दाहश्रमसादारतिक्लमाः ॥ ३३ ॥
परिषिच्याद्भिरुष्णाभिर्जीर्णस्नेहं ततो नरम् ।
यवागूं पाययेच्चोष्णां कामं छिन्नाल्पतण्डुलाम् ॥३४॥
देयौ यूषरसौ वाऽपि सुगन्धी स्नेहवर्जितौ ।
कृतौ वाऽत्यल्पसर्पिष्कौ विलेपी वा विधीयते ॥ ३५ ॥

इस क्रिया से उद्गार (डकार) शुद्ध होता है और भोजन में रुचि उत्पन्न होती है। स्नेह मात्रा के पाचन काल में तृषा, दाह, श्रम, आलस्य, अनिच्छा और श्रम (थकावट) उत्पन्न होने पर जीर्ण-स्नेहवाले मनुष्य को उष्ण जल से नहला कर, अल्प चावलों वाली गली हुई उष्ण यवागू यथेष्ट पिलानी चाहिए। सुगन्धि और स्नेह रहित यूष या मांसरस पिलाना चाहिए अथवा अल्प घृतयुक्त, विलेपी का सेवन कराना चाहिए ॥ ३३-३५ ॥

पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहं तथा ।
सप्तरात्रात् परं स्नेहः सात्म्यीभवति सेवितः ॥ ३६ ॥

स्नेहपान के काल की अवधि—तीन, चार, पाँच तथा छै दिन स्नेह पिलाना चाहिए, सात दिन के उपरान्त, सेवन किया गया स्नेह सात्म्य हो जाता है ॥ ३६ ॥

सुकुमारं कृशं वृद्धं शिशुं स्नेहद्विषं तथा ।
तृष्णार्त्तमुष्णकाले च सह भक्तेन पाययेत् ॥ ३७ ॥

सुकुमार आदि के लिये भोजन के साथ स्नेह प्रयोग का निर्देश—सुकुमार, कृश, वृद्ध, बालक, स्नेहद्वेषी तथा प्यास से पीडित व्यक्तियों को, उष्ण ऋतु में भोजन (यवागू, विलेपी आदि) के साथ स्नेह पान कराना चाहिए ॥ ३७ ॥

पिप्पल्यो लवणं स्नेहाश्चत्वारो दधिमस्तुकं ।
पीतमैकध्यमेतद्धि सद्य स्नेहनमुच्यते ॥ ३८ ॥

सद्यः स्नेहन योग—पिप्पली, लवण, (सैन्धव), चारों स्नेह (घृत, तैल, वसा, मज्जा), दही और दही का पानी एक साथ मिलाकर पीने से, शीघ्र स्नेहन होता है ॥ ३८ ॥

भृष्टा मांसरसे स्निग्धा यवागूः सूपकल्पिता ।
प्रक्षुद्रा पीयमाना तु सद्य स्नेहनमुच्यते ॥ ३९ ॥

भुने हुए मांस के रस में बनाई गई स्नेहयुक्त यवागू, राब मिलाकर (क्षुद्र फाणितं) पीने से, शीघ्र स्नेहन करती है ॥ ३९ ॥

सर्पिष्मती पय सिद्धा यवागू स्वल्पतण्डुला ।
सुखोष्णा सेव्यमाना तु सद्य स्नेहनमुच्यते ॥ ४० ॥

थोडे चावलों की दूध में पकी हुई घृत युक्त सुखोष्ण यवागू का सेवन, सद्यः स्नेहन करता है ॥ ४० ॥

पिप्पल्यो लवणं सर्पिस्तिलपिष्टं वराहजा ।
वसा च पीतमैकध्यं सद्यःस्नेहनमुच्यते ॥ ४१ ॥

पिप्पली, लवण (सैन्धव), घी, तिल की पिट्ठी और सूअर की चर्बी, एक साथ मिलाकर पीने से सद्यः स्नेहन होता है ॥ ४१ ॥

शर्कराचूर्णसंसृष्टे दोहनस्थे घृते तु गाम् ।
दुग्ध्वा क्षीरं पिवेद्रूक्षः सद्यःस्नेहनमुच्यते ॥ ४२ ॥

दूध दूहनेवाले पात्र में घी मिली हुई शर्करा रखकर, उसमें दूध दूह कर पीने से, रूक्ष मनुष्य का शीघ्र स्नेहन होता है ॥ ४२ ॥

यवकोलकुलत्थानां क्वाथो मागधिकान्वितः ।
पयो दधि सुरा चेति घृतमप्यष्टमं भवेत् ॥ ४३ ॥
सिद्धमेतैर्घृतं पीतं सद्यःस्नेहनमुत्तमम् ।
राज्ञे राजसमेभ्यो वा देयमेतद्घृतोत्तमम् ॥ ४४ ॥

जौ, बेर और कुलथी के क्वाथ में पिप्पली के कल्क के साथ दूध, दही, सुरा एवं आठवीं संख्या घृत की मिलाकर, घृतपाक किया जावे, इस घृत के पीने से शीघ्र स्नेहन होता है। इस उत्तम घृत का प्रयोग, राजा तथा राजाओं के तुल्य वैभव सम्पन्न व्यक्तियों के लिए करना चाहिए ॥ ४३-४४ ॥

बलहीनेषु वृद्धेषु मृद्वग्निस्त्रीहतात्मसु ।
अल्पदोषेषु योज्याः स्युर्ये योगाः सम्यगीरिताः ॥४५॥

निर्बल, वृद्ध, मृदु अग्नि वाले, अत्यधिक स्त्री प्रसंग से क्षीण तथा अल्प दोष युक्त व्यक्तियों के लिए, उपर्युक्त योगों का प्रयोग भली-भाँति करना चाहिए ॥ ४५ ॥

विवर्जयेत् स्नेहपानमजीर्णी तरुणज्वरी ।
दुर्बलोऽरोचकी स्थूलो मूर्च्छार्तो मदपीडितः ॥४६॥
छर्द्यर्दितः पिपासार्तः श्रान्तः पानक्लमान्वितः ।
दत्तबस्तिर्विरिक्तश्च वान्तो यश्चापि मानवः ॥ ४७ ॥
अकाले दुर्दिने चैव न च स्नेहं पिवेन्नरः ।
अकाले च प्रसूता स्त्री स्नेहपान विवर्जयेत् ॥ ४८ ॥

स्नेहपान के अयोग्य मनुष्य—अजीर्ण ग्रस्त, तरुण ज्वर से युक्त, दुर्बल, अरोचक से पीड़ित, स्थूल, मूर्च्छा, मद, छर्दि (वमन) और प्यास से दुखी, थके हुए, अधिक सुरापान किए हुए, श्रम (थकावट) युक्त, जिन्हें वस्ति, विरेचन एवं वमन कराया गया हो, ऐसे मनुष्यों को तथा असमय और दुर्दिन में स्नेहपान नहीं करना चाहिए। अकाल-प्रसव वाली स्त्री को भी स्नेहपान नहीं करना चाहिए ॥ ४६-४८ ॥

स्नेहपानाद्भवन्त्येषां नृणां नानाविधा गदाः ।
गदा वा कृच्छ्रतां यान्ति न सिध्यन्त्यथवा पुनः ॥४९॥

इन मनुष्यों को स्नेहपान करने से नाना प्रकार की व्याधियाँ हो जाती हैं, जो कृच्छ्रसाध्य अथवा असाध्य बन जाती हैं ॥ ४९ ॥

गर्भाशयेऽवशेषाः स्यू रक्तक्लेदमलास्तताः ।
स्नेहं जह्यान्निषेवेत पाचनं रूक्षमेव च ॥ ५० ॥

(अकाल-प्रसूता स्त्री के) गर्भाशय में रक्त, क्लेद और मल अवशेष रह जाते हैं, उस दशा में स्नेहपान का परित्याग कर पाचन और रूक्ष औषधियों का प्रयोग करना चाहिए ॥ ५० ॥

दशरात्रात्ततः स्नेहं यथावदवचारयेत् ।
पुरीषं ग्रथितं रूक्षं कृच्छ्रादन्नं विपच्यते ॥ ५१ ॥
उरो विदहते वायुः कोष्ठादुपरि धावति ।
दुर्वर्णो दुर्बलश्चैव रूक्षो भवति मानवः ॥ ५२ ॥

दस दिन के उपरान्त यथाविधि, स्नेहपान का प्रयोग करना चाहिए। मल गाँठदार हो गया हो, रूक्ष हो, अन्न का पाचन कठिनाई से होता हो, छाती जलती हो, वायु कोष्ठ से ऊपर की ओर आती हो, शरीर का वर्ण विकृत हो गया हो, दुर्बलता तथा रूक्षता हो तो मनुष्य को स्नेहपान कराना चाहिए ॥ ५१-५२ ॥

सुस्निग्धा त्वग्विट्शैथिल्यं दीप्तोऽग्निर्मृदुगात्रता ।
ग्लानिर्लाघवमङ्गानामधस्तात् स्नेहदर्शनम् ।
सम्यक्स्निग्धस्य लिङ्गानि स्नेहोद्वेगस्तथैव च ॥ ५३ ॥

सम्यक् स्निग्ध के लक्षण—त्वचा में स्निग्धता, मल में ढीलापन, अग्नि की दीप्ति, शरीर में मृदुता, ग्लानि, अंगों में हलकापन, अधोमार्ग (गुदा) से स्नेह का निकलना तथा स्नेह से अरुचि या घबडाहट होना सम्यक् स्निग्ध के लक्षण हैं ॥ ५३ ॥

भक्तद्वेषो मुखस्रावो गुददाहः प्रवाहिका ।
पुरीषातिप्रवृत्तिश्च भृशस्निग्धस्य लक्षणम् ॥ ५४ ॥

अतिस्निग्ध के लक्षण—भोजन में अरुचि, मुख से लालास्राव, गुदा में दाह, प्रवाहिका तथा अत्यधिक मल की प्रवृत्ति होना अतिस्निग्ध के लक्षण हैं ॥ ५४ ॥

रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम् ।
श्यामाकोरदूपान्नतक्रपिण्याकशक्तुभिः ॥ ५५ ॥

रूक्ष तथा अतिस्निग्ध के लिये प्रतीकार—रूक्ष मनुष्यों का स्नेह से स्नेहन और अतिस्निग्ध का साँवा, कोदो आदि अन्न तथा तक्र, पिण्याक (तिल की खली) और सत्तू आदि के द्वारा रूक्षण करना चाहिए ॥ ५५ ॥

दीप्तान्तरग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्बलवर्णयुक्तः ।
दृढेन्द्रियो मन्दजरः शतायुः स्नेहोपसेवी पुरुषो भवेत्तु

स्नेहपान के फल—स्नेहपान करनेवाले पुरुष की जठराग्नि प्रदीप्त रहती है, कोष्ठ शुद्ध रहता है, धातुयें नवीन हो जाती है, बल एवं वर्ण की प्राप्ति होती है, इन्द्रियाँ अपने कार्य में समर्थ रहती हैं, वृद्धावस्था का आगमन विलम्ब से होता है तथा वह पुरुष शतायु होता है ॥ ५६ ॥

स्नेहो हितो दुर्बलबह्निदेहसन्धुक्षणे व्याधिनिपीडितस्य ।
बलान्वितौभोजनदोषजातैः प्रमर्दितुं तौ सहसा न साध्यौ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने स्नेहौपयोगिक-
चिकित्सित नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

व्याधि से पीडित मनुष्य की, दुर्बल अग्नि को प्रदीप्त करने तथा शरीर को पुष्ट बनाने के लिए, स्नेहपान हितकर होता है। स्नेहपान से प्रदीप्त हुई अग्नि और सबल हुए शरीर को, भोजन के दोष से उत्पन्न विकार, सहसा दबाने में समर्थ नहीं होते ॥ ५७ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायामेकत्रिंशत्तमोऽध्यायः।

द्वात्रिंशत्तमोऽध्यायः

अथातः स्वेदावचारणीयं चिकित्सितं व्याख्यास्यामः यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

स्वेद प्रयोग चिकित्सा का उपक्रम—इसके अनन्तर स्वेदन-प्रयोग चिकित्सा विधि का वर्णन, किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

चतुर्विधः स्वेदः; तद्यथा—तापस्वेद, ऊष्मस्वेद, उपनाहस्वेदो, द्रवस्वेद इति; अत्र सर्वस्वेदविकल्पावरोधः

स्वेद के भेद—स्वेदन चार प्रकार का होता है, जैसे—(१) तापस्वेद, (२) उष्णस्वेद, (३) उपनाहस्वेद और (४) द्रवस्वेद। अन्य सभी प्रकार के स्वेदों का अन्तर्भाव, इन्हीं चार स्वेदों में हो जाता है ॥ ३ ॥

तत्र तापस्वेदः पाणिकांस्यकन्दुककपालवालुकावस्त्रैः प्रयुज्यते, शयानस्य चाङ्गतो बहुशः खादिराङ्गारैरिति ॥ ४ ॥

तापस्वेद विधि—हाथ (करतल), कांसा (कांस्यपात्र), कन्दुक (लोहे आदि की कडाही), कपाल (मिट्टी का ठीकरा), बालू और वस्त्र के द्वारा तथा खैर की लकडी के अंगारों से, लेटे हुए रोगी के अंगों को अनेक बार तपा कर, ताप स्वेद किया जाता है ॥ ४ ॥

ऊष्मस्वेदस्तु कपालपाषाणेष्टकालोहपिण्डानग्निवर्णानद्भिरासिञ्चेदम्लद्रव्यैर्वा, तैरार्द्रोलूखलपरिवेष्टितैरङ्गप्रदेशं स्वेदयेत्। मांसरसपयोदधिस्नेहधान्याम्लवातहरपत्रभङ्गकाथपूर्णं वा कुम्भीमनुतप्तां प्रावृत्योष्माण गृह्णीयात्। पार्श्वच्छिद्रेण वा कुम्भेनाधोमुखेन तस्या मुखमभिसन्धाय तस्मिंश्छिद्रे हस्तिशुण्डाकारां नाडीं प्रणिधाय तं स्वेदयेत् ॥ ५ ॥

ऊष्मस्वेद तथा नाडीस्वेद की विधि—ऊष्मस्वेद के लिए कपाल, पाषाण, ईंट और लोहपिण्ड को अग्नि में लाल करके, जल या काञ्जी आदि अम्लद्रव्य छिडककर, गीले वस्त्र में लपेटना चाहिए तथा उससे अंगों का स्वेदन करना चाहिए। अथवा मांसरस, दूध, दही, स्नेह, धान्याम्ल (काजी) और वातघ्न द्रव्यों के पत्तों (एरण्ड पत्र आदि) के उष्ण क्वाथ से भरे हुए घडे के मुख को ढँककर उससे निकलने वाले वाष्प के द्वारा स्वेदन करना चाहिए। अथवा पार्श्व में छेद किए गए, उलटे मुख वाले दूसरे घडे को उस घडे के मुख पर रखकर, सन्धि बन्धन करके, ऊपर वाले घडे के छिद्र में हाथी के सूंड की आकृति वाली नली लगानी चाहिए और उससे स्वेदन करना चाहिए ॥ ५ ॥

सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम्।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम्।
सुखा सर्वाङ्गगा ह्येषा न च क्लिश्नाति मानवम् ॥६॥

सुखपूर्वक बैठे हुए तथा भली-भाँति अभ्यङ्ग से युक्त और कम्बल आदि से ढके हुए वात के रोगी का, हाथी के सूंड की आकृति वाली नाडी से, स्वेदन करना चाहिए। इससे सभी अंगों का स्वेदन सुखपूर्वक होता है तथा रोगी किसी प्रकार का कष्ट अनुभव नहीं करता ॥ ६ ॥

व्यामार्धमात्रा त्रिर्वक्रा हस्तिहस्तसमाकृतिः।
स्वेदनार्थे हिता नाडी कैलिञ्जी हस्तिशुण्डिका ॥७॥

अर्धव्याम लम्बी, तीन स्थानों में मुडी हुई एवं हाथी के सूंड की आकृति वाली कैलिञ्जी (कुश, काश आदि द्रव्यों से निर्मित) हस्तिशुण्डिका नाडी, स्वेदन के लिए हितकर होती है ॥ ७ ॥

पुरुषायाममात्रां च भूमिमुत्कीर्य खादिरैः।
काष्ठैर्दग्ध्वा तथाऽभ्युक्ष्य क्षीरधान्याम्लवारिभिः ॥८॥
पत्रभङ्गैरवच्छाद्य शयानं स्वेदयेत्ततः।
पूर्ववत् स्वेदयेद्दग्ध्वा भस्मापोह्यापि वा शिलाम् ॥९॥

भूस्वेद तथा अश्मस्वेद की विधि—मनुष्य की लंबाई के बराबर भूमि खोदकर और उसमें खैर की लकड़ी जला कर दूध, कांजी एवं जल छिडकना चाहिए। फिर वातघ्न द्रव्यों के पत्ते बिछा, उस पर रोगी को सुलाकर, स्वेदन करना चाहिए। अथवा पत्थर की पटिया पर खैर की लकड़ी जला, राख हटाकर पूर्ववत् स्वेदन करना चाहिए ॥ ८-९ ॥

पूर्ववत् कुटीं वा चतुर्द्वारां कृत्वा तस्यामुपविष्टस्यान्तश्चतुर्द्वारेऽङ्गारानुपसन्धाय तं स्वेदयेत् ॥ १० ॥

कुटी स्वेदन की विधि—अथवा चार द्वार वाली कुटी बनाकर उसके अन्दर रोगी को बैठाना चाहिए और चारों द्वार पर अग्नि के अंगारों को रखकर पूर्ववत् स्नेहन करना चाहिए ॥ १० ॥

कोशधान्यानि वा सम्यगुपस्वेद्यास्तीर्यं किलिञ्जेऽन्यस्मिन् वा तत्प्रतिरूपके शयानं प्रावृत्य स्वेदयेत्; एवं पांशुगोशकृत्तुषबुसपलालोष्मभिः स्वेदयेत् ॥११॥

प्रस्तरस्वेद विधि—अथवा मूग, उडद आदि धान्य (कोशधान्य) को भली भाँति उबालकर, चटाई या इसी प्रकार की किसी अन्य वस्तु पर फैलाकर, उसपर रोगी को सुलाना चाहिए तथा वस्त्र से ढककर स्वेदन करना चाहिए। इसी प्रकार धूलि, गोबर, तुष, (जौ, धान आदि की भूसी), बुस (भूसा) और तिल की खली के द्वारा (उष्ण करके) स्वेदन करना चाहिए ॥ ११ ॥

उपनाहस्वेदस्तु वातहरमूलकल्कैरम्लपिष्टैर्लवणप्रगाढैः स्निग्धैः सुखोष्णैः प्रदिह्य स्वेदयेत्। एवं

काकोल्यादिभिरेलादिभिः सुरसादिभिस्तिलातसीसर्षपकल्कैः कृशरापायसोत्कारिकाभिर्वेशवारैः साल्वणैर्वा तनुवस्त्रावनद्धैः स्वेदयेत् ॥ १२ ॥

उपनाह स्वेद विधि—कांजी के द्वारा पीसे हुए तथा प्रचुर परिमाण में लवण और स्नेह युक्त वातघ्न द्रव्यों के मूल के कल्क का, सहन करने योग्य उष्ण लेप लगाकर, उपनाह स्वेद करना चाहिए। इसी प्रकार काकोल्यादि गण, एलादिगण, सुरसादिगण, तिल, तीसी और सरसों के कल्क तथा खिचड़ी, खीर, लप्सी, वेशवार (कुट्टित मांस) या साल्वण (वातव्याधियुक्त) को महीन वस्त्र में बाँधकर, स्वेदन करना चाहिए ॥ १२ ॥

द्रवस्वेदस्तु वातहरद्रव्यक्वाथपूर्णे कोष्णकटाहे द्रोण्यां वाऽवगाह्य स्वेदयेत्, एवं पयोमांसरसयूषतैलधान्याम्लघृतवसामूत्रेष्ववगाहेत; एतैरेव सुखोष्णैः कषायैश्च परिषिञ्चेदिति ॥ १३ ॥

अवगाहन तथा परिषेचन की विधि—वातहर द्रव्यों के उष्ण क्वाथ से पूर्ण कड़ाही या द्रोणी (टब) में रोगी को बैठाकर, द्रव स्वेद करना चाहिए। इसी प्रकार दूध, मांसरस, यूष, तेल, कांजी, घी, वसा और मूत्र (अष्टविध मूत्र) में रोगी को बैठाना चाहिए और उपर्युक्त द्रव्यों के सुखोष्ण क्वाथ से स्नान करना चाहिए ॥ १३ ॥

विमर्श:—चरक ने तेरह प्रकार के स्वेदों का वर्णन स्वेदाध्याय में लिखा है—'सङ्कर. प्रस्तरो नाडी परिषेकोऽवगाहनम्। जेन्ताकोऽश्मघनः कर्षः कुटी भूः कुम्भिकैव च। कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश। इन त्रयोदशविध स्वेदों का अन्तर्भाव सुश्रुत चतुर्विध स्वेदों में ही करते हैं। तापस्वेद के अन्दर जेन्ताक, कर्ष, कुटी, कूप और होलाक इन पाँच स्वेदों का उष्ण स्वेद में सङ्कर, प्रस्तर, अश्मघन, नाड़ी, कुम्भी और भू, छै स्वेदों का तथा द्रव स्वेद में परिषेक और अवगाह का अन्तर्भाव हो जाता है।

तत्र तापोष्मस्वेदौ विशेषतः श्लेष्मघ्नौ, उपनाहस्वेदो वातघ्न अन्यतरस्मिन् पित्तसंसृष्टे द्रवस्वेद इति॥

दोषविशेष में स्वेद विशेष का उपयोग—इनमें ताप और उष्णस्वेद विशेषकर कफनाशक तथा उपनाह स्वेद, वात नाशक होता है। कफ या वात के साथ पित्त के मिलने पर द्रवस्वेद का विधान करना चाहिए ॥ १४ ॥

कफमेदोऽन्विते वायौ निवातातपगुरुप्रावरणनियुद्धाध्वव्यायामभारहरणामर्षैः स्वेदमुत्पादयेदिति ॥१५॥

निरग्निस्वेद—वायु के कफ और मेद से युक्त होने पर वायुरहित स्थान, धूप, भारी ओढने के वस्त्र, मल्लयुद्ध, व्यायाम, बोझ उठाना, तथा क्रोध आदि के द्वारा स्वेद निकालना चाहिए ॥ १५ ॥

भवन्ति चात्र—

चतुर्विधो योऽभिहितो द्विधा स्वेदः प्रयुज्यते।
सर्वस्मिन्नेव देहे तु देहस्यावयवे तथा ॥ १६ ॥

चतुर्विद स्वेदों के दो भेद—जैसे कि—चार प्रकार के जिन स्वेदों का वर्णन किया गया है, उनका प्रयोग सम्पूर्ण शरीर अथवा अङ्ग विशेष में दो प्रकार से (साग्नि और निरग्नि) किया जाता है ॥ १६ ॥

येषां नस्यं विधातव्यं वस्तिश्चैव हि देहिनाम्।
शोधनीयाश्च ये केचित् पूर्वं स्वेद्यास्तु ते मताः ॥

प्रथम तथा पश्चात् स्वेद्य रोगी—जिन मनुष्यों को नस्य और वस्ति देनी हो तथा जो शोधन के योग्य हों, उनका प्रथम स्वेदन करना चाहिये ॥ १७ ॥

पश्चात् स्वेद्या हृते शल्ये मूढगर्भानुपद्रवा।
सम्यक् प्रजाता काले या पश्चात् स्वेद्या विजानता ॥

शल्य (मूढगर्भ) निकालने के उपरान्त उपद्रवरहित मूढगर्भा तथा समय पर भलीभांति प्रसव की हुई स्त्री का स्वेदन बाद में अर्थात् प्रसव के पश्चात् करना चाहिए ॥ १८ ॥

स्वेद्यः पूर्वं च पश्चाच्च भगन्दर्यर्शसस्तथा।
अश्मर्यां चातुरो जन्तुः शेषाञ्छास्त्रे प्रचक्ष्महे ॥ १९

भगन्दर, अर्श और अश्मरी में आतुर का स्वेदन पहले और पीछे (शल्य क्रिया के पूर्व और पश्चात्) करना चाहिए, शेष व्याधियों के लिए विधान बतलाया जाता है ॥

नानभ्यक्ते नापि चास्निग्धदेहे
स्वेदो योज्यः स्वेदविद्भिः कथञ्चित्।
दृष्टं लोके काष्ठमस्निग्धमाशु
गच्छेद्भङ्गं स्वेदयोगैर्गृहीतम् ॥ २०॥

स्वेद के पूर्व स्नेह की आवश्यकता—स्वेदन विधि के ज्ञाता वैद्य को बिना अभ्यङ्ग किए हुए तथा स्नेहरहित शरीर वाले व्यक्ति का स्वेदन कभी नहीं करना चाहिए। क्योंकि लोक में ऐसा देखा जाता है कि स्नेहरहित काष्ठ स्वेदन पाकर शीघ्र टूट जाता है ॥ २० ॥

स्नेहक्लिन्ना धातुसंस्थाश्च दोषाः
स्वस्थानस्था ये च मार्गेषु लीनाः।
सम्यक् स्वेदैर्योजितैस्ते द्रवत्वं
प्राप्ताः कोष्ठं शोधनैरन्त्यशेषम् ॥ २१ ॥

स्नेह से क्लिन्न (गले हुए) धातु तथा अपने स्थान में स्थित एवं मार्गों में (शाखाओं में) रुके हुए दोष, भली भांति स्वेदन किये जाने पर, पिघल कर कोष्ठ में आ जाते हैं और शोधन क्रियाओं के द्वारा सम्पूर्ण रूप से शरीर से बाहर निकल जाते हैं ॥ २१ ॥

अग्नेर्दीप्तिं मार्दवं त्वक्प्रसादं
भक्तश्रद्धां स्रोतसां निर्मलत्वम्।
कुर्यात् स्वेदो हन्ति निद्रां सतन्द्रां
सन्धीन् स्तब्धांश्चेष्टयेदाशु युक्तः ॥ ॥ २२ ॥

स्वेद के गुण—स्वेदन करने से अग्नि दीप्त होती है, शरीर कोमल होता है, त्वचा स्वच्छ होती है और भोजन में रुचि तथा स्रोतों में निर्मलता आती है। स्वेद प्रयोग निद्रा और तन्द्रा को दूर करता है तथा चेष्टारहित सन्धियों को शीघ्र सचेष्ट बनाता है ॥ २२ ॥

स्वेदस्रावो व्याधिहानिर्लघुत्वं
शीतार्थित्वं मार्दवं चातुरस्य।

सम्यक्स्विन्ने लक्षणं प्राहुरेत-
न्मिथ्यास्विन्ने व्यत्ययेनैतदेव ॥ २३ ॥

सम्यक् स्विन्न के लक्षण—भलीभांति स्वेदन होने पर रोगी के शरीर से पसीने का निकलना, रोग का नाश, शरीर में हलकापन, शीत की इच्छा और कोमलता आदि लक्षण होते हैं। स्वेदन का मिथ्यायोग होने पर इसके विपरीत लक्षण होते हैं ॥ २३ ॥

स्विन्नेऽत्यर्थं सन्धिपीडा विदाहः
स्फोटोत्पत्तिः पित्तरक्तप्रकोपः।
मूर्च्छा भ्रान्तिर्दाहतृष्णे क्लमश्च
कुर्यात्तूर्णं तत्र शीतं विधानम् ॥ २४ ॥

अति स्विन्न के लक्षण—अत्यधिक स्वेदन होने से संधियों में पीडा, विदाह, फफोले की उत्पत्ति, पित्त और रक्त का प्रकोप, मूर्च्छा, क्लम (थकावट) आदि लक्षण उत्पन्न हो जाते हैं, इस दशा में शीघ्र शीतोपचार करना चाहिए ॥ २४ ॥

पाण्डुर्मेही पित्तरक्ती क्षयार्तः
क्षामोऽजीर्णी चोदरार्तो विषार्तः।
तृट्च्छर्द्यार्तो गर्भिणी पीतमद्यो
नैते स्वेद्या यश्च मर्त्योऽतिसारी।
स्वेदाद्येषां यान्ति देहा विनाशं
नो साध्यत्वं यान्ति चैषां विकाराः।
स्वेदैः साध्यो दुर्बलोऽजीर्णभक्तः
स्यातां चेद् द्वौ स्वेदनीयौ ततस्तौ ॥

स्वेद के अयोग्य रोगी—पाण्डु, प्रमेह, रक्तपित्त और क्षय से पीडित, निर्बल, अजीर्ण ग्रसित, उदर रोग, विष, तृष्णा और वमन से दुःखी, गर्भिणी, मद्यपान किए हुए तथा अतिसार वाले मनुष्यों का स्वेदन नहीं करना चाहिए। स्वेदन करने से इन मनुष्यों का शरीर नष्ट हो जाता है तथा इनके रोग साध्यावस्था को प्राप्त नहीं होते। यदि दुर्बल और अजीर्णावस्था में भोजन किए हुए व्यक्ति स्वेदसाध्य व्याधि से पीडित हों तो दोनों का स्वेदन करना चाहिए ॥ २५ ॥

एतेषां स्वेदसाध्या ये व्याधयस्तेषु बुद्धिमान्।
मृदून् स्वेदान् प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥ २६ ॥

स्वेदसाध्य व्याधियों में निर्दिष्ट स्थान में स्वेदन का विधान—उपर्युक्त व्याधियों से पीडित यदि किसी आतुर का रोग स्वेदसाध्य हो तो बुद्धिमान् वैद्य को मृदु स्वेद देना चाहिए तथा हृदय, अण्डकोष और नेत्रों पर भी मृदु स्वेद का प्रयोग करना चाहिए ॥ २६ ॥

सर्वान् स्वेदान्निवाते च जीर्णान्नस्यावचारयेत्।
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ॥ २७ ॥

वायु रहित स्थान में तथा अन्न का पाचन होने पर एवं स्नेह की मालिश किए हुए व्यक्ति के लिए ही सभी स्वेदों का प्रयोग करना चाहिए। नेत्रों का स्वेदन शीतल वस्तुओं से ढक कर करना चाहिए ॥ २७ ॥

स्विद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत्।
सम्यक्स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः ॥ २८ ॥

स्वेदन करते समय आतुर के हृदय पर शीतल द्रव्य से बार २ स्पर्श करना चाहिए तथा भली भांति स्वेदन हो जाने पर धीरे-धीरे मालिश करके उष्ण जलसे स्नान कराना चाहिए ॥

स्वभ्यक्तं प्रावृताङ्गं च निवातशरणस्थितम्।
भोजयेदनभिष्यन्दि सर्वं चाचारमादिशेत् ॥ २९ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने स्वेदावचारणीयं चिकित्सितं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

स्वेदन के पश्चात् कर्तव्य—भली भांति स्वेदन करके तथा अंगों को वस्त्र से ढक कर, आतुर को वायुरहित स्थान में रखना चाहिए और अनभिष्यन्दि (स्रोतों को अवरुद्ध न करने वाले) भोजन देकर सभी प्रकार के आचार, व्यवहार का नियम समझा देना चाहिए ॥ २९ ॥

विमर्शः—सद्यो व्याधिकरणीयामवस्था स्यन्दयति आपादयति यद् द्रव्यं तदभिष्यन्दि, स्रोतसामुपलेपकारि वा, तद्विपरीतमनभिष्यन्दि।

इत्यायुर्वेदतत्त्वसंदीपिकान्याख्यायां द्वात्रिंशोऽध्यायः ॥

त्रयस्त्रिंशत्तमोऽध्यायः

अथातो वमनविरेचनसाध्योपद्रवचिकित्सितं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

वमन-विरेचन से साध्य रोगों की चिकित्सा का उपक्रम—इसके अनन्तर वमन, विरेचन के द्वारा साध्य रोगों की (उपद्रवो रोगः) चिकित्सा विधि का वर्णन किया जा रहा है जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

दोषाः क्षीणा बृंहयितव्याः, कुपिताः प्रशमयितव्याः, वृद्धा निर्हर्तव्याः, समाः परिपाल्या इति सिद्धान्तः ॥ ३ ॥

दोषों के अवस्था विशेष से चिकित्सा विशेष का निर्देश—क्षीण हुए दोषों को बढ़ाना चाहिए, कुपित हुए दोषों को शान्त करना चाहिए तथा बढ़े हुए दोषों को शरीर से बाहर निकालना चाहिए एवं समान रूप में स्थित दोषों की रक्षा करनी चाहिए, यही चिकित्सा का सिद्धान्त है ॥ ३ ॥

प्राधान्येन वमनविरेचने वर्तेते निर्हरणे दोषाणाम्।
तस्मात्तयोर्विधानमुच्यमानमुपधारय ॥ ४ ॥

वमन-विरेचन का विधान—दोषों को शरीर से बाहर निकालने में मुख्यतः वमन और विरेचन का प्रयोग किया जाता है, इस लिए उन दोनों का विधान बतलाया जा रहा है, सुनो ॥ ४ ॥

अथातुरं स्निग्धं स्विन्नमभिष्यन्दिभिराहारैरनवबद्धदोषमवलोक्य श्वो वमनं पाययिताऽस्मीति संभोजयेत्तीक्ष्णाग्निं बलवन्तं बहुदोषं महाव्याधिपरीतं वमनसात्म्यं च ॥ ५ ॥

तीक्ष्ण अग्नि वाले, बलवान, बहुदोषयुक्त, महाव्याधि से पीड़ित एवं वमन-साम्य स्निग्ध-स्विन्न रोगी को (स्रोतों का बन्धन खुल जाने से) प्रचलित दोष युक्त देख कर, 'कल्ह मैं तुम्हें वमन कराने वाली औषधि पिलाऊँगा' इस निश्चय के साथ अभिष्यन्दि आहार (ग्राम्य, आनूप, उदक जीवों का मांस, दूध, भात आदि) का भली भांति भोजन कराना चाहिए ॥ ५ ॥

भवति चात्र—

पेशलैर्विविधैरन्नैर्दोषानुत्क्लेश्य देहिनः।
स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्तते ॥ ६ ॥

जैसे कि :—स्नेहन तथा स्वेदन से युक्त मनुष्य के दोषों को कोमल एवं नाना प्रकार के अन्नों से उत्क्लेशित कर प्रयुक्त किया गया वमन, भली भांति प्रवृत्त होता है ॥ ६ ॥

अथापरेद्युः पूर्वाह्णे साधारणे काले वमनद्रव्यकषाय-कल्कचूर्णस्नेहानामन्यतमस्य मात्रां पाययित्वा वामयेद्यथायोगं कोष्ठविशेषमवेक्ष्य; असात्म्यबीभत्सदुर्गन्ध-दुर्दर्शनानि च वमनानि विद्ध्यात्, अतो विपरीतानि विरेचनानि; तत्र सुकुमारं कृशं बालं वृद्धं भीरुं वा वमनसाध्येषु विकारेषु क्षीरदधितक्रयवागूनामन्यतम-माकण्ठं पाययेत्, पीतौषधं च पाणिभिरग्नितप्तैः प्रताप्यमानं मुहूर्तमुपेक्षेत; तस्य च स्वेदप्रादुर्भावेन शिथिलतामापन्नं स्वेभ्यः स्थानेभ्यः प्रचलितं कुक्षि-मनुसृतं जानीयात्, ततः प्रवृत्तक्लम्लासं ज्ञात्वा जानु-मात्रासनोपविष्टमाप्तैर्ललाटे पृष्ठे पार्श्वयो कण्ठे च पाणिभिः सुपरिगृहीतमङ्गुलीगन्धर्वहस्तोत्पलनालाना-मन्यतमेन कण्ठमभिस्पृशन्तं वामयेत्तावद्यावत् सम्य-ग्वान्तलिङ्गानीति ॥ ७ ॥

दूसरे दिन प्रातः काल, साधारण (अधिक शीत एवं उष्णता रहित) समय में आतुर के कोष्ठ विशेष की परीक्षा कर, वमनकारक क्वाथ, कल्क, चूर्ण और स्नेह द्रव्यों में जिसका प्रयोग उचित हो, किसी एक की मात्रा पिला कर वमन कराना चाहिए। वमनकारक द्रव्यों को असात्म्य, बीभत्स (विकृत आकृति का), दुर्गन्ध युक्त तथा देखने में कुरूप बनाना चाहिए। विरेचन द्रव्यों का निर्माण इसके विपरीत (सात्म्य, सुन्दर आकृति तथा सुगन्ध युक्त एवं देखने में प्रिय) करना चाहिए; सुकुमार, दुर्बल, बालक, वृद्ध और कायर के वमन-साध्य विकारों में, दूध, दही, तक्र तथा यवागू में से किसी एक को, आकण्ठ (पूर्ण रूप से) पिलाना चाहिए। औषध पीकर, अग्नि से हाथों को तपा कर उष्णता अनुभव करते हुए, आतुर को दो घड़ी (मुहूर्त घटिकाद्वयम्) प्रतीक्षा करनी चाहिए। इस रोगी के शरीर में स्वेद का प्रादुर्भाव देख कर यह समझना चाहिए कि शिथिल हुए दोष अपने स्थान से चलायमान होकर कुक्षि प्रदेश में जा रहे हैं। मिचली प्रारम्भ होने पर घुटने के बल रोगी को आसन पर बैठाकर, श्रेष्ठ जनों के द्वारा ललाट, पीठ, पसवाडे और ग्रीवा को हाथों से भली भांति पकडवाकर. अंगुली, एरण्ड या कमल की नाल में से किसी एक के द्वारा, कण्ठ प्रदेश के अन्दर स्पर्श करते हुए, सम्यग्वान्त के लक्षण उपस्थित होने तक, वमन कराना चाहिए ॥

भवतश्चात्र—

कफप्रसेकं हृदयाविशुद्धिं
कण्डूं च दुश्छर्दितलिङ्गमाहुः।
पित्तातियोगं च विसंज्ञतां च
हृत्कण्ठपीडामपि चातिवान्ते ॥ ८ ॥

वमन के अयोग तथा अतियोग के लक्षण—जैसे कि:—मुख से लालास्राव होना, हृदय की अशुद्धि (गुरुता की अनुभूति) और कण्डू, वमन का अयोग होने पर उपस्थित होते हैं। अतियोग होने पर पित्त की अधिक प्रवृत्ति, सज्ञा नाश और हृदय तथा कण्ठ में पीडा होती है ॥ ८ ॥

पित्ते कफस्यानु सुखं प्रवृत्ते
शुद्धेषु हृत्कण्ठशिरःसु चापि।
लघौ च देहे कफसंस्रवे च
स्थिते सुवान्तं पुरुषं व्यवस्येत् ॥ ९ ॥

वमन के सम्यग्योग के लक्षण—कफ के पश्चात् पित्त का सुखपूर्वक निकलना, हृदय, कण्ठ और शिर की शुद्धि, शरीर में हलकापन तथा कफ का स्राव होने पर रोगी को भली-भांति वमन हो चुका, यह समझना चाहिए ॥ ९ ॥

सम्यग्वान्तं चैनमभिसमीक्ष्य स्नेहनविरेचनशम-नानां धूमानामन्यतमं सामर्थ्यतः पाययित्वाऽऽचारि-कमादिशेत् ॥ १० ॥

सम्यग्वमन हो जाने के बाद का कर्त्तव्य—भली भांति वमन हो जाने पर रोगी को (स्रोतों में चिपके हुए कफ को निकालने के लिए) स्नैहिक, वैरेचनिक और प्रायोगिक (शमनीय) में से किसी एक धूम को शक्ति के अनुसार पिला कर, आहार-विहार का नियम समझा देना चाहिए॥१०॥

भवन्ति चात्र—

ततोऽपराह्णे शुचिशुद्धदेह-
मुष्णाभिरद्भिः परिषिक्तगात्रम्।
कुलत्थमुद्गाढकिजाङ्गलानां
यूषैः रसैर्वाऽप्युपभोजयेत्तु ॥ ११ ॥

जैसे कि:—उष्ण जल से स्नान किए हुए, शुद्ध पवित्र शरीर वाले रोगी को सायंकाल कुलथी, मूग, और अरहर के यूष तथा जांगल जीवों के मांसरस के साथ भोजन करना चाहिए ॥ ११ ॥

कासोपलेपस्वरभेदनिद्रा-
तन्द्रास्यदौर्गन्ध्यविषोपसर्गाः।
कफप्रसेकग्रहणीप्रदोषा
न सन्ति जन्तोर्वमतः कदाचित् ॥ १२ ॥

वमन कराने का फल—कास, उपलेप (स्रोतों में मल की वृद्धि), स्वरभेद, निद्रा, तन्द्रा, मुख की दुर्गन्धि, विष जन्य उपद्रव, कफ का स्राव और ग्रहणी दोष, वमन करने वाले मनुष्य को कभी नहीं होते ॥ १२ ॥

छिन्ने तरौ पुष्पफलप्ररोहा
यथा विनाशं सहसा व्रजन्ति।
तथा हृते श्लेष्मणि शोधनेन
तज्जा विकाराः प्रशमं प्रयान्ति ॥ १३ ॥

वृक्ष के कट जाने पर उसके फूल, फल और जटा का विनाश जिस प्रकार शीघ्रता से हो जाता है उसी प्रकार शोधन से कफ का हरण हो जाने पर उससे उत्पन्न होने वाले रोग शान्त हो जाते हैं ॥ १३ ॥

न वामयेत्तैमिरिकोर्ध्ववात-
गुल्मोदरप्लीहकृमिश्रमार्तान्।
स्थूलक्षतक्षीणकृशातिवृद्ध-
मूत्रातुरान् केवलवातरोगान् ॥ १४ ॥
स्वरोपघाताध्ययनप्रसक्त-
दुश्छर्दिदुःकोष्ठतृडार्तबालान्।
ऊर्ध्वासृपित्तक्षुधितातिरूक्ष-
गर्भिण्युदावर्तिनिरूहितांश्च ॥ १५ ॥

वमन के अयोग्य रोगी—तिमिर, ऊर्ध्ववात, गुल्म, उदर, कृमि तथा श्रम से पीडित, स्थूल, क्षतक्षीण, कृश, अत्यन्त-वृद्ध, मूत्र रोग वाले, शुद्ध वात रोग एवं स्वरभेद से युक्त, अध्ययन में लगे हुए, भली भांति जिन्हें वमन न हुआ हो, क्रूर कोष्ठ वाले, तृष्णा से व्याकुल, बालक, ऊर्ध्व रक्तपित्त के रोगी, भूखे, अत्यन्त रूक्ष, गर्भिणी, उदावर्त से दुःखी तथा निरूहण का प्रयोग किए हुए व्यक्तियों को, वमन नहीं कराना चाहिए ॥ १४-१५ ॥

अवम्यवमनाद्रोगाः कृच्छ्रतां यान्ति देहिनाम्।
असाध्यतां वा गच्छन्ति नैते वाम्यास्ततः स्मृताः॥१६॥

वमन के अयोग्य रोगों में वमन कराने से मनुष्यों के रोग कष्टसाध्य अथवा असाध्य हो जाते हैं, इसलिए उन्हें वमन नहीं कराना चाहिए ॥ १६ ॥

एतेऽप्यजीर्णव्यथिता वाम्या ये च विषातुराः।
अतीव चोल्बणकफास्ते च स्युर्मधुकाम्बुना ॥ १७ ॥

वमन के अयोग्य रोगों में वमन का विशेष निर्देश—उपर्युक्त रोगी भी यदि अजीर्ण से पीडित हों, विष विकार के रोगी हों तथा जिनमें अत्यधिक कफ की वृद्धि हो, उन्हें मुलेठी के क्वाथ से (वमन द्रव्य मिला कर) वमन कराना चाहिए ॥ १७ ॥

वाम्यास्तु—विषशोषस्तन्यदोषमन्दाग्न्युन्मादाप-स्मारश्लीपदार्बुदविदारिकामेदोमेहगरज्वरारुच्यपच्यामा-तीसारहृद्रोगचित्तविभ्रमविसर्पविद्रध्यजीर्णमुखप्रसेकहृद्-ग्लासश्वासकासपीनसपूतीनासकण्ठौष्ठवक्त्र-पाककर्णस्रा-वाधिजिह्वोपजिह्विकागलशुण्डिकाधःशोणितपित्तनिःक-फस्थानजेषु विकारेष्वन्ये च कफव्याधिपरीता इति ॥१८॥

वमन के योग्य रोगी—विषदोष, शोष, स्तन्यदोष, मन्दाग्नि, उन्माद, अपस्मार, श्लीपद, अर्बुद, विदारिका, मेदवृद्धि, प्रमेह, गरविष, ज्वर, अरुचि, आमातिसार, हृद्रोग, पित्तविभ्रम, विसर्प, विद्रधि, अजीर्ण, मुखप्रसेक, हृद्ग्लास (मिचली आना) श्वास, कास, पीनस, पूतिनासा, कण्ठ, ओष्ठ और मुखपाक, कर्णस्राव, अधिजिह्वा, उपजिह्वा, गल-शुण्डिका, अधः रक्तपित्त, कफस्थान में होने वाली व्याधियों तथा कफजन्य विकारों से पीडित अन्य आतुरों को वमन कराना चाहिए ॥ १८ ॥

विरेचनमपि स्निग्धस्विन्नाय वान्ताय च देयम्; अवान्तस्य हि सम्यग्विरिक्तस्यापि सतोऽधः स्रस्तः श्लेष्मा ग्रहणीं छादयति, गौरवमापादयति, प्रवाहिकां वा जनयति ॥ १९ ॥

विरेचन का विधान—विरेचन भी स्नेहन तथा स्वेदन से युक्त एवं वमन किए हुए व्यक्ति को देना चाहिए, क्योंकि वमन प्रयोग से रहित सम्यग्विरिक्त रोगी का भी नीचे की ओर आया हुआ कफ, ग्रहणी को ढक लेता है और गुरुता अथवा प्रवाहिका उत्पन्न कर देता है ॥ १९ ॥

अथातुरं श्वो विरेचनं पाययिताऽस्मीति पूर्वाह्णे लघु भोजयेत्, फलाम्लमुष्णोदकं चैनमनुपाययेत्।
अथापरेऽहनि विगतश्लेष्मधातुमातुरोपक्रमणीयादवेक्ष्यातुरमथास्मै औषधमात्रां पातुं प्रयच्छेत् ॥ २० ॥

विरेचक औषध पान की विधि—आतुर को कल्ह विरेचन पिलाऊँगा इस निश्चय के अनुसार प्रातःकाल लघुभोजन कराना चाहिए; इसके बाद बिजौरे का रस और उष्ण जल पिलाना चाहिए। दूसरे दिन आतुरोपक्रमणीय अध्याय में वर्णित विधि के अनुसार श्लेष्मा तथा रसधातु के नष्ट होने की परीक्षा करके रोगी को औषध की मात्रा पिलानी चाहिए ॥ २० ॥

विमर्श—फलाम्ल बीजपूराद्यि। विगतश्लेष्माणमिति कर्तव्ये धातुग्रहण श्लेष्ममहचरितरसधातूपलक्षणम्। रसावशेषेऽपि सम्प्रेसकत्वात् पुरुषस्य विरेचन न देयमिति आतुरोपक्रमणीयाध्याये उक्तम्। मात्रा पुरुषस्य बलापेक्षया प्रधानमध्यादिभेदेन तन्त्रान्तरोक्ताः कथ्यन्ते। द्वे पले ज्येष्ठमाख्यात मध्यमन्तु पलं भवेत्। पलार्द्धमुपयुञ्जीत कनीयस्तु विरेचनम्। डल्हण

तत्र मृदुः, क्रूरो, मध्यम इति त्रिविधः कोष्ठो भवति। तत्र बहुपित्तो मृदुः, स दुर्घेनापि विरिच्यते, बहुवातश्लेष्मा क्रूरः, स दुर्विरेच्यः; समदोषो मध्यमः, स साधारण इति। तत्र मृदौ मात्रा मृद्वी, तीक्ष्णा क्रूरे, मध्ये मध्या कर्तव्येति। पीतौषधश्च तन्मनाः शय्याभ्याशे विरेच्यते ॥ २१ ॥

विविध कोष्ठ के लक्षण—कोष्ठ तीन प्रकार के होते हैं, (१) मृदु (२) क्रूर और (३) मध्यम। पित्त की अधिकता वाला कोष्ठ मृदु होता है, इसमें दूध से भी विरेचन हो जाता है। वात और श्लेष्मा की अधिकतावाला कोष्ठ क्रूर होता है, इसमें विरेचन कठिनाई से होता है। दोषों की साम्यावस्थावाला कोष्ठ मध्यम होता है, इसमें विरेचन साधारण द्रव्यों से हो जाता है। मृदु कोष्ठवाले को औषध की मृदु मात्रा, क्रूर कोष्ठवाले को तीक्ष्णमात्रा, तथा मध्यम कोष्ठवाले को मध्यम मात्रा पिलानी चाहिए।

औषधपान किए हुए रोगी को विरेचन की ओर अपना ध्यान रखते हुए, शय्या के समीप विरेचन करना चाहिए ॥ २१ ॥

विरेचनं पीतवांस्तु न वेगान् धारयेद्बुधः ।
निवातशायी शीताम्बु न स्पृशेन्न प्रवाहयेत् ॥२२॥

विरेचन औषध पीये हुये के लिये अपथ्य—विरेचन औषधि का पान किए हुए बुद्धिमान व्यक्ति को, मल-मूत्रादि का वेग नहीं रोकना चाहिए। उसे वायुरहित स्थान में सोना चाहिए तथा शीतल जल का स्पर्श एवं प्रवाहण (मलत्याग के समय किनछना) नहीं करना चाहिए ॥ २२ ॥

यथा च वमने प्रसेकौषधकफपित्तानिलाः क्रमेण गच्छन्ति, एवं विरेचने मूत्रपुरीषपित्तौषधकफा इति ॥

वमन और विरेचन में दोषों के निकलने का क्रम—जिस प्रकार वमन में लालास्राव, पान की हुई औषध, कफ, पित्त और वायु क्रम से निकलते हैं, उसी प्रकार विरेचन में मूत्र, मल, पित्त, पान की हुई औषध और कफ निकलता है ॥ २३ ॥

भवन्ति चात्र—

(स्याद्दुर्विरिक्ते कफपित्तकोपो
दाहोऽरुचिर्गौरवमग्निसादः ।)
हृत्कुक्ष्यशुद्धि परिदाहकण्डू
विण्मूत्रसङ्गाश्च न सद्विरिक्ते ॥
मूर्च्छागुदभ्रंशकफातियोगाः
शूलोद्गमश्चातिविरिक्तलिङ्गम् ॥ २४ ॥

विरेचन के अयोग तथा अतियोग के लक्षण—जैसे कि—(भली भाँति विरेचन न होनेपर कफ और पित्त का प्रकोप, दाह, अरुचि, गौरव और अग्निमांद्य हो जाता है) सम्यग्विरेचन न होनेपर हृदय और कुक्षि की अशुद्धि, दाह, कण्डू और मल-मूत्र का अवरोध होता है। मूर्च्छा, गुदभ्रंश, कफ का अधिक स्राव और शूल की उत्पत्ति होना अधिक विरेचन होने के चिह्न हैं ॥ २४ ॥

गतेषु दोषेषु कफान्वितेषु
नाभ्यां लघुत्वे मनसश्च तुष्टौ ।
गतेऽनिले चाप्यनुलोमभावं
सम्यग्विरिक्तं मनुजं व्यवस्येत् ॥ २५ ॥

सम्यग्विरेचन के लक्षण—कफ से युक्त पित्त और मल (दोषोऽन्न पित्तस्थानगतं दोषोपलक्षित पुरीषं कफपित्तञ्च) के शरीर से बाहर निकलने के पश्चात्, नाभिप्रदेश में लघुता और मन में प्रसन्नता की उत्पत्ति होने तथा वायु के अनुलोम दशा में आने पर रोगी को भली भाँति विरेचन हुआ समझना चाहिए ॥ २५ ॥

मन्दाग्निमक्षीणमसद्विरिक्तं
न पाययेताहनि तत्र पेयाम् ।
क्षीणं तृषार्तं सुविरेचितं च
तन्वी सुखोष्णां लघु पाययेच्च ॥ २६ ॥

विरेचन के बाद पथ्य विधान—यदि आतुर मन्दाग्नि से पीडित हो, क्षीण न हुआ हो तथा भली-भाँति विरेचन न हो तो उस दिन उसे पेया नहीं पिलानी चाहिए। क्षीण, प्यास से पीडित तथा भली-भाँति विरेचन हुए रोगी को पतली, सहने योग्य उष्ण एवं हलकी पेया पिलानी चाहिए ॥ २६ ॥

बुद्धेः प्रसादं बलमिन्द्रियाणां
धातुस्थिरत्वं बलमग्निदीप्तिम् ।
चिराच्च पाकं वयसः करोति
विरेचनं सम्यगुपास्यमानम् ॥ २७ ॥

विरेचन के फल—बुद्धि में निर्मलता, इन्द्रियों में अपना कार्य करने की शक्ति, धातुओं में स्थिरता, उत्साह की वृद्धि, अग्नि दीप्ति तथा वृद्धावस्था का विलम्ब से आगमन आदि गुण, भली-भाँति विरेचन का सेवन करने से उत्पन्न होते हैं ॥ २७ ॥

यथोदकानामुदकेऽपनीते
चरस्थिराणां भवति प्रणाशः ।
पित्ते हृते त्वेवमुपद्रवाणां
पित्तात्मकानां भवति प्रणाशः ॥ २८ ॥

जिस प्रकार जलाशय से जल निकल जाने पर स्थावर और जगम वस्तुएँ (कमल, मछली आदि) नष्ट हो जाती हैं, उसी प्रकार पित्त के निकलने पर, पित्तजन्य व्याधियों का (विरेचन से) नाश हो जाता है ॥ २८ ॥

मन्दाग्नयतिस्नेहितबालवृद्ध-
स्थूलाः क्षतक्षीणभयोपतप्ताः ।
श्रान्तस्तृषार्तोऽपरिजीर्णभक्तो
गर्भिण्यधो गच्छति यस्य चासृक् ॥२९॥
नवप्रतिश्यायमदात्ययी च
नवज्वरी या च नवप्रसूता ।
शल्यार्दिताश्राप्यविरेचनीयाः
स्नेहादिभिर्ये त्वनुपस्कृताश्च ॥ ३० ॥
अत्यर्थपित्ताभिपरीतदेहान्
विरेचयेत्तानपि मन्दमन्दम् ।
विरेचनैर्यान्ति नरा विनाश-
मज्ञप्रयुक्तैरविरेचनीयाः ॥ ३१ ॥

विरेचन के अयोग्य रोगी—मन्दाग्नि से पीडित, अधिक स्नेह से युक्त, बालक, वृद्ध, स्थूल, क्षतक्षीण, भय से दुखी, श्रान्त, तृषार्त, अजीर्णावस्था में भोजन किए हुए, गर्भिणी, अधोग रक्त पित्त-नवीन प्रतिश्यायमदात्यय तथा नवीन ज्वर से युक्त, नवीन प्रसूता, शल्य से पीडित, एवं जिनका स्नेहन आदि न किया गया हो, उन्हें विरेचन नहीं देना चाहिए। पित्त की अधिकता से जो दुर्बल हों उन्हें भी धीरे-धीरे विरेचन देना चाहिए। विरेचन के अयोग्य आतुर, मूर्ख व्यक्ति के द्वारा विरेचन का प्रयोग कर देने पर मृत्यु को प्राप्त होते हैं ॥ २९-३१ ॥

विरेच्यास्तु—ज्वरगरकुष्ठशोऽर्बुदोदरग्रन्थिविद्रधिपाण्डुरोगापस्मारहृद्रोगवातरक्तभगन्दरच्छर्दियोनिरोगविसर्पगुल्मप्लीहाशयरक्तबन्धविसूचिकालसकमूत्राघा-

तकुष्ठविस्फोटकप्रमेहानाहप्लीहशोफवृद्धिशस्त्रक्षतक्षाराग्निदग्धदुष्टव्रणाक्षिपाककाचतिमिराभिष्यन्दशिरःकर्णाक्षिनासास्यगुदमेढ्रादहोर्ध्वरक्तपित्तकृमिकोष्ठिनः पित्तस्थानजेष्वन्येषु च विकारेष्वन्ये च पैत्तिकव्याधिपरीता इति ॥ ३२ ॥

विरेचन के योग्य रोगी—ज्वर, गरविष, अरुचि, अर्श, अर्बुद, उदर, ग्रन्थि, विद्रधि, पाण्डुरोग, अपस्मार, हृद्रोग, वातरक्त, भगन्दर, छर्दि, योनिरोग, विसर्प, गुल्म, पक्वाशय के रोग, विबन्ध, विसूचिका, अलसक, मूत्राघात, कुष्ठ, विस्फोटक, प्रमेह, आनाह, प्लीहा, शोथ, वृद्धि (अन्त्रवृद्धि) शस्त्रक्षत, क्षारदग्ध, अग्निदग्ध, दुष्टव्रण, अक्षिपाक, काच, तिमिर, अभिष्यन्द, शिरोरोग, कर्णरोग, नेत्ररोग, नासारोग, मुखरोग, गुदरोग, मेढ्ररोग, दाह, ऊर्ध्वग रक्तपित्त, कृमि कोष्ठ वाले तथा पित्तस्थानगत अन्यरोगों एवं पित्तजन्य व्याधियों से पीडित अन्य आतुरों को विरेचन देना चाहिए ॥

सरत्वसौक्ष्म्यतैक्ष्ण्यौष्ण्यविकाशित्वैर्वि रेचनम् ।
वमनं तु हरेद्दोषं प्रकृत्या गतमन्यथा ॥ ३३ ॥

वमन और विरेचन के दोष निर्हरण में विशेषता—सर, सूक्ष्म, तीक्ष्ण, उष्ण और विकाशि होने से विरेचन द्रव्य (अधोमार्ग से) दोषों को दूर करते हैं तथा वमन द्रव्य अपने स्वभाव (प्रभाव विशेष) के कारण ऊर्ध्वमार्ग से दोषों को निकालते हैं ॥ ३३ ॥

विमर्श :—सरस्य भावः सरत्वमानुलोम्यम् । सूक्ष्मस्य भावः सौक्ष्म्यम्, सूक्ष्मस्रोतोऽनुसारित्वम् । तीक्ष्णस्य भावस्तैक्ष्ण्यम्, शीघ्रतरदोषस्रावणकरत्वम् । उष्णस्यभाव औष्ण्यम् सौम्यद्रव्योपमर्दनकरणसामर्थ्यम् । विकाशिनो भावः विकाशित्व धातो शैथिल्यकरणसामर्थ्यम् । अत्र प्रकृति, स्वभाव- शक्तिविशेष- प्रभावो वीर्यमित्यनर्थान्तरम् । तेन प्रकृत्या वीर्येणान्यथागतमूर्ध्वगमनम् । सरत्वादिभिर्गुणैर्विरेचनमधो दोषानपहरेत् । वमनस्य तुल्यगुणत्वेऽपि वीर्येणोर्ध्वगामित्वम् । टल्हण

यात्यधो दोषमादाय पच्यमानं विरेचनम् ।
गुणोत्कर्षाद्व्रजत्यूर्ध्वमपक्वं वमनं पुनः ॥३४॥

पाक को प्राप्त होता हुआ विरेचन द्रव्य दोषों को लेकर अधोमार्ग में प्रवृत्त होता है और वमन द्रव्य अपक्व अवस्था में ही अपने गुण की प्रधानता से दोषों को ऊर्ध्वमार्ग से निकालता है ॥ ३४ ॥

विमर्श—विरेचन द्रव्य स्थिर, गुरु तथा पृथ्वी और जल गुण प्रधान होते हैं, इसलिए स्थिर होने के कारण पाचन होने पर एवं गुरु होने के कारण अधोमार्ग से प्रवृत्त होते हैं। वमन द्रव्य वायु, अग्नि, गुणप्रधान तथा शीघ्रगमनशील होते हैं, अतः शीघ्रगमनशील होने से अपक्व अवस्था में तथा लघु होने से ऊर्ध्वमार्ग में प्रवृत्त होते हैं।

मृदुकोष्ठस्य दीप्ताग्नेरतितीक्ष्णं विरेचनम् ।
न सम्यङ् निर्हरेद्दोषानतिवेगप्रधावितम् ॥३५॥

विरेचन का सम्यक् प्रवर्त्तन न होने में कारण—अत्यन्त वेग से प्रवर्तित अतितीक्ष्ण विरेचन प्रदीप्त अग्नि वाले मृदु कोष्ठ मनुष्य के दोषों को भली-भाँति नहीं निकालता ॥३५॥

पीतं यदौषधं प्रातर्भुक्तपाकसमे क्षणे ।
पक्तिं गच्छति दोषांश्च निर्हरेत्तत् प्रशस्यते ॥३६॥

विरेचनीय औषध की श्रेष्ठता—प्रातःकाल पी हुई जो औषध आहार-पाचन के समय (तीन प्रहर में) पाक को प्राप्त होती है और दोषों को निकालती है, वह श्रेष्ठ होती है ॥ ३६ ॥

दुर्बलस्य चलान् दोषानल्पानल्पान् पुनः पुनः ।
हरेत् प्रभूतानल्पांस्तु शमयेत् प्रच्युतानपि ॥३७॥

दुर्बल के दोष-हरण में विशेष विधि—दुर्बल मनुष्य के अपने स्थान से चलायमान और कुपित हुए दोषों को बार बार थोड़ी थोड़ी मात्रा में निकालना चाहिए तथा अल्प चलायमान दोषों को भी शमन करना चाहिए ॥ ३७ ॥

हरेद्दोषांश्चलान् पक्वान् बलिनो दुर्बलस्य वा ।
चला ह्युपेक्षिता दोषाः क्लेशयेयुश्चिरं नरम् ॥३८॥

स्थान से चलित दोषों को अवश्य निकालने का निर्देश—बलवान अथवा दुर्बल रोगी के चलायमान पक्व दोषों को बाहर निकालना चाहिए क्योंकि उपेक्षा किए गए दोष बहुत काल तक मनुष्य को कष्ट पहुँचाते हैं ॥ ३८ ॥

मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैर्घृतैः ।
सन्धुक्षिताग्निं स्निग्धं च स्विन्नं चैव विरेचयेत् ॥३९॥

क्रूर कोष्ठ के संशोधन की विधि—मन्दाग्नि तथा क्रूर कोष्ठवाले व्यक्ति की अग्नि को क्षार और लवण युक्त घृत से दीप्त करके तथा स्नेहन, स्वेदन देकर विरेचन देना चाहिए ॥

स्निग्धस्विन्नस्य भैषज्यैर्दोषस्तूत्क्लेशितो बलात् ।
निलीयते न मार्गेषु स्निग्धे भाण्ड इवोदकम् ॥४०॥

शोधन का स्नेह स्वेदपूर्वक प्रयोग में हेतु—स्नेहन और स्वेदन से युक्त रोगी का दोष औषधियों के द्वारा बलपूर्वक उत्कर्षित किए जाने पर मार्ग में उसी प्रकार नहीं ठहर सकता जिस प्रकार चिकने घड़े पर जल नहीं ठहरता ॥ ४० ॥

न चातिस्नेहपीतस्तु पिबेत् स्नेहविरेचनम् ।
दोषाः प्रचलिताः स्थानाद् भूयः श्लिष्यन्ति वर्त्मसु ॥

अतिस्निग्ध के लिए स्नेह विरेचन का निषेध—अत्यधिक स्नेहपान किए हुए व्यक्ति को स्नेहविरेचन नहीं पीना चाहिए क्योंकि अपने स्थान से चलायमान दोष पुनः मार्गों में चिपक जाते हैं ॥ ४१ ॥

विषाभिघातपिडकाशोफपाण्डुविसर्पिणः ।
नातिस्निग्धा विशोध्याः स्युस्तथा कुष्ठिप्रमेहिणः ॥४२॥

विरेचन के अयोग्य व्यक्ति—विष अभिघात, पिडका, शोथ, पाण्डु, कुष्ठ और प्रमेह के रोगी तथा जो अत्यधिक स्निग्ध नहीं हैं उन्हें विरेचन देना चाहिए ॥ ४२ ॥

विरूक्ष्य स्नेहसात्म्यं तु भूयः संस्नेह्य शोधयेत् ।
तेन दोषा हृतास्तस्य भवन्ति बलवर्धनाः ॥४३॥

स्नेहसात्म्य वालों के लिए संशोधन विधि—स्नेहसात्म्य व्यक्ति को रूक्ष बनाकर तथा पुनः स्नेहन करके विरेचन देना चाहिए, इससे निकले हुए दोष बल की वृद्धि करते हैं ॥ ४३ ॥

प्रागपीतं नरं शोध्यं पाययेतौषधं मृदु ।
ततो विज्ञातकोष्ठस्य कार्यं संशोधनं पुनः ॥ ४४ ॥

अविज्ञात कोष्ठ वालों के लिये सशोधन में विशेषता—जिस व्यक्ति ने कभी पहले विरेचन द्रव्य का पान न किया हो, उसे मृदु औषधि पिलाकर शुद्ध करना चाहिए। इसके पश्चात् उसके कोष्ठ का ज्ञान होने पर सशोधन करना चाहिए ॥ ४४ ॥

सुखं दृष्टफलं ह्यल्पमात्रं महागुणम् ।
व्यापत्स्वल्पात्ययं चापि पिबेन्नृपतिरौषधम् ॥ ४५ ॥

राजा का योग्य विरेचन—पीने में सुखकर, जिसका गुण ज्ञात हो चुका हो, मन को प्रिय, अल्पमात्रा वाली, अधिक गुणशील तथा जिसमें हानिकारक दोष स्वल्प हो, ऐसी औषधि राजा को पीनी चाहिए ॥ ४५ ॥

स्नेहस्वेदावनभ्यस्य यस्तु संशोधनं पिबेत् ।
दारु शुष्कमिवानामे देहस्तस्य विशीर्यते ॥ ४६ ॥

रूक्ष का संशोधन करने में दोष—स्नेहन और स्वेदन का प्रयोग किए बिना जो मनुष्य संशोधन औषधि पीता है, उसका शरीर इस प्रकार नष्ट हो जाता है जैसे सूखी लकडी मोडने से टूट जाती है ॥ ४६ ॥

स्नेहस्वेदप्रचलिता रसैः स्निग्धैरुदीरिताः ।
दोषाः कोष्ठगता जन्तोः सुखा हर्तुं विशोधनैः ॥४७॥

संशोधन के द्वारा सुखपूर्वक दोषों के निकलने का निर्देश—स्नेहन और स्वेदन से चलायमान तथा स्निग्ध रसों के द्वारा प्रकुपित, कोष्ठ में पहुँचे हुए मनुष्यों के दोष, संशोधन के द्वारा सुखपूर्वक बाहर निकाले जा सकते हैं ॥४७॥

इत्यायुर्वेदतत्त्वसंदीपिका भाषा व्याख्यायां त्रयस्त्रिंशोऽध्यायः

चतुस्त्रिंशत्तमोऽध्यायः

अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

वमन-विरेचन दोषज व्याधि-चिकित्सा का उपक्रम—इसके अनन्तर वमन, विरेचन के दोष से उत्पन्न व्याधियों की चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

वैद्यातुरनिमित्तं वमनं विरेचनं च पञ्चदशधा व्यापद्यते । तत्र वमनस्याधोगतिरूर्ध्वं विरेचनस्येति पृथक्; सामान्यमुभयोः—सावशेषौषधत्वं, जीर्णौषधत्वं, हीनदोषापहृतत्वं, वातशूलम्, अयोगो, अतियोगो, जीवादानम्, आध्मानं, परिकर्तिका, परिस्रावः, प्रवाहिका, हृदयोपसरणं, विबन्धः, अङ्गग्रग्रह इति ॥३॥

पन्द्रह प्रकार के वमन-विरेचन व्यापदों का निर्देश—वैद्य और आतुर के दोष से (भेषज और परिचारक का ग्रहण भी वैद्य एवं आतुर के द्वारा होता है) वमन तथा विरेचन के द्वारा पन्द्रह प्रकार की व्याधियाँ उत्पन्न होती हैं। इनमें वमन द्रव्य का नीचे को जाना और विरेचन का ऊपर की ओर उठना पृथक् पृथक् व्यापत्तियाँ है। शेष अन्य व्यापत्तियाँ दोनों में (वमन-विरेचन) समान रूप से होती हैं:—(जिनके नाम निम्न लिखित हैं) १ सावशेषौषधत्व, २ जीर्णौषधत्व, ३ हीनदोषापहृतत्व, ४ वातशूल, ५ अयोग, ६ अतियोग, ७ जीवादान, ८ आध्मान, ९ परिकर्तिका, १० परिस्राव, ११ प्रवाहिका, १२ हृदयोपसरण, २१ विबन्ध, १४ अङ्ग ग्रग्रह ॥

विमर्श—ऊपर निर्देश किया गया है कि वमन, विरेचन के द्वारा पन्द्रह प्रकार की व्यापत्तियाँ उत्पन्न होती है। इनमें वमन की अधोगति तथा विरेचन की ऊर्ध्वगति दो व्यापत्तियाँ पृथक्-पृथक् होती है। शेष तेरह व्यापत्तियों का उल्लेख दोनों में समान रूप से होना चाहिए, जिसमें पन्द्रह व्यापत्तियों की गणना ठीक हो जाय। किन्तु उपर्युक्त गणना में चौदह व्यापत्तियाँ आती हैं। इनमें अन्तिम अङ्ग-ग्रग्रह व्यापत्ति का पाठ सुश्रुत संहिता के कई संस्करणों में प्राप्त नहीं होता तथा हाराणचन्द्र जी भी उसे अपने पाठ में सम्मिलित नहीं करते। इस प्रकार उपर्युक्त सूची में से अङ्ग ग्रग्रह को हटा देने पर ही उपर्युक्त गणना का सामञ्जस्य हो सकता है। चरक ने दश व्यापदों का ही नाम निर्देश किया है—'आध्मान परिकर्त्तिश्च स्रावो हृद्गर्भयोर्ग्रहः' । जीवादान सविभ्रंशस्तम्भः सोपद्रवः क्रमः । अयोगादतियोगाच्च दशैता व्यापदो मताः' । प्रेष्यभैषज्यवैद्यानां वैगुण्यादापदः स्मृताः ॥ (च. सि. अ. ६) सावशेषौषधत्व का तात्पर्य है जीर्णावशेष अर्थात् बिना जीर्ण हुई औषधि । इसका लक्षण चरक में इस प्रकार है—'क्लमो दाहोऽङ्गसदन भ्रमो मूर्च्छा शिरोरुजा । अरतिर्वल्हानिश्च सावशेषौषधाकृतिः । (च.सि.अ. ६)

तत्र बुभुक्षापीडितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चावतिष्ठमानं दुर्बलस्य वा गुणसामान्यभावाद्वमनमधो गच्छति, तत्रेप्सितानवाप्तिर्दोषोत्क्लेशश्च; तमाशु स्नेहयित्वा भूयस्तीक्ष्णतरैर्वामयेत् ॥ ४ ॥

वमन के अधोगमन-व्यापद का निर्देश—भूख से पीडित, अत्यन्त तीक्ष्ण अग्निवाले, मृदु कोष्ठ अथवा दुर्बल मनुष्य का पाक को प्राप्त होता हुआ वमन द्रव्य, सरत्व आदि गुणों की समानता के कारण नीचे की ओर जाता है। इससे इच्छित वस्तु की प्राप्ति नहीं होती अर्थात् वमन नहीं होता तथा दोष (कफ) का उत्क्लेश (वृद्धि) होता है; इस दशा में रोगी का शीघ्र स्नेहन करके पुनः तीक्ष्णतर औषध पिला कर वमन कराना चाहिए ॥ ४ ॥

अपरिशुद्धामाशयस्योत्क्लिष्टश्लेष्मणः सशेषान्नस्य वाऽहृद्यमति प्रभूतं वा विरेचनं पीतमूर्ध्वं गच्छति, तत्रेप्सितानवाप्तिर्दोषोत्क्लेशश्च; तत्राशुद्धामाशयमुल्बणश्लेष्माणमाशु वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत्, आमान्वये त्वामवत् संविधानम्, अहृद्येऽतिप्रभूते च हृद्यं प्रमाणयुक्तं च; अत ऊर्ध्वमुत्क्लिष्टदोषे न तृतीयं पाययेत्, ततस्त्वेनं मधुघृतफाणितयुक्तैर्हैर्विरेचयेत् ॥

विरेचन के ऊर्ध्वगमन व्यापद का निर्देश—जिस आतुर का आमाशय अशुद्ध हो तथा कफ का उत्क्लेश हो अथवा जिसका आहार पूर्ण रूप से न पचा हो, उसे अप्रिय या अधिक मात्रा में पिलाया गया विरेचन द्रव्य, ऊपर की ओर जाता है। इससे अभिलषित वस्तु की अप्राप्ति और दोष (पित्त) की वृद्धि होती है। इस स्थिति में अशुद्ध आमाशय एवं बढ़े हुए कफ वाले को शीघ्र वमन कराके पुनः तीक्ष्णतर विरेचन देना चाहिए। आम का अनुबन्ध रहने पर लंघन, पाचन कराना चाहिए। अप्रिय तथा अधिक मात्रा की अवस्था में प्रिय और प्रमाणयुक्त औषध पिलानी चाहिए। इस क्रिया के उपरान्त भी यदि विरेचन द्रव्य ऊपर की ओर उठे तो तीसरी वार विरेचन नहीं देना चाहिए। इस दशा में मधु, घृत, और राव से युक्त अवलेह के द्वारा आतुर को विरेचन कराना चाहिए॥ ५॥

दोषविग्रथितमल्पमौषधमवस्थितमूर्ध्वभागिकमधोभागिकं वा न स्रंसयति दोषान्, तत्र तृष्णा पार्श्वशूलं छर्दिर्मूर्च्छा पर्वभेदो हृल्लासोऽरतिरुद्गाराविशुद्धिश्च भवति, तमुष्णाभिरद्भिराशु वामयेदूर्ध्वभागिके, अधोभागिकेऽपि च सावशेषौषधमतिप्रधावितदोषमतिबलमसम्यग्विरिक्तलक्षणमप्येवं वामयेत्॥ ६॥

सावशेष औषध व्यापद् का वर्णन—वमन अथवा विरेचन की जीर्णावशेष, दोषमिश्रित अल्प औषध, दोषों को निकालने में समर्थ नहीं होती। इससे तृष्णा, पार्श्वशूल, छर्दि (वमन), मूर्च्छा, पर्वभेद (सन्धियों में पीडा), हृल्लास (थुकथुकी), अरति (कहीं मन न लगना) और उद्गार का शुद्ध न होना, होता है। वमन की अवस्था में उस जीर्णावशेष अल्प औषध को उष्ण जल के द्वारा शीघ्र वमन कराना चाहिए और विरेचन की दशा में भी असम्यग्विरिक्त के लक्षणों से युक्त बलवान् पुरुष के बहुदोष मिश्रित जीर्णावशेष औषध को उपर्युक्त विधि से वमन के द्वारा निकालना चाहिए॥ ६॥

क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्तवत् पाकमुपैति, तत्र समुदीर्णा दोषा यथाकालमनिर्हीयमाणा व्याधिविभ्रंशं बलविभ्रंशं चापादयन्ति, तमनल्पममन्दमौषध च पाययेत्॥ ७॥

जीर्णौषध व्यापद् का वर्णन—तीक्ष्ण अग्निवाले क्रूर कोष्ठ मनुष्य की सेवन की हुई अल्पमात्रा या अल्पगुण वाली औषधि भोजन की भाति पच जाती है। उस अवस्था में समय पर बाहर न निकाले गए दोष, व्याधिविभ्रंश (कोष्ठ आदि में क्षोभ उत्पन्न करना) और बलविभ्रंश (सन्धि विश्लेष आदि) उत्पन्न कर देते हैं। इस दशा में प्रचुर और तीक्ष्ण औषध पिलानी चाहिए॥ ७॥

अस्निग्धस्विन्नेनाल्पगुण वा भेषजमुपयुक्तमल्पान् दोषान् हन्ति; तत्र वमने दोषशेषो गौरवमुत्क्लेशं हृदयाविशुद्धि व्याधिवृद्धि च करोति, तत्र तं यथायोगं पाययित्वा वामयेद् दृढतरं, विरेचने तु गुदपरिकर्तनमाध्मान शिरोगौरवमनिःसरणं वा वायोर्व्याधिवृद्धिं च करोति, तमुपपाद्य भूयः स्नेहस्वेदाभ्यां विरेचयेद् दृढतरं दृढ बहुप्रचलितदोषं वा तृतीये दिवसेऽल्पगुणं चेति॥

अल्पदोष हरण व्यापद् का वर्णन—स्नेहन और स्वेदन का प्रयोग किए विना सेवन की गई अल्प गुण वाली औषधि अल्प दोषों को ही नष्ट करती है। उस समय वमन की अवस्था में बचा हुआ दोष गौरव, (भारीपन) उत्क्लेश (मिचली आना) हृदय की अशुद्धि और व्याधि वृद्धि करता है। इसमें योग के अनुसार (स्नेहन-स्वेदन करके) वमन द्रव्य पिला कर आतुर को अत्यधिक वमन कराना चाहिए। विरेचन की अवस्था में बचा हुआ दोष, गुदपरिकर्त्तन (गुदा में चारों ओर काटने के समान पीड़ा), आध्मान, शिरोगौरव, वायु का अवरोध तथा रोग की वृद्धि करता है। इसमें आतुर को, पुनः स्नेहन तथा स्वेदन का प्रयोग करके, तीक्ष्ण विरेचन देना चाहिए। बहुदोष या चलायमान दोषों से युक्त दृढ शरीर वाले व्यक्ति को स्नेहन, स्वेदन के अनन्तर तीसरे दिन अल्प गुण वाली औषधि सेवन करानी चाहिए॥ ८॥

अस्निग्धस्विन्नेन रूक्षौषधमुपयुक्तब्रह्मचारिणा वा वायुं कोपयति, तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणिमन्यामर्मशूलं मूर्च्छां भ्रम मदं संज्ञानाशं च करोति, तं वातशूलमित्याचक्षते; तमभ्यज्य धान्यस्वेदेन स्वेदयित्वा यष्टीमधुकविपक्वेन तैलेनानुवासयेत्॥ ९॥

वातशूल व्यापद् का वर्णन—स्नेहन, स्वेदन के बिना ब्रह्मचर्य रहित अवस्था में सेवन की गई रूक्ष औषध वायु को कुपित करती है। उस समय प्रकुपित हुआ वायु, पार्श्व, पृष्ठ, श्रोणि (कटि) मन्याप्रदेश और मर्म (हृदय) में पीड़ा तथा मूर्च्छा, भ्रम, मद और संज्ञानाश कर देता है। इस दशा को वात शूल कहते हैं। इसमें स्नेह की मालिश करके तथा मापादि शमी धान्यों के द्वारा स्वेदन देकर, मुलेठी के क्वाथ से सिद्ध तैल के द्वारा अनुवासन वस्ति लगानी चाहिए॥

स्नेहस्वेदाभ्यामविभावितशरीरेणाल्पमौषधमल्पगुणं वा पीतमूर्ध्वमधो वा नाभ्येति दोषांश्चोत्क्लेश्य तैः सह बलक्षयमापादयति, तत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति, तमयोगमित्याचक्षते, तमाशु वामयेन्मदनफललवणाम्बुभिर्विरेचयेत्तीक्ष्णतरैः कषायैश्च। दुर्वान्तस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपिडकाव्यङ्गराङ्गमर्दनिस्तोदनानि कुर्वन्ति, ततस्तानशेषान्महौषधेनापहरेत्। अस्निग्धस्विन्नस्य दुर्विरिक्तस्याधोनाभेः स्तब्धपूर्णोदरता शूलं वातपुरीषसङ्गः कण्डूमण्डलप्रादुर्भावो वा भवति, तमास्थाप्य पुनः संस्नेह्य विरेचयेत्तीक्ष्णेन। नातिप्रवर्तमाने तिष्ठति वा दुष्टसंशोधने तत्सन्तेजनार्थमुष्णोदकं पाययेत् पाणितापैश्च पार्श्वोदरमुपस्वेदयेत्, ततः प्रवर्तन्ते दोषाः। अनुप्रवृत्ते चाल्पदोषे जीर्णौषधं बहुदोषमहःशेषं बलं चावेक्ष्य भूयो मात्रां विदध्यात्। अप्रवृत्तदोषं दशरात्रादूर्ध्वमुपसंस्कृतदेहं स्नेहस्वेदाभ्यां भूयः शोधयेत्। दुर्विरेच्यमास्थाप्य पुनः संस्नेह्य विरेचयेत्। ह्रीभयलोभैर्वेगाघातशीलाः प्रायशः स्त्रियो राजसमीपस्था

वणिजः श्रोत्रियाश्च भवन्ति, तस्मादेते दुर्विरेच्याः बहुगतत्वात्; अत एव तानतिस्निग्धान् स्वेदोपपन्नाञ् शोधयेत् ॥ १० ॥

वमन-विरेचन के अयोग व्यापद् का वर्णन—स्नेहन और स्वेदन से रहित शरीर वाले व्यक्ति को दिलाई गई अल्पमात्रा या अल्प गुण वाली औषधि, ऊर्ध्व या अधो मार्ग में (वमन-विरेचन) प्रवृत्त नहीं होती और दोषों को उत्क्लेशित कर उनके साथ बलक्षय उत्पन्न कर देती है। इससे आध्मान, हृदयग्रह, तृष्णा, मूर्च्छा और दाह होता है। इस अवस्था को अयोग कहते हैं। इस दशा में (वमन का अयोग होने पर) मैनफल और लवण मिश्रित जल पिला कर शीघ्र वमन कराना चाहिए तथा (विरेचन के अयोग में) अति तीक्ष्ण कषायों से विरेचन कराना चाहिए। भली भांति वमन न होने पर उत्क्लेशित हुए दोष, शरीर में व्याप्त होकर कण्डू, शोथ, कुष्ठ, पिडका, ज्वर, उदर्मद और निस्तोद (सुई चुभने के समान पीडा) उत्पन्न कर देते हैं। औषधि की बड़ी मात्रा पिला कर इनका समूल नाश करना चाहिए। स्नेहन और स्वेदन से रहित, दुर्विरिक्त मनुष्य की नाभि के नीचे स्तब्धता, तनाव, शूल, अधोवात वायु एवं मल का अवरोध तथा कण्डू और मण्डल की उत्पत्ति होती है, इसे प्रथम आस्थापन देकर (निरूहबस्ति) पुनः स्नेह बस्ति से स्नेहन करके, तीक्ष्ण कषायों के द्वारा विरेचन कराना चाहिए। विरेचन का वेग भली भांति न होने पर अथवा विरेचन द्रव्य के दूषित होकर रुकने पर इसे उत्तेजित करने के लिए उष्ण जल पिलाना चाहिए और करतल को उष्ण करके पार्श्व तथा उदर पर सेक करना चाहिए, इससे दोषों की प्रवृत्ति (विरेचन) होती है। दोषों की प्रवृत्ति अल्प मात्रा में होने पर, औषधि की जीर्णावस्था, दोष बाहुल्य, दिवस का अवसान, शारीरिक शक्ति एवं पुरुष के बल की परीक्षा कर पुनः औषधि की मात्रा पिलानी चाहिए। दोषों की प्रवृत्ति न होने पर दश दिन के उपरान्त, स्नेहन, स्वेदन के द्वारा शुद्ध शरीर वाले व्यक्ति का पुनः (वमन-विरेचन के द्वारा) संशोधन करना चाहिए। कठिनाई से विरेचन होने वाले व्यक्ति को प्रथम आस्थापन (निरूह बस्ति) देकर तथा स्नेह बस्ति का प्रयोग करके, विरेचन कराना चाहिए। लज्जा, भय और लोभ से उपस्थित मल, मूत्र के वेगों को रोकने वाली प्रायः स्त्रियाँ, राजा के समीप रहने वाले व्यक्ति व्यापारी तथा वेदपाठी हुआ करते हैं, इस कारण ये लोग दुर्विरेच्य होते हैं, क्योंकि इनमें वायु की प्रबलता रहती है। अतः भली भांति स्नेहन-स्वेदन करके इनका शोधन करना चाहिए ॥ १० ॥

स्निग्धस्विन्नस्यातिमात्रमतिमृदुकोष्ठस्य वाऽतितीक्ष्णमधिकं वा दत्तमौषधमतियोगं कुर्यात्। तत्र वमनातियोगे पित्तातिप्रवृत्तिर्बलविभ्रंशो वातकोपश्च बलवान् भवति, तं घृतेनाभ्यज्यावगाह्य शीतास्वप्सु शर्करामधुमिश्रैर्लेहैरुपचरेद्यथास्वं, विरेचनातियोगे कफस्यातिप्रवृत्तिरुत्तरकालं च सरक्तस्य, तत्रापि बलविभ्रंशो वातकोपश्च बलवान् भवति, तमतिशीतास्वम्बुभिः परिषिच्याऽवगाह्य वा शीतैस्तण्डुलाम्बुभिर्मधुमिश्रैश्छर्दयेत्, पिच्छाबस्तिं चास्मै दद्यात्, क्षीरसर्पिषा चैनमनुवासयेत्, प्रियङ्ग्वादिं चास्मै तण्डुलाम्बुना पातुं प्रयच्छेत्, क्षीररसयोश्चान्यतरेण भोजयेत् ॥ ११ ॥

अतियोग व्यापद् का वर्णन—अत्यधिक स्नेहन, स्वेदन से युक्त, अथवा अत्यन्त मृदु कोष्ठ वाले पुरुष को अत्यन्त तीक्ष्ण या अधिक मात्रा में दी गई औषधि अतियोग उत्पन्न कर देती है। वमन का अतियोग होने पर पित्त की अधिक प्रवृत्ति; बल का ह्रास और वायु का प्रबल प्रकोप होता है। इसमें घृत की मालिश कर शीतल जल से स्नान कराना चाहिए और दोषों के अनुसार शर्करा और मधु मिश्रित अवलेहों के द्वारा उपचार करना चाहिए। विरेचन का अतियोग होने पर प्रथम कफ की अत्यधिक प्रवृत्ति और इसके बाद रक्तमिश्रित कफ का आगमन होता है। इस दशा में भी बल का ह्रास और वात का प्रबल प्रकोप होता है। रोगी को अत्यन्त शीतल जल से स्नान अथवा जल में गोता लगवाना चाहिए और मधु मिश्रित शीतल तण्डुलोदक के द्वारा वमन कराना चाहिए। इसे पिच्छाबस्ति (पिच्छिल द्रव्यों से युक्त) देनी चाहिए। दूध युक्त घी से अनुवासन बस्ति लगानी चाहिए और तण्डुलोदक के साथ प्रियङ्गु आदि गण के द्रव्य पीने के लिए देना चाहिए तथा दूध या मांसरस में से किसी एक के साथ भोजन कराना चाहिए ॥ ११ ॥

तस्मिन्नेव वमनातियोगे प्रवृद्धे शोणितं ष्ठीवति छर्दयति वा, तत्र जिह्वानिःसरणमपसरणमक्ष्णोर्व्यावृत्तिर्हनुसंहननं तृष्णा हिक्का ज्वरो वैसंज्ञ्यमित्युपद्रवा भवन्ति; तमजाशृक्चन्दनोशीराञ्जनलाजचूर्णैः सशर्करोदकैर्मन्थं पाययेत्, फलरसैर्वा सघृतक्षौद्रशर्करैः शुङ्गाभिर्वा वटादीनां पेयां सिद्धां सक्षौद्रां वर्चोग्राहिभिर्वा, पयसा जाङ्गलरसेन वा भोजयेत्, अतिस्रुतशोणितविधानेनोपचरेत्; जिह्वामतिसर्पितां कटुकलवणचूर्णप्रवृद्धां तिलद्राक्षाप्रलिप्तां वाऽन्तः पीडयेत्, अन्तः प्रविष्टायामम्लमन्ये तस्य पुरस्तात् स्वादयेयुः; व्यावृत्ते चाक्षिणी घृताभ्यक्ते पीडयेत्, हनुसंहनने वातश्लेष्महरं नस्यं स्वेदांश्च विदध्यात्, तृष्णादिषु च यथास्वं प्रतिकुर्वीत, विसञ्ज्ञे वेगुवीणागीतस्वनं श्रावयेत् ॥ १२ ॥

वमन के अतियोग का वर्णन—इसी अतियोग की अवस्था में वमन का अतियोग होने पर रोगी रक्त थूकता है अथवा रक्त का वमन करता है। इसमें जिह्वा का बाहर निकलना, अन्दर की ओर मुड़ जाना, आँखों का फैल जाना, जबड़े का बन्द होना, तृष्णा, हिक्का, ज्वर और संज्ञानाश आदि उपद्रव उत्पन्न हो जाते हैं। इस दशा में बकरी का रक्त, चन्दन, खश, सौवीराञ्जन और धान के लावे के चूर्ण का शर्करा एवं जल के द्वारा मन्थ बना कर पिलाना चाहिए। घृत, मधु और शर्करा मिश्रित फलों के रस या वट आदि वृक्षों की कोंपलों से या मल बांधने वाले (कुटज आदि) द्रव्यों के द्वारा सिद्ध मधु मिली हुई पेया पिलानी चाहिए। दूध अथवा जांगल जीवों के मांसरस के साथ भोजन कराना चाहिए। अधिक रक्त-स्राव को रोकने वाली विधि के अनुसार उपचार करना चाहिए। अधिक

बाहर निकली हुई जिह्वा में त्रिकटु (सोंठ, मरिच, पिप्पल) और लवण रगड़ कर या तिल और द्राक्षा का लेप करके अन्दर दबाना चाहिए। अन्दर घुसी हुई जिह्वा को बाहर निकालने के लिए दूसरे व्यक्ति को उस रोगी के सम्मुख खट्टे फलों का स्वाद लेना चाहिए। नेत्रों के फैल जाने पर घृत की मालिश करके दबाना चाहिए। जबड़े के बैठ जाने पर वातहर नस्य और स्वेद का प्रयोग करना चाहिए। तृष्णा आदि में यथायोग्य उपचार करना चाहिए तथा संज्ञानाश होने पर वांसुरी, वीणा एवं संगीत की ध्वनि सुनानी चाहिए॥

विरेचनातियोगे च सचन्द्रकं सलिलमधः स्रवति, ततो मांसधावनप्रकाशमुत्तरकालं जीवशोणितं च, ततो गुदनिःसरणं वेपथुर्वमनातियोगोपद्रवाश्चास्य भवन्ति; तमपि निःसृतशोणितविधानेनोपचरेत्, निःसर्पितगुदस्य गुदमभ्यज्य परिस्वेद्यान्तः पीडयेत्, क्षुद्ररोगचिकित्सितं वा वीक्षेत, वेपथौ वातव्याधिविधानं कुर्वीत, जिह्वानिःसरणादिपूक्तः प्रतीकारः, अतिप्रवृत्ते वा जीवशोणिते काश्मरीफलबदरीदूर्वोशीरैः शृतेन पयसा घृतमण्डाञ्जनयुक्तेन सुशीतेनास्थापयेत्, न्यग्रोधादिकषायेक्षुरसघृतशोणितसंसृष्टैश्चैनं बस्तिभिरुपाचरेत्, शोणितष्ठीवने रक्तपित्तरक्तातीसारक्रियाश्चास्य विदध्यात्, न्यग्रोधादिं चास्य विदध्यात् पानभोजनेषु ॥ १३ ॥

विरेचन के अतियोग का वर्णन—विरेचन का अतियोग होने पर मोरपंख की चन्द्रिका के तुल्य जल बाहर निकलता है। इसके अनन्तर मांस के धोवन के समान जीव शोणित (शरीरेन्द्रियसत्त्वात्म-संयोगाश्रय रक्त) आता है, फिर गुदभ्रंश, कम्प और वमन के अतियोग वाले उपद्रव उत्पन्न होते हैं। इसकी चिकित्सा भी अधिक रक्तस्राव को रोकने वाली विधि के द्वारा करनी चाहिए। गुदभ्रंश होने पर गुदा में स्नेह का अभ्यङ्ग तथा स्वेदन करके अन्दर की ओर दबाना चाहिए। कम्प में वातव्याधि चिकित्सा विधि का प्रयोग करना चाहिए। जिह्वानि:सरण की चिकित्सा विधि ऊपर बतलाई गई है। जीव शोणित का स्राव अधिक होने पर गम्भारी के फल, बेर, दूब और खस के द्वारा सिद्ध दूध में घी का मण्ड और सौवीराञ्जन मिला कर, शीतल करके, आस्थापन वस्ति का प्रयोग करना चाहिए। न्यग्रोधादिगण के काथ में गन्ने का रस, घृत और रक्त (बकरी का रक्त) मिलाकर वस्तियों के द्वारा उपचार करना चाहिए। थूक के साथ रक्त निकलने पर रक्तपित्त और रक्तातिसार की भांति चिकित्सा करनी चाहिए तथा पान और भोजन में न्यग्रोधादिगण के द्रव्यों का प्रयोग करना चाहिए ॥ १३ ॥

जीवशोणितरक्तपित्तयोश्च जिज्ञासार्थं तस्मिन् पिचुं प्लोतं वा क्षिपेत्, यद्युष्णोदकप्रक्षालितमपि वस्त्रं रञ्जयति तज्जीवशोणितमवगन्तव्यं, सभक्तं च शुने दद्याच्छक्तुसमिश्रं वा, स यद्युपभुञ्जीत तज्जीवशोणितमवगन्तव्यम्, अन्यथा रक्तपित्तमिति ॥ १४ ॥

जीवशोणित और रक्त-पित्त परीक्षा—जीवशोणित (शुद्ध रक्त) और रक्तपित्त की परीक्षा के लिए निकले हुए रक्त में रुई या वस्त्र भिगोना चाहिए। यदि उष्ण जल से धोने पर भी वस्त्र का रंग साफ न हो तो उसे जीवशोणित समझना चाहिए। भोजन या सत्तू में उस रक्त को मिला कर कुत्ते को देना चाहिए, यदि कुत्ता उसे खा ले तो जीवशोणित समझना चाहिए अन्यथा उसे रक्तपित्त जानना चाहिए ॥ १४ ॥

सशेषान्नेन बहुदोषेण रूक्षेणानिलप्रायकोष्ठेनानुष्णमस्निग्धं वा पीतमौषधमाध्मापयति, तत्रानिलमूत्रपुरीषसङ्गः समुन्नद्धोदरता पार्श्वभङ्गो गुदबस्तिनिस्तोदनं भक्तारुचिश्च भवति, तं चाध्मानमित्याचक्षते; तमुपस्वेद्यानाहवर्तिदीपनबस्तिक्रियाभिरुपचरेत् ॥१५॥

आध्मान व्यापद् का वर्णन—अन्न का समुचित परिपाक न होने वाले, बहुदोष युक्त, रूक्ष, एवं वातप्रधान कोष्ठ मनुष्य को स्नेहरहित शीतल औषधि पीने से आध्मान होता है। इसमें अपान वायु और मलमूत्र का अवरोध, पेट का फूलना, पार्श्वपीडा, गुदा और बस्ति में सुई चुभाने की सी वेदना तथा भोजन से अरुचि हो जाती है। इस अवस्था को आध्मान कहते हैं। इसमें स्वेदन करके आनाहवर्ति (मूत्रादि अनुलोमन क्रिया), दीपन, लवन आदि क्रिया तथा वस्ति के द्वारा उपचार करना चाहिए ॥ १५ ॥

क्षामेणातिमृदुकोष्ठेन मन्दाग्निना रूक्षेण वाऽतितीक्ष्णोष्णातिलवणमतिरूक्षं वा पीतमौषधं पित्तानिलौ प्रदूष्य परिकर्तिकामापादयति, तत्र गुदनाभिमेढ्रबस्तिशिरःसु सदाहं परिकर्तनमनिलसङ्गो वायुविष्टम्भो भक्तारुचिश्च भवति, तत्र पिच्छावस्तिर्यष्टीमधुककृष्णतिलकल्कमधुघृतयुक्तः, शीताम्बुपरिषिक्तं चैनं पयसा भुक्तवन्तं घृतमण्डेन यष्टीमधुकसिद्धेन तैलेन वाऽनुवासयेत् ॥ १६ ॥

परिकर्तिका व्यापद् का वर्णन—क्षीण बलकाय, अतिमृदु कोष्ठ, मन्दाग्नि से युक्त, रूक्ष पुरुष के अत्यन्त तीक्ष्ण, उष्ण अथवा अधिक लवणमिश्रित अति रूक्ष औषधि पीने से पित्त और वायु प्रकुपित होकर परिकर्तिका उत्पन्न कर देते हैं। इसमें गुदा, नाभि, मेढ्र, वस्ति और शिर में दाह के साथ कैंची से काटने के समान वेदना, अपान वायु का अवरोध, वायु की विगुणता और भोजन में अरुचि हो जाती है। इसमें मधु, घृत युक्त मुलेठी और काले तिल के कल्क के साथ पिच्छावस्ति का प्रयोग करना चाहिए और रोगी को शीतल जल से स्नान तथा दूध के साथ भोजन दे कर, घृतमण्ड अथवा मुलेठी के द्वारा सिद्ध तेल से अनुवासन वस्ति का प्रयोग करना चाहिए ॥ १६ ॥

क्रूरकोष्ठस्यातिप्रभूतदोषस्य मृद्वौषधमवचारितं समुत्क्लिश्य दोषान्न निःशेषानपहरति, ततस्ते दोषाः परिस्रावमापादयन्ति, तत्र दौर्बल्योदरविष्टम्भारुचिगात्रसदनानि भवन्ति, सवेदनौ चास्य पित्तश्लेष्माणौ परिस्रवतः, तं परिस्रावमित्याचक्षते; तमजकर्णधवतिनिशपलाशबलाकषायैर्मधुसंयुक्तैरास्थापयेत्, उपशान्तदोषं स्निग्धं च भूयः संशोधयेत् ॥ १७ ॥

परिस्राव व्यापद् का वर्णन—बहु दोषयुक्त क्रूर कोष्ठ वाले मनुष्य के मृदु औषधि सेवन करने पर, वह दोषों को उत्क्लेशित कर सम्पूर्ण रूप से बाहर नहीं निकाल पाती, जिससे वे दोष परिस्राव उत्पन्न कर देते है। इसमें दुर्बलता, उदर में वायु वैगुण्य, भोजन में अरुचि और अंगों में पीड़ा होती है, वेदना के साथ पित्त और श्लेष्मा निकलता है, इस अवस्था को परिस्राव कहते हैं। इस दशा में अजकर्ण, धव, तिनिश (स्यन्दन), पलाश और वला (खरेंटी) के मधु युक्त क्वाथ के द्वारा आस्थापन वस्ति का प्रयोग करना चाहिए तथा परिस्राव के शान्त होने पर रोगी का स्नेहन करके पुनः सशोधन देना चाहिये ॥ १७ ॥

अतिरूक्षेऽतिस्निग्धे वा भेषजमवचारितमप्राप्तं वातवर्चं उदीरयति वेगाघातेन वा, तदा प्रवाहिका भवति; तत्र सवातं सदाहं सशूलं गुरु पिच्छिलं श्वेतं कृष्णं सरक्तं वा भृशं प्रवाहमाणः कफमुपविशति; तां परिस्रावविधानेनोपचरेत् ॥ १८ ॥

प्रवाहिका व्यापद् का वर्णन—अतिरूक्ष या अति स्निग्ध पुरुष में प्रयुक्त औषधि; वात और मल के अप्राप्त वेगों को प्रवर्तित कर अथवा वेगों का अवरोध करके; प्रवाहिका उत्पन्न करती है। अर्थात् अत्यन्त रूक्ष पुरुष को औषधि देने पर जब वायु और मल के अप्राप्त वेग ही प्रवर्तित होते हैं तब प्रवाहिका होती है तथा अत्यन्त स्निग्ध पुरुष को जब औषधि दी जाती है तब वेगों के अवरुद्ध होने के कारण प्रवाहिका होती है। इसमें वातसहित, दाह और शूल से युक्त, गुरु, पिच्छल, श्वेत, कृष्ण या रक्तमिश्रित बहुत अधिक कफ प्रवाहण करने पर (मल त्याग के समय किनछने पर) निकलता है। इसका उपचार, परिस्राव चिकित्सा विधि की भांति करना चाहिये ॥ १८ ॥

यस्तूर्ध्वमधो वा भेषजवेगं प्रवृत्तमज्ञत्वाद्विनिहन्ति तस्योपसरणं हृदि कुर्वन्ति दोषाः, तत्र प्रधानमर्मसन्तापाद्वेदनाभिरत्यर्थं पीड्यमानो दन्तान् किटकिटायते, उद्वृताक्षो जिह्वां खादति, प्रताम्यत्यचेताश्च भवति, तं परिवर्जयन्ति मूर्खाः; तमभ्यज्य धान्यस्वेदेन स्वेदयेत्, यष्टिमधुकसिद्धेन च तैलेनानुवासयेत्, शिरोविरेचनं चास्मै तीक्ष्णं विदध्यात्, ततो यष्टिमधुकमिश्रेण तण्डुलाम्बुना छर्दयेत्, यथादोषोच्छ्रायेण चैनं बस्तिभिरुपाचरेत् ॥ १९ ॥

औषध के प्रवृत्त वेग को रोकने से उत्पन्न अवस्था का वर्णन—जो व्यक्ति अज्ञानवश ऊपर या नीचे की ओर प्रवृत्त औषध-वेग को रोकता है, उसके (प्रकुपित हुए) दोष हृदय में प्रवेश करते हैं। इस अवस्था में प्रधान मर्म (हृदय) के सन्तप्त होने से अत्यधिक वेदना से पीडित पुरुष दाँत कटकटाता है, आँखे ऊपर उठ जाती हैं, जीभ काटता है, मूर्च्छित होता है और अन्त में सज्ञारहित हो जाता है। मूर्ख लोग इसकी चिकित्सा (मृतक समझ कर) नहीं करते। इसमें रोगी का अभ्यङ्ग करके धान्यस्वेद से स्वेदन करना चाहिये, मुलेठी से सिद्ध तेल के द्वारा अनुवासन देना चाहिए और तीक्ष्ण शिरोविरेचन का प्रयोग करना चाहिए। फिर मुलेठी मिले हुए तण्डुलोदक के द्वारा वमन कराना चाहिए तथा दोषों के प्रकोप के अनुसार वस्तियों से इसकी चिकित्सा करनी चाहिये ॥ १९ ॥

यस्तूर्ध्वमधो वा प्रवृत्तदोषः शीतागारमुदकमनिलमन्यद्वा सेवेत, तस्य दोषाः स्रोतःस्वलीयमाना घनीभावमापन्ना वातमूत्रशकृद्ग्रहमापाद्य विबध्यन्ते, तस्याटोपो दाहो ज्वरो वेदनाश्च तीव्रा भवन्ति; तमाशु वामयित्वा प्राप्तकालां क्रियां कुर्वीत; अधोभागे त्वधोभागदोषहरद्रव्यं सैन्धवामूत्रसंसृष्टं विरेचनाय पाययेत्, आस्थापनमनुवासनं च यथादोषं विदध्यात्, यथादोषमाहारक्रमं च; उभयतोभागे तूपद्रवविशेषान् यथास्वं प्रतिकुर्वीत ॥ २० ॥

विबन्धव्यापद् का वर्णन—ऊर्ध्व या अधोमार्ग से प्रवृत्त दोषों की स्थिति में जो पुरुष शीतलगृह, जल, वायु या अन्य शीतल वस्तुओं का सेवन करता है, उसके दोष स्रोतों में रुककर, घनत्व (ठोस) दशा को प्राप्त होते हुए वायु, मूत्र और मल को रोककर विबन्ध उत्पन्न कर देते है। इसमें रोगी को दाह, ज्वर और तीव्र वेदना होती है, उसे शीघ्र वमन देकर अवस्था के अनुसार उपचार करना चाहिए। विरेचन की अवस्था में अधोभाग के दोषों को दूर करने वाले द्रव्यों को सेन्धानमक, काञ्जी तथा गोमूत्र में मिलाकर विरेचन के लिए पिलाना चाहिए, आस्थापन तथा अनुवासन वस्ति का प्रयोग दोषों के अनुसार करना चाहिये, दोषों के अनुकूल आहार सेवन कराना चाहिए तथा दोनों मार्गों की प्रवृत्ति अवस्था में उपद्रव विशेष का प्रतिकार, दोषों के अनुसार करना चाहिए ॥ २० ॥

या तु विरेचने गुदपरिकर्तिका तद्वमने कण्ठक्षणनं, यदधः परिस्रवणं स ऊर्ध्वभागे श्लेष्मप्रसेकः, या त्वधः प्रवाहिका सा तूर्ध्वं शुष्कोद्गारा इति ॥ २१ ॥

कतिपय वमन-विरेचन व्यापदों के अन्तर का निर्देश—विरेचन में जिस प्रकार गुदपरिकर्तिका होती है उसी प्रकार वमन में कण्ठक्षणन (कण्ठ में जलन) होता है, विरेचन में जो परिस्राव है वमन में वही कफप्रसेक है तथा विरेचन में जिसे प्रवाहिका कहते है वही वमन में शुष्क उद्गार कहलाता है ॥

भवति चात्र—

यास्त्वेता व्यापदः प्रोक्ता दश पञ्च च तत्त्वतः ।
एता विरेकातियोगदुर्योगायोगजाः स्मृताः ॥२२॥

इति सुश्रुतसंहितायां चिकित्सास्थाने वमनविरेचनव्यापच्चिकित्सितं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥

पूर्वोक्त व्यापदों का हेतु—जैसे कि:—तत्त्वतः (परमार्थ रूप से) जिन पन्द्रह प्रकार की व्यापदों का वर्णन किया गया है, वे विरेचन तथा वमन के अतियोग, मिथ्यायोग, एव हीन योग के कारण उत्पन्न होती हैं ॥ २२ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायां चतुस्त्रिंशत्तमोऽध्यायः ॥

पञ्चत्रिंशत्तमोऽध्यायः

अथातो नेत्रबस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः ॥ १ ॥

यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

नेत्रबस्ति के प्रमाण, विभाग तथा चिकित्सा का उपक्रम—इसके अनन्तर यन्त्रबस्ति इनका प्रमाण तथा विभाग एवं इनके द्वारा की जानेवाली व्याधि-प्रतिकार पद्धति का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

विमर्शः—नेत्र यन्त्रम् (स्नेहदानसाधननलिका)। बस्तिरेणादीनां मूत्राधारः (बस्तिर्नामिचर्मविशेषो मूत्राधारथानम्) तदाधेय द्रव्यमपि, तयो. प्रमाण प्रविभागश्च, स एव चिकित्सित व्याधे प्रतीकारो यस्मिन् तत्।

तत्र स्नेहादीनां कर्मणां बस्तिकर्म प्रधानतममाहुराचार्याः। कस्मात् ? अनेककर्मकरत्वाद्बस्तेः; इह खलु बस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति, क्षीणशुक्रं वाजीकरोति, कृशं बृंहयति, स्थूलं कर्शयति, चक्षुः प्रीणयति, वलीपलितमपहन्ति, वयः स्थापयति ॥ ३ ॥

बस्ति की प्रशंसा—आचार्य लोग स्नेहन आदि कर्मों में बस्तिकर्म को मुख्यतम मानते है। क्योंकि बस्ति अनेक कार्यों को सिद्ध करती है। नाना प्रकार के द्रव्यों के संयोग से बस्ति दोषों का सशोधन, संशमन और संग्रहण करती है, क्षीण शुक्र पुरुष को वाजी अर्थात् शुक्रवान् बनाती है, कृश को पुष्ट करती है, स्थूल को दुर्बल करती है, नेत्रों को शक्ति देती है, वली-पलित रोगों का नाश करती है और आयु को बढ़ाती है ॥ ३ ॥

शरीरोपचय वर्णं बलमारोग्यमायुषः।
कुरुते परिवृद्धि च बस्तिः सम्यगुपासितः ॥ ४ ॥

भली भांति सेवन की गई बस्ति शरीर की पुष्टि, वर्ण, बल, आरोग्य और आयुष्य की वृद्धि करती है ॥ ४ ॥

विमर्शः—चिकित्सा में चरक ने बस्ति के महत्त्व को निम्नलिखित शब्दों में व्यक्त किया है—शारीरागता कोष्ठगताश्च रोगा मर्मास्थिसर्वावयव गताश्च। ये सन्ति तेषा न तु कश्चिदन्यो वायोः पर जन्मनि हेतुरस्ति। विण्मूत्रपित्तादिमलाशयानां विक्षेपसधानकर. स यस्मात्। तस्यातिवृद्धस्य शमाय नान्यद् वस्तेर्विना भेषजमस्ति किञ्चित्। तस्माच्चिकित्सार्द्धमिति ब्रुवन्ति सर्वा चिकित्सा मपि बस्तिमेके ॥ (च० कल्प० अ० १)

तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्थार्दिताक्षेपकपक्षाघातैकाङ्गसर्वाङ्गरोगाध्मानोदरयोनिशूलशर्कराशूलवृद्ध्युपदंशानाहमूत्रकृच्छ्रगुल्मवातशोणितवातमूत्रपुरीषोदावर्तशुक्रार्तवस्तन्यनाशहृद्ग्रहनुमन्याग्रहशर्कराश्मरीमूढगर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥ ५ ॥

बस्ति साध्य रोग—बस्ति का विशेष प्रयोग ज्वर अतिसार, तिमिर, प्रतिश्याय, शिरोरोग, अधिमन्थ, अर्दित, आक्षेपक, पक्षाघात, एकाङ्गवात, सर्वाङ्गवात, आध्मान, उदर, योनिशूल, शर्करा-शूल, वृद्धि, उपदंश, आनाह, मूत्रकृच्छ्र, गुल्म, वातशोणित, वात-मूत्र-मल का अवरोध, उदावर्त, शुक्र आर्तव-स्तन्यनाश, हृदय, हनु-मन्याग्रह, शर्करा, अश्मरी तथा मूढगर्भ प्रभृति रोगों में किया जाता है ॥

भवति चात्र—

बस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते।
संसर्गे सन्निपाते च बस्तिरेव हितः सदा ॥ ६ ॥

जैसे कि—वात, पित्त- कफ, रक्त, दोषों के संसर्ग (प्रकोप) तथा सन्निपात (त्रिदोषज संसर्ग) में बस्ति प्रयोग ही सर्वदा हितकर होता है ॥ ६ ॥

तत्र सांवत्सरिकाष्टद्विरष्टवर्षाणां षडष्टदशाङ्गुलप्रमाणानि कनिष्ठिकानामिकामध्यमाङ्गुलिपरिणाहान्यग्रेऽध्यर्धाङ्गुलव्यङ्गुलार्धतृतीयाङ्गुलसन्निविष्टकर्णिकानि कङ्कश्येनबर्हिणपक्षनाडीतुल्यप्रवेशानि मुद्गमाषकलायमात्रस्रोतांसि विदध्यान्नेत्राणि। तेषु चास्थापनद्रव्यप्रमाणमातुरहस्तसंमितेन प्रसृतेन संमितौ प्रसृतौ द्वौ चत्वारोऽष्टौ च विधेयाः ॥ ७ ॥

बस्ति नेत्र का प्रमाण—एक, आठ तथा सोलह वर्ष की आयु के लिए क्रमशः छै, आठ और दश अंगुल लम्बी, कनिष्ठिका, अनामिका और मध्यमा अंगुलि के समान मोटी अग्रभाग में डेढ अंगुल, दो अंगुल और साढे तीन अंगुल दूरी पर कर्णिकासहित तथा मूल में कंक, श्येन (बाज) और मोर के पख की नाडी की भांति प्रवेश द्वार वाली एव मूग, उडद और मटर प्रमाण अग्र छिद्र युक्त नेत्रों का निर्माण करना चाहिये। उनमें क्रमशः आतुर की हस्त प्रमाण अञ्जलि से दो, चार और आठ अञ्जलि आस्थापन द्रव्य की मात्रा रखनी चाहिए ॥ ७ ॥

विमर्शः—तत्र सावत्सरिकाष्टद्विरष्टवर्षाणामित्यत्र यथासख्यव्याख्यानेन सावत्सरिकबालस्य निरूहयन्त्र षडङ्गुलप्रमाणम्, तत्कनिष्ठिकापरिणाहम्, अग्रेऽध्यर्द्धाङ्गुलसन्निविष्टकर्णिक, कङ्कपक्ष नाडीतुल्यप्रवेश मूले, मुद्गवाहिस्रोतश्चाग्रे विदध्यात्। छत्राकारा गुदेऽधिकान्त प्रदेशरोधिनी कर्णिका कथ्यते। कङ्क वकचञ्चुः कृष्णवर्ण प्रसिद्ध एव। अष्टवर्षस्य पुनरष्टाङ्गुलप्रमाण, तदनामिकापरिणाहम्, अग्रे द्व्यङ्गुलसन्निविष्टकर्णिक, श्येनपक्षनाडीतुल्यप्रवेश मूले, माषवाहिस्रोतश्चाग्रे विदध्यात्। द्विरष्टवर्षस्य षोटशवर्षस्येत्यर्थः। किम्भूत यन्त्रम्, दशाङ्गुलप्रमाण, तन्मध्याङ्गुलिपरिणाह, अर्द्धतृतीयाङ्गुलसन्निविष्टकर्णिकम्। बर्हिणो मयूर., तत्पक्षनाडीप्रवेश मूले, कलायवाहिस्रोतश्चाग्रे विदध्यात्। तेष्विति सावत्सरिकाष्टद्विरष्टवर्षेषु बालेषु यथासख्यमातुरहस्तेन द्वौ चत्वारोऽष्टौ च प्रसृता विधेयाः। प्रसृतोऽत्र कुञ्चिताङ्गुलि पाणि., ननु पलद्वयमिति गयदासाचार्यः। जेज्जटाचार्यस्तु आतुरहस्तग्रहण मध्यमपुरुषहस्तोपलक्षणम्, तेन तत् प्रसृतेन पलद्वयप्रमितेनेति व्याख्यानयति। (डल्हण)

वर्षान्तरेषु नेत्राणां बस्तिमानस्य चैव हि।
वयोबलशरीराणि समीक्ष्योत्कर्षयेद्विधिम् ॥ ८ ॥

बीच के वर्षों में (उपर्युक्त आयु के अतिरिक्त) नेत्रों का

प्रमाण तथा वस्ति द्रव्य की मात्रा वय, बल और शरीर की भली भाँति परीक्षा करके बढ़ा लेनी चाहिए ॥ ८ ॥

पञ्चविंशतेरूर्ध्वं द्वादशाङ्गुलं, मूलेऽङ्गुष्ठोदरपरीणाहम्, अग्रे कनिष्ठिकोदरपरीणाहम्, अग्रे त्र्यङ्गुलसन्निविष्टकर्णिकं, गृध्रपक्षनाडीतुल्यप्रवेशं, कोलास्थिमात्रच्छिद्रं, छिन्नकलायमात्रच्छिद्रमित्येके; सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि। आस्थापनद्रव्यप्रमाणं तु विहितं द्वादशप्रसृताः। सप्ततेस्तूर्ध्वं नेत्रप्रमाणमेतदेव, द्रव्यप्रमाणं तु द्विरष्टवर्षवत् ॥ ९ ॥

पचीस वर्ष से ऊपर की आयु के लिए बारह अङ्गुल लम्बी, मूल में अंगुष्ठोदर प्रमाण मोटी, अग्रभाग में कनिष्ठिकोदर प्रमाण मोटी तथा अग्रभाग में तीन अंगुल दूरी पर कर्णिका सहित, गृद्धपक्षी की नाडी के समान मूल में प्रवेश द्वार वाली, बेर की गुठली के तुल्य अग्रभाग में छिद्र से युक्त, किन्हीं आचार्यों के मत से फूले हुए मटर के तुल्य अग्रभाग में छिद्रयुक्त एवं सभी नेत्रों के वस्ति को बाँधने के लिए दो कर्णिका होनी चाहिए। इनमें आस्थापन द्रव्य बारह प्रसृत (अञ्जलि) होना चाहिए। सत्तर वर्ष से ऊपर की आयु में नेत्र का प्रमाण इतना ही होना चाहिए पर द्रव्य प्रमाण सोलह वर्ष की आयु के तुल्य होना चाहिए ॥ ९ ॥

मृदुर्वस्तिः प्रयोक्तव्यो विशेषाद्बालवृद्धयोः।
तयोस्तीक्ष्णः प्रयुक्तस्तु वस्तिर्हि स्याद् बलायुषी ॥१०॥

बालक और वृद्धों की वस्ति में विशेषता—बालक और वृद्ध के लिए विशेषरूप से मृदु वस्ति का प्रयोग करना चाहिए क्योंकि इस अवस्था में तीक्ष्ण वस्ति का प्रयोग बल और आयुष्य को नष्ट करता है ॥ १० ॥

(व्रणनेत्रमष्टाङ्गुलं मुद्गवाहिस्रोतः; व्रणमवेक्ष्य यथास्वं स्नेहकषाये विदधीत ॥ ११ ॥)

व्रण नेत्र के लक्षण—व्रण नेत्र की लंबाई आठ अङ्गुल और स्रोत मूंग की आकृति का होना चाहिए तथा व्रण की परीक्षा करके दोषों के अनुसार स्नेह एवं कषायों का प्रयोग करना चाहिए ॥ ११ ॥

तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि श्लक्ष्णानि दृढानि गोपुच्छाकृतीन्यृजूनि गुटिकामुखानि च ॥ १२ ॥

वस्तिनेत्र के निर्माण द्रव्यों और आकृतियों का निर्देश—नेत्र सुवर्ण, रजत, ताम्र, लौह, पित्तल, दन्त, शृंग, स्फटिक और वृक्ष के सार भाग से निर्मित तथा चिकने, दृढ़, गौ की पूँछ की आकृतिवाले, सीधे और गोलमुख से युक्त होने चाहिए ॥ १२ ॥

वस्तयश्च बन्ध्या मृदवो नातिबहला दृढाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणाम् ॥ १३ ॥

वस्ति के निर्माण द्रव्य—वस्तियों का निर्माण बन्ध्या गौ, भैंस, सूअर, बकरी और भेंड़ की वस्तियों के द्वारा करना चाहिए, जो कोमल हों, बहुत मोटी न हों तथा दृढ और प्रमाण युक्त हों ॥ १३ ॥

नेत्राभावे हिता नाडी नलवंशास्थिसंभवा।
वस्त्यभावे हितं चर्म सूक्ष्मं वा तान्तवं घनम् ॥१४॥

नेत्र के अभाव में नरसल, बाँस या अस्थि की बनी हुई नली हितकर होती है और वस्ति के अभाव में पतला चमड़ा अथवा गाढ़ा वस्त्र उपयोगी होता है ॥ १४ ॥

वस्तिं निरुपदिग्धं तु शुद्धं सुपरिमार्जितम्।
मृदुनोद्वर्तहीनं च मुहुः स्नेहविमर्दितम् ॥१५॥
नेत्रमूले प्रतिष्ठाप्य न्युब्जं तु विवृताननम्।
बद्ध्वा लोहेन तप्तेन चर्म स्रोतसि निर्दहेत् ॥१६॥

वस्ति निर्माण की प्रक्रिया—मांस रक्त आदि से रहित, शुद्ध (कषायरञ्जित), भली-भाँति स्वच्छ की हुई, कोमल, न तो बड़ी और न छोटी, अनेक बार स्नेह से मर्दित, फैले हुए मुखवाली अधोमुखी वस्ति को नेत्र के मूल में जोड़कर बाँधना चाहिए और तप्त लोह-शलाका से उस वस्ति चर्म के छिद्र को जला देना चाहिए ॥ १५-१६ ॥

परिवर्त्य ततो वस्तिं बद्ध्वा गुप्तं निधापयेत्।
आस्थापनं च तैलं च यथावत्तेन दापयेत् ॥१७॥

वस्ति को फिर उलट कर तथा बाँधकर सुरक्षित स्थान में रखना चाहिए और इसके द्वारा विधिपूर्वक आस्थापन (निरूह) एवं तैल वस्तियों का प्रयोग करना चाहिए ॥१७॥

तत्र द्विविधो वस्तिः—नैरूहिकः, स्नैहिकश्च। आस्थापनं, निरूह इत्यनर्थान्तरं; तस्य विकल्पो माधुतैलिकः; तस्य पर्यायशब्दो यापनो युक्तरथः, सिद्धवस्तिरिति। स दोषनिर्हरणाच्छरीरनीरोहणाद्वा निरूहः, वयःस्थापनादायुःस्थापनाद्वा आस्थापनम्। माधुतैलिकविधानं च निरूहोपक्रमचिकित्सिते वक्ष्यामः। यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावप) कृष्टः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः। तस्यापि विकल्पोऽर्धार्धमात्रावकृष्टोऽपरिहार्यो मात्रावस्तिरिति ॥ १८ ॥

वस्ति के भेद—वस्ति दो प्रकार की होती है—(१) नैरूहिक और (२) स्नैहिक। आस्थापन और निरूह एकार्थवाचक शब्द हैं। माधुतैलिक वस्ति इसी का भेद है और यापन, युक्तरथ तथा सिद्धवस्ति इसके पर्यायवाचक शब्द है। दोषों को निकालने अथवा शरीर का रोहण (वृद्धि) करने के कारण इसे निरूह कहते हैं तथा वय (बल?) या आयु को स्थिर रखने से यह आस्थापन कहलाती है। माधुतैलिक वस्ति का विधान निरूहक्रम चिकित्सित अध्याय में किया जा रहा है। अपने प्रमाण और गुण के अनुसार कथित, आस्थापन से चतुर्थांश मात्रा वाली अनुवासन वस्ति, स्नेह वस्ति का भेद है। शरीर में रुकी रहने पर भी जो दूषित नहीं होती अथवा प्रतिदिन जिसका प्रयोग किया जाय उसे अनुवासन कहते हैं। इस अनुवासन वस्ति का भेद मात्रा वस्ति है, जो डेढपल प्रमाण मात्रा वाली तथा निरुपद्रव होती है ॥ १८ ॥

विमर्श—यस्य यत् प्रमाणं यो यो गुणस्तास्यां विहितः स्नेहवस्त्याख्योऽनुवासनस्य इत्यर्थः। यथावय इत्यादि वक्ष्यमाण-

वाक्यदर्शनात् आस्थापनस्य पादैस्त्रिभिरवकृष्टो हीन: पादावकृष्टः। अवमर्थ:—सांवत्सरिकादि कालापेक्ष यत् प्रकुञ्चादि चतुर्विंशतिपलावसान निरूहप्रमाण तच्चतुर्थांशेन कर्षमारभ्य षट्पलानि यावदनुवासनस्य प्रमाणमिति। तस्याप्यनुवासनस्य षट्पलप्रमाणस्यार्द्धार्द्धमात्रा वकृष्ट: पादावशिष्टोऽध्यर्द्धपलमात्र इत्यर्थ:। (डल्हण)

निरूहः शोधनो लेखी स्नैहिको बृंहणो मतः।
निरूहशोधितान्मार्गान् सम्यक् स्नेहोऽनुगच्छति।
अपेतसर्वदोषासु नाडीष्विव वहज्जलम् ॥१९॥
सर्वदोषहरश्चासौ शरीरस्य च जीवनः।
तस्माद्विशुद्धदेहस्य स्नेहवस्तिर्विधीयते ॥२०॥

विशुद्ध देह में ही स्नेहवस्ति विधान का निर्देश—निरूहवस्ति शोधन और लेखन करती है तथा स्नैहिक वस्ति बृंहण होती है। निरूहवस्ति से शुद्ध हुए मार्गों में स्नेह भली-भाँति उसी प्रकार पहुँचता है जिस प्रकार सर्वविध दोषरहित (कूड़े, करकट या अन्य बाधा से रहित) नाली में जल पहुँचता है। वस्तियाँ (निरूह और अनुवासन) सम्पूर्ण दोषों को दूर करने वाली तथा शरीर के लिए प्राण होती हैं, अतः शुद्ध शरीर वाले व्यक्ति के लिए ही स्नेहवस्ति का विधान करना चाहिए ॥१९-२०॥

तत्रोन्मादभयशोकपिपासारोचकाजीर्णार्शःपाण्डुरोगश्रमममदमूर्च्छाच्छर्दिकुष्ठमेहोदरस्थौल्यश्वासकासकण्ठशोपशोफोपसृष्टक्षतक्षीणचतुस्त्रिमासगर्भिणीदुर्बलाग्न्यसहा बालवृद्धौ च वातरोगादृते क्षीणा नानुवास्या नास्थापयितव्याः ॥ २१ ॥

वस्ति कर्म के अयोग्य मनुष्य—उन्माद, भय, शोक, पिपासा, अरोचक, अजीर्ण, अर्श, पाण्डुरोग, श्रम, मद, मूर्च्छा, छर्दि, कुष्ठ, मेह, उदर, स्थौल्य, श्वास, कास, कण्ठशोप, शोथ तथा उरःक्षत से युक्त कृश, सात मास की गर्भिणी, दुर्बल अग्नि वाले, असहिष्णु बालक, वृद्ध एवं वातरोग के अतिरिक्त अन्य कारणों से क्षीण पुरुषों को, अनुवासन और निरूहण वस्तियाँ नहीं देनी चाहिए ॥

उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः।
अवश्यं स्थापनीयास्ते नानुवास्याः कथञ्चन ॥२२॥

रोग विशेष में केवल स्थापन का निर्देश—उदर, प्रमेह और कुष्ठ से पीडित तथा स्थूल मनुष्य को अनुवासन वस्ति अवश्य देनी चाहिए किन्तु इनके लिए निरूह वस्ति का प्रयोग कभी नहीं करना चाहिए ॥ २२ ॥

असाध्यता विकाराणां स्यादेषामनुवासनात्।
असाध्यत्वेऽपि भूयिष्ठं गात्राणां सदनं भवेत् ॥२३॥

अनुवासन प्रयोग से इनमें हानि—इन रोगों से पीडित मनुष्यों को अनुवासन देने से व्याधियाँ असाध्य हो जाती हैं, असाध्य अवस्था में भी अंगों में पीडा अधिक होती है ॥२३॥

पक्वाशये तथा श्रोण्यां नाभ्यवस्ताच्च सर्वतः।
सम्यक्प्रणिहितो वस्तिः स्थानेष्वेतेषु तिष्ठति ॥२४॥

वस्ति द्वारा सर्वांगगत दोषों के हरण का निर्देश—भली-भाँति प्रयुक्त वस्ति पक्वाशय, कटिप्रदेश और नाभि के अधोभाग में चारों ओर ठहरती है ॥ २४ ॥

पक्वाशयाद्वस्तिवीर्यं खैर्देहमनुसर्पति।
वृक्षमूले निषिक्तानामपां वीर्यमिव द्रुमम् ॥२५॥

पक्वाशय से वस्ति का वीर्य (प्रभाव) स्रोतों के द्वारा सम्पूर्ण शरीर में उसी प्रकार फैल जाता है, जिस प्रकार वृक्ष की जड़ में सींचे गए जल की शक्ति सम्पूर्ण वृक्ष में फैल जाती है ॥ २५ ॥

स चापि सहसा वस्तिः केवलः समलोऽपि वा।
प्रत्येति वीर्यं त्वनिलैरपानाद्यैर्विनीयते ॥२६॥

वह वस्ति भी केवल या मल के साथ सहसा बाहर निकल आती है किन्तु उसकी शक्ति अपान, उदान और व्यान आदि के द्वारा सम्पूर्ण शरीर में पहुँच जाती है ॥ २६ ॥

वीर्येण बस्तिरादत्ते दोषानापादमस्तकात् (न्)।
पक्वाशयस्थोऽम्बरगो भूमेरर्को रसानिव ॥२७॥

पक्वाशयस्थ वस्ति अपनी शक्ति से शिर से पैर तक के सम्पूर्ण दोषों को उसी प्रकार ग्रहण करती है जिस प्रकार आकाश में रहने वाला सूर्य भूमि,से,रसों को खींचता है ॥२७॥

स कटीपृष्ठकोष्ठस्थान् वीर्येणालोड्य संचयान्।
उत्खातमूलान् हरति दोषाणां साधुयोजितः ॥२८॥

भली भाँति प्रयुक्त वस्ति अपनी शक्ति से कटि, पृष्ठ और कोष्ठ में संचित दोषों को हिलाकर जड सहित उखाड कर दूर करती है ॥ २८ ॥

दोषत्रयस्य यस्माच्च प्रकोपे वायुरीश्वरः।
तस्मात्तस्यातिवृद्धस्य शरीरमभिनिघ्नतः ॥२९॥
वायोर्विषहते वेगे नान्या वस्तेर्ऋते क्रिया।
पवनाविद्धतोयस्य वेला वेगमिवोदधेः ॥३०॥

वात-प्रकोप के प्रशमन में वस्ति की प्रधानता—चूँकि तीनों दोषों को प्रकुपित करने में स्वामी वायु होता है, इसलिए शरीर को हानि पहुँचाने वाले, अत्यधिक बढ़े हुए उस वायु के वेग को विशेषरूप से सहन करने में वस्ति, अन्य क्रियाओं की अपेक्षा, उसी प्रकार समर्थ होती है जिस प्रकार पवन के द्वारा प्रताडित जल के वेग को समुद्र का कूल (किनारा) सहन करता है ॥ २९-३० ॥

शरीरोपचयं वर्णं बलमारोग्यमायुषः।
कुरुते परिवृद्धिं च बस्तिः सम्यगुपासितः ॥३१॥

भली भाँति सेवन की गई वस्ति शरीर की पुष्टि, वर्ण, बल, आरोग्य और आयुष्य की वृद्धि करती है ॥ ३१ ॥

अत ऊर्ध्वं व्यापदो वक्ष्यामः। तत्र नेत्र विचलितं, विवर्तितं, पार्श्वावपीडितम्, अत्युत्क्षिप्तम्, अवसन्नं, तिर्यक्प्रक्षिप्तमिति षट् प्रणिधानदोषाः; अतिस्थूलं, कर्कशम्, अवनतं, अणुभिन्नं, सन्निकृष्टविप्रकृष्टकर्णिकं, सूक्ष्मातिच्छिद्रम्, अतिदीर्घम्, अतिह्रस्वम्, अस्थिमदित्येकादश नेत्रदोषाः; वहलता, अल्पता, सच्छिद्रता, प्रस्तीर्णता, दुर्बद्धतेति पञ्च वस्तिदोषाः, अतिपीडितता, शिथिलपीडितता, भूयो भूयोऽवपीडनं, कालातिक्रम इति चत्वारः पीडनदोषाः; आमता, हीनता, अतिमात्रता, अतिशीतता, अत्युष्णता, अतितीक्ष्णता, अतिमृदुता,

अतिस्निग्धता, अतिरूक्षता, अतिसान्द्रता, अतिद्रवता, इत्येकादश द्रव्यदोषाः; अवाक्शीर्षोच्छीर्षन्युब्जोत्तानसङ्कुचितदेहस्थितदक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषाः; एवमेताश्चतुश्चत्वारिंशद्व्यापदो वैद्यनिमित्ताः आतुरनिमित्ताः पञ्चदश आतुरोपद्रवचिकित्सिते वक्ष्यन्ते स्नेहस्त्वष्टभिः कारणैः प्रतिहतो न प्रत्यागच्छति त्रिभिर्दोषैः, अशनाभिभूतः, मलव्यामिश्रः, दूरानुप्रविष्टः, अस्विन्नरयः, अनुष्णः, अल्पम्भुक्तवतः, अल्पश्चेति वैद्यातुरनिमित्ता भवन्ति। अयोगस्तूभयोः, आध्मानं, परिकर्तिका, परिस्रावः, प्रवाहिका, हृदयोपसरणम्, अङ्गप्रग्रहः, अतियोगः, जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्ति ॥ ३२ ॥

बस्ति की व्यापत्तियों का निर्देश—इसके अनन्तर बस्ति के दोषों का वर्णन किया जा रहा है। (१) नेत्र का विशेष हिलना (२) प्रविष्ट होते ही मुड जाना (३) दक्षिण और वाम पार्श्वों का दबना (४) अत्यधिक ऊपर उठना (५) नीचे को दबना और (६) तिरछा प्रविष्ट करना ये छै दोष बस्ति-प्रयोग के हैं। (१) बहुत मोटा (२) खुरदरा (३) नीचे को झुका होना (४) परमाणुओं का भिन्न होना, (५) समीप कर्णिका युक्त (६) दूर कर्णिका युक्त (७) अत्यधिक छोटे छिद्र वाला (८) बहुत बडे छिद्र वाला (९) बहुत लम्बा (१०) बहुत छोटा और (११) किनारे से युक्त ये ग्यारह नेत्र के दोष हैं। (१) मांस सहित होना, (२) छोटी होना, (३) छिद्र युक्त होना, (४) स्नायु-जाल से युक्त होना और (५) भली-भाँति न बाँधने वाली होना ये पाँच बस्ति के दोष हैं। (१) अधिक दबना (२) कम दबना (३) बार बार दबना और (४) पीडन काल का अतिक्रमण करना ये चार बस्ति को दबाने के दोष हैं। (१) अपक्व स्नेह, (२) अल्प होना, (३) अधिक होना, (४) अत्यन्त शीतल होना, (५) अत्यधिक उष्ण होना, (६) अत्यन्त तीक्ष्ण होना, (७) अत्यन्त मृदु होना, (८) अत्यन्त स्निग्ध होना, (९) अत्यन्त रूक्ष होना, (१०) अत्यधिक गाढा होना, और (११) अत्यधिक द्रव होना ये ग्यारह द्रव्य के दोष हैं। (१) शिर नीचे रखना (२) शिर ऊँचा रखना, (३) पेट के बल लिटाना, (४) चित्त लिटाना, (५) शरीर सिकोड़ कर रखना, (६) बैठे रहना और (७) दाहिने पसवाडे से सोये हुए को बस्ति देना, ये सात शय्या-दोष हैं। उपर्युक्त ये चौवालीस दोष चिकित्सक के द्वारा उत्पन्न होते हैं। आतुर के द्वारा उत्पन्न होनेवाले पन्द्रह प्रकार के उपद्रवों का वर्णन आतुरोपद्रव-चिकित्सित अध्याय में किया जा रहा है। आठ कारणों के द्वारा रुका हुआ स्नेह पुनः वापस नहीं आता। (१) तीनों दोषों के कारण (२) भोजन के द्वारा दबाये जाने से (३) मल के मिश्रण से (४) दूर प्रविष्ट हो जाने से (५) स्वेदन के बिना प्रयुक्त होने से (६) शीतल होने से (७) आहार नहीं करने से तथा (८) अल्प आहार करने से। ये दोष वैद्य और आतुर दोनों के द्वारा उत्पन्न होते हैं। (१) दोनों बस्तियों का अयोग (२) आध्मान (३) परिकर्तिका (४) परिस्राव (५) प्रवाहिका (६) हृदयोपसरण (७) अङ्ग प्रग्रह (८) अतियोग और (९) जीवादान ये नौ व्यापद् वैद्य के द्वारा उत्पन्न होते हैं ॥ ३२ ॥

भवति चात्र—

षट्सप्ततिः समासेन व्यापदः परिकीर्तिताः।
तासां वक्ष्यामि विज्ञानं सिद्धिं च तदनन्तरम् ॥३३॥

इति श्रीसुश्रुतसंहितायां चिकित्सास्थाने नेत्रबस्तिप्रमाणप्रविभागचिकित्सितं नाम पञ्चत्रिंशोऽध्यायः ॥३५॥

जैसे कि—सक्षेप से छिहत्तर व्यापदों का वर्णन किया गया है, प्रथम इनका लक्षण तदनन्तर उनकी चिकित्सा का वर्णन किया जा रहा है ॥ ३३ ॥

इत्यायुर्वेदतत्त्वसंदीपिका भाषाव्याख्यायां
पञ्चत्रिंशत्तमोऽध्यायः ॥

षट्त्रिंशत्तमोऽध्यायः

अथातो नेत्रबस्तिव्यापच्चिकित्सितं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥२॥

नेत्रबस्ति व्यापच्चिकित्सा का उपक्रम—इसके अनन्तर नेत्र और बस्ति के दोष से उत्पन्न होने वाली व्यापदों की चिकित्सा का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

अथ नेत्रे विचलिते तथा चैव विवर्तिते।
गुदे क्षतं रुजा वा स्यात्तत्र सद्यःक्षतक्रियाः ॥३॥

नेत्र प्रणिधान व्यापद् का वर्णन एवं उसकी चिकित्सा—बस्ति प्रयोग के समय नेत्र के हिलने तथा अन्दर प्रविष्ट होकर मुड जाने से गुदा में क्षत या वेदना होती है, उसमें सद्यःक्षत क्रिया विधि का प्रयोग करना चाहिए ॥ ३ ॥

अत्युत्क्षिप्तेऽवसन्ने च नेत्रे पायौ भवेद्रुजा।
विधिरत्रापि पित्तघ्नः कार्यः स्नेहैश्च सेचनम् ॥४॥

नेत्र के अधिक ऊपर उठे होने तथा नीचे दबे होने के कारण गुदा में पीडा होती है, इसमें पित्तनाशक क्रियाविधि का प्रयोग तथा स्नेह से परिषेक करना चाहिए ॥ ४ ॥

तिर्यक्प्रणिहिते नेत्रे तथा पार्श्वावपीडिते।
मुखस्यावरणाद्बस्तिर्न सम्यक् प्रतिपद्यते।
ऋजु नेत्रं विधेयं स्यात्तत्र सम्यग्विजानता ॥५॥

नेत्र तिरछा प्रविष्ट होने तथा उभय पार्श्व के दबने से नेत्र-मुख के अवरुद्ध हो जाने के कारण, बस्ति का प्रयोग भली भांति नहीं होता। इसलिये कुशल चिकित्सक को नेत्र का प्रयोग सीधा करना चाहिये ॥ ५ ॥

अतिस्थूले कर्कशे च नेत्रेऽस्निमति घर्षणात्।
गुदे भवेत् क्षतं रुक् च साधनं तस्य पूर्ववत् ॥६॥

नेत्रदोष व्यापद् का वर्णन और उसकी चिकित्सा—बहुत

मोटे और खुरदरे तथा किनारेदार नेत्र के प्रयोग से गुदा में रगड लगने के कारण व्रण एवं वेदना हो जाती है, इसकी चिकित्सा पूर्ववत् सद्यःक्षत चिकित्साविधि के अनुसार करनी चाहिये ॥ ६ ॥

आसन्नकर्णिके नेत्रे भिन्नेऽणौ वाऽप्यपार्थकः ।
अवसेको भवेद्वस्तेस्तस्माद्दोषान् विवर्जयेत् ॥७॥

नेत्रमूल में कर्णिका के अत्यन्त समीप रहने तथा परमाणुओं के भिन्न रहने पर वस्तिदान व्यर्थ होता है क्योंकि वस्ति में से द्रव्य चूता है, इसलिए इन दोषों से युक्त वस्ति का परित्याग करना चाहिए ॥ ७ ॥

प्रकृष्टकर्णिके रक्तं गुदमर्मप्रपीडनात् ।
क्षरत्यत्रापि पित्तघ्नो विधिर्वस्तिश्च पिच्छिलः ॥८॥

कर्णिका के नेत्रमूल में दूर (तीन अङ्गुल से ऊपर चार अङ्गुल की दूरी पर) स्थित होने पर गुदामर्म के पीडित होने से रक्तस्राव होता है, इसमें भी पित्तनाशक क्रिया विधि तथा पिच्छावस्ति का प्रयोग करना चाहिए ॥ ८ ॥

ह्रस्वे त्वणुस्रोतसि च क्लेशो वस्तिश्च पूर्ववत् ।
प्रत्यागच्छंस्ततः कुर्याद्रोगान् बस्तिविघातजान् ॥९॥

प्रमाणहीन एवं सूक्ष्म छिद्र वाले नेत्र के प्रयोग से क्लेश होता है तथा पूर्ववत् वस्ति व्यर्थ होती है, एवं वस्ति के वापस लौटने के कारण वस्ति को पीडित करने वाले (मूत्राघात, मूत्रकृच्छ्र आदि) रोगों की उत्पत्ति होती है ॥ ९ ॥

दीर्घे महास्रोतसि च ज्ञेयमत्यवपीडवत् ।
प्रस्तीर्णे वहले चापि बस्तौ दुर्बद्धदोषवत् ॥१०॥

वस्तिदोष व्यापद् का वर्णन और उसकी चिकित्सा–बहुत लम्बे और बहुत बडे छिद्र वाले नेत्र का प्रयोग करने से वस्ति को अत्यधिक दबाने वाले दोषों की भांति लक्षण होते हैं। वस्ति के स्नायुजाल से युक्त तथा अधिक मोटी होने पर कठिनाई से बँधने वाले दोष होते है ॥ १० ॥

बस्तावल्पेऽल्पता वाऽपि द्रव्यस्याल्पा गुणा मताः ।
दुर्बद्धे चाणुभिन्ने च विज्ञेयं भिन्ननेत्रवत् ॥११॥

वस्ति के छोटी होने पर उसमें अल्प द्रव्य आता है, इससे गुण में भी कमी रहती है और दुर्बद्ध एवं अणुभिन्न (फटी रहने पर) होने से भिन्न नेत्र के समान लक्षण होते हैं ॥११॥

अतिप्रपीडितो वस्तिः प्रयात्यामाशयं ततः ।
वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते ॥१२॥
तत्र तूर्णं गलापीडं कुर्याच्चाप्यवधूननम् ।
शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान् ॥१३॥

वस्तिपीडन दोष व्यापद् का वर्णन और उसकी चिकित्सा—अधिक दबाव देकर प्रयोग की गई वस्ति आमाशय में पहुँचती है और वहाँ वायु से प्रेरित होकर नासिका या मुख से बाहर निकलती है। इस अवस्था में रोगी के गले को शीघ्र दबाना और केश आदि को पकडकर हिलाना चाहिए तथा तीक्ष्ण शिरोविरेचन और कायविरेचन एवं शीतल परिषेक करना चाहिये ॥ १२-१३ ॥

शनैः प्रपीडितो बस्तिः पक्वाधानं न गच्छति ।
न च सम्पादयत्यर्थं तस्माद्युक्तं प्रपीडयेत् ॥१४॥

धीरे से दबाई गई वस्ति पक्वाशय में नहीं पहुँचती जिससे कार्य का सम्पादन नहीं होता, इसलिए वस्ति को उचित रूप से दबाना चाहिए ॥ १४ ॥

भूयो भूयोऽवपीडेन वायुरन्तः प्रपीड्यते ।
तेनाध्मानं रुजश्चोग्रा यथास्वं तत्र बस्तयः ॥१५॥

बार बार वस्ति को दबाने से उदर का वायु दबता है उससे आध्मान और उग्र पीड़ा होती है, इस दशा में जिसके लिए जो वस्ति उपयोगी हो उसका प्रयोग करना चाहिये ॥

कालातिक्रमणात् क्लेशो व्याधिश्चाभिप्रवर्धते ।
तत्र व्याधिबलघ्नं तु भूयो बस्तिं निधापयेत् ॥१६॥

वस्तिकाल (द्रुत और विलम्बित रूप से वस्ति प्रदान की क्रिया) का अतिक्रमण होने पर क्लेश और व्याधि (अनुलोम व्याधि) की उत्पत्ति होती है, इस अवस्था में व्याधि के बल को नाश करने वाली वस्ति का पुनः प्रयोग करना चाहिए ॥ १६ ॥

गुदोपदेहशोकौ तु स्नेहोऽपक्वः करोति हि ।
तत्र संशोधनो बस्तिर्हितं चापि विरेचनम् ॥१७॥

वस्ति द्रव्यदोष व्यापद् का वर्णन और उसकी चिकित्सा–अपक्व स्नेह (आमतैल) द्रव्य का वस्ति में प्रयोग करने पर गुदा में लेप और शोथ हो जाता है, इसमें संशोधन वस्ति और विरेचन हितकर होता है ॥ १७ ॥

हीनमात्रावुभौ बस्ती नातिकार्यकरौ मतौ ।
अतिमात्रौ तथाऽऽनाहक्लमातीसारकारकौ ॥१८॥

हीन मात्रा में प्रयुक्त दोनों वस्तियाँ (स्नेह वस्ति, निरूह वस्ति) विशेष कार्य सम्पादन नहीं करतीं तथा अधिक मात्रा में प्रयुक्त होने पर आनाह, क्लम और अतिसार उत्पन्न कर देती हैं ॥ १८ ॥

मूर्च्छां दाहमतीसारं पित्तं चात्युष्णतीक्ष्णकौ ।
मृदुशीतावुभौ वातविबन्धाध्मानकारकौ ॥१९॥

अति उष्ण और तीक्ष्ण वस्तियाँ मूर्च्छा, दाह और अतिसार को उत्पन्न तथा पित्त को प्रकुपित करती हैं, एवं मृदु और शीतल वस्तियाँ वात-विबन्ध (वायु की रुकावट) और आध्मान-कारक होती हैं ॥ १९ ॥

तत्र हीनादिषु हितः प्रत्यनीकः क्रियाविधिः ।
गुदबस्त्युपदेहं तु कुर्यात् सान्द्रो निरूहणः ॥२०॥
प्रवाहिकां वा जनयेत्तनुरल्पगुणावहः ।
तत्र सान्द्रे तनुं बस्तिं तनौ सान्द्रं च दापयेत् ॥२१॥

वस्ति के हीन आदि दोषों में हेतु विपरीत क्रिया हितकर होती है। सान्द्र (गाढा) निरूहण द्रव्य गुदा और वस्ति में उपलेप कर देता है और पतला द्रव्य अल्प गुण वाला एवं प्रवाहिकोत्पादक होता है। इसमें सान्द्रवस्ति के दोष में तनुवस्ति और तनुवस्ति के दोष में सान्द्रवस्ति का प्रयोग करना चाहिये ॥ २०–२१ ॥

स्निग्धोऽतिजाड्यकृद्रूक्षः स्तम्भाध्मानकृदुच्यते ।
वस्तिं रूक्षमतिस्निग्धे स्निग्धं रूक्षे च दापयेत् ॥२२॥

स्निग्ध वस्ति अतिशय क्लेदकारी तथा रूक्ष, स्तम्भ और आध्मान कारक होती है, अति स्निग्ध वस्तिजन्य दोष में

रूक्ष वस्ति तथा रूक्ष में स्निग्ध वस्ति का प्रयोग करना चाहिये॥

अतिपीडितवद्दोषान् विद्धि चाप्यवशीर्षके।
उच्छीर्षके समुन्नाहं वस्तिः कुर्याच्च मेहनम् ॥२३॥
तत्रोत्तरो हितो वस्तिः सुस्विन्नस्य सुखावहः।
न्युब्जस्य बस्तिर्नाप्नोति पक्वाधानं विमार्गगः ॥२४॥
हृद्गुदं बाधते चात्र वायुः कोष्ठमथापि च।
उत्तानस्यावृते मार्गे बस्तिर्नान्तः प्रपद्यते ॥२५॥

शय्यादि दोष व्यापद का वर्णन और उसकी चिकित्सा—वस्ति दान के समय मस्तक नीचा रखने पर अतिपीडित वस्ति के समान दोषों की उत्पत्ति होती है तथा शिर को ऊँचा रख कर दी गई वस्ति मेढ़ को फुला देती है। इस दशा में रोगी का सम्यक् स्वेदन करके, सुख देनेवाली उत्तर-वस्ति का प्रयोग हितकर होता है। अधोमुख पुरुष की विमार्गगत वस्ति पक्वाशय में नहीं पहुँचती, प्रकुपित वायु हृदय, गुदा और पक्वाशय को पीड़ित करती है। उत्तान सोये हुए पुरुष के अवरुद्ध मार्ग में वस्ति देने से वह अन्दर प्रविष्ट नहीं होती ॥ २३–२५ ॥

नेत्रसंवेजनभ्रान्तो वायुश्चान्तः प्रकुप्यति।
देहे सङ्कुचिते दत्तः सवर्त्मोरप्युभयोस्तथा ॥२६॥
न सम्यगनिलाविष्टो वस्तिः प्रत्येति देहिनः।
स्थितस्य बस्तिर्दत्तस्तु क्षिप्रमायात्यवाङ्मुखः ॥२७॥

नेत्र (वस्तिनेत्र) के हिलने से भ्रान्त (चलायमान) हुआ वायु उदर में प्रकुपित होती है। रोगी के शरीर एवं दोनों जंघा को सकुचित कर वस्ति देने पर, वायु से भरी होने के कारण वस्ति, भली भाँति वाहर नहीं आती। बैठे हुए मनुष्य को वस्ति देने पर वह शीघ्र नीचे की ओर लौटती है ॥ २६–२७ ॥

न चाशयं तर्पयति तस्मान्नार्थकरो हि सः।
नाप्नोति बस्तिर्दत्तस्तु कृत्स्नं पक्वाशयं पुनः ॥२८॥
दक्षिणाश्रितपार्श्वस्य वामपार्श्वानुगो यतः।
न्युब्जादीनां प्रदानं च वस्तेर्नैव प्रशस्यते ॥२९॥
पश्चादनिलकोपोऽत्र यथास्वं तत्र कारयेत्।
व्यापदः स्नेहवस्तेस्तु वक्ष्यन्ते तच्चिकित्सिते ॥३०॥

दक्षिण पार्श्व मे लेटे हुए पुरुष को वस्ति देने से वह सम्पूर्ण पक्वाशय में नहीं पहुँच पाती क्योंकि पक्वाशय वाम पार्श्व में होता है, इसलिए आशय का तर्पण नहीं होता और वस्ति दान व्यर्थ होता है। अधोमुख दशा में वस्ति लगाना भी उचित नहीं होता। इस अवस्था में वायु का प्रकोप होने पर तदनुकूल चिकित्सा करनी चाहिए। स्नेह वस्ति से होनेवाली हानियों का वर्णन उनकी चिकित्सा के प्रसंग में किया जा रहा है ॥ २८–३० ॥

अयोगाद्यास्तु वक्ष्यामि व्यापदः सचिकित्सिताः।
अनुष्णोऽल्पौषधो हीनो बस्तिर्नैति प्रयोजितः ॥३१॥
विष्टम्भाध्मानशूलैश्च तमयोगं प्रचक्षते।
तत्र तीक्ष्णो हितो बस्तिस्तीक्ष्णं चापि विरेचनम् ॥३२॥

अयोग आदि व्यापदों का वर्णन और उनकी चिकित्सा—अयोग आदि व्यापदों का वर्णन चिकित्सा के साथ किया जा रहा है। शीतल, अल्पद्रव्य युक्त तथा हीन मात्रा वाली प्रयोग की गई वस्ति वापस नहीं आती तथा विष्टम्भ, आध्मान और शूल उत्पन्न करती है, इसे अयोग कहते है। इस अवस्था में तीक्ष्ण वस्ति तथा तीक्ष्ण विरेचन हितकर होता है ॥ ३१–३२ ॥

सशेषान्नेऽथवा भुक्ते बहुदोषे च योजितः।
अत्याशितस्यातिबहुर्बस्तिर्मन्दोष्ण एव च ॥३३॥
अनुष्णलवणस्नेहो ह्यतिमात्रोऽथवा पुनः।
तथा बहुपुरीषं च क्षिप्रमाध्मापयेन्नरम् ॥३४॥
हृत्कटीपार्श्वपृष्ठेषु शूलं तत्रातिदारुणम्।
तत्र तीक्ष्णतरो बस्तिर्हितं चाप्यनुवासनम् ॥३५॥

अन्नाजीर्णशेष में अथवा भोजन के बाद एवं दोषों की अधिकता में तथा अत्यधिक भोजन किए हुए व्यक्ति को अत्यन्त उष्ण और बहुत धीरे दी गई वस्ति अथवा अधिक मात्रा में एवं मल की अधिकता वाले पुरुष के लिए प्रयुक्त शीतल तथा लवण-स्नेहरहित वस्ति, शीघ्र आध्मान उत्पन्न करती है। इसमें हृदय, कटि, पार्श्व और पृष्ठ में भयङ्कर पीडा होती है, उस दशा में अत्यन्त तीक्ष्ण निरूह वस्ति तथा अनुवासन वस्ति का प्रयोग भी हितकर होता है ॥ ३३–३५ ॥

अतितीक्ष्णोऽतिलवणो रूक्षो वस्तिःप्रयोजितः।
सपित्तं कोपयेद्वायुं कुर्याच्च परिकर्तिकाम् ॥३६॥
नाभिबस्तिगुदं तत्र छिनत्तीवातिदेहिनः।
पिच्छाबस्तिर्हितस्तस्य स्नेहश्च मधुरैः श्रृतः ॥३७॥

अत्यन्त तीक्ष्ण तथा अत्यधिक लवणयुक्त रूक्ष वस्ति का प्रयोग, पित्त के साथ वायु को कुपित कर परिकर्तिका उत्पन्न कर देता है, इसमें मनुष्य की नाभि, वस्ति और गुदा में कैंची से काटने की भाँति पीड़ा होती है। इस दशा में पिच्छा वस्ति और मधुर द्रव्यों से सिद्ध स्नेहवस्ति का प्रयोग हितकर होता है ॥ ३६–३७ ॥

अत्यम्ललवणस्तीक्ष्णः परिस्रावाय कल्पते।
दौर्बल्यमङ्गसादश्च जायते तत्र देहिनः ॥३८॥
परिस्रवेत्ततः पित्तं दाहं सञ्जनयेद्गुदे।
पिच्छाबस्तिर्हितस्तत्र बस्तिः क्षीरघृतेन च ॥३९॥

अत्यन्त अम्ल, लवण युक्त तीक्ष्ण वस्ति परिस्राव उत्पन्न करती है, इसमें मनुष्य को दुर्बलता तथा अंगों में पीडा एव पित्त का स्राव होता है जिससे गुदा में दाह उत्पन्न हो जाता है। इसके लिए पिच्छावस्ति और दूध तथा घृत के साथ वस्ति देना हितकर होता है ॥ ३८–३९ ॥

प्रवाहिका भवेत्तीक्ष्णान्निरूहात् सानुवासनात्।
सदाहशूलं कृच्छ्रेण कफान्रक्तुपवेश्यते ॥४०॥
पिच्छाबस्तिर्हितस्तत्र पयसा चैव भोजनम्।
सर्पिर्मधुरकैः सिद्धं तैलं चाप्यनुवासनम् ॥४१॥

अनुवासन के साथ तीक्ष्ण निरूहण का प्रयोग करने से प्रवाहिका की उत्पत्ति होती है। इसमें दाह और शूल के साथ कफ और रक्त निकलता है एवं रोगी को बैठने में कष्ट होता है। इसके लिए पिच्छावस्ति का प्रयोग तथा दूध के साथ

भोजन तथा मधुरगण के द्वारा सिद्ध घृत या तैल का अनुवासन प्रयुक्त करना चाहिए ॥ ४०-४१ ॥

अतितीक्ष्णो निरूहो वा सवाते चानुवासनः ।
हृदयस्थोपसरणं कुरुते चाङ्गपीडनम् ॥४२॥
दोषैस्तत्र रुजस्तारता मदो मूर्च्छाऽङ्गगौरवम् ।
सर्वदोषहरं बस्तिं शोधनं तत्र दापयेत् ॥४३॥

वायु के साथ अत्यन्त तीक्ष्ण निरूह या अनुवासन का प्रयोग होने पर, वह हृदय में पहुँचकर अंगों में पीडा उत्पन्न करता है। दोषों के प्रकुपित होने से भिन्न-भिन्न (तोद, ओप, चोप आदि) पीडायें, मद, मूर्च्छा और अंगों में भारीपन होता है। इसमें सभी दोषों को दूर करनेवाली शोधन वस्ति का प्रयोग करना चाहिए ॥ ४२-४३ ॥

रूक्षस्य बहुवातस्य तथा दुःशायिनस्य च ।
बस्तिरङ्गग्रहं कुर्याद्रूक्षो मृद्वल्पभेषजः ॥४४॥
तत्राङ्गसादः प्रस्तम्भो जृम्भोद्वेष्टनवेपकाः ।
पर्वभेदश्च तत्रेष्टा स्वेदाभ्यञ्जनबस्तयः ॥४५॥

रूक्ष, बहुवात युक्त तथा विधि-विपरीत सोये हुए रोगी को दी गई वस्ति अंगों में जकडाहट उत्पन्न करती है तथा मृदु, अल्प औषधियुक्त रूक्ष वस्ति, अंगों में पीडा, स्तम्भ, जृम्भा, ऐंठन, कम्पन और जोडों में फूटन उत्पन्न करती है। इस दशा में स्वेदन, अभ्यङ्ग और वस्तियों का प्रयोग हितकर होता है ॥ ४४-४५ ॥

अत्युष्णतीक्ष्णोऽतिबहुर्दत्तोऽतिस्वेदितस्य च ।
अल्पदोषस्य वा बस्तिरतियोगाय कल्पते ॥४६॥
विरेचनातियोगेन समानं तस्य लक्षणम् ।
पिच्छाबस्तिप्रयोगश्च तत्र शीतः सुखावहः ॥४७॥

अति उष्ण, अति तीक्ष्ण, अधिक मात्रा युक्त एवं अत्यधिक स्वेदन तथा अल्प दोष वाले व्यक्ति के लिए प्रयुक्त वस्ति, अतियोग उत्पन्न करती है। इसमें विरेचन के अतियोग के समान लक्षण होते हैं। इसके लिए पिच्छा वस्ति तथा शीतोपचार हितकर होता है ॥ ४६-४७ ॥

अतियोगात् परं यत्र जीवादानं विरिक्तवत् ।
देयस्तत्र हितश्चाप्सु पिच्छाबस्तिः सशोणितः ॥४८॥

विरेचन के अतियोग की भाँति वस्ति के अतियोग से जीवादान (जीवरक्त का निकलना) होने पर रक्तयुक्त जलीय पिच्छावस्ति का प्रयोग हितकर होता है ॥ ४८ ॥

नवैता व्यापदो यास्तु निरूहं प्रत्युदाहृताः ।
स्नेहबस्तिष्वपि हि ता विज्ञेयाः कुशलैरिह ॥४९॥

निरूह के द्वारा होनेवाली जिन नौ व्यापदों का कथन किया गया है उनकी कल्पना बुद्धिमान वैद्य को स्नेहवस्तियों में भी करनी चाहिए ॥ ४९ ॥

इत्युक्ता व्यापदः सर्वाः सल्लक्षणचिकित्सिताः ।
भिषजा च तथा कार्यं यथैता न भवन्ति हि ॥५०॥

इस प्रकार सभी व्यापदों के लक्षण और चिकित्सा का वर्णन किया गया है, वैद्य को ऐसा यत्न करना चाहिए जिसमें ये दोष न होने पावें ॥ ५० ॥

पक्षाद्विरेको वान्तस्य ततश्चापि निरूहणम् ।
सद्यो निरूढोऽनुवास्यः सप्तरात्राद्विरेचितः ॥५१॥

इति सुश्रुतसंहितायां चिकित्सास्थाने नेत्रबस्तिव्यापच्चिकित्सितं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

निरूहण तथा अनुवासन के काल की अवधि—भली-भाँति वमन कराने के पन्द्रह दिन पश्चात् विरेचन तथा सोलहवें दिन निरूहण का प्रयोग करना चाहिए। निरूहण से युक्त पुरुष को अनुवासन उसी समय देना चाहिए किन्तु विरेचन की अवस्था में सात दिन के पश्चात् अनुवासन का प्रयोग करना चाहिए ॥ ५१ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायां षट्त्रिंशत्तमोऽध्यायः ॥

सप्तत्रिंशत्तमोऽध्यायः

अथातोऽनुवासनोत्तरबस्तिचिकित्सितं व्याख्यास्यामः ॥
यथोवाच भगवान् धन्वन्तरि ॥२॥

अनुवासन और उत्तरवस्ति चिकित्सा का उपक्रम—इसके अनन्तर अनुवासन और उत्तरवस्ति चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

विरेचनात् सप्तरात्रे गते जातबलायवै ।
कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः ॥ ३ ॥

विरेचन के उपरान्त अनुवासन की विधि—विरेचन से सात दिन पश्चात्, बल-लाभ तथा भोजन किए हुए अनुवासन के योग्य पुरुष को भली भाँति अनुवासन देना चाहिए ॥३॥

यथावयो निरूहाणां या मात्राः परिकीर्तिताः ।
पादावकृष्टास्ताः कार्याः स्नेहबस्तिषु देहिनाम् ॥ ४ ॥

अनुवासन बस्ति की मात्रा—वय के अनुसार निरूह वस्तियों की जो मात्रा बतलाई गई है, उसकी चौथाई मात्रा मनुष्यों की स्नेहवस्तियों में लेनी चाहिए ॥ ४ ॥

उत्सृष्टानिलविण्मूत्रे नरे बस्तिं विधापयेत् ।
एतैर्हि विहतः स्नेहो नैवान्तः प्रतिपद्यते ॥ ५ ॥

अनुवासन वस्ति का पूर्व कर्म—वायु, मल और मूत्र का त्याग किए हुए पुरुष के लिए वस्ति का विधान करना चाहिए, क्योंकि इनकी उपस्थिति में इनसे अवरुद्ध स्नेह अन्दर प्रविष्ट नहीं होता ॥ ५ ॥

स्नेहबस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः ।
स्नेहवीर्यं तथा दत्ते देहं चानुविसर्पति ॥ ६ ॥

अशुद्ध शरीरवाले पुरुष के लिए स्नेहबस्ति का प्रयोग नहीं करना चाहिए। शुद्ध शरीर में स्नेह वस्ति का प्रयोग करने से वह स्नेह बल प्रदान करता है तथा शरीर में फैल जाता है ॥ ६ ॥

अत ऊर्ध्वं प्रवक्ष्यामि तैलानीह यथाक्रमम् ।
पानान्वासननस्येषु यानि हन्युर्गदान् बहून् ॥ ७ ॥

अनुवासन के लिए तैलों का वर्णन—इसके आगे क्रमानुसार तैलों का वर्णन किया जा रहा है जिनका प्रयोग पान,

अनुवासन और नस्य में करने से अनेक व्याधियों का नाश होता है ॥ ७ ॥

शटीपुष्करकृष्णाह्वामदनामरदारुभिः ।
शताह्वाकुष्ठयष्ट्याह्ववचाबिल्वहुताशनैः ॥ ८ ॥
सुपिष्टैर्द्विगुणक्षीरं तैलं तोयचतुर्गुणम् ।
पक्त्वा बस्तौ विधातव्य मूढवातानुलोमनम् ॥ ९ ॥
अर्शांसि ग्रहणीदोषमानाहं विषमज्वरम् ।
कट्यूरुपृष्ठकोष्ठस्थान् वातरोगांश्च नाशयेत् ॥ १०॥

कचूर, पोहकरमूल, पिप्पल, मैनफल, देवदारु, सौंफ, कूठ, मुलेठी, वच, बेल और हुताशन (चित्रक) को पीस कर, तैल से दुगुने दूध और चौगुने जल के द्वारा तैल पाक करके, बस्ति-प्रयोग करना चाहिए। इसके प्रयोग से मूढ़ वायु का अनुलोमन तथा अर्श, ग्रहणी दोष, आनाह, विषम ज्वर और कटि, ऊरु, पृष्ठ एवं कोष्ठगत वात रोगों का नाश होता है ॥

वचापुष्करकुष्ठैलाभदनामरसिन्धुजैः ।
काकोलीद्वययष्ट्याह्वमेदायुग्मनराधिपैः ॥११॥
पाठाजीवकजीवन्तीभार्गीचन्दनकट्फलैः ।
सरलागुरुबिल्वाम्बुवाजिगन्धाग्निवृद्धिभिः ॥१२॥
विडङ्गारग्वधश्यामात्रिवृन्मागधिकर्धिभिः ।
पिष्टैस्तैलं पचेत् क्षीरपञ्चमूलरसान्वितम् ॥१३॥
गुल्मानाहाग्निपङ्गार्शोग्रहणीमूत्रसङ्गिनाम् ।
अन्वासनविधौ युक्तं शस्यतेऽनिलरोगिणाम् ॥१४॥

वच, पोहकर मूल, कूठ, इलायची, मैनफल, देवदारु, सेन्धा नमक, काकोली, क्षीरकाकोली, मुलेठी, मेदा, महामेदा, नराधिप (अमलतास), पाठा, जीवक, जीवन्ती, भार्गी, चन्दन, कायफल, निशोथ, अगर, बेल, अम्बु (सुगन्ध बाला), अश्वगन्ध, अग्नि (चित्रक), वृद्धि, विडङ्ग, अमलतास, श्यामा (विधारा), निशोथ, पिप्पल और ऋद्धि को पीस कर दूध और पञ्चमूल-क्वाथ के साथ तैल पाक किया जावे। इसका प्रयोग गुल्म, आनाह, अग्निमांद्य, अर्श, ग्रहणी और मूत्रावरोध से पीडित तथा वातरोगियों की अनुवासन वस्ति में उत्तम होता है ॥ ११–१४ ॥

विमर्शः—अत्र तैले नराधिपाराग्वधपाठात् सरला त्रिवृत् पाठाश्च एतयोर्द्विगुणा मात्रा देया। उक्तञ्च—'घृते तैले च योगे च यद् द्रव्य पुनरुच्यते। तद् द्रव्यमिहाचार्यैर्भागतो द्विगुण मतम्'।

चित्रकातिविषापाठादन्तीबिल्ववचामिषैः ।
सरलांशुमतीराम्नानीलिनीचतुरङ्गुलैः ॥१५॥
चव्याजमोदकाकोलीमेदायुग्मसुरद्रुमैः ।
जीवकर्षभवर्षाभूबस्तगन्धाशताह्वयैः ॥१६॥
रेण्वश्वगन्धामज्जिष्ठाशटीपुष्करतस्करैः ।
सक्षीरं विपचेत्तैल मारुतामयनाशनम् ॥१७॥
गृध्रसीखञ्जकुब्जाढ्यमूत्रोदावर्तरोगिणाम् ।
शस्यतेऽल्पबलाग्नीनां वस्तावाशु नियोजितम् ॥१८॥

चित्रकादि तैल अनुवासनार्थः—चित्रक, अतीस, पाठा, दन्ती, बेलगिरी, वच, सौंफ, निशोथ, अशुमती (शालिपर्णी), रास्ना, नील, अमलतास, चव्य, अजमोद, काकोली, मेदा, महामेदा, देवदारु, जीवक, ऋषभक, वर्षाभू (पुनर्नवा), अजगन्धा, सौंफ, रेणु (पित्तपापडा), अश्वगन्ध, मजीठ, कचूर, पोहकर-मूल, और तस्कर (चोरक) को पीस कर दूध के साथ तैल पाक किया जावे। यह तैल वातज व्याधियों का नाश करता है। इसका वस्ति के द्वारा आशु प्रयोग गृध्रसी, खञ्ज, कुब्ज, आढ्यवात, मूत्रावरोध, उदावर्त एव मन्दाग्नि वाले पुरुषों के लिए हितकर होता है ॥ १५–१८ ॥

भूतिकैरण्डवर्षाभूरास्नावृषकरोहिषैः ।
दशमूलसहाभार्गीपञ्चग्रन्थामरदारुभिः ॥१९॥
बलानागबलामूर्वावाजिगन्धामृताद्वयैः ।
सहाचरवरीविश्वाकाकनासाविदारिभिः ॥२०॥
यवमाषातसीकोलकुलत्थैः कथितै श्रृतम् ।
जीवनीयप्रतीवापं तैलं क्षीरचतुर्गुणम् ॥२१॥
जङ्घोरुत्रिकपार्श्वांसबाहुमन्याशिरःस्थितान् ।
हन्याद्वातविकारांस्तु वस्तियोगैर्निषेवितम् ॥२२॥

भूतिकादि तैल (अनुवासनार्थ)—भूतिक (कत्तृणापरपर्य्यायम्), एरण्ड, पुनर्नवा, रास्ना, अडूषा, रोहिष (कत्तृण), दशमूल के द्रव्य, मापपर्णी, भार्गी, पिप्पलीमूल, देवदारु, बला (खरेटी), नागबला (गंगेरन), मूर्वा, अश्वगन्ध, अमृताद्वय (गुडुची और हरीतकी), कटसरैया, वरी (शतावरी), विश्वा (सोंठ), काकनासा, विदारीकन्द, जौ, उडद, तीसी, झडबेर और कुलथी के छाने हुए क्वाथ में, जीवनीय-गण की औषधियों के प्रक्षेप (कल्क) के साथ, चतुर्गुण दूध के द्वारा सिद्ध किया हुआ तैल, जङ्घा, ऊरु, त्रिक, पार्श्व, अंस, बाहु, मन्या एव शिरोभाग में स्थित वातविकारों को वस्ति के द्वारा प्रयोग करने पर नाश करता है।

जीवन्त्यतिबलामेदाकाकोलीद्वयजीवकैः ।
ऋषभातिविषाकृष्णाकाकनासावचामरैः ॥ २३ ॥
रास्नामदनयष्ट्याह्वसरलाभीरुचन्दनैः ।
स्वयङ्गुप्राशटीशृङ्गीकलसीसारिवाद्वयैः ॥ २४ ॥
पिष्टैस्तैलघृत पक्वं क्षीरेणाष्टगुणेन तु ।
तच्चानुवासने देयं शुक्राग्निबलवर्धनम् ॥ २५ ॥
बृंहणं वातपित्तघ्नं गुल्मानाहहरं परम् ।
नस्ये पाने च संयुक्तमूर्ध्वजत्रुगदापहम् ॥ २६ ॥

जीवन्ती, अतिबला (कंघी), मेदा, काकोली, क्षीर काकोली, जीवक, ऋषभक, अतीस, पिप्पल, काकनासा, वच, देवदारु, रास्ना, मैनफल, मुलेठी, निशोथ, भीरु (शतावरी), चन्दन, स्वयङ्गुप्ता (कौचकेबीज), कचूर, काकडासिंगी, कलसी (पृष्टिपर्णी), श्वेतसारिवा और कृष्णसारिवा को पीसकर, अष्टगुण दूध के साथ तैल या घृत का पाक करके, अनुवासन में प्रयोग करना चाहिए। यह योग शुक्र, अग्नि और बल को बढ़ाने वाला, बृहण, वात, पित्तनाशक तथा गुल्म और अनाह को दूर करता है। नस्य और पान में इसका प्रयोग करने से ऊर्ध्वजत्रु गत रोग दूर होते हैं ॥ २३–२६ ॥

मधुकोशीरकाश्मर्यकट्वकोत्पलचन्दनैः ।
श्यामापद्मकजीमूतशक्राह्वातिविषाम्बुभिः ॥ २७ ॥

तैलपादं पचेत् सर्पिः पयसाऽष्टगुणेन च ।
न्यग्रोधादिगणक्वाथ-युक्तं बस्तिषु योजितम् ॥ २८ ॥
दाहासृग्दरवीसर्पवातशोणितविद्रधीन् ।
पित्तरक्तज्वराद्यांश्च हन्यात् पित्तकृतान् गदान् ॥२९॥

मधुकादितैलम् (अनुवासनार्थ)—मुलेठी, रास्ना, गम्भारी, कुटकी, कमल, चन्दन श्यामा (त्रिवृत), पद्माख, जीमूत (नागरमोथा), इन्द्रजौ, अतीस और सुगन्धवाला को पीस कर चतुर्थांश तैल मिश्रित घृत, आठ गुने दूध के साथ सिद्ध करके न्यग्रोधादि गण के क्वाथ के साथ बस्तियों में प्रयोग करना चाहिए। इससे दाह, असृग्दर, विसर्प, वातरक्त, विद्रधि, रक्तपित्त, ज्वर तथा पित्तजन्य व्याधियाँ नष्ट होती हैं।

मृणालोत्पलशालूकसारिवाद्वयकेशरैः ।
चन्दनद्वयभूनिम्बपद्मबीजकसेरुकैः ॥ ३० ॥
पटोलकटुकारक्तागुन्द्रापर्पटवासकैः ।
पिष्टैस्तैलघृतं पक्वं तृणमूलरसेन च ॥ ३१ ॥
क्षीरद्विगुणसंयुक्तं बस्तिकर्मणि योजितम् ।
नस्येऽभ्यञ्जनपाने वा हन्यात् पित्तगदान् बहून् ॥३२॥

मृणालादितैल (अनुवासनार्थ)—मृणाल (कमलनाल), कमल, शालूक (कमलकन्द), श्वेतसारिवा, कृष्ण सारिवा, नागकेशर, श्वेतचन्दन, रक्तचन्दन, चिरायता, कमलगट्टा, कमेरु, परवल की पत्ती, कुटकी, रक्ता (मजीठ), गुन्द्रा (पटेर), पित्तपापडा और अडूसा को पीसकर, तृणपञ्चमूल के क्वाथ तथा द्विगुण दूध के साथ, तैल या घृत का पाक करके बस्तिदान, नस्य, अभ्यङ्ग और पान में प्रयोग करना चाहिए। इससे अनेक पित्तज रोगों का नाश होता है ॥३०-३२॥

त्रिफलातिविषामूर्वात्रिवृच्चित्रकवासकैः ।
निम्बारग्वधपर्पटग्रन्थास्पर्पणनिशाद्वयैः ॥ ३३ ॥
गुडूचीन्द्रसुराकृष्णाकुष्ठसर्षपनागरैः ।
तैलमेभिः समैः पक्वं सुरसादिरसाप्लुतम् ॥ ३४ ॥
पानाभ्यञ्जनगण्डूषनस्यबस्तिषु योजितम् ।
स्थूलतालस्यकण्डूवादीन् जयेत्कफकृतान् गदान् ॥३५॥

त्रिफलादि तैल (अनुवासनार्थ)—त्रिफला, अतीस, मूर्वा निशोथ, चित्रक, अडूसा, नीम, अमलतास, वच, सप्तपर्ण, हल्दी, दारुहल्दी, गुडूची, इन्द्रसुरा (इन्द्रवारुणी), पिप्पल, कूठ, सरसों और सोंठ को समान भाग में पीस कर सुरसादि गण के क्वाथ के द्वारा तैल पाक करके पान, अभ्यङ्ग, गण्डूष, नस्य तथा बस्तियों में प्रयोग करना चाहिए। इसके प्रयोग से स्थूलता आलस्य, कण्डू एवं कफज व्याधियाँ नष्ट होती हैं।

पाठाजमोदाशार्ङ्गेष्टापिप्पलीद्वयनागरैः ।
सरलागुरुकालीयभार्गीचव्यामरद्रुमैः ॥ ३६ ॥
मरिचैलाभयाकट्वीशटीग्रन्थिककटफलैः ।
तैलमेरण्डतैलं वा पक्वमेभिः समायुतम् ॥ ३७ ॥
वल्लीकण्टकमूलाभ्यां काथेन द्विगुणेन च ।
हन्यादन्वासनैर्दत्तं सर्वान् कफकृतान् गदान् ॥ ३८ ॥

पाठादितैल (अनुवासनार्थ)—पाठा, अजवायन, शार्ङ्गेष्टा (काकजघा), पिप्पल, गजपिप्पल, सोंठ, निशोथ, अगर, कालीय (पीतचन्दन), भार्गी, चव्य, देवदारु, मरिच, इलायची, हरीतकी, कुटकी, कचूर, पिप्पलीमूल और कायफल को समान भाग में पीस कर कण्टक पञ्चमूल और वल्लीपञ्चमूल के दुगने क्वाथ के साथ तिल तैल या एरण्ड तैल सिद्ध करना चाहिए। अनुवासन में इस तैल का प्रयोग करने से कफजन्य समस्त व्याधियाँ नष्ट होती हैं ॥ ३६-३८ ॥

विडङ्गादीच्यसिन्धूत्थशटीपुष्करचित्रकैः ।
कट्फलातिविषाभार्गीवचाकुष्ठसुराह्वयैः ॥ ३९ ॥
मेदामदनयष्ट्याह्वश्यामानिचुलनागरैः ।
शताह्वानीलिनीरास्नाकलसीवृषपरेरणुभिः ॥ ४० ॥
बिल्वाजमोदकृष्णाह्वादन्तीचव्यनराधिपैः ।
तैलमेरण्डतैलं वा मुष्ककादिरसाप्लुतम् ॥ ४१ ॥
प्लीहोदावर्तवातासृग्गुल्मानाहकफामयान् ।
प्रमेहशर्कराशर्सांसि हन्यादाश्वनुवासनैः ॥ ४२ ॥

विडङ्गादितैल (अनुवासनार्थ)—विडङ्ग, सुगन्धवाला, सेन्धानमक, कचूर, पोहकरमूल, चित्रक, कायफल, अतीस, भार्गी, वच, कूठ, देवदारु, मेदा, मैनफल, मुलेठी, श्यामा (विधारा), निचुल (जलबेत), सोंठ, सौंफ, नील, रास्ना, पृष्टिपर्णी, अडूसा, पित्तपापडा, बेल, अजवायन, पिप्पल, दन्ती, चव्य और अमलतास को पीसकर, मुष्कक गण के क्वाथ के साथ तिलतैल या एरण्ड तैल का पाक करना चाहिए। इसके द्वारा अनुवासन देने पर प्लीहा, उदावर्त, वातरक्त, गुल्म, आनाह, कफज रोग, प्रमेह, शर्करा और अर्श शीघ्र नष्ट होता है ॥ ३९-४२ ॥

अशुद्धमपि वातेन केवलेनातिपीडितम् ।
अहोरात्रस्य कालेषु सर्वेष्वेवानुवासयेत् ॥ ४३ ॥

वायु के अति प्रकोप में अशुद्ध पुरुष के अनुवासन की विधि—केवल वात रोग से अत्यधिक पीडित अशुद्ध शरीर वाले पुरुष को भी दिन, रात में सभी समय अनुवासन देना चाहिए ॥ ४३ ॥

रूक्षस्य बहुवातस्य द्वौ त्रीनप्यनुवासनान् ।
दत्त्वा स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत् ॥ ४४ ॥

रूक्ष एवं बहुवातयुक्त पुरुष को दो, तीन बार अनुवासन देकर, स्निग्ध शरीर होने के पश्चात् निरूहबस्ति देनी चाहिए॥

अस्निग्धमपि वातेन केवलेनातिपीडितम् ।
स्नेहप्रगाढैर्मतिमान्निरूहैः समुपाचरेत् ॥ ४५ ॥

वायु के अति प्रकोप में अस्निग्ध पुरुष के अनुवासन की विधि—केवल वात से अतिपीडित स्नेहरहित शरीर वाले पुरुष की चिकित्सा भी बुद्धिमान् वैद्य को स्नेहबहुल निरूह बस्ति के द्वारा करनी चाहिए ॥ ४५ ॥

अथ सम्यङ्निरूढं तु वातादिष्वनुवासयेत् ।
बिल्वयष्ट्याह्वमदनफलतैलैर्यथाक्रमम् ॥ ४६ ॥

दोषभेद से अनुवासन तैल—वातादि दोषों में, भली भांति निरूपण किए गए व्यक्ति को, क्रमशः बेल, मुलेठी और मैनफल के द्वारा सिद्ध तैल से, अनुवासन देना चाहिए ॥ ४६ ॥

रात्रौ बस्तिं न दद्यात्तु दोषोत्क्लेशो हि रात्रिज ।
स्नेहवीर्ययुतः कुर्यादाध्मानं गौरवं ज्वरम् ॥ ४७ ॥

रात्रि में बस्तिदान का निषेध—रात्रि में बस्ति का प्रयोग नहीं करना चाहिए क्योंकि रात्रि में उत्पन्न होने वाले दोषों का उत्क्लेश होता है तथा शक्ति युक्त स्नेह आध्मान, गौरव एवं ज्वर उत्पन्न कर देता है ॥ ४७ ॥

विमर्शः—दोषोत्क्लेश इति यस्मात् रात्रावाहारविदाहेन कालशैत्यात् स्रोतोमुखसृतत्वेन च दोषधातुमलेषु विश्लेदनलक्षण उत्क्लेशो भवति। अन्यत्राप्युक्तम्-'अविशुद्धे तु हृदये निशि क्लिन्नेषु धातुषु। विदग्धेऽन्नरसे स्रोतःसूपलिप्तेषु देहिनाम्। व्यापारेभ्यो निवृत्तानां दोषोत्क्लेशो भवेदिति'।

अह्नि स्थानस्थिते दोषे वह्नौ चान्नरसान्विते।
स्फुटस्रोतोमुखे देहे स्नेहौजः परिसर्पति ॥ ४८ ॥

दिन में बस्ति प्रदान के गुण—दिन में दोषों के अपने स्थान में स्थित रहने और अग्नि के अन्न रस से युक्त होने तथा स्रोतों का मुख खुला होने के कारण शरीर में स्नेह की शक्ति फैलती है ॥ ४८ ॥

पित्तेऽधिके कफे क्षीणे रूक्षे वातरुगर्दिते।
नरे रात्रौ तु दातव्यं काले चोष्णेऽनुवासनम् ॥४९॥

अवस्था विशेष में रात्रि में भी अनुवासन की विधि—पित्त की अधिकता तथा कफ के क्षीण होने पर एवं उष्ण काल में, वात रोग से पीड़ित रूक्ष मनुष्य को रात्रि में अनुवासन देना चाहिए ॥ ४९ ॥

उष्णे पित्ताधिके वाऽपि दिवा दाहादयो गदाः।
संभवन्ति यतस्तस्मात् प्रदोषे योजयेद्भिषक् ॥५०॥

उष्ण काल अथवा पित्त की अधिकता में भी दिन में अनुवासन प्रयोग करने से दाह आदि व्याधियाँ उत्पन्न होती हैं, इसलिए वैद्य को प्रदोष काल में बस्ति का प्रयोग करना चाहिए ॥ ५० ॥

शीते वसन्ते च दिवा ग्रीष्मप्रावृड्घनात्यये।
स्नेहो दिनान्ते पानोक्तान् दोषान् परिजिहीर्षता ॥५१॥

ऋतु विशेष के अनुसार बस्ति के काल में विशेषतायें—स्नेहपान में कथित दोषों से बचने की अभिलाषा वाले पुरुष को, शीत और वसन्त ऋतु में दिन में तथा ग्रीष्म, वर्षा एवं शरद् ऋतु में दिन के अन्त में स्नेह (अनुवासन बस्ति) देना चाहिए ॥ ५१ ॥

अहोरात्रस्य कालेषु सर्वेष्वेवानिलाधिकम्।
तीव्रायां रुजि जीर्णान्न भोजयित्वाऽनुवासयेत् ॥५२॥

वाताधिक्य में सर्वदा अनुवासन बस्ति की विधि—वायु की अधिकता होने पर दिन रात में भी तथा अन्न जीर्ण होने पर तीव्र वेदना की स्थिति में भोजन देकर अनुवासन प्रयोग करना चाहिए ॥ ५२ ॥

न चाभुक्तवतः स्नेहः प्रणिधेयः कथञ्चन।
शुद्धत्वाच्छून्यकोष्ठस्य स्नेह ऊर्ध्वं समुत्पतेत् ॥५३॥

बिना भोजन किये हुये को स्नेह बस्ति का प्रतिषेध—बिना भोजन कराये कभी स्नेह बस्ति का प्रयोग नहीं करना चाहिए क्योंकि शरीर शुद्ध होने से तथा कोष्ठ की रिक्तता के कारण स्नेह ऊपर की ओर जाता है ॥ ५३ ॥

सदाऽनुवासयेच्चापि भोजयित्वाऽऽर्द्रपाणिनम्।
ज्वरं विदग्धभुक्तस्य कुर्यात स्नेहः प्रयोजितः ॥५४॥

भोजनोत्तर अविलम्ब अनुवासन देने का निर्देश—रोगी को भोजन देकर अविलम्ब (गीले हाथ की स्थिति में ही) सदा अनुवासन का प्रयोग करना चाहिए क्योंकि अन्न के परिपाक काल में प्रयुक्त की गई स्नेह बस्ति ज्वर उत्पन्न कर देती है ॥ ५४ ॥

न चातिस्निग्धमशन भोजयित्वाऽनुवासयेत्।
मदं मूर्च्छां च जनयेद् द्विधा स्नेहः प्रयोजितः ॥५५॥

अत्यधिक स्नेह युक्त भोजन देकर अनुवासन का प्रयोग नहीं करना चाहिए क्योंकि दो प्रकार से प्रयुक्त हुआ स्नेह मद और मूर्च्छा उत्पन्न करता है ॥ ५५ ॥

रूक्ष भुक्तवतो ह्यन्नं बलं वर्णं च हापयेत्।
युक्तस्नेहमतो जन्तुं भोजयित्वाऽनुवासयेत् ॥५६॥

रूक्ष अन्न का सेवन बल और वर्ण का नाश करता है इसलिए मनुष्य को अल्प स्नेहयुक्त भोजन देकर अनुवासन देना चाहिए ॥ ५६ ॥

यूषक्षीररसैस्तस्माद्यथाव्याधि समीक्ष्य वा।
यथोचितात् पादहीनं भोजयित्वाऽनुवासयेत् ॥५७॥

यूष, दूध और मांसरस अथवा व्याधि के अनुकूल आहार (संसर्जन क्रम के अनुसार सेवन किए जाने वाले) की चतुर्थांश मात्रा खिलाकर अनुवासन का प्रयोग करना चाहिए ॥ ५७ ॥

अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः।
भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः ॥५८॥
विसृज्य च शकृन्मूत्रं योजयेत् स्नेहबस्तिना।
प्रणिधानविधानं तु निरूहे संप्रवक्ष्यते ॥५९॥

अनुवासन बस्ति देने की विधि—अनुवासन किए जाने वाले पुरुष का भली भाँति अभ्यङ्ग करके धीरे-धीरे उष्ण जल से स्वेदन करना चाहिए फिर शास्त्रवर्णित भोजन देकर कुछ टहलाना चाहिए और मल-मूत्र का परित्याग कराने के पश्चात् स्नेहबस्ति का प्रयोग करना चाहिए। इसका प्रणिधान-विधान (बस्ति-प्रदान के नियम) निरूह बस्ति के प्रकरण में कहा जा रहा है ॥ ५८-५९ ॥

ततः प्रणिहितस्नेह उत्तानो वाक्शतं भवेत्।
प्रसारितैः सर्वगात्रैस्तथा वीर्यं विसर्पति ॥६०॥

बस्ति-विधान के अनुसार स्नेहबस्ति लेने के अनन्तर रोगी को सम्पूर्ण अङ्गों को फैला, उत्तान लेटकर, सौ बार गिनती गिनना चाहिए। इस प्रकार स्नेह का वीर्य सारे शरीर में फैल जाता है ६० ॥

ताडयेत्तलयोरेनं त्रींस्त्रीन् वाराञ्छनैः शनैः।
स्फिचोश्चैनं ततः शय्यां त्रीन् वारानुत्क्षिपेत्ततः ॥६१॥
एवं प्रणिहिते बस्तौ मन्दायासोऽथ मन्दवाक्।
स्वास्तीर्णे शयने काममासीताचारिके रतः ॥६२॥

रोगी के हाथ-पैर के तलवे तथा नितम्ब पर धीरे-धीरे तीन-तीन बार थपथपाना चाहिए, फिर शय्या को रोगी सहित तीन बार ऊपर उठाना चाहिए। इस प्रकार बस्ति प्रणिधान के पश्चात् अल्पश्रम तथा अल्प वाणी बोलते हुए,

रोगी को अपनी शय्या पर सोकर क्रोध आदि नियमों के परित्याग का पालन करना चाहिए ॥ ६१-६२ ॥

स तु सैन्धवचूर्णेन शताह्वेन च योजितः।
देयः सुखोष्णश्च तथा निरेति सहसा सुखम् ॥६३॥

स्नेह में सेन्धा नमक तथा सौंफ मिलाकर सुखोष्ण वस्ति देने से वह सुखपूर्वक सहसा बाहर आती है ॥ ६३ ॥

यस्यानुवासनो दत्तः सकृदन्वक्षमाव्रजेत्।
अत्यौष्ण्यादतितैक्ष्ण्याद्वा वायुना वा प्रपीडितः ॥६४॥
सवातोऽधिकमात्रो वा गुरुत्वाद्वा सभेषजः।
तस्यान्योऽल्पतरो देयो न हि स्निह्यत्यतिष्ठति ॥६५॥

अनुवासन औषधि के एकबार में ही लौट आने में दोष—अधिक उष्णता, तीक्ष्णता, वायु के दबाव, वातयुक्त अथवा अधिक मात्रा में होने या औषधि के गुरुत्व के कारण जिस पुरुष का प्रयुक्त एक बार में ही औषधि के साथ बाहर आ जाता है, उसे दूसरी वस्ति अल्प मात्रा में देनी चाहिए, क्योंकि स्नेह के न रुकने से स्नेहन नहीं होता ॥ ६४-६५ ॥

विष्टब्धानिलविण्मूत्रः स्नेहहीनेऽनुवासने।
दाहक्लमप्रवाहार्तिकरश्चात्यनुवासनः ॥६६॥

स्नेहहीन तथा स्नेहाधिक अनुवासन के दोष—स्नेहहीन अनुवासन वायु, मल और मूत्र का अवरोध तथा अधिक स्नेहयुक्त दाह, क्लम और प्रवाहिका उत्पन्न करता है ॥ ६६ ॥

सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु।
ओपचोषैर्विना शीघ्रं स सम्यगनुवासितः ॥६७॥

सम्यग् अनुवासित के लक्षण—जिस पुरुष का स्नेह वायु और मल के साथ ओप चोष (वेदना विशेष) के बिना शीघ्र वापस आ जाता है उसे भली-भाँति अनुवासित समझना चाहिए ॥ ६७ ॥

जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥६८॥

यदि मनुष्य प्रदीप्त अग्नि वाला हो तो, स्नेह के वापस आने पर पूर्व आहार के पाचन के पश्चात् इच्छानुकूल लघु भोजन देना चाहिए ॥ ६८ ॥

प्रातरुष्णोदकं देयं धान्यनागरसाधितम्।
तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते ॥६९॥

प्रातःकाल धनियाँ और सोंठ के साथ सिद्ध उष्ण जल देना चाहिए, इससे अनुवासित व्यक्ति की अग्नि दीप्त होती है तथा भोजन में रुचि उत्पन्न होती है ॥ ६९ ॥

स्नेहवस्तिक्रमेष्वेवं विधिमाहुर्मनीषिणः।
अनेन विधिना षड्वा सप्त वाऽष्टौ नवैव वा ॥७०॥
विधेया वस्तयस्तेषामन्तरा तु निरूहणम्।
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवद्व्रणौ ॥७१॥

स्नेहवस्ति के प्रथमादि दान से कार्य का निरूपण—काय-चिकित्सकों ने स्नेहवस्तियों के क्रम में इसी विधि का विधान किया है। इस विधि में छः, सात, आठ, या नौ स्नेहवस्तियाँ देनी चाहिए और इनके मध्य में निरूहवस्ति का प्रयोग भी करना चाहिए। प्रयुक्त प्रथम स्नेहवस्ति, वस्ति और व्रण का स्नेहन करती है ॥ ७० ७१ ॥

विमर्श—चरक ने निम्नलिखित रूप में वस्तिदान प्रकार और उनकी संख्या का वर्णन किया है—द्विषण्मताः कर्म्मसु वस्तयो हि काले ततोर्द्धेन तथा च योगे। सान्वासना द्वादश वै निरूहाः प्राक्स्नेह एकः परतश्च पञ्च। काले त्रयोऽन्तेऽन्तरितास्त्रयैकः स्नेहा निरूहैः सहिताश्च षट् स्युः। योगे निरूहास्त्रय एव देयाः, स्नेहास्तथा षट् च पराङ्मिध्याः। (च. सि अ. १) द्वि षडिति द्वादश वस्तयः। कर्म्मसु चिकित्सितकर्म्मसु। इति कर्मवस्ति। तथा काले वस्तिस्ततोऽर्द्धेन षड्वस्तयः, योगे च तथार्द्धेन षट्वस्तयः स्युरिति। सानुवासना निरूहा द्वादश कर्म्मसु प्राक् स्नेह एको निरूहवस्तिः पूर्वमेकः स्नेहवस्तिस्ततो निरूहवस्तिस्तत परतः पञ्च सानुवासना निरूहा इति कर्म्मसु द्वादशवस्तयः। तथा च एकोऽनुवासनवस्ति पूर्वं ततो निरूहस्ततोऽनुवासन ततो निरूहस्ततोऽनुवासन ततो निरूहस्ततोऽनुवासनं ततो निरूहस्ततोऽनुवासन ततो निरूहस्ततोऽनुवासन ततो निरूहइति द्वादश कर्म्मसु वस्तयः। काले सान्वासनास्त्रय इति षट्, तत्र प्राक् स्नेह एको निरूहात् पूर्वमेकः स्नेहवस्तिस्ततो निरूहस्ततोऽनुवासन-वस्तिस्ततो निरूहस्तत स्नेहवस्तिस्ततो निरूह इति षट् सानुवासना निरूहा वस्तय काले। अथ योगे तथार्द्धेन सानुवासनाः षट्वस्तयः। तद् यथा-त्रय एव निरूहा देयास्त्रया पराङ्मिध्याः स्नेहाश्च त्रय इति षट्। तथा च-पूर्वमेकोऽनुवासनवस्तिस्ततो निरूहस्ततः स्नेहवस्तिस्ततो निरूहस्तत स्नेहवस्तिस्ततो निरूह इत्येव षट् योगे स्मरन्ति। पराङ्मिध्यास्त्रिय स्नेहास्त्रयो निरूहा इति। (गंगाधर कविराज)

सम्यग्दत्तो द्वितीयस्तु मूर्वस्थमनिलं जयेत्।
जनयेद्बलवर्णौ च तृतीयस्तु प्रयोजितः ॥७२॥

भली भाति दी गई दूसरी वस्ति ऊर्ध्वजत्रुगत वायु का शमन करती है और तीसरी प्रयुक्त वस्ति बल एवं वर्ण की उत्पत्ति करती है ॥ ७२ ॥

रसं चतुर्थी रक्तं तु पञ्चमः स्नेहयेत्तथा।
षष्ठस्तु स्नेहयेन्मांसं मेदः सप्तम एव च ॥७३॥
अष्टमो नवमश्चास्थि मज्जानं च यथाक्रमम्।
एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ॥७४॥

चौथी वस्ति रस, पाँचवीं रक्त, छठी मांस एवं सातवीं मेद का स्नेहन करती है आठवीं और नौवीं वस्ति क्रमानुसार अस्थि और मज्जा का स्नेहन करती है। इस प्रकार शुक्रगत दोषों की (व्याधि समुद्देशीयोक्तान् क्लैब्यान्हर्षजनकान्) चिकित्सा द्विगुण वस्तियों (अठारह वस्ति) के द्वारा भली भांति करनी चाहिए ॥ ७३-७४ ॥

अष्टादशाष्टादशकान् स्नेहवस्तीनां यो निषेवते।
यथोक्तेन विधानेन परिहारक्रमेण च ॥७५॥
स कुञ्जरबलोऽश्वस्य जवैस्तुल्योऽमरप्रभः।
वीतपाप्मा श्रुतधरः सहस्रायुर्नरो भवेत् ॥७६॥

अनुवासन का फल—पूर्वोक्त विधान और परिहार क्रम के अनुसार जो पुरुष अठारह, स्नेह तथा अठारह निरूह वस्तियों का सेवन करता है वह हाथी के समान बलशाली, घोड़े की भांति वेगवान्, देवताओं के तुल्य कान्तिमान्, पूर्व जन्म के पापों से मुक्त और श्रवण की हुई वाणी को धारण करने वाला तथा सहस्रवर्ष की आयु से युक्त होता है ॥ ७५-७६ ॥

स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ।
स्नेहादग्निवधोत्क्लेशौ निरूहात् पवनाद्भयम् ॥७७॥

अनुवासन अथवा निरूह में से किसी एक वस्ति के अधिक सेवन में दोष—स्नेह या निरूह किसी एक वस्ति का अधिक सेवन नहीं करना चाहिए क्योंकि स्नेहवस्ति की अधिकता से अग्नि का नाश और उत्क्लेश तथा निरूह से वात के प्रकोप का भय रहता है ॥ ७७ ॥

तस्मान्निरूढोऽनुवास्यो निरूह्यश्चानुवासितः ।
नैवं पित्तकफोत्क्लेशौ स्यातां न पवनाद्भयम् ॥७८॥

इसलिए निरूह के पश्चात् अनुवासन और अनुवासन के बाद निरूह का प्रयोग करना चाहिए। इस विधि से वस्ति सेवन करने पर पित्त और कफ का उत्क्लेश नहीं होता तथा वात-प्रकोप का भय नहीं रहता ॥ ७८ ॥

रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने ।
दद्याद्द्वैद्यस्ततोऽन्येषामग्न्याबाधभयात्त्र्यहात् ॥७९॥

स्नेहवस्ति का अवस्थाविशेष से विधान का निर्देश—रूक्ष तथा बहुवात युक्त पुरुष के लिये प्रतिदिन तथा अन्य मनुष्यों के लिए अग्निमांद्य के भय से तीसरे दिन स्नेहवस्ति का प्रयोग करना चाहिए ॥ ७९ ॥

स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनल्पयः ।
तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते ॥८०॥

अभ्यास से वस्ति आपद् विहीन होने का निर्देश—रूक्ष मनुष्यों को अल्पमात्रा में दीर्घकाल तक सेवन की गई स्नेहवस्ति, हानि नहीं पहुँचाती। उसी प्रकार स्निग्ध पुरुषों के लिए अल्पमात्रा युक्त निरूह का सेवन हितकर होता है ॥८०॥

अत ऊर्ध्वं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥८१॥
अल्पवीर्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्वन्त्युपद्रवान् स्नेहः, स चापि न निवर्तते ॥८२॥

दोषाभिभूत स्नेहवस्ति के व्यापद्—इसके आगे स्नेह वस्तियों से उत्पन्न होनेवाली व्यापदों (हानियों) का वर्णन किया जा रहा है। जब बलवान वातादि दोष कोष्ठ में रहते हैं तब अल्पशक्तिवाले स्नेह को तिरस्कृत करके पृथक्-पृथक् उपद्रवों को उत्पन्न करते हैं तथा स्नेह को भी बाहर नहीं निकलने देते ॥ ८१ ८२ ॥

तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भा वातरुजस्तास्ता वेपथुर्विषमज्वरः ॥८३॥

वायु से स्नेह के तिरस्कृत होने पर मुख में कषायता, जृम्भा, भिन्न भिन्न वातजन्य वेदनायें, कम्प और विषमज्वर होता है ॥ ८३ ॥

पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः स्वेदो नेत्रमूत्राङ्गपीतता ॥८४॥

पित्त के द्वारा स्नेह के तिरस्कृत होने से मुख में कटुता, दाह, तृष्णा, ज्वर और स्वेदागमन होता है तथा नेत्र, मूत्र, एवं अंग पीले पड़ जाते हैं ॥ ८४ ॥

श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्दिरुच्छ्वासः कृच्छ्राच्छीतज्वरोऽरुचिः ॥८५॥

श्लेष्मा के द्वारा स्नेह का तिरस्कार होने पर मुख से लालास्राव, मुख में मधुरता, गौरव, छर्दि, श्वास लेने में कठिनाई, शीत ज्वर और अरुचि होती है ॥ ८५ ॥

तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥८६॥

पूर्वोक्त व्यापदों की चिकित्सा—दोषों के द्वारा स्नेह के तिरस्कृत होने पर दोषों के अनुकूल दोषशामक चिकित्सा विधि का विधान करना चाहिए ॥ ८६ ॥

अत्याशितेऽन्नाभिभवात् स्नेहो नैति यदा तदा ।
गुरुरामाशयः शूलं वायोश्चाप्रतिसंचर ॥८७॥
हृत्पीडा मुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥८८॥

अधिक भोजन करने पर स्नेहवस्ति देने से उत्पन्न व्यापद् और उनकी चिकित्सा—अधिक भोजन करने पर अन्न से तिरस्कृत हुआ स्नेह जब बाहर नहीं आता तब आमाशय में गुरुता, शूल, वायु का अवरोध, हृदय में पीडा, मुख वैरस्य श्वास, मूर्च्छा, भ्रम और अरुचि होती है। इसमें लंघन के पश्चात् दीपन चिकित्सा विधि का प्रयोग हितकर होता है ॥ ८७-८८ ॥

अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाऽङ्गसदनाध्माने श्वासः शूलं च जायते ॥८९॥
पक्वाशयगुरुत्वं च तत्र द्रव्यान्निरूहणम् ।
तीक्ष्णं तीक्ष्णौषधैरेव सिद्धं चाप्यनुवासनम् ॥९०॥

अशुद्ध देहवाले को अनुवासन देने में व्यापद् और उनकी चिकित्सा—अशुद्ध शरीरवाले (विरेचन निरूह से रहित) व्यक्ति का मल से मिश्रित स्नेह जब पुनः बाहर नहीं आता तब अंगों में पीड़ा, आध्मान, श्वास और शूल उत्पन्न होता है एवं पक्वाशय में गुरुता होती है। इसमें निरूहण तथा तीक्ष्ण औषधियों से ही सिद्ध तीक्ष्ण अनुवासन का प्रयोग भी करना चाहिए ॥ ८९-९० ॥

शुद्धस्य दूरानुसृते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्वेन्द्रियाणामुपलेपोऽवसादनम् ॥९१॥
स्नेहगन्धि मुखं चापि कासश्वासावरोचकः ।
अति पीडितवत्तत्र सिद्धिरास्थापनं तथा ॥९२॥

स्नेह का अनुसरण उदर में होने पर व्यापद् तथा उनकी चिकित्सा—शुद्ध शरीर वाले (वमन विरेचन से युक्त) पुरुष में स्नेह के उदर में प्रवेश करने से, शरीर में स्नेह का दिखलाई पड़ना, इन्द्रियों में मलवृद्धि, ग्लानि, मुख में स्नेह की गन्ध, काम, श्वास, और अरुचि होती है। इसमें अधिक पीडित (दबाई गई) वस्ति की भाँति चिकित्सा विधि तथा आस्थापन वस्ति (निरूहण) का प्रयोग करना चाहिए ॥ ९१-९२ ॥

अस्विन्नस्याविशुद्धस्य स्नेहोऽल्पः संप्रयोजितः ।
शीतो मृदुश्च नाभ्येति ततो मन्दं प्रवाहते ॥९३॥
विच्यवगौरवाध्मानशूलाः पक्वाशयं प्रति ।
तत्राम्यापनमेवाशु प्रयोज्यं सानुवासनम् ॥९४॥

स्वेदन तथा शोधन से रहित अवस्था में अल्प स्नेह देने पर व्यापद् और उनकी चिकित्सा—स्वेदन तथा वमन विरेचन से रहित अशुद्ध शरीरवाले व्यक्ति के लिए प्रयुक्त मात्रा में अल्प, शीतल और मृदु स्नेह बाहर नहीं आता एवं धीरे-धीरे निकलता है, जिससे विबन्ध, गौरव, आध्मान और पक्वाशय में शूल होता है। इसमें शीघ्र आस्थापन के साथ अनुवासन वस्ति का प्रयोग करना चाहिए ॥ ९३-९४ ॥

अल्पं भुक्तवतोऽल्पो हि स्नेहो मन्दगुणस्तथा।
दत्तो नैति क्लमोत्क्लेशौ भृशं चारतिमावहेत् ॥९५॥

अल्प भोजन किए हुए को मन्दगुण स्नेहदान से व्यापद् और उनकी चिकित्सा—अल्प भोजन के पश्चात् अल्पमात्रा में दिया गया स्नेह मन्दगुण होने के कारण बाहर नहीं आता और श्रम, उत्क्लेश एवं अतिशय मानसिक व्याकुलता उत्पन्न करता है ॥ ९५ ॥

तत्राप्यास्थापनं कार्यं शोधनीयेन बस्तिना।
(अन्वासनं च स्नेहेन शोधनीयेन शस्यते) ॥९६॥

इस अवस्था में भी शोधनीय वस्ति से आस्थापन करना चाहिए। (शोधनीय स्नेहवस्ति से अनुवासन भी हितकर होता है।) ॥ ९६ ॥

अहोरात्रादपि स्नेहः प्रत्यागच्छन्न दुष्यति।
कुर्याद्धरितगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ॥९७॥

स्नेह वस्ति के न निकलने पर व्यापत्काल की अवधि का निर्देश—दिन-रात अर्थात् २४ घण्टे में भी वापस नहीं आया हुआ स्नेह विकार उत्पन्न नहीं करता और वस्ति का गुण प्रदान करता है, किन्तु जीर्ण होने पर अल्प गुण युक्त होता है ॥ ९७ ॥

यस्य नोपद्रवं कुर्यात् स्नेहवस्तिरनिःसृतः।
सर्वोऽल्पोवाऽऽवृतो रौक्ष्याद्युपेक्ष्यः स विजानता ॥९८॥

उपद्रव न करनेवाले स्नेहवस्ति के न निकलने पर उपेक्षा का निर्देश—रूक्षता के कारण अवरुद्ध जिस मनुष्य की सम्पूर्ण या अल्पमात्रा में बाहर न आई हुई स्नेहवस्ति कोई उपद्रव नहीं करती, बुद्धिमान वैद्य को उसकी उपेक्षा करनी चाहिए ॥ ९८ ॥

अनायान्त त्वहोरात्रात् स्नेह संशोधनैर्हरेत्।
स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते ॥९९॥

एक स्नेहवस्ति के बिना निकले दूसरी वस्ति न देने का निर्देश—एक अहोरात्र में बाहर नहीं आए हुए स्नेह को सशोधन के द्वारा निकालना चाहिए, स्नेहवस्ति के वापस न आने पर दूसरी स्नेहवस्ति का प्रयोग नहीं करना चाहिए ॥

इत्युक्ता व्यापदः सर्वाः सलक्षणचिकित्सिताः।
वस्तेरुत्तरसङ्ग्रस्य विधिं वक्ष्याम्यतः परम् ॥१००॥

उत्तरवस्ति विधि का निर्देश—इस प्रकार लक्षण और चिकित्सा के साथ सम्पूर्ण व्यापत्तियों का वर्णन किया गया। इसके आगे उत्तरवस्ति की विधि का कथन किया जा रहा है ॥ १०० ॥

चतुर्दशाङ्गुलं नेत्रमातुराङ्गुलसमितम्।
मालतीपुष्पवृन्ताग्र छिद्रं सर्षपनिर्गमम् ॥१०१॥

नेत्र प्रमाण—आतुर की अंगुलियों के माप से चौदह अंगुल, मालती पुष्प के वृन्त की भाँति अग्रभाग वाला तथा सरसों के निकलने योग्य छिद्र से युक्त होना चाहिए ॥ १०१ ॥

स्नेहप्रमाणं परमं प्रकुञ्चश्चात्र कीर्तितः।
पञ्चविंशादधो मात्रां विद्ध्याद्बुद्धिकल्पिताम् ॥१०२॥

उत्तरवस्ति के द्रव्य की मात्रा—(स्नैहिक) उत्तरवस्ति में स्नेह की उत्तम मात्रा एक पल होती है। पच्चीस वर्ष से अल्प आयु वाले व्यक्तियों के लिए स्नेह मात्रा की कल्पना वैद्य को अपनी बुद्धि से करनी चाहिए ॥ १०२ ॥

निविष्टकर्णिकं मध्ये, नारीणां चतुरङ्गुले।
मूत्रस्रोतःपरीणाह मुद्गवाहि दशाङ्गुलम् ॥१०३॥

स्त्रियों के उत्तरवस्ति के नेत्र का प्रमाण—पुरुषों के नेत्र में कर्णिका मध्यभाग में होनी चाहिए तथा स्त्रियों के नेत्र में चार अंगुल की दूरी पर। मूत्र के निकलने का मार्ग मूग के निकलने योग्य छिद्र तथा लम्बाई दश अंगुल होनी चाहिए ॥ १०३ ॥

मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः।
तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम् ॥१०४॥
द्व्यङ्गुलं मूत्रमार्गे तु कन्यानां त्वेकमङ्गुलम्।
विधेयं चाङ्गुलं तासां विधिवद्वक्ष्यते यथा ॥१०५॥

स्त्रियों के लिए नेत्र-प्रणिधान की विधि—कुछ अन्य विद्वान् नेत्र-प्रमाण मेढ्र के तुल्य मानते हैं। स्त्रियों के अपत्य-मार्ग में चार अंगुल नेत्र प्रविष्ट करना चाहिए और मूत्रमार्ग में दो अंगुल। कन्या (बारह वर्ष से न्यून आयु) के लिए एक अंगुल नेत्र का प्रयोग करना चाहिए और कही जाने वाली विधि के अनुसार उनकी अंगुलि प्रमाण का विधान करना चाहिए ॥ १०४-१०५ ॥

स्नेहस्य प्रसृतं चात्र स्वाङ्गुलीमूलसंमितम्।
देयं प्रमाणं परममवोग् बुद्धिविकल्पितम् ॥१०६॥

स्त्रियों की उत्तरवस्ति में स्नेह का मान—स्त्रियों के लिए स्नेह की मात्रा उनकी अंगुलि मूल के बराबर एक प्रसृत (अञ्जलि) लेना चाहिए और (बलवान रोग में) सभी अवस्थाओं में उक्त प्रमाण का प्रयोग करना चाहिए तथा (मध्यहीन बल रोग में) न्यून मात्रा की कल्पना अपनी बुद्धि के अनुसार करनी चाहिए ॥ १०६ ॥

औरभ्रः शौकरो वाऽपि बस्तिराजश्च पूजितः।
तदलाभे प्रयुञ्जीत गलचर्म तु पक्षिणाम् ॥१०७॥

उत्तरवस्ति के योग्य वस्ति का निरूपण—औरभ्र (भेडा) सूअर अथवा बकरे की वस्ति इनके लिए उत्तम होती है, उनके अभाव में पक्षियों के गलचर्म का प्रयोग करना चाहिए ॥

(अस्यालाभे दृतेः पादो मृदुचर्मततोऽपि वा)।
अथातुरमुपस्निग्धं स्विन्नं प्रशिथिलाशयम् ॥१०८॥
यवागूं सघृतक्षीरां पीतवन्तं यथाबलम्।
निपण्णमाजानुसमे पीठे सोपाश्रये समम् ॥१०९॥
स्वभ्यक्तबस्तिमूर्धानं तैलेनोष्णेन मानवम्।
ततः समं स्थापयित्वा नालमस्य प्रहर्षितम् ॥११०॥

पूर्वं शलाकयाऽन्विष्य ततो नेत्रमनन्तरम् ।
शनैः शनैर्घृताभ्यक्तं विदध्यादङ्गुलानि षट् ॥१११॥

पुरुषों की उत्तरवस्ति के प्रणिधान की विधि—(इसके अभाव में मशक का चतुर्थांश भाग या मृदुचर्म प्रयोग में लाना चाहिए) स्नेहन, स्वेदन से युक्त शिथिल आशय वाले रोगी को अग्निबल के अनुसार घृत, दुग्धयुक्त यवागू पिलाकर, घुटने के बराबर ऊँची, सहारे वाली चौकी पर सीधा बैठाना चाहिए और उष्ण तैल से वस्तिप्रदेश के ऊपरी भाग तथा रोगी की भलीभांति मालिश करनी चाहिए। फिर उस रोगी के दृढ़ लिङ्ग को सीधा स्थापित कर, प्रथम शलाका से मूत्रमार्ग का अन्वेषण करके, तदनन्तर घृत लगे हुए नेत्र को धीरे-धीरे ६ अंगुल प्रविष्ट करना चाहिए ॥ १०८-१११ ॥

मेढ्रायामसमं केचिदिच्छन्ति प्रणिधानकम् ।
ततोऽवपीडयेद्बस्तिं शनैर्नेत्रं च निर्हरेत् ॥११२॥

कुछ आचार्य पुरुषेन्द्रिय प्रमाण नेत्र-प्रवेश का कथन करते हैं। वस्ति को दबाकर धीरे से नेत्र निकाल लेना चाहिए ॥ ११२ ॥

विमर्शः—चरक ने पुरुषेन्द्रिय प्रमाण नेत्र-प्रवेश का विधान बतलाया है। 'ऋजः सुखोपविष्टस्य हृष्टे मेढ्रे घृताक्तिते। शलाकयाऽन्विष्य गतिं यथाप्रतिहता व्रजेत्। ततः शेफःप्रमाणेन पुष्पनेत्रं प्रवेशयेत्।' (च. सि. अ. ९)

ततः प्रत्यागतस्नेहमपराह्णे विचक्षणः ।
भोजयेत् पयसा मात्रां यूषेणाथ रसेन वा ॥११३॥

बुद्धिमान् वैद्य स्नेह के वापस आने पर रोगी को सायंकाल दूध, यूष अथवा मांसरस के साथ भोजन की मात्रा खिलावे ॥ ११३ ॥

अनेन विधिना दद्याद्वस्तींस्त्रींश्चतुरोऽपि वा ।
ऊर्ध्वजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः ॥११४॥

स्त्रियों की उत्तरवस्ति-प्रणिधान विधि—जानु को ऊँचा करके उत्तान लेटी हुई स्त्री को तीन या चार वस्ति बुद्धिमान वैद्य इस विधि से लगावे ॥ ११४ ॥

सम्यक् प्रपीडयेद्योनिं दद्यात् सुमृदुपीडितम् ।
त्रिकर्णिकेन नेत्रेण दद्याद्योनिमुखं प्रति ॥११५॥

वस्ति-प्रणिधान के समय योनि को दबाकर तीन कर्णिका वाले नेत्र को योनिमुख में प्रवेश करके धीरे-धीरे वस्ति दबानी चाहिए ॥ ११५ ॥

गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु ।
क्वाथप्रमाणं प्रसृतं, स्त्रिया द्विप्रसृतं भवेत् ॥११६॥

स्त्रियों के निरूह तथा उत्तरवस्ति के लिए क्वाथ का प्रमाण—गर्भाशय की शुद्धि के लिए स्त्रियों में स्नेह की मात्रा स्नेह से द्विगुण (पूर्वोक्त अंगुलिमूल-सम्मित प्रसृति की अपेक्षा द्विगुण) होनी चाहिए तथा क्वाथ की मात्रा (निरूहवस्ति के लिए पुरुषों में) एक प्रसृत और स्त्रियों के लिए दो प्रसृत होनी चाहिए ॥ ११६ ॥

कन्येतरस्याः, कन्यायास्तद्वद्वस्तिप्रमाणकम् ।
अप्रत्यागच्छति भिषग् बस्तावुत्तरसंज्ञिते ॥११७॥
भूयो बस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः ।
गुदे वर्तिं निदध्याद्वा शोधनद्रव्यसंभृताम् ॥११८॥

उत्तरवस्ति में स्नेह के न निकलने पर उसके निकालने का उपाय—प्रसूता या अप्रसूता तथा कन्या (बारह वर्ष से न्यून आयु) के लिए वस्ति-शोधनार्थ क्वाथ की मात्रा पुरुष की भांति रोगी को अञ्जलि की माप से एक प्रसृत लेनी चाहिए। उत्तरवस्ति के वापस आने पर वैद्य को पुनः शोधनगण के द्रव्यों से युक्त वस्ति लगानी चाहिए। अथवा शोधन द्रव्य मिश्रित वर्ति (विरेचन द्रव्य युक्त) गुदा में रखनी चाहिए ॥

प्रवेशयेद्वा मतिमान् बस्तिद्वारमथैषणीम् ।
पीडयेद्वाऽप्यधो नाभेर्बलेनोत्तरमुष्टिना ॥११९॥

अथवा बुद्धिमान् वैद्य को वस्तिद्वार में एषणी (शलाका) प्रवेश करना चाहिए या मुट्ठी के अग्रभाग से बलपूर्वक नाभि के नीचे दबाना चाहिए ॥ ११९ ॥

आरग्वधस्य पत्रैस्तु निर्गुण्ड्याः स्वरसेन च ।
कुर्याद्गोमूत्रपिष्टेषु वर्तीर्वाऽपि ससैन्धवाः ॥१२०॥
मुद्गैलासर्षपसमाः प्रविभज्य वयांसि तु ।
बस्तेरागमनार्थाय ता निदध्याच्छलाकया ॥१२१॥

अमलतास के पत्ते और सेन्धानमक को एक साथ निर्गुण्डी स्वरस या गोमूत्र के द्वारा पीसकर आयु के अनुसार मूंग, इलायची और सरसों के समान वर्ति बनानी चाहिए तथा वस्ति के आगमन के लिए शलाका की सहायता से उसे मूत्रमार्ग में रखना चाहिए ॥ १२०-१२१ ॥

आगारधूमबृहतीपिप्पलीफलसैन्धवैः ।
कृता वा शुक्तगोमूत्रसुरापिष्टैः सनागरैः ॥१२२॥

अथवा गृहधूम, बड़ी कटेरी, पिप्पल, मैनफल, सेन्धा नमक और सोंठ को शुक्त, गोमूत्र एवं सुरा के द्वारा पीसकर बनाई गई वर्ति का प्रयोग करना चाहिए ॥ १२२ ॥

अनुवासनसिद्धिं च वीक्ष्य कर्म प्रयोजयेत् ।

स्नैहिक उत्तरवस्ति के पश्चात् नितम्ब-ताडन आदि अनुवासन चिकित्साकर्म का प्रयोग समझकर करना चाहिए ॥

शर्करामधुमिश्रेण शीतेन मधुकाम्बुना ॥१२३॥
दह्यमाने तदा बस्तौ दद्याद्बस्तिं विचक्षणः ।
क्षीरवृक्षकषायेण पयसा शीतलेन च ॥१२४॥

वस्तिदाह में चिकित्सा—वस्ति में दाह होने पर शर्करा और मधु मिश्रित शीतल मुलेठी क्वाथ की वस्ति लगानी चाहिए। अथवा क्षीरवृक्ष के शीतल क्वाथ में दूध मिलाकर वस्ति प्रयोग करना चाहिए ॥ १२४ ॥

शुक्रं दुष्टं शोणितं चाङ्गनानां
पुष्पोद्रेकं तस्य नाशं च कष्टम् ।
मूत्राघातान्मूत्रदोषान् प्रवृद्धान्
योनिव्याधिं संस्थितिं चापरायाः ॥१२५॥
शुक्रोत्सेकं शर्करामश्मरीं च
शूलं बस्तौ वङ्क्षणे मेहने च ।
घोरानन्यान् बस्तिजांश्चापि रोगान्
हित्वा मेहानुत्तरो हन्ति बस्तिः ॥१२६॥

उत्तरबस्ति का फल—उत्तरबस्ति, प्रमेह को छोड़कर दूषित शुक्र और स्त्रियों के आर्तव, रज की अधिकता, रज का नाश एवं रजःकष्ट, मूत्राघात, मूत्रकृच्छ्र, योनिरोग, अपरा की रुकावट, शुक्रस्राव, अश्मरी तथा बस्ति, वङ्क्षण और लिङ्ग के शूल, एवं बस्ति की अन्य भयङ्कर व्याधियों को नष्ट करती है ॥ १२५-१२६ ॥

सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च ।
बस्तेरुत्तरसंज्ञस्य समानं स्नेहबस्तिना ॥१२७॥

इति श्रीसुश्रुतसंहितायां चिकित्सास्थानेऽनुवासनोत्तरबस्तिचिकित्सितं नाम सप्तत्रिंशोऽध्यायः ॥३७॥

भली भांति दी गई उत्तरबस्ति के लक्षण, उसके दोष और उनकी चिकित्सा स्नेहबस्ति के समान होती है ॥ १२७ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायां सप्तत्रिंशोऽध्यायः ॥

अष्टत्रिंशत्तमोऽध्यायः

अथातो निरूहक्रमचिकित्सितं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

निरूह विधान का उपक्रम—इसके अनन्तर निरूह विधान के द्वारा चिकित्सा विधि का वर्णन किया जा रहा है, जैसा कि भगवान धन्वन्तरि ने (सुश्रुत प्रभृति शिष्यों से) कहा ॥ १-२ ॥

अथानुवासितमास्थापयेत्; स्वभ्यक्तस्विन्नशरीरमुत्सृष्टबहिर्वेगमवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्यायामधःशिरसमुपरिग्रहायां श्रोणिप्रदेशप्रतिव्यूढायामनुपधानायां वामपार्श्वशायिनमाकुञ्चितदक्षिणसक्थमितरप्रसारितसक्थं सुमनसं जीर्णान्नं वाग्यतं सुनिषण्णदेहं विदित्वा, ततो वामपादस्योपरि नेत्रं कृत्वेतरपादाङ्गुष्ठाङ्गुलिभ्यां कर्णिकामुपरि निष्पीड्य, सव्यपाणिकनिष्ठिकानामिकाभ्यां वस्तेर्मुखार्थं सङ्कोच्य, मध्यमाप्रदेशिन्यङ्गुष्ठैरर्थं तु विवृतास्यं कृत्वा, वस्तावौषधं प्रक्षिप्य, दक्षिणहस्ताङ्गुष्ठेन प्रदेशिनीमध्यमाभ्यां चानुत्सिक्तमनायतमबुद्बुदमसङ्कुचितमवातमौषधासन्नमुपसंगृह्य, पुनरुपरि तदितरेण गृहीत्वा दक्षिणेनावसिञ्चेत्, ततः मूत्रेणौषधान्ते द्विर्निर्वाऽऽवेष्ट्य बध्नीयात्, अथ दक्षिणेनोत्तानेन पाणिना बस्तिं गृहीत्वा वामहस्तमध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रमुपसंगृह्याङ्गुष्ठेन नेत्रद्वारं पिधाय, घृताभ्यक्ताग्रनेत्रं घृताक्तमुपादाय प्रयच्छेदनुपूर्व्वशं ममसुन्मुखमाकर्णिकं नेत्रं प्रणिधत्स्वेति ब्रूयात् ॥३॥

निरूह के प्रणयन की विधि—अनुवासित (अनुवासन बस्ति प्रयुक्त) पुरुष को आस्थापन (निरूह बस्ति) देना चाहिए। भली भांति स्नेहन, स्वेदन से युक्त शरीर तथा मल-मूत्र का त्याग किए हुए व्यक्ति को वायु रहित, पवित्र गृह में मध्याह्न काल के समय, निम्नभाग में सुन्दर पड़ने योग्य स्थान वाली, कटि प्रदेश की ओर विशाल एवं सिरहाने से रहित फैली हुई शय्या पर बाँये पसवाड़े से लिटाना चाहिए। उस व्यक्ति के दाहिने पैर को सिकोड़ कर बायाँ पैर फैला देना चाहिए और उसे प्रसन्न-चित्त, अन्न का परिपाक हो गया है तथा मौन होकर अंस प्रदेश को उन्नत रख विश्राम कर रहा है, ऐसा समझ कर (देख कर) बायें पैर के ऊपर नेत्र को रख, दूसरे पैर के अंगूठे और अंगुलि से बस्ति-कर्णिका को उपर उठा कर, बायें हाथ की कनिष्ठिका एवं अनामिका से बस्ति के आधे मुख को बन्द करके, मध्यमा, तर्जनी और अंगूठे से आधे मुख को खोल कर बस्ति में औषध भरना चाहिए। फिर दाहिने हाथ के अंगूठे, तर्जनी और मध्यमा अंगुलि से, ऊपर के भाग से औषध न निकले इतनी भरी हुई, विस्तार रहित, बुलबुले से रिक्त असंकुचित एवं वायु-विहीन बस्ति को औषधि के समीप पकड़ कर, बायें हाथ से दाहिने हाथ के ऊपर पकड़ना चाहिए और दाहिने हाथ से ही इसमें औषधि भरना चाहिए तथा औषधि के अन्त भाग में दो-तीन बार सूत्र लपेट कर बांधना चाहिए। तदनन्तर सीधे दाहिने हाथ से बस्ति को पकड़ना चाहिए और बायें हाथ की मध्यमा एवं तर्जनी अंगुलि से नेत्र को पकड़ कर, अंगूठे से नेत्र के मुख को बन्द करके, अग्र भाग में घृत लगे हुए नेत्र को घृतयुक्त गुदा में प्रविष्ट करने के लिए पृष्ठ वंश के नीचे देना चाहिए और कर्णिका को सीधे ऊपर रखते हुए नेत्र को प्रविष्ट करो ऐसा रोगी से कहना चाहिए ॥ ३ ॥

बस्तिं सव्ये करे कृत्वा दक्षिणेनावपीडयेत् ।
एकेनैवावपीडेन न द्रुतं न विलम्बितम् ॥ ४ ॥

बायें हाथ से बस्ति को पकड़ कर दाहिने हाथ से एक ही दबाव में न तो बहुत शीघ्र और न धीरे धीरे बस्ति को दबाना चाहिए ॥ ४ ॥

ततो नेत्रमपनीय त्रिंशन्मात्राः पीडनकालादुपेक्ष्योत्तिष्ठेत्यातुरं ब्रूयात् । अथातुरमुपवेशयेदुत्कुटुकं बस्त्यागमनार्थम् । निरूहप्रत्यागमनकालस्तु मुहूर्तो भवति ॥५॥

नेत्र को बाहर निकाल कर, बस्ति देने से लेकर तीस मात्रा तक प्रतीक्षा करनी चाहिए फिर रोगी को खड़ा होने के लिए कहना चाहिए। बस्ति के बाहर आने के लिए रोगी को उकड़ू बैठाना चाहिए। निरूह बस्ति के वापस आने का समय एक मुहूर्त (दो घड़ी) होता है ॥ ५ ॥

विमर्शः—उत्सृष्टबहिर्वेगं त्यक्तविण्मूत्रादिकम् । प्रततायां शय्यायां स्तब्धायां विस्तीर्णायामिति केचित् । श्रोणिप्रदेशव्यूढायां कटिप्रदेशविशालायाम् । सुनिषण्णदेहम् असोज्झन यथा स्यात्तथा विश्रान्तशरीरम् । सव्यपाणिर्वामकरः । अनुत्सिक्तमूर्ध्वक्षरणरहितं यथा भवति तथा सिक्तम् । अनायतमनतिदीर्घम् (अचिरात् प्रवृत्तम्) । आर्कारिक कर्णिकां मर्य्यादीकृत्य । नेत्र प्रणिधत्स्व प्रवेशयेति आतुरं प्रति भिषग् ब्रूयात् । त्रिंशन्मात्रा इति मात्रामान हि अग्निवेशेन व्याख्यातम्-'यावत् पर्येति हस्ताग्र दक्षिण जानुमण्डलम् । निमेषोन्मेषकालो वा सा मात्रा परिकीर्त्तिता' । मुहूर्तो घटिकाद्वयम् ।

अनेन विधिना बस्तिं दद्याद्बस्तिविशारदः ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्थतः ॥ ६ ॥

वस्ति क्रिया के जानने वाले वैद्य को प्रयोजन के अनुसार इस विधि से दूसरी, तीसरी अथवा चौथी वस्ति का प्रयोग करना चाहिए ॥ ६ ॥

सम्यङ्निरूढलिङ्गे तु प्राप्ते बस्तिं निवारयेत् ।
विशेषात् सुकुमाराणां हीन एव क्रमो हितः ॥ ७ ॥

निरूह के अतियोग का निषेध—निरूह वस्ति के भली भांति प्रयुक्त होने के लक्षणों की उपस्थिति होने पर वस्ति प्रयोग बन्द कर देना चाहिए तथा सुकुमार मनुष्यों के लिए विशेष रूप से वस्तियों का कम ही प्रयोग करना चाहिए ॥७॥

अपि हीनक्रमं कुर्यान्न तु कुर्यादतिक्रमम् ।
यस्य स्याद्वस्तिरल्पोऽल्पवेगो हीनमलानिलः ॥ ८ ॥
दुर्निरूढः स विज्ञेयो मूत्रार्त्यरुचिजाड्यवान् ।

दुर्निरूढ के लक्षण—वस्ति प्रयोग का क्रम अल्प भले ही रहे किन्तु उसका अधिक प्रयोग नहीं करना चाहिए। जिस व्यक्ति की वस्ति अल्प गुण वाली हो, वेग अल्प हो, मल और वायु की न्यूनता हो तथा जिसमें मूत्रपीडा, अरुचि एवं जडता उत्पन्न हो उसे दुर्निरूढ (भली भांति निरूह प्रयोग न होना) समझना चाहिए ॥ ८ ॥

यान्येव प्राङ्न्यायोक्तानि लिङ्गान्यतिविरेचिते ॥ ९ ॥
तान्येवातिनिरूढेऽपि विज्ञेयानि विपश्चिता ।

अतिनिरूढ के लक्षण—अतिविरेचन के जिन लक्षणों का वर्णन हमने पहले किया है उन्हीं लक्षणों को अतिनिरूह में भी बुद्धिमान् वैद्य को समझना चाहिए ॥ ९ ॥

यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ॥१०॥
लाघवं चोपजायेत सुनिरूढं तमादिशेत् ।

सुनिरूढ के लक्षण—जिस व्यक्ति का मल, पित्त, कफ और वायु क्रम से बाहर निकलता है तथा शरीर में लघुता उत्पन्न होती है उसे सुनिरूढ (भली भांति निरूह प्रयुक्त) समझना चाहिए ॥ १० ॥

सुनिरूढं ततो जन्तुं स्नातवन्तं तु भोजयेत् ॥११॥

फिर स्नान किये हुए सुनिरूढ पुरुष को भोजन कराना चाहिए ॥ ११ ॥

पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
सर्वं वा जाङ्गलरसैर्भोजयेदविकारिभिः ॥१२॥

पित्त, श्लेष्मा और वात युक्त सुनिरूढ व्यक्ति को क्रमशः दूध, यूष एव मांसरस के साथ अथवा सभी को विकार रहित जाङ्गल जीवों के मांसरस के साथ भोजन कराना चाहिए ॥ १२ ॥

त्रिभागहीनमर्धं वा हीनमात्रमथापि वा ।
यथाग्निदोषं मात्रेयं भोजनस्य विधीयते ॥१३॥

भोजन तीन हिस्सा अथवा आधा या अल्प मात्रा में न्यून होना चाहिए तथा भोजन की इस मात्रा का विधान अग्नि और दोष के अनुसार करना चाहिए ॥ १३ ॥

अनन्तरं ततो युञ्ज्याद्यथास्वं स्नेहबस्तिना ।
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ॥१४॥
आस्थापनस्नेहबस्त्योः सम्यग्दाने तु लक्षणम् ।

स्नेहवस्ति के गुण—इसके पश्चात् दोष के अनुसार स्नेहवस्ति का प्रयोग करना चाहिए। आस्थापन और स्नेहवस्ति के भली भांति प्रयुक्त होने पर इन्द्रियों की ग्रहणशक्ति में वृद्धि, मन में प्रसन्नता, स्निग्धता एव व्याधि की शान्ति होती है ॥१४॥

तदहस्तस्य पवनाद्भयं बलवदिष्यते ॥१५॥
रसौदनस्तेन शस्तस्तदहश्चानुवासनम् ।

उस दिन (निरूह वस्ति के प्रयोग के दिन) रोगी को वायु के प्रकोप का प्रबल भय रहता है, इसलिए मांसरस के साथ चावल का भोजन तथा उसी दिन अनुवासन वस्ति का प्रयोग करना चाहिए ॥ १५ ॥

पश्चादग्निबलं मत्वा पवनस्य च चेष्टितम् ॥१६॥
अन्नोपस्तम्भिते कोष्ठे स्नेहबस्तिर्विधीयते ।

इसके अनन्तर अग्नि-बल तथा वायु की क्रियाओं का ज्ञान करके अन्न-पान से अवरुद्ध कोष्ठ में स्नेह वस्ति का प्रयोग करना चाहिए ॥ १६ ॥

अनायान्त मुहूर्तात्तु निरूहं शोधनैर्हरेत् ॥१७॥
तीक्ष्णैर्निरूहैर्मतिमान् क्षारमूत्राम्लसंयुतैः ।

यदि एक मुहूर्त अर्थात् दो घडी में निरूह वस्ति वापस न आवे तो शोधनीय तथा यवक्षार, गोमूत्र एवं काञ्जी मिश्रित तीक्ष्ण निरूहों के द्वारा बुद्धिमान् वैद्य को उसे बाहर निकालना चाहिए ॥ १७ ॥

विगुणानिलविष्टब्धं चिरं तिष्ठन्निरूहणम् ॥१८॥
शूलारतिज्वरानाहान्मरणं वा प्रवर्तयेत् ।

देर तक निरूह के रहने से दोष—विपरीत गति वाले वायु से अवरुद्ध हुआ निरूह बहुत काल तक रुक जाता है जिससे शूल, अरति (किसी कार्य में मन का न लगना), ज्वर और आनाह की उत्पत्ति अथवा मृत्यु भी हो जाती है ॥ १८ ॥

न तु भुक्तवतो देयमास्थापनमिति स्थितिः ॥१९॥
विसूचिकां वा जनयेच्छर्दिं वाऽपि सुदारुणाम् ।
कोपयेत् सर्वदोषान् वा तस्माद्भुक्तवद्भोजिने ॥२०॥

अन्न खाये हुये को आस्थापन का निषेध—भोजन किये हुए व्यक्ति को आस्थापन नहीं देना चाहिए क्योंकि इससे विसूचिका की उत्पत्ति या भयङ्कर वमन होता है अथवा सम्पूर्ण दोष कुपित हो जाते है। इसलिए निरूह वस्ति का प्रयोग भोजन न किए हुए व्यक्तियों के लिए ही करना चाहिए ॥ १९-२० ॥

जीर्णान्नस्याशये दोषाः पुंसः प्रव्यक्तिमागताः ।
निःशेषाः सुखमायान्ति भोजनेनाप्रपीडिताः ॥२१॥

जीर्ण अन्न वाले के लिये आस्थापन देने में गुण—जीर्ण अन्न वाले व्यक्ति के पक्वाशय में निरावरण रूप में स्थित दोष, भोजन के द्वारा पीडित न होने पर, सम्पूर्ण रूप में सुखपूर्वक बाहर निकल जाते है ॥ २१ ॥

न वाऽऽस्थापनविक्षिप्तमन्नमग्निः प्रधावति ।
तस्मादास्थापनं देयं निराहाराय जानता ॥२२॥

आस्थापन वस्ति के द्वारा विक्षिप्त हुई (दुर्बल हुई) अग्नि अन्न की ओर नहीं दौडती अर्थात् अन्न का परिपाक करने में समर्थ नहीं रहती अतः कुशल चिकित्सक को आस्थापन वस्ति का प्रयोग निराहार मनुष्य के लिए ही करना चाहिए ॥

आवस्थिकं क्रमं चापि बुद्ध्वा कार्यं निरूहणम्।
मलेऽपकृष्टे दोषाणां बलवत्त्वं न विद्यते ॥२३॥

अवस्था विशेष में अन्न खाये हुए को भी निरूह देने का निर्देश—आवस्थिक क्रम का ज्ञान करके (तीव्र शूल, आध्मान आदि रोगों की अवस्था में चिकित्सा के द्वारा ऊर्ध्व भाग से दोषों की शुद्धि न होने पर भोजन किए हुए व्यक्ति को भी फलवर्ति आदि के प्रयोग से निरूह का प्रयोग करना) अर्थात् रोगों की अवस्था के अनुसार चिकित्सा क्रम का निर्णय कर निरूह वस्ति का प्रयोग करना चाहिए क्योंकि मल के निकल जाने पर दोष निर्बल हो जाते हैं ॥ २३ ॥

क्षीराण्यम्लानि मूत्राणि स्नेहाः काथा रसास्तथा।
लवणानि फलं क्षौद्रं शताह्वा सर्षपं वचा ॥२४॥
एला त्रिकटुकं रास्ना सरलो देवदारु च।
रजनी मधुकं हिङ्गु कुष्ठं संशोधनानि च ॥२५॥
कटुका शर्करा मुस्तमुशीरं चन्दनं शटी।
मञ्जिष्ठा मदनं चण्डा त्रायमाणा रसाञ्जनम् ॥२६॥
बिल्वमध्यं यवानी च फलिनी शक्रजा यवाः।
काकोली क्षीरकाकोली जीवकर्षभकावुभौ ॥२७॥
तथा मेदा महामेदा ऋद्धिर्वृद्धिर्मधूलिका।
निरूहेषु यथालाभमेष वर्गो विधीयते ॥२८॥

आस्थापन में उपयोगी द्रव्य—सभी प्रकार के दूध, अम्ल, मूत्र, स्नेह, क्वाथ, मांसरस तथा लवण, त्रिफला, मधु, सौंफ, सरसों, वच, इलायची, त्रिकटु (सोंठ, मरिच, पिप्पली), रास्ना, सरलवृक्ष, देवदारु, हल्दी, मुलेठी, हींग, कूठ, संशोधन द्रव्य (त्रिवृत् आदि), कुटकी, शर्करा, नागरमोथा, खस, चन्दन, कचूर, मजीठ, मैनफल, चण्डा (लाल कनेर), त्रायमाणा, रसोत, बेलगिरी, अजवायन, प्रियङ्गु, इन्द्रयव, काकोली, क्षीरकाकोली, जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि और मधूलिका (तृणविशेषः मर्कटिकेति लोके) इस वर्ग में से जितनी औषधियाँ मिल सकें उनका प्रयोग निरूहबस्तियों में किया जाता है ॥ २४-२८ ॥

स्वस्थे काथस्य चत्वारो भागाः स्नेहस्य पञ्चमः।
क्रुद्धेऽनिले चतुर्थस्तु षष्ठः पित्ते कफेऽष्टमः ॥२९॥

निरूह में दोषानुसार क्वाथ की मात्रा—स्वस्थ पुरुष के लिए (निरूह) क्वाथ के चारों भाग और स्नेह का पाँचवा भाग तथा वात प्रकोप में स्नेह का चौथा भाग, पित्त प्रकोप में छठा एवं कफ प्रकोप में आठवां भाग होना चाहिए ॥ २९ ॥

सर्वेषु चाष्टमो भागः कल्कानां, लवणं पुनः।
क्षौद्रं मूत्रं फलं क्षीरमम्लं मांसरसं तथा ॥३०॥
युक्त्या प्रकल्पयेद्धीमान् निरूहे कल्पनात्रियम् ॥३१॥

तीनों दोषों के प्रकोप में कल्क आठवां भाग तथा लवण मधु, मूत्र, फल, दूध, काञ्जी एवं मांसरस का योग बुद्धिमान् वैद्य को युक्तिपूर्वक करना चाहिए। निरूहबस्ति की कल्पना निम्न लिखित रूप में है ॥ ३०-३१ ॥

विमर्शः—स्वस्थे समवातपित्तकफे पुरुष। द्वादश प्रसृतस्य निरूहस्य चत्वारो भागाश्चत्वारः प्रसृता अष्टौ पलानि। स्नेहस्य भाग. पञ्चम इति चतुर्विंशतिपलनिरूहापेक्षया पादोनषड्पलानि। क्रुद्धेऽनिले चतुर्थ इति चतुर्थो भाग. षट् पलानीत्यर्थः। षष्ठः पित्ते इति क्रुद्धे पित्ते स्नेहस्य षष्ठो भागः चत्वारि पलानीत्यर्थः। कफेऽष्टम इति क्रुद्धे कफे स्नेहस्याष्टमो भागस्त्रीणि पलानीत्यर्थः। सर्वत्र वातपित्तश्लेष्मसु कल्कस्य अष्टमो भागस्त्रीणि पलानीत्यर्थः। सर्वेषु स्वस्थास्वस्थेषु इति गयी। लवण पुनरित्यादि लवणाद्रीनि विशेषप्रमाणेनानुक्तान्यपि युक्त्या दापयेत्, युक्त्या योगेनेत्यर्थः।

कल्कस्नेहकषायाणामविवेकाद्भिषग्वरैः।
बस्तेः सुकल्पना प्रोक्ता तस्य दानं यथार्थकृत् ॥३२॥

वस्ति द्रव्य के योजन का क्रम—श्रेष्ठ वैद्यों ने कल्क, स्नेह और कषाय के अपृथग्भाव (आपस में घुला-मिला रहना) को ही वस्ति की सुन्दर कल्पना बतलाई है तथा इसका दान (प्रयोग) यथार्थकृत् अर्थात् वात, पित्त, कफ और शोणित का हरण, शोधन, संग्रहण, लेखन, बृंहण, वाजीकरण एवं रसायन आदि गुणों को करने वाला होता है ॥ ३२ ॥

दत्त्वाऽऽदौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम्।
पात्रे तलेन मथ्नीयात्तद्वत् स्नेहं शनैः शनैः ॥३३॥
सम्यक् सुमथिते दद्यात् फलकल्कमतः परम्।
ततो यथोचितान् कल्कान् भागैः स्वैः श्लक्ष्णपेषितान् ॥३४॥

प्रथम सैन्धानमक एक कर्ष तथा मधु दो प्रसृत (चारपल) मिला कर हथेली से मथना चाहिए और मथते समय धीरे-धीरे मधु के तुल्य स्नेह मिलाते रहना चाहिए। इसके बाद भली भाति मथन हो जाने पर, मैनफल का कल्क मिला कर फिर वातादि दोषों को दूर करने वाले अन्य द्रव्यों का महीन पिसा हुआ कल्क उनके अंश के समान मिलाना चाहिए ॥

गम्भीरे भाजनेऽन्यस्मिन्मथ्नीयात्त खजेन च।
यथा वा साधु मन्येत न सान्द्रो न तनुः समः ॥३५॥

दूसरे गहरे पात्र में उपर्युक्त द्रव्यों का मथनी से मन्थन करना चाहिए अथवा जिस प्रकार उचित दिखलाई पड़े वैसे मथना चाहिए किन्तु इसका ध्यान रखना चाहिए कि द्रव्य न तो अधिक गाढ़ा और न पतला हो जाय अपि तु समान रहे ॥

रसक्षीराम्लमूत्राणां दोषावस्थामवेक्ष्य तु।
कषायप्रसृतान् पञ्च सुपूतांस्तत्र दापयेत् ॥३६॥

मांसरस, दूध, काञ्जी और मूत्र का मिश्रण दोषों की अवस्था के अनुसार करना चाहिए तथा पांच प्रसृत छाना हुआ क्वाथ इसमें मिलाना चाहिए ॥ ३६ ॥

अत ऊर्ध्वं द्वादशप्रसृतान् वक्ष्यामः—

दत्त्वाऽऽदौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥३७॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्।
संमूर्च्छिते कषायं तु चतुःप्रसृतिसंमितम् ॥३८॥
वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम्।
एव प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् ॥३९॥

द्वादश प्रसृत-प्रमाण का साधन—इसके आगे द्वादश प्रसृत प्रमाण की साधन विधि का वर्णन किया जाता है—प्रथम सैन्धा नमक एक कर्ष लेकर इसके साथ दो प्रसृति (चार पल) मधु मिला दोनों को मथकर, तीन प्रसृति

स्नेह मिलाना चाहिए और स्नेह के मिल जाने पर एक प्रसृति कल्क द्रव्य डालना चाहिए। जब सभी द्रव्य आपस में भली-भाँति मिल जाँय तब चार प्रसृति कषाय मिलाना चाहिए। सबके अन्त में दो प्रसृति प्रक्षेप द्रव्य का संयोग करना चाहिए। इस प्रकार बनाई गई वस्ति द्वादश-प्रसृत होती है ॥ ३७–३९ ॥

ज्येष्ठाया. खलु मात्रायाः प्रमाणमिदमीरितम् ।
अपह्रासे भिषक्कुर्यात्तद्वत प्रसृतिहापनम् ॥४०॥

ज्येष्ठ अर्थात् उत्तम मात्रा का यह प्रमाण बतलाया गया है। यदि इस मात्रा में न्यूनता करनी हो तो वैद्य को एक प्रसृति न्यून कर देनी चाहिए ॥ ४० ॥

यथावयो निरूहाणां कल्पनेयमुदाहृता ।
सैन्धवादिद्रवान्तानां सिद्धिकामैर्भिषग्वरैः ॥४१॥

सिद्धि की कामना करनेवाले श्रेष्ठ वैद्यों ने सैन्धव से लेकर कषाय पर्यन्त निरूहवस्तियों की यह कल्पना आयु के अनुसार की है ॥ ४१ ॥

अत ऊर्ध्वं प्रवक्ष्यन्ते बस्तयोऽत्र विभागशः ।
यथादोषं प्रयुक्ता ये हन्युर्नानाविधान् गदान् ॥४२॥

इसके आगे विभाग के अनुसार वस्तियों का वर्णन किया जाता है, जो वातादि दोषों के अनुसार प्रयुक्त होने पर विविध प्रकार की व्याधियों का नाश करती हैं ॥ ४२ ॥

शम्पाकोरुबुवर्षाभूवाजिगन्धानिशाच्छदैः ।
पञ्चमूलीबलारास्नागुडूचीसुरदारुभिः ॥४३॥
कथितैः पालिकैरेभिर्मदनाष्टकसंयुतैः ।
कल्कैर्मार्गविकाम्भोदहपुषामिसिसैन्धवैः ॥४४॥
वत्साह्वयप्रियङ्गूम्रायष्ट्याह्वयरसाञ्जनैः ।
दद्यादास्थापनं कोष्णं क्षौद्राद्यैरभिसंस्कृतम् ॥४५॥

शम्पाकादि आस्थापन—अमलतास, एरण्ड, पुनर्नवा, अश्वगन्ध, निशाच्छद (कचूर), लघुपञ्चमूल, खरेटी, रास्ना, गुडूची और देवदारु, एक एक पल तथा आठ मदनफल, (चार मैनफल बराबर है एक पल के) इस प्रकार इन सोलह पल द्रव्यों का क्वाथ करना चाहिए और इसमें पिप्पल, नागरमोथा, हाऊबेर, सौंफ, सेन्धानमक, इन्द्रयव, प्रियङ्गु, मुलेठी एवं रसोत का कल्क मिलाकर मधु आदि से संस्कृत करके सहने योग्य उष्ण आस्थापन वस्ति का प्रयोग करना चाहिए ॥

पृष्ठोरुत्रिकशूलाश्मविण्मूत्रानिलसङ्गिनाम् ।
ग्रहणीमारुतार्शोघ्नं रक्तमांसबलप्रदम् ॥४६॥

इसके प्रयोग से पृष्ठ, ऊरु और कटिशूल, अश्मरी, मल-मूत्र-वायु का अवरोध, ग्रहणी, वात तथा अर्श रोग नष्ट होते हैं तथा रक्त, मांस एवं बल की प्राप्ति होती है ॥ ४६ ॥

गुडूचीत्रिफलाराम्नादशमूलबलापलैः ।
कथितैः श्लक्ष्णपिष्टैस्तु प्रियङ्गुघनसैन्धवैः ॥४७॥
शतपुष्पावचाकृष्णायवानीकुष्ठबिल्वजैः ।
सगुडैरक्षमात्रैस्तु मदनार्धपलान्वितैः ॥४८॥
क्षौद्रतैलघृतक्षीरशुक्ताकाञ्जिकमस्तुभिः ।
समालोड्य च मूत्रेण दद्यादास्थापनं परम् ॥४९॥

गुडूच्यादि आस्थापन—गुडूची, त्रिफला, रास्ना, दशमूल, खरेंटी और मांस का क्वाथ करके प्रियङ्गु, नागरमोथा, सेंधा-नमक, सौंफ, वच, पिप्पल, अजवायन, कूठ, बेलगिरि और गुड एक-एक कर्ष तथा मैनफल आधा पल पीसकर क्वाथ में मिलाना चाहिए, फिर इसमें मधु, तैल, घृत, दूध, शुक्त, काञ्जी, मस्तु एवं गोमूत्र घोलकर आस्थापन वस्ति का प्रयोग करना चाहिए ॥

विमर्श—पल मासम् । गुडूच्यादीनि बलान्तानि षोडशद्रव्याणि प्रत्येक पलमितानि तथा मासस्यापि षोडशपलानि एव सप्तदश द्रव्याणि द्वात्रिंशत्पलपरिमितानि, मासस्य षट्त्रिंशदधिकशतपल प्रमाण जल दत्त्वा क्वाथयेत् । बिल्वज बिल्वफलम् ।

तेजोवर्णबलोत्साहवीर्याग्निप्राणवर्धनम् ।
सर्वमारुतरोगघ्नं वयःस्थापनमुत्तमम् ॥५०॥

इसके प्रयोग से शरीर की कान्ति, वर्ण, बल, उत्साह, शक्ति, अग्नि और प्राण (अग्नीषोमादयः) की वृद्धि होती है तथा यह समस्त वातरोगों को नष्ट करता है एवं आयु को स्थिर रखने में श्रेष्ठ है ॥ ५० ॥

कुशादिपञ्चमूलाब्दत्रिफलोत्पलवासकैः ।
सारिवोशीरमञ्जिष्ठाराम्नारेणुपरूपकैः ॥५१॥
पालिकैः कथितैः सम्यग् द्रव्यैरेभिश्च पेषितैः ।
शृङ्गाटकात्मगुप्तेभकेसरागुरुचन्दनैः ॥५२॥
विदारीमिसिमञ्जिष्ठाश्यामेन्द्रयवसिन्धुजैः ।
फलपद्मकयष्ट्याह्वैः क्षौद्रक्षीरघृताप्लुतैः ॥५३॥
दत्तमास्थापनं शीतमम्लहीनैस्तथा द्रवैः ।
दाहासृग्दरपित्तास्रकृपित्तगुल्मज्वरान्नयेत् ॥५४॥

कुशादि आस्थापन—तृणपञ्चमूल (कुश, काश, नल, दर्भ, काण्डेक्षु), नागरमोथा, त्रिफला, नीलकमल, अड़ूसा, सारिवा, खस, मजीठ, रास्ना, रेणु (पर्पटक) और फालसे को एक एक पल लेकर भलीभाँति क्वाथ करके इसमें महीन पिसा हुआ सिंघाड़ा, कौंच के बीज, गजपिप्पल, नागकेशर, अगर, चन्दन, विदारीकन्द, सौंफ, मजीठ, श्यामा (प्रियङ्गु), इन्द्रयव, सेन्धानमक, मैनफल, पद्माख और मुलेठी मिलाना चाहिए फिर मधु, दूध एवं घृत घोलकर शीतल करके अम्ल द्रव्यों से रहित एवं मांसरस, इक्षुरस आदि द्रवों से युक्त, आस्थापन वस्ति का प्रयोग करना चाहिए। इसके प्रयोग से दाह, रक्तप्रदर, रक्तपित्त, पित्तजगुल्म और ज्वर नष्ट होता है ॥ ५१–५४ ॥

रोध्रचन्दनमञ्जिष्ठाराम्नाऽनन्तावलर्धिभिः ।
सारिवावृषकाश्मर्यमेदामधुकपद्मकैः ॥५५॥
स्थिरादितृणमूलैश्च काथः कर्षत्रयोन्मितैः ।
पिष्टैर्जीवकर्षभकाकोलीयुगर्धिमधुकोत्पलैः ॥५६॥
प्रपौण्डरीकजीवन्तीमेदारेणुपरूपकैः ।
अभीरुमिसिसिन्धूत्थवत्सकोशीरपद्मकैः ॥५७॥
कसेरुशर्करायुक्तैः सर्पिर्मधुपयप्लुतैः ।
द्रवैस्तीक्ष्णाम्लवर्ज्यैश्च दत्तो बस्तिः सुशीतलः ॥५८॥
गुल्मासृग्दरहृत्पाण्डुरोगान् सविषमज्वरान् ।

असृक्पित्तातिसारौ च हन्यात्पित्तकृतान् गदान् ॥५८॥

लोध्रादि आस्थापन—लोध, चन्दन, मजीठ, रास्ना, अनन्तमूल, खरेंटी, ऋद्धि, सारिवा, अडूसा, गम्भारी, मेदा, मुलेठी, पद्माख, स्थिरादि (लघुपञ्चमूल) और तृणपञ्चमूल तीन तीन कर्ष लेकर क्वाथ करके इसमें पिसा हुआ जीवक, काकोली, क्षीरकाकोली, ऋद्धि, मुलेठी, नीलकमल, पुण्डेरी, जीवन्ती, मेदा, पित्तपापड़ा, फालसा, अभीरु (शतावरी), सौंफ, सेन्धानमक, इन्द्रयव, खस, पद्माख और कसेरु मिलाना चाहिए फिर शर्करा, घृत, मधु एवं दूध घोलकर तथा तीक्ष्ण और अम्ल द्रव्यों से रहित, शीतल वस्ति का प्रयोग करना चाहिए। इसके प्रयोग से गुल्म, रक्तप्रदर, हृद्रोग, पाण्डुरोग, विषमज्वर, रक्तातिसार, पित्तातिसार तथा अन्य पित्तज व्याधियाँ नष्ट होती हैं ॥ ५५-५९ ॥

भद्रानिम्बकुलत्थार्ककोशातक्यमृतामरैः ।
सारिवाबृहतीपाठामूर्वाऽऽरग्वधवत्सकैः ॥६०॥
क्वाथः, कल्कस्तु कर्तव्यो वचामदनसर्षपैः ।
सैन्धवामरकुष्ठैलापिप्पलीविल्वनागरैः ॥६१॥
कटुतैलमधुक्षारमूत्रतैलाम्लसंयुतैः ।
कार्यमास्थापनं तूर्णं कामलापाण्डुमेहिनाम् ॥६२॥
मेदस्विनामनग्नीनां कफरोगाशनद्विषाम् ।
गलगण्डगरग्लानिश्लीपदोदररोगिणाम् ॥६३॥

भद्रादि आस्थापन—भद्रा (कायफल), नीम की छाल, कुलथी, मदार, कड़ुई तरोई, गिलोय, देवदारु, सारिवा, बड़ी कटेरी, पाठा, मूर्वा, अमलतास और इन्द्रयव का क्वाथ करके इसमें वच, मैनफल, सरसों, सेन्धानमक, देवदारु, कूट, इलायची, पिप्पल, बेलगिरी और सोंठ का कल्क मिलाकर कटुतैल, मधु, यवक्षार, गोमूत्र, तिलतैल तथा काञ्जी का मिश्रण करके इसके द्वारा कामला, पाण्डु तथा प्रमेह से पीड़ित, मेदस्वी, अग्निमान्द्य से युक्त, कफरोगी, अन्न से द्वेष रखने वाले, गलगण्ड, गरविष, ग्लानि, श्लीपद एवं उदर के रोगियों को शीघ्र आस्थापन वस्ति का प्रयोग करना चाहिए ॥ ६०-६३ ॥

दशमूलीनिशाविल्वपटोलत्रिफलामरैः ।
कथितैः कल्कपिष्टैस्तु मुस्तसैन्धवदारुभिः ॥६४॥
पाठामागधिकेन्द्राह्वैस्तैलक्षारमधुप्लुतैः ।
कुर्यादास्थापनं सम्यक्मूत्राम्लफलयोजितैः ॥६५॥
कफपाण्डुगदालस्यमूत्रमारुतसंगिनाम् ।
आमाटोपापचीश्लेष्मगुल्मकृमिविकारिणाम् ॥६६॥

दशमूलादि आस्थापन—दशमूल, हल्दी, बेलगिरी, परवल की पत्ती, त्रिफला और देवदारु का क्वाथ करके इसमें नागरमोथा, सेन्धानमक, दारुहल्दी, पाठा, पिप्पल एवं कुटज का पिसा हुआ कल्क मिलाकर तथा तिल तैल, यवक्षार, मधु, गोमूत्र, काञ्जी और मैनफल भलीभाँति घोलकर इसके द्वारा कफ और पाण्डुरोग, आलस्य, मूत्र एवं वात के अवरोध से पीड़ित, आम, आटोप, अपची, कफजगुल्म तथा कृमिविकार से युक्त रोगियों के लिए आस्थापन वस्ति का प्रयोग करना चाहिए ॥ ६४-६६ ॥

वृषाश्ममेदवर्षाभूधान्यगन्धर्वहस्तकैः ।
दशमूलबलामूर्वायवकोलनिशाच्छदैः ॥६७॥
कुलत्थबिल्वभूनिम्बैः कथितैः पलसंमितैः ।
कल्कैर्मदनयष्ट्याह्वषड्ग्रन्थामरसर्षपैः ॥६८॥
पिप्पलीमूलसिन्धूत्थयवानीमिसिवत्सकैः ।
क्षौद्रेक्षुक्षीरगोमूत्रसर्पिस्तैलरसाप्लुतैः ॥६९॥
तूर्णमास्थापनं कार्यं संसृष्टबहुरोगिणाम् ।
गृध्रसीशर्कराऽष्ठीलातूनीगुल्मगदापहम् ॥७०॥

वृषादि आस्थापन—अडूसा, पाषाणभेद, पुनर्नवा, धनियां, एरण्ड, दशमूल, बला, मूर्वा, जौ, बेर, कचूर, कुलथी, बेलगिरी और चिरायता एक एक पल लेकर क्वाथ करना चाहिए। फिर इसमें मैनफल, मुलेठी, वच, देवदारु, सरसों, पिप्पलीमूल, सेन्धानमक, अजवायन, सौंफ और इन्द्रयव का कल्क मिला, मधु, इक्षुरस, दूध, गोमूत्र, घृत, तैल तथा मांसरस घोलकर, सन्निपातज रोगों की शान्ति के लिए शीघ्र आस्थापन वस्ति का प्रयोग करना चाहिए। इसके प्रयोग से गृध्रसी, शर्करा, अष्ठीला, तूनी और गुल्मरोग नष्ट होता है ॥ ६७-७० ॥

रास्नारग्वधवर्षाभूकटुकोशीरवारिदैः ।
त्रायमाणाऽमृतारक्तापञ्चमूलीविभीतकैः ॥७१॥
सबलैः पालिकैः क्वाथः कल्कस्तु मदनान्वितैः ।
यष्ट्याह्वमिसिसिन्धूत्थफलिनीन्द्रयवाह्वयैः ॥७२॥
रसाञ्जनरसक्षौद्रद्राक्षासौवीरसंयुतैः ।
युक्तो वस्तिः सुखोष्णोऽयं मांसशुक्रबलौजसाम् ॥७३॥
आयुषोऽग्नेश्च संस्कर्ता हन्ति चाशु गदानिमान् ।
गुल्मासृग्दरवीसर्पमूत्रकृच्छ्रक्षतक्षयान् ॥७४॥
विषमज्वरमर्शांसि ग्रहणीं वातकुण्डलीम् ।
जानुजङ्घाशिरोवस्तिग्रहोदावर्तमारुतान् ॥७५॥
वातासृक्शर्कराष्ठीलाकुक्षिशूलोदरारुचीः ।
रक्तपित्तकफोन्मादप्रमेहाध्मानहृद्ग्रहान् ॥७६॥

रास्नादि आस्थापन—रास्ना, अमलतास, पुनर्नवा, कुटकी, खस, नागरमोथा, त्रायमाणा, गिलोय, मजीठ, लघुपञ्चमूल, बहेड़ा और बला एक एक पल लेकर क्वाथ करना चाहिए और उसमें मैनफल, मुलेठी, सौंफ, सेन्धानमक, प्रियङ्गु तथा इन्द्रयव का कल्क तथा रसोत, मांसरस, मधु, द्राक्षा एवं सौवीर का मिश्रण कर इस वस्ति का सुखोष्ण प्रयोग मांस, शुक्र, बल और ओज से युक्त व्यक्तियों के लिए करना चाहिए। इसके प्रयोग से आयु तथा अग्नि की वृद्धि होती है और गुल्म, रक्तप्रदर, विसर्प, मूत्रकृच्छ्र, उरःक्षत, क्षय, विषमज्वर, अर्श, ग्रहणी, वातकुण्डलिका, जानु-जघा-शिर-वस्ति की जकड़ाहट, उदावर्त, वातरोग, वातरक्त, शर्करा, अष्ठीला, कुक्षिशूल, उदर, अरुचि, रक्तपित्त, कफज उन्माद, प्रमेह, आध्मान, हृद्ग्रह आदि व्याधियाँ नष्ट होती हैं ॥

वातघ्नौषधनिष्काथाः सैन्धवत्रिवृतायुना ।
साम्लाः सुखोष्णा योज्याः स्युर्बस्तय कुपितेऽनिले ॥७७॥

वातरोग में आस्थापन कल्पना—वातघ्न औषधियों के क्वाथ में सेन्धानमक, निशोथ और काञ्जी मिलाकर सहने योग्य उष्ण बस्तियों का प्रयोग वातप्रकोप में करना चाहिए ॥

न्यग्रोधादिगणक्वाथाः काकोल्यादिसमायुताः ।
विधेया बस्तयः पित्ते ससर्पिष्काः सशर्कराः ॥७८॥

पित्तरोग में आस्थापन कल्पना—काकोल्यादिगण से युक्त न्यग्रोधादिगण के क्वाथ में घृत एवं शर्करा का मिश्रण करके पित्त प्रकोप में बस्ति प्रदान करना चाहिए ॥ ७८ ॥

आरग्वधादिनिष्क्वाथाः पिप्पल्यादिसमायुताः ।
सक्षौद्रमूत्रा देयाः स्युर्बस्तयः कुपिते कफे ॥७९॥

कफरोग में आस्थापन कल्पना—पिप्पल्यादिगण से युक्त आरग्वधादिगण के क्वाथ में मधु और गोमूत्र मिलाकर कफ प्रकोप में बस्ति प्रयोग करना चाहिए ॥ ७९ ॥

शर्करेक्षुरससक्षीरघृतयुक्ताः सुशीतलाः ।
क्षीरवृक्षकषायाढ्या बस्तयः शोणिते हिताः ॥८०॥

शोणित रोग में आस्थापन कल्पना—शर्करा, इक्षुरस, दूध और घृत युक्त, शीतल तथा क्षीरवृक्ष के क्वाथ की पर्याप्त मात्रा मिश्रित बस्तियाँ रक्तप्रकोप में हितकर होती हैं ॥ ८० ॥

शोधनद्रव्यनिष्क्वाथास्तत्कल्कस्नेहसैन्धवैः ।
युक्ताः स्नेहेन मथिता बस्तयः शोधनाः स्मृताः ॥८१॥

शोधनास्थापन कल्पना—शोधन द्रव्यों के क्वाथ (वमन-विरेचन के लिए कथित द्रव्य) तथा कल्क के साथ स्नेह और सेन्धानमक मिलाकर मथनी से मन्थन करके बनाई गई बस्ति शोधन कहलाती है ॥ ८१ ॥

त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापा बस्तयो लेखनाः स्मृताः ॥८२॥

लेखनास्थापन कल्पना—त्रिफला क्वाथ, गोमूत्र, मधु और यवक्षार तथा ऊषकादिगण के प्रक्षेप से युक्त बस्तियाँ लेखन कहलाती हैं ॥ ८२ ॥

बृंहणद्रव्यनिष्क्वाथाः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता बस्तयो बृंहणाः स्मृताः ॥८३॥

बृंहणास्थापन कल्पना—बृंहण द्रव्यों के क्वाथ में मधुर गण (काकोल्यादिगण) की ओषधियों का कल्क एवं घृत और मांसरस मिला कर बनाई गई बस्तियाँ बृंहण कहलाती हैं ॥ ८३ ॥

चटकाण्डोच्चटाक्वाथाः सक्षीरघृतशर्कराः ।
आत्मगुप्ताफलावापाः स्मृता वाजीकरा नृणाम् ॥८४॥

वाजीकरास्थापन कल्पना—चटक पक्षी के अण्डे तथा उच्चटा (श्वेतगुञ्जा) के क्वाथ में दूध, घृत और शर्करा एवं कौंच के बीज का प्रक्षेप मिलाकर बनाई गई बस्ति मनुष्यों के लिए वाजीकरण होती है ॥ ८४ ॥

वदर्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः ।
क्षीरसिद्धाः क्षौद्रयुताः सास्राः पिच्छिलसंज्ञिताः ॥८५॥
वाराहमाहिषैरभ्रविडालैरेणकौक्कुटम् ।
सद्यस्कमसृगाजं वा देयं पिच्छिलबस्तिषु ॥८६॥

पिच्छाबस्ति कल्पना—बेर, ऐरावती (नागबला), शेलु (लिसोढा), सेमल और धामन के कोमल पत्तों को दूध में पकाकर मधु तथा रक्त मिला बनाई गई बस्ति, पिच्छिल बस्ति कहलाती है। पिच्छिलबस्तियों में सूअर, भैंसा, मेंढा, बिडाल, कृष्णमृग, मुर्गा और बकरे का ताजा रक्त मिश्रित करना चाहिए ॥ ८५-८६ ॥

प्रियङ्ग्वादिगणक्वाथा अम्बष्ठाद्येन संयुताः ।
सक्षौद्राः सघृताश्चैव ग्राहिणो बस्तयः स्मृताः ॥८७॥

संग्राह्यास्थापन-कल्पना—प्रियङ्ग्वादिगण के क्वाथ में अम्बष्ठादिगण के द्रव्यों का कल्क तथा मधु और घृत मिलाकर बनाई गई बस्तियाँ ग्राहिणी होती हैं ॥ ८७ ॥

एतेष्वेव च योगेषु स्नेहाः सिद्धाः पृथक् पृथक् ।
समस्तेष्वथवा सम्यग्विधेयाः स्नेहबस्तयः ॥८८॥

पूर्वोक्त कल्पों से स्नेहबस्तियों के विधान का निर्देश—उपर्युक्त इन्हीं योगों में पृथक् पृथक् अथवा सम्पूर्ण योगों के साथ स्नेहों को सिद्ध करके भली-भाँति स्नेहबस्तियों का प्रयोग करना चाहिए ॥ ८८ ॥

वन्ध्यानां शतपाकेन शोधितानां यथाक्रमम् ।
बलातैलेन देयाः स्युर्बस्तयस्त्रैवृतेन च ॥८९॥

वन्ध्याओं को बस्ति देने के लिए शतपाक-बला तैल—क्रमपूर्वक वमन, विरेचनादि से शुद्ध शरीरवाली वन्ध्या स्त्रियों को शतपाक तैल (वातव्याधि में पठित) बला तैल (मूढगर्भ चिकित्सा) अथवा त्रैवृत स्नेह (महावात व्याधि में पठित) की बस्तियाँ प्रदान करनी चाहिए ॥ ८९ ॥

नरस्योत्तमसत्त्वस्य तीक्ष्णं बस्तिं निधापयेत् ।
मध्यमं मध्यसत्त्वस्य विपरीतस्य वै मृदुम् ॥९०॥

सत्त्वभेद से बस्ति का भेद—उत्तम सत्त्व (बल) वाले मनुष्य को तीक्ष्ण, मध्यम सत्त्व वाले मनुष्य को मध्यम और हीन सत्त्व वाले मनुष्य के लिए मृदु बस्ति प्रयुक्त करनी चाहिए ॥ ९० ॥

एवं कालं बलं दोषं विकारं च विकारवित् ।
वस्तिद्रव्यबलं चैव वीक्ष्य बस्तीन् प्रयोजयेत् ॥९१॥

कालादि भेद से बस्ति भेद—इसी प्रकार काल, बल, दोष और विकार तथा बस्ति के द्रव्य की शक्ति को समझ कर वैद्य को बस्तियों का प्रयोग करना चाहिए ॥ ९१ ॥

दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं पुनः ।
पश्चात् संशमनीयं च दद्याद्बस्तिं विचक्षणः ॥९२॥

दोषों को उत्क्लेशित करने के लिए प्रथम उत्क्लेशनबस्ति, (उत्क्लेशित हुए) दोषों को हरण करने के लिए मध्य में दोषहर बस्ति तथा अन्त में दोषों को शान्त करने के लिए संशमन बस्ति का प्रयोग बुद्धिमान् वैद्य को करना चाहिए ॥

एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हपुषाफलकल्कश्च बस्तिरुत्क्लेशनः स्मृतः ॥९३॥

एरण्डबीजादि उत्क्लेशन बस्ति—एरण्डबीज, मुलेठी, पिप्पल, सेन्धानमक, वच, हाऊबेर और मैनफल के कल्क से निर्मित बस्ति उत्क्लेशनबस्ति कहलाती है ॥ ९३ ॥

शताह्वा मधुकं बीजं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो बस्तिर्दोषहरः स्मृतः ॥९४॥

दोपहर वस्ति—सौंफ, मुलेठी, इन्द्रयव और मैनफल के साथ काञ्जी तथा गोमूत्र के द्वारा निर्मित वस्ति दोपहर वस्ति कहलाती है ॥ ९४ ॥

प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते बस्तिर्दोषाणां शमनः परः ॥९५॥

शमन वस्ति—प्रियङ्गु, मुलेठी, नागरमोथा, रसोत तथा दूध के द्वारा निर्मित वस्ति दोषों को शान्त करने के लिए श्रेष्ठ होती है ॥

नृपाणां तत्समानानां तथा सुमहतामपि ।
नारीणां सुकुमाराणां शिशुस्थविरयोरपि ॥९६॥
दोषनिर्हरणार्थाय बलवर्णोदयाय च ।
समासेनोपदेक्ष्यामि विधानं माधुतैलिकम् ॥९७॥

माधुतैलिक वस्ति-प्रशंसा—राजाओं तथा उनके तुल्य पुरुषों, वैभवशाली व्यक्तियों, स्त्रियों, सुकुमारों तथा शिशु और वृद्धों के भी दोषों को हरण एव बल और वर्ण बढ़ाने वाली माधुतैलिक वस्तियों का विधान सक्षेप में बतलाया जा रहा है ॥ ९६-९७ ॥

यानस्त्रीभोज्यपानेषु नियमश्चात्र , नोच्यते ।
फलं च विपुलं दृष्टं व्यापदां चाप्यसंभवः ॥९८॥

इन माधुतैलिक वस्तियों के प्रयोग काल में सवारी, स्त्रीसेवन, भोजन तथा पान का निषेध नहीं किया गया है, इनसे लाभ भी बहुत होता है और हानि होने की सभावना भी नहीं रहती ॥ ९८ ॥

योज्यस्त्वतः सुखेनैव निरूहक्रममिच्छता ।
यदेच्छति तदैवैष प्रयोक्तव्यो विपश्चिता ॥९९॥

इसलिए निरूहवस्ति की कामना करनेवाले व्यक्तियों को सुखपूर्वक इनका प्रयोग करना चाहिए । बुद्धिमान वैद्य को आतुर की इच्छानुसार (जिस समय आतुर की इच्छा हो) इस वस्ति का प्रयोग करना चाहिए ॥ ९९ ॥

मधुतैले समे स्यातां काथश्चैरण्डमूलजः ।
पलार्धं शतपुष्पायास्ततोऽर्धं सैन्धवस्य च ॥१००॥
फलेनैकेन संयुक्तः खजेन च विलोडितः ।
देयः सुखोष्णो भिषजा माधुतैलिकसंज्ञितः ॥१०१॥

माधुतैलिक वस्ति कल्पना—मधु और तैल की समान मात्रा, एरण्ड के जड़ का क्वाथ मधु-तैल के तुल्य, सौंफ आधापल, सेन्धानमक एक कर्ष और एक मैनफल को मथनी से मथकर माधुतैलिक नामक वस्ति का सुखोष्ण प्रयोग वैद्य को करना चाहिए ॥ १००-१०१ ॥

वचामधुकतैलं च काथः सरससैन्धवः ।
पिप्पलीफलसंयुक्तो बस्तिर्युक्तरथः स्मृतः ॥१०२॥

युक्तरथ वस्ति-कल्पना—वच, मुलेठी, सेन्धानमक, पिप्पल और मैनफल के क्वाथ में तैल तथा मांसरस का मिश्रण कर बनाई गई वस्ति युक्तरथ वस्ति कहलाती है ॥

सुरदारु वरा रास्ना शतपुष्पा वचा मधु ।
हिङ्गुसैन्धवसंयुक्तो बस्तिर्दोपहरः स्मृतः ॥१०३॥

दोपहर वस्ति कल्पना—देवदारु, त्रिफला, रास्ना, सौंफ, वच, मधु, हींग और सेन्धानमक से युक्त वस्ति 'दोपहर' कहलाती है ॥ १०३ ॥

पञ्चमूलीकषायं च तैलं मगधिका मधु ।
बस्तिरेष विधातव्यः सशताह्वः ससैन्धवः ॥१०४॥

लघुपञ्च मूल के क्वाथ में तैल, पिप्पल, मधु, सौंफ और सेन्धानमक मिश्रितकर वस्ति प्रयोग करना चाहिए ॥ १०४ ॥

यवकोलकुलत्थानां काथो मागधिका मधु ।
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः ॥१०५॥

सिद्धवस्ति कल्पना—जौ, बेर और कुलथी के क्वाथ में पिप्पल, मधु, सेन्धानमक तथा मुलेठी मिलाकर बनाई गई वस्ति सिद्धवस्ति कहलाती है ॥ १०५ ॥

मुस्तापाठामृतातिक्काबलाराग्वापुनर्नवाः ।
मञ्जिष्ठाऽऽरग्वधोशीरत्रायमाणाख्यगोक्षुरान् ॥१०६॥
पलिकान् पञ्चमूलाल्पसहितान्मदनाष्टकम् ।
जलाढके पचेत् काथं पादशेषं पुनः पचेत् ॥१०७॥
क्षीरार्धाढकसंयुक्तमाक्षीरात् सुपरिस्रुतम् ।
पादेन जाङ्गलरसस्तथा मधुघृतं समम् ॥१०८॥
शताह्वाफलिनीयष्टीवत्सकैः सरसाञ्जनैः ।
कार्षिकैः सैन्धवोन्मिश्रैः कल्कैर्बस्तिः प्रयोजितः ॥१०९॥
वातासृङ्मेहशोफार्शोगुल्ममूत्रविबन्धनुत् ।
विसर्पज्वरविड्भङ्गरक्तपित्तविनाशनः ॥११०॥
बल्यः संजीवनो वृष्यश्चक्षुष्यः शूलनाशनः ।
यापनानामयं राजा बस्तिर्मुस्तादिको मतः ॥१११॥

मुस्तादि आस्थापन वस्ति—नागरमोथा, पाठा, गिलोय, कुटकी, बला, रास्ना, पुनर्नवा, मजीठ, अमलतास, खस, त्रायमाणा, गोखरू और लघुपञ्चमूल एक एक पल तथा आठ मैनफल लेकर एक आढ़क जल में पकाना चाहिए । फिर चतुर्थांश अवशिष्ट क्वाथ में आधा आढक दूध मिलाकर दुग्ध मात्र अवशिष्ट रहने तक पुनः पकाना चाहिए तथा इसमें चतुर्थांश जाङ्गलजीवों का मांसरस, समान भाग मधु, घृत एवं सौंफ तथा प्रियङ्गु, मुलेठी, इन्द्रयव, रसोत और सेन्धानमक का कल्क एक-एक कर्ष मिलाकर वस्ति प्रयोग करना चाहिए । इसके प्रयोग से वातरक्त, प्रमेह, शोथ, अर्श, गुल्म, मूत्रावरोध, विसर्प, ज्वर, मलभेद और रक्तपित्त का नाश होता है । यह मुस्तादिक वस्ति यापन वस्तियों में सर्वश्रेष्ठ है, बल तथा जीवन शक्ति प्रदान करती है, वृष्य है, नेत्रों के लिए हितकारी एवं शूलनाशक है ॥

अवेक्ष्य भेषजं बुद्ध्या विकारं च विकारवित् ।
बीजेनानेन शास्त्रज्ञः कुर्याद्बस्तिशतान्यपि ॥११२॥

अनुक्त आस्थापन की कल्पना का सूत्र—रोगों को जानने वाले शास्त्रज्ञ वैद्य को अपनी बुद्धि से औषधि और व्याधि को समझकर इस बीज (वस्तियों) के द्वारा सैकड़ों वस्तियों का निर्माण करना चाहिए ॥ ११२ ॥

अजीर्णे न प्रयुञ्जीत दिवास्वप्नं च वर्जयेत् ।
आहाराचारिकं शेषमन्यत् कामं समाचरेत् ॥११३॥

आस्थापन किये हुये लोगों के लिए वर्ज्य विषय—अजीर्ण में वस्ति प्रयोग नहीं करना चाहिए । वस्ति लेने पर दिन

में नहीं सोना चाहिए। इसके अतिरिक्त अन्य शेष आहार-आचार के नियम का पालन पर्याप्त रूप में करना चाहिए ॥ ११३ ॥

यस्मान्मधु च तैलं च प्राधान्येन प्रदीयते ।
माधुतैलिक इत्येवं भिषग्भिर्बस्तिरुच्यते ॥११४॥

माधुतैलिकादि संज्ञाओं का विवरण—मधु और तैल का इन वस्तियों में प्रधानरूप से प्रयोग होने के कारण वैद्य इसे माधुतैलिक वस्ति कहते हैं ॥ ११४ ॥

रथेष्वपि च युक्तेषु हस्त्यश्वे चापि कल्पिते ।
यस्मान्न प्रतिषिद्धोऽयमतो युक्तरथः स्मृतः ॥११५॥

जुडे हुए रथ तथा हाथी और घोडे की सवारी पर भी इस वस्ति के प्रयोग का निषेध नहीं है इसलिए इसे युक्तरथ वस्ति कहते हैं ॥ ११५ ॥

बलोपचयवर्णानां यस्माद् व्याधिशतस्य च ।
भवत्येतेन सिद्धिस्तु सिद्धबस्तिरतो मतः ॥११६॥

बल और वर्ण की वृद्धि तथा सैकडों व्याधियों में सिद्धि प्रदान करने के कारण यह सिद्ध वस्ति कहलाती है ॥ ११६ ॥

सुखिनामल्पदोषाणां नित्यं स्निग्धाश्च ये नराः ।
मृदुकोष्ठाश्च ये तेषां विधेया माधुतैलिकाः ॥११७॥

सुखी, अल्पदोष युक्त, नित्य स्निग्धर हने वाले तथा मृदुकोष्ठ मनुष्यों के लिए, माधुतैलिक वस्ति का विधान करना चाहिए ॥ ११७ ॥

मृदुत्वात् पादहीनत्वादकृत्स्नविधिसेवनात् ।
एकबस्तिप्रदानाच्च सिद्धबस्तिष्वयन्त्रणा ॥११८॥

माधुतैलिक वस्ति की श्रेष्ठता में हेतु—मृदुवीर्य औषधियों से युक्त तथा पादहीन (९ अथवा ६ प्रसृत मात्रा) होने से, सम्पूर्ण विधियों का पालन (वमनादि विधियों का परित्याग) न करने से तथा एक वस्ति के द्वारा सिद्धि प्राप्त होने के कारण, इसे सिद्धवस्तियों में श्रेष्ठ समझा जाता है ॥ ११८ ॥

इति सुश्रुतसंहितायां चिकित्सास्थाने निरूहक्रम-चिकित्सितं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

इत्यायुर्वेदतत्त्वसंदीपिकाभाषाव्याख्यायामष्टत्रिंशत्तमोऽध्यायः ॥

एकोनचत्वारिंशत्तमोऽध्यायः

अथातो आतुरोपद्रवचिकित्सितं व्याख्यास्यामः ॥१॥
यथोवाच भगवान् धन्वन्तरिः ॥२॥

आतुरोपद्रव की चिकित्सा का उपक्रम—इसके अनन्तर आतुरों को होनेवाले (पञ्चकर्मजन्य) उपद्रवों की चिकित्सा-विधि का वर्णन किया जा रहा है, जैसा कि भगवान् धन्वन्तरि ने (सुश्रुत-प्रभृति शिष्यों से) कहा ॥ १-२ ॥

स्नेहपीतस्य वान्तस्य विरिक्तस्य स्रुतासृजः ।
निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥३॥

संशोधन किये हुए के अग्निमान्द्य का प्रतिकार—स्नेहन, वमन, विरेचन, रक्तमोक्षण तथा निरूह वस्ति का सेवन करने वाले मनुष्यों की जठराग्नि मन्द हो जाती है ॥ ३ ॥

सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति ।
अल्पो महद्भिर्बहुभिश्छादितोऽग्निरिवेन्धनैः ॥४॥

वह अग्नि अत्यधिक गुरु अन्नों के सेवन से उसी प्रकार शान्त हो जाती है, जिस प्रकार बडी बडी तथा बहुत अधिक लकडियों के द्वारा आच्छादित अल्प अग्नि बुझ जाती है ॥ ४ ॥

स चाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्धते ।
काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥५॥

वही अग्नि (जठराग्नि) अल्प एवं लघु अन्नों के सेवन से बढती है, जिस प्रकार छोटी छोटी एव अल्प लकडियों के सहयोग से अग्नि प्रज्वलित होती है ॥ ५ ॥

हृतदोषप्रमाणेन सदाऽऽहारविधिः स्मृतः ।
त्रीणि चात्र प्रमाणानि प्रस्थोऽर्धाढकमाणकम् ॥ ६ ॥

